राम्बरशब्दौ । एतौ लक्षणनिरपेक्षौ । लक्षणेन तु 'ताम्राम्रयोर्म्बः' इत्यनेन[1] सूत्रेण ताम्राम्रशब्दयोर्[2]युक्तस्य म्ब इति विधाने[3] तम्बं अम्बं इति भवति । तत्समा संस्कृतसमा यथा आहो अहो अंहो नाम हे अहह हि अयि इत्यादि । इयं तु संस्कृतमार्गेणैव भवति । तद्भवा संस्कृतभवा । सा च प्रकृतिभूतस्य संस्कृतस्य सिद्धावस्थापेक्षया साध्यावस्थापेक्षया च जायमानत्वात् सिद्धा साध्या चेति[4] द्विविधा भवति । द्विविधाया अपि सिध्यर्थमिदं शास्त्रमारब्धव्यम् । सिद्धावस्थया[5] जायमानं[6] रूपं साध्यावस्थया जायमानं[7] रूपं च यथास्थानं दर्शयिष्यामः ॥

[8]इति श्रीदक्षिणामूर्ति[9]किङ्करेण लक्ष्मीधरेण विरचितायां षड्भाषाचन्द्रिकाया-मुपोद्घातप्रक्रिया ॥

अथ संज्ञावतारः प्रदर्श्यते[10]—

संज्ञाप्रत्याहारमयी वा ॥ १ । १ । ३ ॥

इत्यधिकृत्य—

सुप्स्वादिरन्त्यहला ॥ १ । १ । ४ ॥

सुप्सु[11] स्वादिविभक्तिषु आदिर्वर्णो वचनं वा अन्त्यहला[12] अन्त्यव्यञ्जनेन सह संज्ञा भवति । यथा सु औ जस् इति त्रयाणां सुस् इति संज्ञा । अम् औट् शस् इति त्रयाणामस् इति संज्ञा । टा भ्याम् भिस् इति त्रयाणां टास् इति संज्ञा । ङे भ्याम् भ्यस् इति त्रयाणां ङेस् इति संज्ञा । ङसि भ्याम् भ्यस् इति त्रयाणां ङसिस्[13] इति संज्ञा । ङस् ओस् आम् इति त्रयाणां ङम् इति संज्ञा । ङि ओस् सुप् इति त्रयाणां ङिप् इति संज्ञा । कृतानां संज्ञानां शास्त्रे[14] उपयोगः प्रदर्श्यते ।

---

१ इति सूत्रेण My., P. २ ताम्राम्रयो° My., P. ३ विधानेन R. ४ °साध्येति My., M. ५ सिद्धावस्थाया R. ६ जायमानरूपस्वरूपं M. ७ जायमानरूपस्वरूपं M. ८ M. drops इति श्री············प्रक्रिया. ९ °मूर्तिदेवकिङ्करेण R. १० उच्यते R.; सम्यगुपदर्श्यते My , P. ११ सुप्स्वादि My. १२ R. drops अन्त्य. १३ ङसीति संज्ञा M. १४ शास्त्रोपयोगः M.

'सुससोः' इति सूत्रेण विधास्यमानं कार्यं सुस्संज्ञासंज्ञितानां त्रयाणां स्यात् । 'क्वचिदसादेः' इति सूत्रेण विधीयमानं कार्यमस्संज्ञासंज्ञितानां त्रयाणां स्यात् । 'टाससि णः' इति सूत्रेण विधीयमानं कार्यं टास्संज्ञासंज्ञितानां त्रयाणां स्यात् । 'ङेसो ङम्' इति सूत्रेण विधीयमानं कार्यं ङेस्संज्ञासंज्ञितानां त्रयाणां स्यात् । 'हिंतोत्तोदोदुं ङसिस्' इति सूत्रेण विधीयमानं कार्यं ङसिस्संज्ञासंज्ञितानां त्रयाणां भवति । 'ङेसो ङम्' इत्यत्रैव विहितं कार्यं ङम्संज्ञासंज्ञितानां त्रयाणां स्यात् । 'ङिपोस्' इत्यनेन क्रियमाणं कार्यं ङिप्संज्ञासंज्ञितानां त्रयाणां भवति । इत्यादि संचारणीयम् ॥

ह्रो ह्रस्वः ॥ १ । १ । ५ ॥

यो ह्रस्वः स ह्रसंज्ञः स्यात् । तथा च 'ह्रश्चौत्कुतूहले' इत्यादौ ह्रशब्देन ह्रस्वज्ञानं फलति ॥

दि दीर्घः ॥ १ । १ । ६ ॥

यो दीर्घः स दिसंज्ञः स्यात् । तेन 'दिर्दोत्तोदुङसौ' इत्यादौ दिशब्देन दीर्घबुद्धिर्भवति ॥

सः समासः ॥ १ । १ । ७ ॥

यः समासः स ससंज्ञः स्यात् । तेन 'वा से' इत्यादौ स इत्यनेन समासबोधः सिध्यति ॥

शषसाः शुः ॥ १ । १ । ८ ॥

एते त्रयः शुसंज्ञाः स्युः । तथा च 'शोः सल्' इत्यादौ शुशब्देन त्रयाणां स्वीकारः ॥

आदिः खुः ॥ १ । १ । ९ ॥

---

१ शास्त्रेण My., P. २ विधास्यमानं M. ३ क्रियमाणं R. ४ विधास्यमानं M. ५ भवति M. ६ °दोरुजस् M. ७ विधास्यमानं M. ८ स्यात् My., P. ९ स्यात् My., P. १० ह्रश्चात्कु° M. ११ एवं च M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य आदिर्वर्णः स खुसंज्ञः स्यात् । तथा च 'खोः कन्दुक—' इत्यादौ खुशब्देनादिज्ञानं स्यात् ॥

संयुक्तं स्तु ॥ १ । १ । १२ ॥

संयुक्तं व्यञ्जनद्वयं स्तुसंज्ञं स्यात् । तेन 'स्तोः' इत्यधिकारसूत्रे स्तोरित्यनेन संयुक्तव्यवहारलाभः ॥

गो गणपरः ॥ १ । १ । १० ॥

गणप्रधानो य आदिशब्दः स गसंज्ञो भवति । तथा च 'क्लीबे गुणगाः' इत्यादौ गुणगा इत्यनेन गुणादय इति भवति ॥

द्वितीयः फुः ॥ १ । १ । ११ ॥

यः शब्दस्य द्वितीयो वर्णः स फुसंज्ञो भवति । तथा च 'सप्तपर्णे फोः' इत्यादौ फोरित्यनेन द्वितीयवर्णबुद्धिर्जायते ॥

तु विकल्पे ॥ १ । १ । १३ ॥

यो विकल्पवाचकः स सर्वोऽपि तुसंज्ञो भवति । तथा च 'तु समृध्यादौ' इत्यादौ तुशब्देन विकल्पवाचकज्ञानं भवति ॥

अथ प्रसङ्गाच्छास्त्रव्यापितयोपयुक्तानि कतिचित् सूत्राणि व्याख्यायन्ते ॥

प्रायो लिति न विकल्पः ॥ १।१।१४ ॥

यः कार्यार्थे सूत्रेऽनुषज्यते न तु प्रयोगे दृश्यते स इत् व्याकरणान्तरेऽनुबन्ध इत्युच्यते । लकार इद्यस्य स लित् । लिति कार्ये विकल्पः प्रायो न भवति । तेन 'अविद्युति स्त्रियामाल्' इत्यादौ विधीयमानमाकारादिकं नित्यमेव स्यात् ॥

रितो द्वित्वल् ॥ १ । ४ । ८५ ॥

रेफ इद्यस्य स रित् । रेफानुबन्धस्यादेशव्यञ्जनस्य नित्यं द्वित्वं भवति । तथा च 'लरंकोटे', 'णों दिना रुदिते' इत्यादौ विधीयमानलकारादीनां द्वित्वं सिध्यति ॥

---

१ खोरित्यनेन M. २ भवति M. ३ बुद्धिर्भवति M. ४ फलति M. ५ कर्तव्ये M. ६ संभवति M. ७ द्विरवम् R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिति दीर्घः ॥ १ । १ । १५ ॥

शकार इद्यस्य स शित् । शानुबन्धे परतः पूर्वस्य दीर्घो भवति । तेन 'शिरलुङ् नपुनरि तु' 'जश्शसोश्शलुक्' इत्यादौ पूर्वस्याचो दीर्घः सिध्यति ॥

सानुनासिकोच्चारं ङित् ॥ १ । १ । १६ ॥

ङकारानुबन्धं कार्यं सानुनासिकोच्चारं भवति । तेन 'कामुक-यमुनाचामुण्डातिमुक्तके मो ङ्लुक्' इत्यादौ काउओ जउणा इत्यादिषु सानुनासिकोच्चारः फलति । तच्च यथास्थानं दर्शयिष्यामः ॥ इह शास्त्रे 'नृनपि ङसिङसोः' इत्यादिषु केषुचित् सूत्रेषु नृशब्दो नप्छब्दश्च श्रूयते तौ क्रमेण पुंलिङ्गनपुंसकलिङ्गवाचकाविति ज्ञातव्यम् ॥

बहुलम् ॥ १ । १ । १७ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्त्यनुवर्तते । तेन प्राकृते यल्लक्षणं तद्बहुलं भवतीति वेदितव्यम् ॥

अथ सन्धिरुच्यते ।

सन्धिस्त्वपदे ॥ १ । १ । १९ ॥

संस्कृतोक्तः सर्वसन्धिः प्राकृते तु विकल्पेन भवति । अपदे एकपदे तु न भवति ॥ **व्यासऋषिः** इति स्थिते व्यासशब्दे 'शोर्लु-क्स्रोः—' इत्यतो लुगित्यनुवर्तमाने 'लवरामधश्च' इत्यतोधश्चेति च

मनयाम् ॥ १ । ४ । ७९ ॥

अधो वर्तमानानां मनयां लोपः स्यात् । इत्यधो वर्तमानयलोपः ॥ ऋषिशब्देपि 'ऋतोत्' इत्यतः ऋत इत्यनुवर्तमाने

इल् कृपगे ॥ १ । २ । ७६ ॥

कृपेत्यादिषु ऋत इत्वं लित् स्यात् । इति कृपादित्वादृकारस्य इत्वे **इषि** इति स्थिते

---

१ श इद्यस्य My., P. २ R. drops लिङ्ग.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोः सल् ॥ १ । ३ । ८७ ॥

शोः शषसानां सकारो लित् स्यात् । इति षकारस्य सकारे सति **वासइसि** इति स्थिते अनुक्तमन्येति[1] न्यायेन 'आद्गुणः' इति नित्यत्वेन गुणे प्राप्ते 'सन्धिस्त्वपदे' इति विकल्प्यते । **वासेसि** । सन्ध्यभावे **वासइसी** ॥ **विषमातपः** । अत्र विषमआतप इति स्थिते विषम-शब्दे षस्य सत्वं पूर्ववत् । आतपशब्दे 'अस्तोरस्तोरचः' इत्यनुवर्तमाने

प्रायो लुक् कगचजतदपयवाम् ॥ १।३।८ ॥

असंयुक्तानामनादौ वर्तमानानामचः परेषां कादीनां सर्वेषां[2] प्रायो लुक् स्यात् । इति तलोपे 'नात्पः' इत्यत्र आदित्यनुवर्तमाने

यश्रुतिरः ॥ १ । ३ । १० ॥

'प्रायो लुक्—' इत्यादिना कादीनां लोपे सति योवशिष्यते अवर्णः सः अवर्णात् परो लघुप्रयत्नतरयकारश्रुतिर्भवति । इत्यकारस्य यकार-श्रुतौ सत्यां आअप इति स्थिते 'प्रायो लुक्—' इति पलोपे प्राप्ते

नात्पः ॥ १ । ३ । ९ ॥

आत् अवर्णात् परस्य पकारस्य लोपो न भवति । इति पस्य लोपे प्रतिषिद्धे

पो वः ॥ १ । ३ । ५५ ॥

असंयुक्तस्यानादौ वर्तमानस्याचः परस्य पस्य वः स्यात् । इति पकारस्य वकारे सति **विसमआअव** इति स्थिते अनुक्तमन्यन्यायेन 'अकः सवर्णे दीर्घः' इति नित्यत्वेन दीर्घे प्राप्ते विकल्पः । **विसम-आअवो** । **विसमाअवो** ॥ **कविईश्वर** इति स्थिते कविशब्दे 'प्रायो लुक्—' इति वलोपः । ईश्वरशब्देपि

लवरामधश्च ॥ १ । ४ । ७८ ॥

लुगित्यनुवर्तते । संयुक्तसंबन्धिनामधो वर्तमानानां चकारादुपरि वर्तमानानां लवरां लोपः स्यात् । इत्यधो वर्तमानवलोपे 'शोः सल्'

१ अनुक्तमन्यन्यायेन M. २ सर्वेषां कादीनां R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति शस्य सत्वे च कइईसर इति स्थिते पूर्ववत् सवर्णसंधौ प्राप्ते विकल्पः । कइईसरो । कईसरो इत्याद्यूह्यम् । नात्र 'शेषादेशस्य—' इत्यादिना सस्य द्वित्वम् । 'दीर्घान्न' इति प्रतिषेधात् । अपद इति किम् । वच्छाइ मुद्धाए । अत्र प्रत्युदाहरणद्वयेपि वृक्षशब्दस्य 'क्लीबे गुणगाः' इति गुणादिपाठान्नपुंसकत्वे 'भिशिशिङ् जश्शसोः' इति शिङ् । मुग्धाशब्देपि शोर्लु[1]गित्यनुवर्तते ।

कगटडतदपै[2]×क×पशोरुपर्यद्रे ॥ १ । ४ । ७७ ॥

संयुक्तसंबन्धिनामुपरिस्थितानां द्रशब्दव्य[3]तिरिक्तानां कादीनां जिह्वामूलीयोपध्मानीययोः शोः शषसानां च लुक् स्यात् । इत्युपरिस्थितगलोपे 'रितो द्वित्वल्'[4] इत्यधिकृत्य

शेषादेशस्याह्रोचोखोः ॥ १ । ४ । ८६ ॥

संयुक्तयोरेकतरस्य लोपे योवशिष्यते स शेषस्तस्य संयुक्तादेशस्य च अह्रः हकाररेफवर्जितस्य अचः स्वरात् परस्य अखोरनादौ वर्तमानस्य द्वित्वं भवति । इति धस्य द्वित्वे मु[5]द्धा इति स्थिते 'ङसेः शशाशिशे' इत्यनेन शे सत्युभयत्राप्य[6]नुक्तमन्यन्यायेन शास्त्रान्तरसिद्धे 'लशकतद्धिते' इति सूत्रेण शलोपे इकारैकारयोर[7]वस्थाने गुणवृद्धिलक्षणसन्धौ प्राप्ते 'अपदे' इति प्र[8]तिषेधान्न भवे[9]ति । अत्र शिङः शे इत्यस्य च प्रत्ययत्वाभावेपि प्रत्ययादेशत्वात् तदादेशन्यायेन प्रत्ययत्वम् । तथा च युक्तः शलोपः । राममम[10]लं वन्दे इत्यादिषु रामम् अमलम् इति स्थिते 'लोपः' इत्यधिकृत्य

अन्त्यहलोश्रदुदि ॥ १ । १ । २५ ॥

शब्दानामन्त्यहलो लोपः स्याच्छ्रु[11]दित्यव्ययमुदित्युपसर्गं च वर्ज-

---

१ °त्यनुवर्तमाने M. २ °पबः R. ३ °रहितानां My., P. ४ द्वित्वलित्यतो द्वित्वलित्यधिकृत्य P. ५ मुद्धा इ इति R. ६ °प्यनुक्तन्यायेन M. ७ °रवस्थाने सति R. ८ निषेधान्न M. ९ संभवति M. १० रामं अमलं वन्दे इति स्थिते My., P. ११ °च्छ्रूच्छब्दमुच्छब्दं च वर्जयित्वा R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थित्वा। इति मलोपे प्राप्ते 'यत्तत्सम्यग्विष्वक्पृथको मल्' इत्यतो मलित्यधिकृत्य

मोचि वा ॥ १। १। ३९ ॥

शब्दानामन्त्यमकारस्याचि परे[1] मो वा स्यात्। राममम॑लं। मत्वाभावे 'बिन्दुल्' इत्यनेन सामान्यप्राप्तो बिन्दुरेव। तथा च **रामंअमलं**। एवमचि परे मस्यादेशौ सर्वत्र संचारणीयौ। बहुलाधिकारात् क्वचिदेकपदेपि संधिर्भवति। करिष्यति। काही। काहिइ॥ द्वितीयः। बीओ। बिइओ॥ काहीत्यत्र 'लटस्तिप्तावि॑जेच्' इति सूत्रे लड्ग्रहणस्य लकारसामान्यवाचकत्वाल्लृटोपीजादेशे सति 'भविष्यति हिरादिः' इति सूत्रेण लृडादेशस्य इचः प्राक् हि इत्यस्य प्रयोगे 'आ भूतभविष्यति च कृञः' इत्यनेन कृञ ऋकारस्य आत्वे सति[2] काहिइ इति स्थिते सवर्णसन्धौ कृते काही। सन्ध्यभावे काहिइ इति सिद्धम्। द्वितीयशब्दे[3]पि 'कग—' इति सूत्रेणोपस्थितदलोपे वबयोर[4]-भेदन्यायेन वकारस्य बत्वे बितीय इति स्थिते 'वा पानीयगे' इति सूत्रेण पानीयादिगणपठितस्य द्वितीयशब्दस्य संबन्धिन[5] ईकारस्य इत्वे सति 'प्रायो लुक्' इति तलोपे बिइअ इति स्थिते सवर्णसन्धौ कृते बीओ सन्ध्यभावे बिइओ इति[6] द्वयं सिद्धम्। नन्वत्र वबयोरभेदन्यायस्त्वसंगत एव। स किं व्याकरणान्तरसिद्धत्वाद्वा अत्र शास्त्रे विधानाद्वा। नाद्यः। व्याकरणान्तरे तदभेदविधानाभावात्। न द्वितीयः। तद्गमकाभावात्। तस्मादसंगतमेतदि[7]त्यत्रोच्यते[8]। आद्यपक्षदूषणमस्मदिष्टमेव। द्वितीयं तु न सहामहे। अभेदगमकस्य विद्यमानत्वात्। तथाहि। 'नीवीस्वप्ने वा' इत्यनेन सूत्रेण वस्य मत्वं विधीयते। अत्र च स्थान्यादेशाभ्यां भवितव्यम्। न चात्र सूत्रे

१ M. drops परे. २ R. drops सति. ३ P. and R. drop अपि. ४ °रभेद इति न्यायेन My., P. ५ संबन्धि ईकारस्य My. ६ इति पदद्वयं M. ७ °दसंगतमेव तदिति My., P. ८ °दिति चेदत्रोच्यते My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ दृश्येते । तथा चानुवृत्त्या भवितव्यम् । अनुवृत्तिस्तु 'बो मः शबरे' इत्यव्यवहितपूर्वसूत्रादेव वक्तव्या । [1]तत्पूर्वतनसूत्राणामनुपयोगात् । तथा च सति बस्य स्थानित्वं म[2]स्यादेशत्वं च प्रतीयते । एतच्च 'नीवी-स्वमे वा' इत्यत्र वबयोरभेदमन्तरा न घटते । एवं च सति ज्ञाप-कादिष्टसिद्धिः । तस्माल्लब्धमित्यादिप्रयोगेषु 'लवरामधश्च' इति सूत्रे-णोपरिस्थितबलोपौ बीओ इत्यादौ वकारस्थाने बकारोच्चारणं च सिध्यति । अथ यदि ज्ञापकाद्वबयोरभेदः स्यात् तर्हि 'बो वः' इति सूत्रेण बस्य वत्वविधानमनर्थकमेव स्यादिति चेन्मैवम् । [3]तद्विधानस्य नियमार्थत्वादित्यलं सूत्रकलहचर्चया । ननु संधाविदमुदाहरणीभवि-तुमेव नार्हति । स्वरूपस्यैव दुर्घटत्वात् । तथा हि । 'कग—'इति सूत्रेणोपरिस्थितदलोपे खलु रूपसिद्धिः । नात्र दलोपः कर्तुं शक्यते । ततः पूर्वमेव 'लवराम्—'इति सूत्रेण वलोपप्रसक्तेः । तर्ह्युभयलोपो भवत्विति चेदहो विस्मरणशीलता देवानांप्रियस्य यदुदाहरणस्वरूप-भावमपि न जानाति । नन्वत्र पुरस्फूर्तिकत्वाद्दकारस्य वकारस्य तत्सा-पेक्षत्वाच्च दकारस्यैव लोपो भवतु । सत्यं पुरस्फूर्तिकत्वं सत्यं च [4]तत्सापेक्षत्वं स्वप्रतीतौ वकारस्य । तथाप्यनुक्तमन्यन्यायेन [5]शास्त्रान्तर-सिद्धेन 'विप्रतिषेधे परं कार्यम्' इति न्यायेन 'लवराम्—'इति सूत्रस्यैव परत्वाद्वलोप एव युक्त इति नेदमुदाहरणं विद्वत्कवीनां कर्णरसायनीभवितुमर्हति । अत्रोच्यते । 'बहुलम्' इति बहुलग्रह-णानुवृत्त्यान्यदेव कार्यं सर्वापवादेन भवतीति विप्रतिषेधन्यायमपोह्य दलोप एव भवति । यद्वा द्वितीयमाल्यादिषु 'कग—'इति सूत्रस्य 'लवराम्—' इति सूत्रस्य 'मनयाम्' इति सूत्रस्य च प्रसक्तौ सत्यां 'यथादर्शनं लोपः' इति **त्रिविक्रमदेवस्योक्तेरपीदमुदाहर्तुमर्हतीति** सर्वं भद्रम् ॥

---

१ तत्प्राक्तनसूत्राणा° My., P. २ मस्यातिदेशत्वं M. ३ वत्वविधानस्य My., P. ४ स्वप्रतीतौ तत्सापेक्षत्वं M. ५ शास्त्रान्तरसिद्ध 'विप्र°' R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न यण् ॥ १ । १ । २० ॥

संधिरित्यनुवर्तते । 'इको यणचि' इति संस्कृतोक्तः संधिः प्राकृते न भवति । इवर्णादेर्यत्वादिर्न भवतीत्यर्थः । यणिति यवरलानां परिग्रहेपि प्राकृते ऋलृवर्णयोः प्रयोगाभावाद्यत्ववत्वयोरेवायं निषेधः ॥ पहावली अरुणो । वहू अवऊढो । प्रभावल्यरुणः । वध्ववगूढः । अत्र प्रभावली अरुणः । वधू अवगूढ इति स्थिते प्रभाशब्दे वधूशब्दे च 'निकषस्फटिकचिकुरे हः' इत्यतो 'हः' इत्यधिकृत्य

खघथधभाम् ॥ १ । ३ । २० ॥

असंयुक्तानामनादौ वर्तमानानामचः परेषां खादीनां हः स्यात् । इति भकारधकारयोर्हकारः ॥ 'प्रायो लुक्—'इति गूढे गकारलोपः । वलोपस्तु प्रायोग्रहणान्न भवतीति रूपसिद्धिः ॥

एङः ॥ १ । १ । २१ ॥

नेत्यनुवर्तते । संधिरिति च । एदोतोः संस्कृतोक्तः संधिः प्राकृते न भवति । लच्छीए आणंदो । रुक्खादो[1] आअओ । देवो अहिणन्दणो । लक्ष्म्या आनन्दः । वृक्षादागतः । देवोभिनन्दनः ॥ अहो अच्चरिअमित्यादयः संस्कृतवदेव सिद्धाः ॥

शेषेच्यचः ॥ १ । १ । २२ ॥

युक्तस्य[2] लोपे योवशिष्यते स शेषः । तस्मिन्नचि[3] अचः संधिर्न भवति । फणामणिप्पईवा । जोण्हाऊरिअकेसो । फणामणिप्रदीपाः । ज्योत्स्नापूरितकेशः । आद्योदाहरणे 'प्रायो लुक्—' इति दकारलोपे 'पो वः' इति पस्य वत्वे 'लवराम्—'इति रेफलोपे शेषस्य पस्य द्वित्वे च पकारस्याकारस्य दलोपे शिष्टस्य[4] च संधिर्न भवति । द्वितीयोदाहरणेपि पकारतकारयोर्लोपे[5] त्स्नस्य 'श्नष्णस्नस्त्नह्नह्लक्ष्णां ण्हः' इति ण्हादेशे

---

१ रुक्खाओ M. २ M. has हलो after युक्तस्य. ३ M. has परे after तस्मिन्नचि. ४ शिष्टेकारस्य My., P. ५ तकारपकारयो° R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ण्हास्थाकारस्य पलोपे शिष्टेन ऊकारेण सह गुणलक्षणसंधिर्न भवति। बहुलाधिकारात् कचिद्विकल्पः। कुम्भकारः। अत्र कलोपे शिष्टेन[1] संधिपक्षे कुंभारो संध्यभावे कुम्भआरो॥ सुपुरुषः। सूरिसो। सुउरिसो[2]। अत्र पलोपे 'त्वदुत उपरिगुरुके' इत्यत 'उतः' इत्यनुवर्तमाने

रोर्भ्रुकुटीपुरुषयोरित्॥ १। २। ६०॥

अनयो रेफसम्बन्धिन उकारस्य इत् स्यात्। इति पुरुषशब्दे रेफोकारस्येकारः। कचिच्छिष्टेन नित्यं संधिरेव। शातवाहनः। सालाहणो। चक्रवाकः। चक्काओ। अत्र 'प्रायो लुक्—'इति वलोपे शिष्टेन[3] सह लकारस्याकारस्य सवर्णदीर्घलक्षणसंधिरेव। अत्र संस्कृतशातवाहनशब्दः प्रकृतिभूतः। अत्र 'दोहदप्रदीपशातवाहनातसाम्'[4] इति तवर्गस्य लत्वम्। अथवा शालावाहनशब्दस्य संस्कृतस्य प्रकृतित्वं[5] तत्र 'ड्यापोः संज्ञाछन्दसोर्बहुलम्' इति शालाशब्दस्यापो ह्रस्वः। संज्ञारूपत्वात्। यद्वा सालवाहनशब्दस्य वा प्रकृतित्वम्। सर्वथा लौकिकप्रसिद्धस्य शालिवाहनशब्दस्य तु प्रकृतित्वं न योयुंजीति[6]। द्वितीयोदाहरणेपि 'लवरामधश्च' इति रेफलोपे शेषस्य द्वित्वे ककारस्थाकारस्य वलोपे शिष्टेनाकारेण[7] सह संधिरेव। सालवाहणो चक्कवाओ इत्येतौ तु प्रायोग्रहणाद्वकारस्य लोपाभावे[8] भवतः। लोपे तु संधिरेव॥

तिङः॥ १। १। २३॥

'न' इत्यनुवर्तते। 'अचः' इति 'अचि' इति च 'संधिः' इति च। तिङः संबन्धिनोचोचि परे संधिर्न भवति[9]। भवतीह। होइ इह। पिबोदकम्। पिज्ज उअअं। अत्र 'होहुवहवा[10] भुवेस्तु—' इत्यनेन भवतेर्धातोर्हो इत्यादेशे 'लटस्तिपाविजेच्' इत्यनेन लटस्तिप इजादेशे च होइ इह इति स्थिते इकारयोः संधिर्न भवति[11]। पिज्ज उअअं

---

१ अवशिष्टेन M. २ सुउरिसो सूरिसो M. ३ अवशिष्टेन M. ४ °प्रतीप° My. ५ संस्कृतशालावाहनशब्दः प्रकृतिभूतस्तस्मिन् पक्षे M. ६ योयुज्यते R. ७ अवशिष्टेन M. ८ लोपाभावेपि R. ९ स्यात् My., P. १० होहुवहुवा P. ११ My. and P. drop भवति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यत्रापि 'पट्टघोट्टडल्लपिज्जाः पिबतेः' इत्यनेन सूत्रेण पिबतेः पिज्जादेशे उदकशब्दे च दकयोर्लोपे अकारोकारयोः संधिर्न भवति ॥ त्रिदश ईश इति स्थिते 'लवराम्—'इति रेफलोपे 'प्रायो लुक्—' इति दलोपे चोभयत्र 'शोः सल्' इति शकारयोः सत्वे सति तिअस ईस इति स्थिते अनुक्तमन्यन्यायेन 'आद्गुणः' इति गुणे प्राप्ते 'बहुलम्' इत्यधिकृत्य 'शेषेच्यचः' इति च

लोपः ॥ १ । १ । २४ ॥

अचोचि परे बहुलं लोपः स्यात् । इत्याद्यसकारस्याकारलोपे तिअसीसो ॥ एवं निश्वासउच्छ्वास इति स्थिते निश्वासशब्दे 'लवराम्—' इति वलोपे

शोर्लुप्तयवरशोर्दिः ॥ १ । २ । ८ ॥

यवरशषसानां लोपे येवशिष्टाः शषसास्तेषामादेरचो दीर्घो भवति । इति दीर्घे णीसास इति स्थिते शेषत्वात् सकारस्य द्वित्वे प्राप्ते

दीर्घान्न ॥ १ । ४ । ८७ ॥

दीर्घात् परस्य शेषस्यादेशस्य च द्वित्वं न भवति । इति द्वित्वप्रतिषेधः ॥ उच्छ्वासशब्देपि

दोदोनुत्साहोत्सन्न ऊच्छसि ॥ १ । २ । ६२ ॥

उदः उदित्युपसर्गस्य उकारस्य शसि शकारसकारपरयोः दा दकारेण सह ऊत्वं भवत्युत्साहोत्सन्नशब्दौ वर्जयित्वा । इत्युद ऊकारे णीसासऊसास इति स्थिते पूर्ववद्गुणे प्राप्ते 'लोपः' इत्यनेन पूर्वपदान्त्यसकारस्याकारस्य लोपे

द्विवचनस्य बहुवचनम् ॥ २ । ३ । ३४ ॥

अस्मिन् शास्त्रे सुबन्ते तिङन्ते च द्विवचनस्य बहुवचनं भवति । इति बहुवचने 'श्लुग्जश्शसोः' इति जसो लोपे णीसासूसासा इति

---

१ °ढल्ल° P. २ इति सूत्रेण R. ३ R. drops प्राप्ते. ४ स्यात् My., P. ५ P. drops उदः. ६ स्याद्गु° My., P.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सिद्धम् ॥ एवं सर्वत्र सावधानेन संधितैदपवादौ विज्ञाय कविभिः प्रयोगाः संचारणीयाः ॥

इति संधिप्रैकरणम् ।

अमलस्फटिकाङ्गाय चन्द्रमःखण्डधारिणे ।
वटाधःस्थितिदक्षाय दक्षिणामूर्तये नमः ॥

अथाजन्ताः पुंलिङ्गा उच्यन्ते । अकारान्तः पुंलिङ्गो रामशब्दः । अनुक्तमन्यन्यायेन प्रातिपदिकसंज्ञा स्याद्युत्पत्तिश्च । राम सु इति स्थिते 'अतो डो विसर्गः' इत्यधिकृत्य

सोः ॥ २ । २ । १३ ॥

अतः परस्य सोः स्थाने डो भैवति । अनुक्तमन्यन्यायेन डैलोपटिलोपौ । रामो ॥ द्विवैचनस्य प्रयोगो नास्तीत्युक्तमेव । राम जस् इति स्थिते शास्त्रान्तर इवैकशेषः ।

श्लुग्जश्शसोः ॥ २ । २ । ३ ॥

नाम्नः परयोर्जश्शसोः श्लुक् स्यात् ॥

शिति दीर्घः ॥ १ । १ । १५ ॥

शिति परतः पूर्वस्याचो दीर्घः स्यात् । रामा ॥ संबुद्धौ राम सु इति स्थिते । अत्राप्यनुक्तन्यायेनैकवचनस्यैवं संबुद्धित्वम् ।

---

१ °तदपचारान् R. २ °प्रक्रिया R. ३ R. omits this verse; and M. puts it after अथाजन्तपुंलिङ्गा उच्यन्ते. ४ अथाजन्तपुंलिङ्गा M. ५ My. and P. omit पुंलिङ्गा उच्यन्ते. ६ My. and P. omit अकारान्तः पुंलिङ्गो रामशब्दः. ७ दो M. ८ दो M. ९ स्यात् My., P. १० टिलोपदलोपौ M. ११ द्विवचनप्रयोगो My., P. १२ नेत्युक्तमेव My., P. १३ बहुष्वर्थेष्वनेकरामशब्दप्रयोगे प्राप्ते शास्त्रा° My., P. १४ My. and P. have तस्माज्जसि after it. १५ संबोधने My., P. १६ My. and P. drop अत्रापि. १७ अनुक्तमन्यन्यायेन My., P. १८ My. and P. drop एव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

डो[1]श्लुकौ तु संबुद्धेः ॥ २ । २ । ४२ ॥

'सोः' इति प्राप्तो यो डो[2] यश्च 'श्लुगनपि सोः' इति श्लुक् तौ डो[3]श्लुकौ संबुद्धेरामन्त्रणार्थस्य सोस्तु भवतः ॥

दे संमुखीक[4]रणे ॥ २ । १ । ५९ ॥

अत्र संबुद्धिव्यञ्जकस्य हे इत्यस्य स्थाने दे इति प्र[5]योज्यः ॥ [6]अनुक्तमन्यन्यायेन टिलोपः । दे रामा । [7]डो इत्यस्याभावपक्षे

सोर्लुक् ॥ २ । २ । ९ ॥

नाम्नः परस्य सोर्लुक् स्यात् । इति सुलोपः । दे राम । नात्र पक्षे सोः श्लुक् । इदुदन्तत्वाभावात् तदन्तविषयत्वात्तस्य । एवं च[8] स[9]ति डो इत्यस्याभावपक्षे सोः श्लुकमङ्गीकृत्य 'शिति दीर्घः' इति दीर्घे प्राप्ते बहुलाधिकारा[10]न्नं भवतीति षड्भाषारूपमालिकाकारेण दुर्गणाचार्येणोक्तं चिन्त्य[11]म् ॥ बहुवचनं पूर्ववत् । दे रामा । द्विती[12]यैकवचने राम अमिति स्थिते 'वीप्सार्थात्तदचि सुपो मस्तु' ई[13]त्यतः 'सुपः' 'मः' इत्यधिकृत्य

अमः ॥ २ । २ । २ ॥

नाम्नः परस्य सुप्संबन्धिनोमः स्थाने म[14]कारो भवति । रामम् । अत्र 'अन्त्यहलोश्रदुदि' [15]इति मलोपे प्राप्ते 'मोचि वा' ई[16]त्यतः 'मः' इत्यधिकृत्य

बिन्दुल् ॥ १ । १ । ४० ॥

शब्दानामन्त्यमकारस्य नित्यं बिन्दु[17]र्भवति । लोपापवादः । रामं ।

---

१ दो° My. २ दो My. ३ दो° My. ४ M. has च after it. ५ प्रयुज्यते M. ६ My. and P. drop अनुक्तमन्यन्यायेन. ७ दो M. ८ R. omits च. ९ M. drops सति. १० नेति My., P. ११ दुरुक्तम् M. १२ My. and P. drop द्वितीयैकवचने. १३ इत्यधिकृत्य R., M. १४ मः स्यात् My., P. १५ इत्यन्त्यहलो मकारस्य लोपे M. १६ इत्यधिकृत्य M., R. १७ बिन्दुः स्यात् P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राम शस् इति स्थिते 'अतो [1]डो विसर्गः' [2]इत्यतः 'अतः' इत्यधिकृत्य 'दिर्वा भ्यसि' [3]इत्यतो 'वा' इति च

शस्येत् ॥ २ । २ । २० ॥

अतः शसि परे एद्वा स्यात् । रामे । पक्षे रामा । उभयत्रापि शसः श्लुक् ॥ राम टा इति स्थिते

टो डे[4]र्णल् ॥ २ । २ । १८ ॥

अ[5]त इत्यनुवर्तते । अतः परस्य टा[6]वचनस्य[7] डि[8]त् एण इत्या[9]देशो भवति । लित्वान्नित्यम् । टिलोपः । रामेण इति स्थिते 'बि[10]न्दुल्' इत्यधिकृत्य

क्त्वासुपोस्तु सुणात् ॥ १ । १ । ४३ ॥

क्त्वाप्रत्ययस्य सुपश्च[11] संबन्धिनः सुकाराण्णकाराच्च परो बिन्दुर्[12]भवति विकल्पेनेति णात्परो बिन्दुः ।[13]रामेणं रामेण ॥ राम भिस् इति स्थिते

हिंहिँहि भिसः ॥ २ । २ । ५ ॥

नाम्नः परस्य भिस एते त्रय [14]आदेशा भवन्ति ॥ 'शस्येत्' इत्यं[15]ते 'एत्' इत्यनुवर्तमाने 'अतः' इति च

भिस्भ्यः सुपि ॥ २ । २ । २१ ॥

एतेषु परेष्वत एत्वं स्यात् । पृथक्त्वान्नित्यम् । रामेहिं । रामेहिँ । रामेहि ॥ चतुर्थ्यास्तु षष्ठ्येव । तादर्थ्यचतुर्थ्यां तु विशेष उच्यते । राम ङे इति स्थिते 'ङसो ङम्' इत्यधिकृत्य

तादर्थ्ये ङेस्तु ॥ २ । ३ । ३६ ॥

---

१ दो M. २ इत्यधिकृत्य M., R. ३ इति च R., M. ४ दे° M. ५ M. has अत इत्यनुवर्तते before the Sûtra. ६ तृतीयैकवचनस्य R. ७ M. has स्थाने after it. ८ दि देण M. ९ इत्यादेशः स्यात् P., My. १० 'बिन्दुः' इत्य° M., R. ११ सुपः संबन्धिनः M. १२ बिन्दुर्वा स्यादिति My., P. १३ रामेण रामेणं M. १४ आदेशाः स्युः My., P. १५ इत्यनुवर्तमाने M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तादर्थ्ये विहितस्य ङेश्चतुर्थ्येकवचनस्य स्थाने ङम् । षष्ठी तु विकल्पेन भवति । तथा च रामस्स रामाय वा पोप्फाणि । रामार्थं पुष्पाणीत्यर्थः । एवं सर्वत्र तादर्थ्ये चतुर्थ्येकवचनस्य विकल्पेन प्रयोगः प्राकृते ऊह्यः ॥ पञ्चम्येकवचने

हिंतोत्तोदोदु ङसिस् ॥ २ । २ । ६ ॥

अत्र ङसिसिति सुव्यत्ययेन षष्ठ्यर्थे प्रथमा । तथा च नाम्नः परस्य ङसिसः पञ्चम्याः स्थाने हिंतो त्तो दो दु इति चत्वार आदेशा भवन्ति । ङसिसित्यनेन एकवचनबहुवचनयोर्ग्रहणम् । तेनोभयत्राप्येते आदेशाः । तथा च । रामहिंतो । रामत्तो । रामदो । रामदु । इति स्थिते

दिर्दोत्तोदुङसौ ॥ २ । २ । ८ ॥

पञ्चम्यादेशेषु दो त्तो दु इत्येतेषु ङसौ पञ्चम्येकवचने च परतः पूर्वाचो दीर्घः स्यात् । रामाहिंतो । अत्रैकवचनत्वाद्दीर्घः । एवमेकवचनादेशेषु नित्यमेव दीर्घः । बहुवचनादेशेषु दो त्तो दुष्वपि । अन्यत्र विकल्पः । रामत्तो । अत्र 'संयोगे' इति कृतदीर्घस्यापि ह्रस्वः । नन्वत्र यदि ह्रस्वस्तर्हि दीर्घविधौ त्तो इत्यस्य ग्रहणं किमर्थम् । 'भिस्भ्यस्सुपि' इति भ्यसादेशेसिन्नेत्वबाधनार्थम् । दोदुग्रहणमप्येत्वापवादायैव । तेन त्तो इत्यत्र ह्रस्व एव । दोदु इत्यत्र दीर्घ एव । 'प्रायो लुक्—'इत्यादिना दकारयोर्लोपः । रामाओ रामाउ । नन्वत्र दलोपः कर्तुं न शंक्यते । दोदु इति प्रतिपदोक्तत्वादिति चेन्न । दोद्वन्तयोः प्रयोगादर्शनात् । तर्हि दकारोच्चारणं किमर्थम् । भाषान्तरार्थम् । तेन शौरसेनीमागध्योरातिदेशिकौकारोकारौ न स्तः । किं तु दोदू एव ।

---

१ M. drops ङेः. २ रामाय रामस्स My., P. ३ तादर्थ्येकवचनप्रयोगस्य विकल्पः M. ४ आदेशाः स्युः My., P. ५ °भयत्रापि आदेशा एते M. ६ R. drops च. ७ पूर्वस्याचो R. ८ दुषु विकल्पः R. ९ °निषेधार्थम् M. १० शक्यः My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पैशाच्यां[1] गिरीतो इत्यादौ 'तद् तदोः' इति दकारस्य तकारार्थं चेति युक्तं दकारोच्चारणम् ॥

ङसेः श्लुक् ॥ २ । २ । १५ ॥

अत इत्यनुवर्तते । अतः परस्य ङसेः श्लुक् स्यात् । शित्वात् पूर्वस्य दीर्घः । रामा ॥

ङसिसो हि ॥ २ । २ । १७ ॥

अत इत्यनुवर्तते । अत्रापि ङसिस इत्यनेनैकवचनबहुवचनयोः परिग्रहः[2] । अतः परस्य ङसिसः पञ्चम्या[3] हि इत्यादेशो[4] भवति । रामाहि । अत्राप्येकवचनादेशत्वाद् 'दिदोत्तोदुङ्सौ' इति दीर्घः ॥ भ्यसि हिंतो इत्याद्यादेशा हि इत्यादेशोपि ॥

सुन्तो भ्यसः ॥ २ । २ । ७ ॥

नाम्नः परस्य भ्यसः सुन्तो इति[5] भवति ॥ 'अतो डो[6] विसर्गः' इत्यतः[7] 'अतः' इत्यधिकृत्य

दिर्वा भ्यसि ॥ २ । २ । १९ ॥

अत इति पञ्चम्यन्तस्य षष्ठ्यन्तविपरिणामः[8] । अतो भ्यसादेशे परे दीर्घो वा स्यात् । पक्षे 'भिस्भ्यः सुपि' इत्येत्वम् । रामाहिंतो रामेहिंतो । रामासुंतो । रामेसुंतो । रामाहि । रामेहि । त्तोदोदुषु दीर्घ एव । अत्रापि 'संयोगे' इति कृत[9]दीर्घस्यापि ह्रस्वः । रामत्तो । रामाओ । रामाउ ॥ राम ङस् इति स्थिते

ङसोऽस्त्रियां सर् ॥ २ । २ । १० ॥

नाम्नः परस्य ङसः सर् इत्ययमादेशो[10] भवति न तु स्त्रियाम् । रित्वाद् द्वित्वम् । रामस्स । अस्त्रियामिति किम् । महिलाए । मालाए[11] । बुद्धीए । धेणूए ॥ राम आम् इति स्थिते

---

१ R. has एवम् before पैशाच्यां. २ परिग्रहणम् M. ३ पञ्चम्याः स्थाने हि M. ४ °त्यादेशः स्यात् My., P. ५ इत्यादेशो भवति M. ६ दो M. ७ इत्यधिकृत्य M. ८ षष्ठ्यर्थो विपरिणामः M. ९ R. drops कृत. १० °मादेशः स्यान्न My., P. ११ My. and P. drop मालाए.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णशामः ॥ २ । २ । ४ ॥

नाम्नः परस्यामः षष्ठीबहुवचनस्य[1] णशित्यादेशो[2] भवति । शित्त्वाद् दीर्घः । 'क्त्वासुपोस्तु सुणात्' इति वा बिन्दुः । रामाणं । रामाण । नात्रानुक्तमन्यन्यायेन[3] 'चुट्' इति णलोपः[4] । बहुलाधिकारात् । साक्षात् प्रत्ययत्वाभावाद्वा[5] ॥ राम ङि इति स्थिते 'वैतत्तदः' इत्यतो 'वा' इत्यनुवर्तमाने[6] 'अतः' इति च

ङेर्डे ॥ २ । २ । १६ ॥

अकारादुत्तरस्य[7] ङेर्डिदेत्वं[8] वा स्यात् । टिलोपः[9] । रामे । पक्षे

ङेर्म्मिर् ॥ २ । २ । ११ ॥

ङेर्म्मिरित्यादेशः[10] स्यात् । रित्त्वाद् द्वित्वम् । रामम्मि ॥ राम सुप् इति स्थिते 'भिस्भ्यः सुपि' इत्येत्वम् । 'क्त्वासुपोः' इति वा बिन्दुः[11] । रामेसुं । रामेसु । एवं शिवादयोप्यदन्ता अनुक्तविशेषादेशा ऊह्याः ॥ सर्वनामशब्दानामकारान्तानां रूपभेदोस्ति । अत्रापि सर्वनाम्नामभिधेयवल्लिङ्गता । सर्व सु इति स्थिते 'लवराम्—' इति रेफलोपे 'शेषादेशस्य—' इति द्वित्वे च[12] एकवचनं रामवत् । जसि

सर्वादेर्जसोतो डे ॥ २ । २ । ६२ ॥

सर्वादेरदन्तात् परस्य जस एत्वं डिद्भवति । अनुक्तमन्यन्यायेन[13] टिलोपः । सव्वे ॥ द्वितीयैकवचनमारभ्य षष्ठीबहुवचनपर्यन्तं रामवत् । आमि 'अनिदमेतदस्तु—' इत्यतः 'तु' इत्यनुवर्तमाने 'सर्वादेः' इति च

---

१ षष्ठी बहुवचनस्य is omitted by My. and P. २ °त्यादेशः स्यात् My., P. ३ अत्रानुक्त° R. ४ न णलोपः R. ५ My. and P. drop साक्षात् प्रत्ययत्वाभावाद्वा. ६ °त्यनुवर्तते M. ७ अदन्तात् परस्य My., P. ८ ङेः सप्तम्येकवचनस्य My., P. ९ डित्वाट्टिलोपः My., P. १० °त्यादेशो भवति M. ११ बिन्दुल् My., P. १२ R. omits च. १३ अनुक्तन्यायेन R.; My. and P. drop अनुक्तमन्यन्यायेन.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमो डेसिं ॥ २ । २ । ६५ ॥

सर्वादेरतः परस्यामः डिदेसिं इत्यादेशो वा स्यात्[1] । टिलोपः । सव्वेसिं । पक्षे णश् बिन्दुश्च वा । सव्वाणं सव्वाण[2] । अत्र आमामिति बहुवचनं लिङ्गत्रयेप्येसिमादेशार्थम् । ङौ

ङेस्त्थसिंम्मि ॥ २ । २ । ६३ ॥

'सर्वादेः' इत्यनुवर्तते 'अतः' इति च । सर्वादेरदन्तात् परस्य ङेः स्थाने त्थ स्सिं म्मि इति त्रय आदेशाः स्युः । सव्वत्थ । सव्वस्सिं । सव्वम्मि । 'अतः' इति किम् । अमुम्मि ।

अनिदमेतदस्तु किंयत्तदः स्त्रियामपि हिं ॥ २।२ । ६४ ॥

'सर्वादेः' इत्यनुवर्तते । 'ङेस्त्थसिंम्मि' इत्यतो 'ङेः' इति 'अतः' इति च । इदमेतद्वर्जिताददन्तात् सर्वादेः परस्य ङेर्हिं इत्यादेशो वा स्यात् किंयत्तद्भ्यः स्त्रियामपि । सव्वहिं । पक्षे पूर्वोक्तादेशाः ॥ शेषं रामवत् । एवं विश्वादीनां रूपं नेयम्[3] । विशेषास्तु कथ्यन्ते । विश्वशब्दे 'लवराम्—' इति वलोपे

शोर्लुप्तयवरशोर्दिः ॥ १ । २ । ८ ॥

यवरशषसानां लोपे येवशिष्टाः शुसंज्ञिताः शषसास्तेषामादेरचो दीर्घः स्यात्[4][5] । इति दीर्घे 'शोः सल्' इति शस्य सत्वे च वीसो । नात्र शेषत्वेपि सस्य द्वित्वम् । 'दीर्घान्न' इति प्रतिषेधात् ॥ शेषं सर्ववत् । उभशब्दस्य द्विवचनवाचित्वेपि प्राकृते 'द्विवचनस्य बहुवचनम्' इति सर्वत्र बहुवचनमेव । उभ जस् इति स्थिते 'खघथधभाम्' इति भस्य हत्वे । उहे । शेषं सर्ववत् । उभशब्दस्य उभय इति स्थिते

उभयाधसोरवहहेट्ठौ ॥ १ । ३ । ९८ ॥

उभय अधस् इत्येतयोर्यथासंख्यमवह हेट्ठ इत्येतावादेशौ स्तः[6] ।

---

१ भवति M. २ सव्वाण सव्वाणं M. ३ ज्ञेयम् M. ४ My. and P. drop from यवरशषसानाम् to स्यात्. ५ दीर्घो भवति R. ६ वा भवतः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युभयशब्दस्य अवहादेशे सर्ववद्रूपम् । आदेशाभावपक्षे भस्य हत्वे उहअं । उवहं इत्यपि केचित् । पक्षद्वयेपि सर्ववत् प्रक्रिया ॥ पूर्वशब्दस्य ।

मलिनधृतिपूर्ववैडूर्याणां मइलदिहिपुरिमवेरुलिआः ॥१।३।९९॥

मलिनादीनां मइलादय आदेशा वा भवन्ति । इति पूर्वशब्दस्य पुरिमादेशे । पुरिमो । पुरिमे । इत्यादि । आदेशाभावपक्षे रेफलोपे शेषस्य द्वित्वे

संयोगे ॥ १ । २ । ४० ॥

संयोगे परे पूर्वस्य ह्रस्वो भवति । इति ह्रस्वे । पुव्वो । पुव्वे । इत्यादि सर्ववद्रामवच्च । ह्रस्वे कृते 'स्तौ' इत्युत ओत्वम् । बहुलाधिकारात् सर्वत्र न भवति । अथवा ओत्वस्यानादेशविषयत्वाद्वा परिहारः ॥ एकशब्दस्य

दैवगेस्वौ ॥ १ । ४ । ९२ ॥

'रितो द्वित्वल' इत्यतो 'द्वित्वल्' इत्यनुवर्तते । दैवादिष्वनादौ वर्तमानस्य व्यञ्जनस्य द्वित्वं वा स्यात् । इति दैवादिपाठात् द्वित्वे । एक्को । द्वित्वाभावे

वैकादौ गः ॥ १ । ३ । १४ ॥

'खोपुष्पकुब्जकर्परकिले कोः' इत्यतः 'कोः' इत्यनुवर्तते । एकादौ कोः कवर्गस्य गकारो वा भवति । एगो । 'स्वार्थे तु कश्च' इत्यतः 'स्वार्थे' इति 'उपरेः संव्याने ल्लल्' इत्यतो 'ल्लल्' इत्यप्यधिकृत्य

नवैकाद्वा ॥ २ । १ । २० ॥

नव एक आभ्यां परः स्वार्थे द्विरुक्तो लो वा स्यात् । इति स्वार्थे ले

---

१ सर्वशब्दवत् R. and सर्ववत् M. for सर्ववद्रूपम्. २ आदेशाभावे My., P. ३ My. and P. drop प्रक्रिया. ४ °वैदूर्याणां M. ५ स्युः My., P. ६ M. drops परे. ७ इत्यनुवर्तते M., R. ८ °किते कोः P. ९ इति च द्वयमप्यधिकृत्य M., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सति । एक्कल्लो इत्यप्यस्ति ॥ शेषं सर्ववत् । ननु एक्को एक्कल्लो इत्यत्र 'संयोगे' इत्येकारस्य ह्रस्वः किं न स्यात् । किं ततः । तदानुक्तन्यायेन 'एच इग्ध्रस्वादेशे' इतीकारः स्यात् । ततश्च इक्को इक्कल्लो इति स्यादिति चेन्मैवम् । 'अत्र शास्त्रे एदोतोः क्वचित् स्वरूपेणैव ह्रस्वः' इति त्रिविक्रमदेवेनोक्तत्वादत्र स्वरूपह्रस्वाङ्गीकारात् । एक्को । एक्कल्लो इत्युपपन्नः प्रयोगः । प्रथमशब्दे प्रथम सु इति स्थिते 'हे दक्षिणेऽस्य' इत्यतः 'अस्य' इत्यनुवर्तमाने 'उल्ध्वनिगवयविष्वचि वः' इत्यतः 'उल्' इति च

प्रथमे प्थोः ॥ १ । २ । २० ॥

प्रथमशब्दे पकारथकारयोः संबन्धिनोवर्णस्य[1] युगपत् क्रमेण चोत्वं स्यात् । लित्वान्नित्यम् । इत्यवर्णद्वयस्योत्वे 'वेतसः—'इत्यतः 'तोः' इत्यनुवर्तमाने 'ढः पृथिव्यौषधनिशीथे' इत्यतः 'ढः' इति च

प्रथमशिथिलमेथि[2]शिथिर[3]निषधेषु ॥ १ । ३ । ४८ ॥

एषु तवर्गस्य ढो[4] भवति । इति थकारस्य ढत्वे युगपदकारद्वयस्यो-कारद्वयविधानपक्षे पुढुमो । क्रमपक्षे । पुढमो । पढुमो ॥ जसि तु पूर्ववत् । शेषं रामवत् । स्वशब्दे विशेषः[5] । स्व सु इति स्थिते 'अर्हत्युच्च' इत्यतः 'उत्' इत्य[6]नुवर्तमाने

एकाचि श्वस्स्वे ॥ १ । ४ । १०८ ॥

एकस्वरयोः श्वस्स्व[7] इत्येतयोः संयुक्तस्यान्त्यहलः प्रागुत्वं भ[8]वति । इत्युत्वे सुवो सुवे । इत्यादि । ङसि[9]ङ्योः पूर्वशब्दवत् । अन्यत्र[10] सर्ववत् । एकाजिति किम् । स्वजनः । सजणो ॥ कतमशब्दे 'सप्तपर्णे फोः' इत्य[11]तः 'फोः' इत्यधिकृत्य

---

१ संबन्धिवर्णस्य M. २ °मेधि° R., M. ३ °शिधिर° M. ४ ढः स्यात् My. ५ My. and P. omit विशेषः; P. drops विशेषः. ६ इत्यनुवर्तते M. ७ स्वश्व M., P. ८ स्यात् My., P. ९ जसि R.; शसि M.; ङसिङौ My. १० अन्यत्र तु M. ११ इत्यधिकृत्य R., M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मध्यमकतमे च ॥ १ । २ । १४ ॥

अनयोर्द्वितीया चेत्वं स्यात् । 'प्रायो लुक्—'इति तलोपः । कइमो ॥ शेषं सर्ववत् । येषां यत्र यत्र सर्वनामसंज्ञा तत्र तत्र सर्ववत् । अन्यत्र रामशब्दवद्रूपनिर्णयः कर्तव्यः ॥

इति सर्वनामानि ॥

अथाकारान्तेषु केषुचित् संयुक्तादेशवत्सु विशेषाः प्रदर्श्यन्ते ।

स्तोः ॥ १ । ४ । १ ॥

अधिकारोऽयम् । 'इल् ज्या[1]याम्' इति यावत् । य[2]दित ऊर्ध्वमनुक्रमिष्यते तत् स्तोः संयुक्तस्य भवे[3]तीति वेदितव्यम् ॥ वृ[4]क्षशब्दे 'क्ष्वेडकगे खल्' इ[5]त्यतः 'खल्' इत्यधिकृत्य

वुश्च रुर्वृक्षे ॥ १ । ४ । ७ ॥

वृ[6]क्षे संयुक्तस्य खो[7] भवति । त[8]त्संनियोगेन वृकारस्य रुकारः । रुक्खो । रुक्खा[9] । अ[10]स्यैव रूपान्तर[11]म् । 'उत्सवऋक्षोत्सुकसामर्थ्ये छो वा' इत्यतः 'छः' इत्यधिकृत्य

स्पृहादौ ॥ १ । ४ । २२ ॥

स्पृहादिषु स्तोश्छो भवति । इति स्पृहादिपठिते[12]वृक्ष[13]शब्दे क्ष[14]स्य छत्वे

ऋतोत् ॥ १ । २ । ७४ ॥

आदेर्ऋकारस्या[15]त् स्यात् । इत्यत्त्वे वच्छो वच्छा ॥ शेषं रामवत् । एवं सर्वत्र विशेषादेशमात्रमुच्यते । अन्यत् सर्वं रामवदूह्यम् ।

---

१ 'इल्जायाम्' My. २ इति ऊर्ध्वं यदुपक्रमिष्यते M. ३ स्यादिति P., My. ४ प्रथमं वृक्षशब्दे R. ५ इत्यधिकृत्य R., M. ६ वृक्षशब्दे संयुक्तस्य P., My. ७ खः स्यात् My., P. ८ तत्संनियोगे M. ९ M. has शेषं रामवत् after this. १० The passage from अस्यैव रूपान्तरम् to वच्छो वच्छा is omitted in My. and R. ११ M. has वा देशान्तरम् after this. १२ स्पृहादिपठितस्य P. १३ वृक्षशब्दस्य P. १४ P. drops क्षस्य. १५ °स्यात्वं स्यात P.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वा रक्ते गः ॥ १ । ४ । २ ॥

रक्ते संयुक्तस्य गकारो वा भवति[1] । 'शेषादेशस्य—'इत्यादिना द्वित्वम् । रग्गो । गत्वाभावे 'कग—'इति कलोपे शेषे[2]द्वित्वे रत्तो ॥

शुल्के ङ्गः ॥ १ । ४ । ३ ॥

वेत्यनुवर्तते । शुल्के संयुक्तस्य ङ्गो वा[3] स्यात् । सुङ्गो । पक्षे सुक्को ॥

कः शक्तमुक्तदष्टमृदुत्वरुग्णेषु ॥ १ । ४ । ४ ॥

एषु स्तोः ककारो[4] भवति तु विकल्पेन । सक्को । पक्षे सत्तो । मोक्को[5] । अत्र 'स्तौ' इत्युत ओत्वम् । दक्को । पक्षे 'स्त्यानचतुर्थे च[6] तु ठः' इत्यतो[7] 'ठः' इत्यधिकृत्य

ष्टः ॥ १ । ४ । १४ ॥

ष्टस्य ठः स्यात् । आदेशत्वाद् द्वित्वम् । दट्ठो ॥ रुग्णशब्दे

हरिद्रादौ ॥ १ । ३ । ७८ ॥

'रो डा पर्याणे' इत्यतो 'रः' इत्यनुवर्तते । 'लो जठरवठरनिष्ठुरे' इत्यतो 'लः' इति च । हरिद्रादौ रस्य लत्वं[8] स्यात् । इति हरिद्रादिपाठाद्रेफस्य लत्वे । लुक्को । पक्षे 'मनयाम्—'इति नलोपे[9] द्वित्वे च । लुग्गो ॥

क्ष्वेडकगे खल् ॥ १ । ४ । ५ ॥

क्ष्वेडकादिषु स्तोः खकारो[10] भवति । ल्त्वान्नित्यम् । 'प्रायो लुक्'—इति कलोपः । खेडओ[11] । विषम् । स्फोटकः[12] । खोडओ । स्फेटकः । खेडओ । अत्र[13] उभयत्र 'टो डः' इति टस्य डत्वम् ॥

[14]कस्कोर्नाम्नि ॥ १ । ४ । ६ ॥

---

१ स्यात् My., P. २ शेषस्य द्वित्वे P., My. ३ भवति वा M. ४ ककारो वा for ककारो भवति तु विकल्पेन P., My. ५ M. has पक्षे मोत्तो after it. ६ च तु रः M. ७ इत्यधिकृत्य M., R. ८ लत्वं वा स्यात् M. ९ M. drops न. १० खः स्यात् P., My. ११ खेडवो M., R. १२ सोटकः P. १३ उभयत्रापि for अत्र उभयत्र P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'खल्' इत्यनुवर्तते । अनयोर्नाम्नि संज्ञायां खल्[1] स्यात् । लित्त्वा-न्नित्यम्[2] । पोक्खरक्खो । पुष्कराक्षः । अत्र 'हृश्चौत्कुतूहले' इत्यत 'ओत्' इत्यनुवर्तते । 'त्वदुत उपरिगुरुके' इत्यत 'उतः' इति च ।

स्तौ ॥ १ । २ । ६६ ॥

युक्ते परे उत ओत्वं स्यात् । इत्योत्वम् । स्के । स्कन्धः । खंधो ॥

क्षः ॥ १ । ४ । ८ ॥

'खल्' इत्यनुवर्तते । क्षस्य खल्[3] स्यात् । क्षयः । खओ । विचं-क्षणः । विअक्खणो ॥

स्कन्दतीक्ष्णशुष्के तु खोः ॥ १ । ४ । १० ॥

'खल्' इत्यनुवर्तते । एषु खोरादेः संयुक्तस्य खो वा स्यात् ॥ खंदो । पक्षे 'कग—'इति सलोपे अचः परत्वाभावान्न शेषस्य द्वित्वम् । कन्दो । तीक्ष्णः । तिक्खो । पक्षे तिण्हो[4] । अत्र 'श्नष्ण–' इत्यादिना क्ष्णस्य ण्हः । शुष्कः । सोक्को[6] । पक्षे सोक्खो[5] ।

स्तम्भे ॥ १ । ४ । ११ ॥

'खल्' इत्यनुवर्तते । 'तु' इति च 'खोः' इति च । स्तम्भे खोरादेः संयुक्तस्य[7] खकारो वा स्यात्[8] । खंभो । पक्षे 'कग—'इति सलोपे तम्भो ।

स्थोऽस्पन्दे ॥ १ । ४ । १२ ॥

'खोः' इत्यनुवर्तते । स्पन्दाभाववृत्तौ स्तम्भे खोरादेः संयुक्तस्य थकारो भवति[9] ॥ लित्वान्नित्यम् । थम्भो । सात्त्विकभावः ।

स्त्यानचतुर्थे च तु ठः ॥ १ । ४ । १३ ॥

---

१ ख for खल् M., R. २ M. and R. drop लित्वान्नित्यम्. ३ ख for खल् M., R. ४ M. drops तिण्हो. ५ सुक्खो M. ६ सुक्को M. ७ संयुक्तस्य खोः for खोरादेः संयुक्तस्य R. ८ भवति M. ९ थकारः स्यात् My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनयोश्चकारादस्पन्दवृत्तौ स्तम्भे च स्तोष्ठत्वं तु[1] भवति । ठंभो । सात्त्विकभावः । पक्षे उक्तं थत्वम् । चउट्ठो । पक्षे रेफलोपे द्वित्वे च[2] चउत्थो । अत्रैव 'तु मयूरचतुर्थ—'इत्यादि सूत्रेणादेरचः परेण सस्वरव्यञ्जनेन सहितस्य स्थाने[3] वा ओत्वे चोट्ठो । चोत्थो इत्यप्यस्ति । सौराष्ट्रमहाराष्ट्रयोः 'लवराम्—'इति रेफलोपे उभावपि ष्टौ तथा च 'ष्टः' इति ठत्वे ऐच एङि सोरट्ठो । महाराष्ट्रे तु ठत्वे

हश्च महाराष्ट्रे ह्रोर्व्यत्ययः ॥ १ । ४ । १११ ॥

अत्र ह्रोः हकाररेफयोः व्यत्ययः स्थितिपरिवृत्तिर्भवति । एकस्थाने एको भवतीत्यर्थः । हश्च दीर्घस्य ह्रस्वोपि[4] भवति । मरहट्ठो ॥

विसंस्थुलास्थ्यधनार्थे ॥ १ । ४ । १५ ॥

'ठः' इत्यनुवर्तते । विसंस्थुलास्थिशब्दयोरधनवाचिन्यर्थशब्दे च स्तोः ठो[5] भवति । विसंठुलो । अर्थः । अट्ठो । प्रयोजनम् । धने तु अत्थो ॥

चः कृत्तिचत्वरे ॥ १ । ४ । १६ ॥

अनयोर्युक्तस्य चः स्यात् । कृत्तिधरः । किच्चिहरो[6] । कृपादित्वात्[7] ऋतः 'इत्कृपगेः' ईतीत्वम्[8] । चत्वरपरः । चच्चरपरो ॥

त्योचैत्ये ॥ १ । ४ । १७ ॥

'चः' इत्यनुवर्तते । चैत्यवर्जितस्य त्यस्य चः स्यात् । प्रत्ययः । पच्चओ । अमात्यः । अमच्चो । अत्र 'संयोगे' इति ह्रस्वः । 'अचैत्ये' इति किम् । चेइअं । अत्र 'स्याद्भव्य—' इत्यादिना[9] यात् प्रागित्वम् । ऐचे[10] एत्वं यतलोपश्च । अत्रैव दैत्यादित्वात् ऐचः अइ इत्यादेशे चइअं । चइत्तं इत्यप्यस्ति ॥

---

१ विकल्पेन भवति M. २ R. drops च. ३ एकस्य स्थाने M. ४ R. drops अपि. ५ ठः स्यात् My., P. ६ किच्चिहलो M. ७ अत्र 'ऋत—' R. ८ इति कृपादित्वादीत्वं R. ९ भवेदित्यादिना M. १० ऐच एङित्येत्वम् M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्सवऋक्षोत्सुकसामर्थ्ये छो वा ॥ १ । ४ । १९ ॥

एषु स्तोश्छत्वं वा स्यात् । उच्छवो । पक्षे

'दोदोनुत्साहोत्सन्न ऊ शसि' ॥ १ । २ । ६१ ॥

उदः उदित्युपसर्गसंबन्धिनः उकारस्य शसि शकारसकारयोः परयोः दा दकारेण सह ऊ ऊकारः स्यात् । इत्यूत्वे ऊसवो । ऋक्षः । रिच्छो । पक्षे 'क्षः' इति क्षस्य खत्वे रिक्खो । उभयत्रापि 'ऋतोत्' इत्यतः 'ऋतः' इत्यधिकृत्य

केवलस्य रिः ॥ १ । २ । ९० ॥

व्यञ्जनेनासंयुक्तस्य ऋतो रिरित्यादेशः स्यात् । इति रिः । उत्सुकः । उच्छुओ । ऊसुओ । अत्रापि 'दोर्द—'इत्यूकारः । दृष्टसामर्थ्यः । दिट्ठसामच्छो । पक्षे दिट्ठसामत्थो ॥

क्षण उत्सवे ॥ १ । ४ । २१ ॥

'छः' इत्यनुवर्तते । उत्सववाचिनि क्षणशब्दे स्तोश्छः स्यात् । छणो । उत्सवे किम् । खणो । क्षणः कालः ।

क्षुण्णस्थगितदक्षर्सदृशेषु स्पृहादित्वात् स्तोश्छत्वे च्छुण्णो । क्षुण्णो । छइओ । स्थगितः । अत्र गतयोर्लोपः । दच्छो । दक्षः ॥ 'केवलस्य रिः' इत्यतः 'रिः' इत्यधिकृत्य 'ऋतोत्' इत्यतः 'ऋतः' इति च

दृश्यक्सक्किनि ॥ १ । २ । ९१ ॥

अ क्स क्विन् एतदन्ते दृशिधातौ ऋतो रिरित्यादेशः स्यात् । इति क्सान्तदृशिधातोर्ऋकारस्य रौ सति 'शोर्लुसयवरशोर्दिः' इत्यतः 'दिः' इत्यधिकृत्य 'आदेः' इति च

---

१ My. and P. omit the portion from ऊ शसि to ऊकारः स्यात्. २ इत्यधिकृत्य M., R. ३ रीत्यादेशः M. ४ उच्छुवो M. ५ ऊसुवो M. ६ दोदोनुत्साहोत्सन्नदे इति उद ऊकारः M. ७ भवति R. ८ सदृक्षेषु R. ९ °त्यधिकृत्य M., R. १० इति च M., R. ११ °त्या-देशः स्यात् My., P. १२ रिः इति सति M. १३ M. drops इत्यतः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु समृद्ध्यादौ ॥ १ । २ । १० ॥

समृद्ध्यादिष्वादेरवर्णस्य दीर्घो वा स्यात् । इति समृध्यादिपाठाद्वा दीर्घे । सारिच्छो । सरिच्छो । सदृक्षः ॥

थ्यश्चत्सप्सामनिश्चले ॥ १ । ४ । २३ ॥

निश्चलव्यतिरिक्तानां थ्यादीनां छः[1] स्यात्[2] । भुक्तपथ्यः । भोत्तपच्छो[3] । पश्चिमः । पच्छिमो । मत्सरः । मच्छरो । अवीप्सः । अविच्छो । इत्यादि । 'अनिश्चले' इति किम् । णिच्चलो । अत्र 'कग—' इति शलोपशेषद्वित्वे[4]

द्यय्यर्या जः ॥ १ । ४ । २४ ॥

एषां जः स्यात् । अनवद्यः । अणवज्जो । द्योतः । जोओ । जय्यः । जज्जो । क्षय्यः । खज्जो । पर्यायः । पज्जाओ । इत्यादि ॥

ध्यह्योर्झल् ॥ १ । ४ । २६ ॥

अनयोर्झत्वं लित्स्यात् । ध्यः । उपाध्यायः । उवज्झाओ । अत्र 'पो वः' । 'संयोगे' इति ह्रस्वश्च[5] । विध्यः । विज्झो । मध्यमः । मज्झिमो । अत्र 'मध्यमकतमे च' इत्यतः इः । ह्यः । सह्यः । सज्झो । इत्यादि ॥

र्तस्याधूर्तादौ टः ॥ १ । ४ । ३० ॥

र्तस्य टः स्यात् धूर्तादीन् वर्जयित्वा । कैवर्तः । केवट्टो । संवर्तितः । संवट्टिओ[7] । 'अधूर्तादौ' इति किम् । धूर्तः । धुत्तो । धूर्तादि—[6]

धूर्त । संवर्तन । वार्ता । प्रवर्तन । मुहूर्त । मूर्त । आवर्तक । संवर्तक । वार्तिक । वर्तिका । निवर्तन । आवर्तन । विवर्तन । प्रवर्तक । मूर्ति । उत्कर्तित । निवर्तक । कीर्ति । कार्तिक । इत्यादि ।[8]

---

१ त्स M. २ छो भवति M. ३ भुत्तपच्छो M. ४ लोपशेषद्वित्वे M. ५ M. has इति वत्वम् after it. ६ M. drops च. ७ संवट्टओ. M. ८ धूर्तसंवर्तवार्ताश्च मूर्तवर्तकवार्तकाः । आवर्तनमुहूर्तौ च प्रवर्तकनिवर्तकौ ॥ कीर्तिः कार्तिकमूर्ती च उत्कीर्त्यादीनि तद्गणे ॥ M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुलाधिकारात् वार्ताशब्दे टत्वमपि भवति ॥

प्रवृत्तसंदष्टमृत्तिर्धूर्तेष्टापत्तनकदर्थितोष्ट्रे ॥ १ । ४ । ३१ ॥

'टः' इत्यनुवर्तते । एषु स्तोष्टत्वं स्यात् । प्रवृत्तः । पवट्टो । अत्र 'ऋतोत्' इत्यत्वम् । संदष्टः । संदट्टो । कदर्थितशब्दे 'वेतस इति तोः' इत्यतः 'तोः' इत्यधिकृत्य

कदर्थिते खोर्वः ॥ १ । ३ । ४४ ॥

असिन्नादेस्तवर्गस्य वः स्यात् । इति दस्य वत्वे । कवट्टिओ । उष्ट्रः । उट्टो । सन्दष्टोष्ट्रयोः 'ष्टः' इत्यस्यापवादः ॥

डल्[2] फोर्मर्दितविच्छर्दच्छर्दिकपर्दवितर्दिगर्तसंमर्दे ॥१ । ४ । ३३ ॥

एषु द्वितीयस्य संयुक्तस्य नित्यं डो भवति । मर्दितः । मड्डिओ । विच्छर्दः । विच्छड्डो । कपर्दः । कवड्डो । गर्तः । गड्डो । संमर्दः । संमड्डो ॥

ढोर्धर्द्धिश्रद्धामूर्ध्नि[3] तु ॥ १ । ४ । ३४ ॥

एषु स्तोर्ढो वा स्यात् । अर्धभागः । अड्ढहाओ । पक्षे अद्धहाओ[4] ॥

दग्धविदग्धवृद्धिदंष्ट्रावृद्धे ॥ १ । ४ । ३५ ॥

'ढः' इत्यनुवर्तते । एषु स्तोर्ढो भवति । दग्धः । दड्ढो । विदग्धः । विअड्ढो । वृद्धशब्दे ऋत्वादिपाठादुत उत्वे । वुड्ढो । बहुलाधिकारात् क्वचिन्न भवति । वुद्धकविणिरूविअं । वृद्धकविनिरूपितम् ॥

पञ्चदशदत्तपञ्चाशति णः ॥ १ । ४ । ३६ ॥

एषु स्तोर्णकारो[5] भवति । दत्तः । दिण्णो । अत्र सन्नादिपाठादत इत्वम् ॥

ज्ञम्नोः ॥ १ । ४ । ३७ ॥

---

१ °केष्टा° M. २ डो for डल् M. ३ °र्द्धं° M. ४ अर्धहाओ P., My. ५ °र्णकारः स्यात् M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ण इत्यनुवर्तते । एतयोर्णः स्यात् । सुज्ञानः । सुण्णाणो । ज्ञातः । णाओ । अत्रैव

जाणमुणौ ज्ञः ॥ २ । ४ । १३० ॥

ज्ञा अवबोधन इत्यस्य जाण मुण इत्यादेशौ स्तः[1] । जाणत इति स्थिते 'आदेर्लुक्यात्खोः—' इत्यतः 'अतः' इत्यधिकृत्य[2]

क्ते ॥ २ । ४ । १८ ॥

क्तप्रत्यये पर[3]तोत इत्वं स्यात्[4] । इतीत्वे । जा[5]णिओ । ज्ञातः । वि-ज्जा[6]णमओ । विज्ञानमयः । विण्णाणमओ इत्यप्यस्ति । नात्र 'ज्ञो ञोविज्ञाने' इति प्रतिषेधः । जाणादेशस्य धात्वादेशरूपत्वात् । बहुलाधिकाराज्जाणादेशो विकल्प्यत इति केचित् । तेन विण्णाणादयः सिद्धाः । म्नः । प्र[7]द्युम्नः । पज्जुण्णो । धृ[8]ष्टद्युम्नः । ध[9]ट्टज्जुणो । 'कर्णिकारे णो वा' इत्य[10]तः 'णः' इत्यधिकृत्य 'रितो द्वित्वल्' इत्यतः 'द्वित्वल्' इति 'दीर्घान्न[11]' इत्यतः 'न' इति च

धृ[12]ष्टद्युम्ने ॥ १ । ४ । ८९ ॥

अत्रादेशस्य णस्य द्वित्वं न[13] स्यात् । इति णस्य न[14] द्वित्वम् । पृ[15]थक्त्वान्नित्यम् ॥

स्तवे थो वा ॥ १ । ४ । ३८ ॥

अत्र[16] संयुक्तस्य थो वा स्यात् । थ[17]वो[18] । पक्षे 'कग—' इति सलोपे । त[19]वो ॥

---

१ भवतः M. २ 'मोमसुष्विच' इति च is added after this in M. ३ परे M. ४ भवति M. ५ ज्ञातः । जाणिओ । M. ६ विज्ञानमयः । विजाणमओ । P. ७ प्रद्युम्नादयः M. ८ दृष्टद्युम्नः । R., My., P. ९ दट्ठजणो R., My., P.; धट्टज्जुण्णो M. १० इत्यधिकृत्य M. ११ M. and My. drop 'दीर्घान्न' इत्यतः 'न' इति च. १२ R. has न धृष्ट°. १३ M. omits न. १४ नित्य for न M. १५ पृथक्त्वान्नित्यम् is dropped in M. १६ अत्र स्तोः संयुक्तस्य M. १७ M. has स्तवः । before it. १८ थओ M. १९ तओ M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रो हश्चोत्साहे ॥ १ । ४ । ३९ ॥

'थः' इत्यनुवर्तते । 'वा' इति च । अत्र स्तोर्थो वा स्यात् तत्सं-नियोगेन [1]हस्य च रेफः । उत्थारो । पक्षे '[2]थ्यश्चत्स—' इत्यादिना त्सस्य छः । [3]उच्छाहो ॥

स्तः ॥ १ । ४ । ४० ॥

स्तस्य थः स्यात् । हस्तः । हत्थो । प्रस्तरः । पत्थरो ॥

पर्यस्ते टश्च ॥ १ । ४ । ४१ ॥

अत्र स्तस्य टः स्याच्चकारात्थश्च ॥ 'लो वार्द्रे' इत्यतः 'लः' इत्यधिकृत्य

र्यः सौकुमार्यपर्यङ्कपर्यस्तपर्याणे ॥ १ । ४ । ५५ ॥

एषु र्यस्य लः स्यात् । इति र्यस्य लत्वे । पर्यङ्कः । पलङ्को । [4]पॅ-ल्लङ्को । पल्लत्थो । पर्यस्तः । [5]सौकुमार्ययुक्तः । सोअमल्लजुत्तो । अत्र ऐच एङ् । मुकुलादिपाठादुकारस्याकारः कलोपश्च । कृतपर्याणः । कअपल्लाणो । अत्रैव 'मनयाम्' इति यलोपे '[6]भ्यौ बृहस्पतौ तु बहोः' इत्यतः 'तु' इत्यनुवर्तमाने

रो डा पर्याणे ॥ १ । ३ । ७६ ॥

अत्र रेफस्य डा वा स्यात् । [8]कअपडाणो । 'वात्मभस्मनि पः' इत्यतः 'पः' इत्यधिकृत्य

[9]ड्मक्मोः ॥ १ । ४ । ४३ ॥

एतयोः [10]पंः स्यात् । कुड्मलः । '[11]कुंपंळो । अत्र वक्रादित्वाद्बिन्दुः ।

---

१ हकारस्य M. २ 'थ्यश्च' इत्यादिना M. ३ M. has उत्साहः before it. ४ पल्लङ्को My. ५ Before this M. has प्रसङ्गात् सौकुमार्यपर्याणयो-रपि रूपनिर्णयः क्रियते । ६ ह्यौ M. ७ M. has इति डादेशे before it. ८ M. has कअवड्डाणो इत्यपि भवति. ९ क्मोः M. १० पो भवति । M. ११ कुंपळो M.

रुक्मिणीरमणः । रुप्पिणीरमणो । क्वचित्थोपि[1] । रुत्थिणीरमणो[2] । क्वचि-न्मोपि[3] । रुम्मिणीरमणो ॥

ष्पस्पोः फः ॥ १ । ४ । ४४ ॥

अनयोः फः स्यात्[4] । निष्पापः[5] । णिप्फावो । निष्पेषः । णिप्फेसो । स्पन्दः[6] । फन्दो । इत्यादि ॥

भीष्मे ॥ १ । ४ । ४५ ॥

'फः' इत्यनुवर्तते । अत्र ष्मोः फः स्यात्[7] । भिप्फो । भीष्मः । 'श्लेष्मबृहस्पतौ तु फोः' इत्यतः[8] 'तु' इत्यधिकृत्य

ग्मो मः ॥ १ । ४ । ४७ ॥

ग्मस्य मो वा स्यात् । तिग्मकिरणः । तिम्मकिरणो । पक्षे मलोपे तिग्गकिरणो ॥

न्मः ॥ १ । ४ । ४८ ॥

'मः' इत्यनुवर्तते । न्मस्य मः[9] स्यात् । मन्मथ इति स्थिते 'बो वः' इत्यतः[10] 'वः' इत्यधिकृत्य 'त्वभिमन्यौ मः' इत्यतः 'मः' इति च

मन्मथे ॥ १ । ३ । ६६ ॥

अत्र मस्य वः स्यात् । थस्य हत्वं च[11] । वम्महो ॥

ताम्राम्रयोर्म्बः[12] ॥ १ । ४ । ४९ ॥

अनयोस्तोर्म्बः[13] स्यात् । तम्बमओ[14] घटः[15] ॥

इन्मयटि ॥ १ । ३ । ६९ ॥

---

१ कचिद्वोपि M. २ रुव्विणीरमणो M. ३ M. drops क्वचिन्मोपि । रुम्मिणीरमणो । ४ फो भवति M. ५ निष्पावः P., My., R. ६ M. has स्पर्शः । फंसो । वक्रादित्वाद्बिन्दुः before इत्यादि । ७ भवति M. ८ इत्यधिकृत्य M. ९ मो भवति M. १० इति च M. ११ M. drops च. १२ म्भः M. १३ अनयोर्युक्तस्य मकारपरो भकारो भवति M. १४ तम्भमओ M. १५ M. drops घटः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मयट्प्रत्यये यस्य वा इत् स्यादिति विक[1]ल्पादिकारः । तम्बमइओ । ताम्रमय इत्यर्थः । आम्रः । [2]अम्बो ॥

ऊर्ध्वे भो वा ॥ १ । ४ । ५० ॥

अत्र स्तोर्भो वा स्यात् । [3]अतिऊर्ध्वः । अइउब्भो । अत्र तलोपे 'न यण्' इति संधिप्रतिषेधः । पक्षे । [4]रवलोपद्वित्वे । अइउद्धो ॥

वश्च विह्वले ॥ १ । ४ । ५२ ॥

[5]अत्रापि स्तोर्वस्य भो वा स्यात् च्छश्च । विब्भलो । विच्छलो । [6]पक्षे विहलो । [7]अत्र 'अह्रः' इति निषेधात् शेषहकारस्य द्वित्वं न भवति ॥

डेरो ब्रह्मचर्यसौन्दर्ये च ॥ १ । ४ । ५७ ॥

'र्यः सौकुमार्य—' इत्यतः 'र्यः' इत्यनुवर्तते । अनयोर्डित् एर इत्[8]यादेशः स्यात् । टि[9]लोपः । अणुट्ठिअब्ब[10]म्हचेरो । अनुष्ठितब्रह्मचर्यः । दिट्ठसोंदेरो । दृष्टसौन्दर्यः ॥

वा पर्यन्ते ॥ १ । ४ । ५८ ॥

'र्यः' इत्यनुवर्तते । 'डेरः' इति च । पर्यन्ते र्यस्य डेरो वा स्यात् । पेरंतो । पक्षे । सामान्यो जः । पज्जन्तो ॥

धैर्ये रः ॥ १ । ४ । ५९ ॥

धैर्ये र्यस्य रो वा स्यात् । धैर इति स्थिते । 'ऐच एङ्' इत्यतः 'ऐचः' इत्यधिकृत्य

ई धैर्ये ॥ १ । २ । १०९ ॥

---

१ विकल्पेन इकारः M. २ अम्भो M. ३ अत्यूर्ध्वः M. ४ रवलेति वरेफलोपशेषद्वित्वे M. ५ M. has 'भः' इत्यनुवर्तते । अत्र संयुक्तसंबन्धिनो वस्य &c. ६ M. has वलोपे after पक्षे. ७ शेषस्यापि हकारस्य द्वित्वं न भवति 'अह्न' इति निषेधात् M. ८ °त्यादेशो भवति M. ९ M. drops टिलोपः १० ब्बह्मचरो My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]अत्रैकारस्येकारः स्यात् । [2]गेअधीरो । गतधैर्यः । पक्षे जः । गअधिज्जो ॥

[3]तूर्यदशार्हशौण्डीर्ये ॥ १ । ४ । ६० ॥

एषु स्तो [4]रः स्यात् । तूरघोसो । तूर्यघोषः । दसारो । दशार्हः । पआसिअसोण्डीरो । [5]अत्र 'अह्रः' इति रस्य न द्वित्वम् । प्रकाशितशौण्डीर्यः ॥

बाष्पे होश्रुणि ॥ १ । ४ । ६१ ॥

अश्रुवाचिनि बाष्पशब्दे [6]स्तोर्हः स्यात् । बाहो । '[7]अश्रुणि' किम् । बप्फो । [8]ऊष्मा । अत्र 'ष्पस्पोः—' इति फः ॥

[9]कार्षापणे ॥ १ । ४ । ६२ ॥

अत्र स्तोर्हः [10]स्यात् । काहावणो । कहावणो । कहावणो इत्यत्र 'संयोगे' इति पूर्वमेव ह्रस्वः पश्चादादेशः । यद्वा कर्षापणशब्दाद्वा सिद्धिः ॥

न वा तीर्थदुःखदक्षिणदीर्घे ॥ १ । ४ । ६३ ॥

[11]एषु स्तोर्हत्वं न वा विकल्पेन भवति । तीह इति स्थिते । 'ईतः काश्मीरहरीतक्योर्लालौ' [12]इत्यतः 'ईतः' इत्यधिकृत्य

तीर्थे ह्यूत् ॥ १ । २ । ५५ ॥

अत्र युक्तस्य हि हकारे सति [13]ईकारस्य [14]ऊकारः स्यात् । [15]इत्यूकारे । कअतूहो । कृततीर्थः । पक्षे । कअतित्थो । दुहो । दुःखम् । अत्र

---

१ अत्रैकार्यस्येकारः P., R. २ M. has इत्तीकारे before this. ३ M. has रः' इत्यनुवर्तते before it. ४ रो भवति M. ५ M. has प्रकाशितशौण्डीर्यः । अत्र शेषस्यादेशस्य वा रेफस्य न द्वित्वम् । 'अह्रः' इति प्रतिषेधात् । ६ स्तोर्हो भवति M. ७ M. has नेत्रजलम् before 'अश्रुणि'. ८ ऊष्मो M. ९ M. has before it 'हः' इत्यनुवर्तते । १० भवति M. ११ M. has 'हः' इत्यनुवर्तते before it. १२ इत्यधिकृत्य M. १३ ईतः before ईकारस्य M. १४ ऊत् before ऊकारः M. १५ इतीकारस्थाने ऊकारे M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखशब्दस्य कुलादिपाठाद्विकल्पेन पुंस्त्वम्[1] । दुहिओ । दुक्खिओ । दुःखितः । दक्षिणशब्दे हत्वे 'शोर्लुप्तयवरशोर्दिः' इत्येतः 'दिः' इत्यधिकृत्य[2]

हे दक्षिणेस्य ॥ १ । २ । ९ ॥

अत्र युक्तस्य हे सत्यादेरवर्णस्य दीर्घः स्यात् । दाहिणो । हत्वाभावे दक्खिणो[3] । दीर्घशब्दे हत्वे दीहो । 'नवैकाद्वा' इत्यतः 'वा' इति 'स्वार्थे तु कश्च' इत्यतः 'स्वार्थे' इति चाधिकृत्य[4][5]

रो दीर्घात् ॥ २ । १ । २४ ॥

दीर्घात् 'स्वार्थे' रो वा स्यात् । दीहरो । हत्वाभावे रेफलोपद्वित्व-ह्रस्वाः । दिग्घो । अत्र सर्वस्य शेषस्यादेशस्य वा हस्य न द्वित्वम्[6] ॥

ह्लो ल्हः ॥ १ । ४ । ६६ ॥

ह्लकारस्य लाक्रान्तहकारः स्यात् । प्रह्लादः । पल्हाओ । अत्र 'प्रायो लुक्–' इति दलोपः । कह्लारपरः । कल्हारपरो ॥

श्मष्मस्मह्मामस्मररश्मौ म्हः ॥ १ । ४ । ६७ ॥

श्मादीनां म्हादेशः[7] स्यात् स्मररश्मिशब्दौ वर्जयित्वा । काश्मीरः । कम्हारो ॥

काश्मीरे म्भः ॥ १ । ४ । ५३ ॥

अत्र स्तोर्म्भो वा स्यात्[8] । कम्भारो । अत्रोभयत्रापि

ईतः काश्मीरहरीतक्योर्लालौ ॥ १ । २ । ५१ ॥

एतयोरीकारस्य यथाक्रमं आ अ इत्यादेशौ लितौ स्तः । इत्याकारः । ग्रीष्मः । गिम्हो । विस्मयः । विम्हओ[9] । अस्मादृशः । अम्हारिसो । अत्र 'दृश्यक्सकीनि' इति ऋकारस्य रिकारः[10] । दलोपश्च ।

---

१ पुंलिङ्गता M. २ इत्यधिकृत्य M. ३ M. has खत्वे before दक्खिणो. ४ इत्यधिकृत्य M. ५ इति चाधिकृत्य M. ६ M. adds अह इति प्रतिषेधात्. ७ म्हादेशो भवति M. ८ म्भ इत्यादेशो वा स्यात् M. ९ विम्मओ P. १० रिः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्म । ब्राह्मणः । बम्हणो । बाम्हणो । अत्रोत्खातादिपाठसमये 'ब्राह्मण-पूर्वाह्णयोरपीच्छन्त्यन्ये' इति वचनाद्विकल्पेनाकारस्य ह्रस्वः । इदं वचनं 'संयोगे' इति प्राप्तह्रस्वविकल्पार्थम् । 'असमररश्मौ' इति किम् । सरो । रस्सी ॥

पक्ष्मणि ॥ १ । ४ । ६८ ॥

'म्हः' इत्यनुवर्तते । अत्र स्तोर्म्हः स्यात् । पक्ष्मललोचनः । पम्हलळोअणो ॥

श्नष्णस्नह्नह्णक्ष्णां ण्हः ॥ १ । ४ । ६९ ॥

एषां ण्हादेशः स्यात् । प्रश्नः । पण्हो । कृष्णः । कण्हो । स्नातः । ण्हाओ । प्रस्नवः । पॅण्हवो । ज्योत्स्नापूरः । जोॅण्हाऊरो । अपह्नवः । अवण्हओ । पूर्वाह्णः । पुव्वण्हो । पुव्वाण्हो । अत्रापि ब्राह्मणशब्दवद् वा ह्रस्वः । अपराह्णः । अवरण्हो । श्लक्ष्णः । सण्हो । लण्हो इत्यपि केचित् ॥

सूक्ष्मे ॥ १ । ४ । ७० ॥

अत्र स्तोर्ण्हः स्यात् । सुण्हो । 'हश्चौत्कुतूहले' इत्यतः 'औत्' इत्यनुवर्तमाने

सूक्ष्मेद्वोतः ॥ १ । २ । ६७ ॥

अत्र ऊत ओत्वं वा स्यात् । सोण्हो । अत्वपक्षे सण्हो ॥

आश्लिष्टे लधौ ॥ १ । ४ । ७१ ॥

अत्र युक्तयोर्यथाक्रमं लधौ स्तः । श्लीत्यस्य लः । ष्ट इत्यस्य धः । आलिद्धो ॥

टठौ स्तब्धे ॥ १ । ४ । ७२ ॥

---

१ प्राप्तह्रस्वस्य विक° M. २ भवति M. ३ भवति M. ४ पह्नवो My. ५ जोह्नाऊरो My. ६ अवह्नवो My. ७ M. inserts उत्खातादिपाठाद्विकल्पेन ह्रस्वे । ८ श्नक्ष्णः M. ९ भवति M. १० इत्यनुवर्तते M. ११ ओतः M. १२ सोण् R. १३ My. drops अत्वपक्षे । सण्हो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र युक्तयोर्यथाक्रमं टठौ भवतः । टट्ठो । स्तब्धः ॥

तो ढो रश्चारब्धे तु ॥ १ । ४ । ७३ ॥

आरब्धे युक्तस्य तो वा स्यात् । तत्सन्नियोगेन रस्य च ढः । आढत्तो । पक्षे । आरद्धो । अत्र वबयोरभेदन्यायेन 'लवराम्—' इति वलोपद्वित्वे

शोर्लुक्स्वोः स्तम्बसमस्तनिःस्पृहपरस्परश्मशानश्मश्रुणि ॥ १ । ४ । ७५ ॥

स्तम्बादिषु शोः शषसानामादौ वर्तमानानां संयुक्तसंबन्धिनां लुक् स्यात् । तम्बो । समत्तो । णिप्पिहो । अत्र कृपादित्वादृत इत्वम् । इदं सूत्रं 'स्तः' इति सूत्रस्य 'ष्पस्पोः—' इति सूत्रस्य 'श्मष्म—' इत्यादि-सूत्रस्य चापवादकम् ॥

श्चस्य हरिश्चन्द्रे ॥ १ । ४ । ७६ ॥

अत्र[1] श्चस्य लुक् स्यात् । हरिअंदो ॥

धात्रीद्रे रस्तु ॥ १ । ४ । ८० ॥

धात्रीशब्दे द्रशब्दे च रेफस्य वा[2] लुक् स्यात् । धात्रीरमणः । धत्तीरमणो । लुगभावे । धारीरमणो । अत्र 'कग—' इति तलोपः । ह्रस्वात् प्रागेव रेफलोपे । धाईरमणो[3] । द्रे । चन्द्रः । चन्दो । चन्द्रो । रुद्रः । रुद्दो । रुद्रो । इत्यादि । ह्रदशब्दे विशेषः । 'हश्च महाराष्ट्रे ह्रोर्व्यत्ययः' इत्यतः 'व्यत्ययः' इत्यधिकृत्य

ह्रदे दहयोः ॥ १ । ४ । ११५ ॥

अत्र देहयोर्व्यत्ययः[4] स्यात्[5] । द्रह इति स्थिते । अत्रापि द्रशब्दस्य विद्यमानत्वाद् विकल्पेन रेफलोपे । दहो । द्रहो । केचिन्नेच्छन्ति रेफलोपम् । द्रहशब्दः संस्कृतेपीति केचित् । द्रहादयस्तरुणपुरुषवाचका इत्यन्ये । भो द्रहो । भो द्रह ॥

---

१ M. has लुगनुवर्तते before it. २ लुग्वा स्यात् M. ३ धातीरमणो My. ४ हेर्व्यत्ययः M. ५ दकारहकारयो° M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्स्य मध्याह्ने ॥ १ । ४ । ८१ ॥

[1]अत्र हस्य लुग्वा स्यात् । मज्झण्णो । अत्र हस्य लोपे नस्य णत्वम् । शेषस्य[2] द्वित्वम् । 'संयोगे' इति ह्रस्वः[3] । पक्षे । मज्झण्हो ॥

ज्ञो ञोविज्ञाने ॥ १ । ४ । ८२ ॥

ज्ञसंबन्धिनो ञस्य लुग्वा स्यात् । न[4] तु विज्ञाने । सुज्ञानः । सुज्जाणो । पक्षे 'ज्ञम्नोः' इति णत्वम् । सुण्णाणो । सर्वज्ञः । सवज्जो । पक्षे पूर्ववणत्वे । अत्र 'उलुध्वनिगवयविष्वचि वः' इत्यतः[5] 'उल्' इत्यधिकृत्य 'हे दक्षिणेस्य' इत्यतः 'अस्य' इति च

ज्ञो णोभिज्ञादौ ॥ १ । २ । १७ ॥

अभिज्ञादिषु ज्ञकारादेशस्य णस्य संबन्धिनः अस्य उत्वं लित् स्यात् । सव्वण्णू । आत्मज्ञः । अप्पज्जो[6] । अप्पण्णू । अत्र 'वात्मभस्मनि पः' इति त्मस्य पादेशः । दैवज्ञः । देव्वज्जो । देव्वण्णू । दैवशब्दस्य वैरादिपाठादैकारस्य वा अ इ इत्यादेशे दइवज्जो । दइवण्णू[7] । एवमिङ्गितज्ञ इत्यादि[8] । 'अविज्ञाने' इति किम् । विण्णाणं । एषां ज्ञकारादेशणकारसंबन्धिनो[9]कारस्य उत्वं दृश्यते । तेभिज्ञादयो मनोज्ञाज्ञाभिज्ञप्रज्ञासंज्ञाविज्ञानेषु ज्ञस्य ण एव । तथा च । मणण्णू । अण्णू । अहिण्णू । प्रज्ञा[10] । पण्णा । संज्ञा[11] । सण्णा । विज्ञानम्[12] । विण्णाणं । अत्रैव 'जाणमुणौ ज्ञः' इति ज्ञाधातोर्जाणादेशे विज्जाणमित्यप्यस्ति । 'अविज्ञाने' इति प्रतिषेधस्तु ज्ञो ञो विषय एव । न तु जाणादेशविषयः । आज्ञप्तिः । आणत्ती । आज्ञापनम् । आणावणं । अत्रापि ण एव ॥

रात्रौ ॥ १ । ४ । ८४ ॥

[13]रात्रिशब्दे युक्तस्य लुग्वा स्यात् । रात्रिचरः । राइअरो । रतिअरो ॥

---

१ M. has धात्रीद्रेरस्तु' इत्यतः 'तु' इत्यनुवर्तते before it. २ शेषद्वित्वम् M. ३ ह्रस्वश्च M. ४ अविज्ञाने विज्ञानशब्दे न भवति M. ५ इत्यधिकृत्य M. ६ अप्पज्जो R. ७ इत्याद्यपि भवति for दइवण्णू M. ८ इत्याद्यपि M. ९ संबन्धिनोवर्णस्य M. १० M. drops प्रज्ञा. ११ M. drops संज्ञा. १२ M. drops विज्ञानम्. १३ M. has लुगनुवर्तते before it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ द्वित्वविधिः ॥

'रितो द्वित्वल्' इत्यतः[1] 'द्वित्वल्' इत्यधिकृत्य

शेषादेशस्याह्रोचोखोः ॥ १ । ४ । ८६ ॥

संयुक्तयोरेकतरस्य लोपे योवशिष्यते स शेषः । तस्य संयुक्तादेशस्य च अह्रः हकाररेफवर्जितस्य अचः स्वरात् परस्य अखोरनादौ वर्तमानस्य द्वित्वं स्यात्[2] । शेषे । समस्तः । समत्तो । इत्यादि । आदेशे । रक्तः । रग्गो । इत्यादि । 'अह्रः' इति किम् । विह्वलः । विहळो । धैर्यम् । धीरं । 'अचः' इति किम् । वयस्यः । वअंसो । अत्र वक्रादित्वाद्बिन्दुः । 'अखोः' इति किम् । णाणं ॥

दीर्घान्न ॥ १ । ४ । ८७ ॥

लाक्षणिकादलाक्षणिकाच्च दीर्घात् परयोः शेषादेशयोर्द्वित्वं न स्यात्[3] । निश्वासः । णीसासो । अत्र 'शोर्लुप्त—' इति दीर्घविधानाल्लाक्षणिकत्वम्[4][5] । अलाक्षणिकात् । ईश्वरः । ईसरो । पार्श्वः । पासो । इत्यादि । अलाक्षणिकाद् द्वित्वाभावः प्रयोगतोनुसर्तव्यः ॥

कर्णिकारे णो वा ॥ १ । ४ । ८८ ॥

अत्र णग्रहणमुत्तरार्थम् । कर्णिकारे शेषस्य द्वित्वं वा स्यात् । कणिआरो । कण्णिआरो ॥

वा से ॥ १ । ४ । ९० ॥

[6]से समासे शेषादेशयोर्द्वित्वं वा स्यात् । णैइग्गामो[7] । णइगामो । नदीग्रामः । णइगामो इत्यत्र

दिह्रौ मिथस्से ॥ १ । १ । १८ ॥

से समासे दिह्रौ दीर्घह्रस्वौ मिथोन्योन्यं बहुलं स्तः[8] । एवं समासेषु

---

१ इत्यधिकृत्य M. २ भवति M. ३ भवति M. ४ °विधानाद्दीर्घस्य लाक्षणिकाल्लाक्ष° M. ५ M. has इत्याद्यूह्यम् after लाक्षणिकत्वम्. ६ M. has 'द्वित्वल्' इत्यनुवर्तते before it. ७ नदीग्रामः । णईगामो । णइग्गामो M. ८ भवतः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वत्र दीर्घह्रस्वयोर्व्यत्ययोनुसन्धेयः । प्रकृतमनुसरामः । कुसुमप्रकरः । कुसुमप्पअरो । कुसुमपअरो[1] ॥

प्रमुक्तगे ॥ १ । ४ । ९१ ॥

'वा से' इति सर्वमनुवर्तते । प्रमुक्तादिषु समासे यथादर्शनं व्यञ्जनस्य द्वित्वं वा स्यात् । प्रमुक्तः । पम्मुक्को । पमुक्को । अत्र 'कः शक्त—' इत्यादिना क्तोः कः । सप्पवासो[2] । सपवासो । बद्धप्फलो[3] । बद्धफळो । बद्धफलः । मळअस्सिहरिस्सिहंडो । मलअसिहरिसिहंडो । मलयशिखरिशिखण्डः । त्रैलोक्यनाथः । तेल्लोक्कणाहो । तेळोक्कणाहो । सपरितापः । सप्परितावो । सपरितावो । परवशः । परव्वसो । परवसो । प्रतिकूलः । पडिक्कूळो । पडिकूळो । अदर्शनः । अद्दंसणो । अदंसणो । अत्र वक्रादित्वाद्बिन्दुः । आकृतिगणत्वात्[4] । पफुल्लम् । प्पफुल्लं । पफुल्लं । सपरिहासम् । सप्परिहासं । सपरिहासं । इत्यादि सिद्धम् । ननु पडिकूळ इत्यत्र लोपलक्षणलक्षितत्वात् 'प्रायो लुक्—' इति कलोपः किंमिति[5] न । उच्यते । अत्र[6] सूत्रे समासे तु वाक्यविभक्त्यपेक्षया भिन्नपदत्वमपि भवतीत्युक्तत्वात् यदा भिन्नपदत्वं तदा कादीनामादित्वाल्लोपो न भवति । एकपदत्वपक्षे तु लोप एवेत्युभयमप्यस्तीति संतोष्टव्यम् ॥

दैवगेखौ ॥ १ । ४ । ९२ ॥

दैवादिष्वनादेर्यथादर्शनं व्यञ्जनस्य द्वित्वं वा स्यात् । दैवपरः । देव्वपरो । देवपरो । व्याकुलः । वाऊळ्ळो । वाउळो । नीडः । नेड्डो[7] । नेडो । अत्र 'एल्वीडनीडकीदृश—' इत्यादिना ईकारस्य एकारः[8] । निहितः । णिहित्तो । णिहिओ । स्थूलः । थुल्लो[9] । थूलो । अत्र 'कग—' इति सलोपः । ननु थुल्लो इत्यत्र '[10]स्तौ' इत्युत ओत्वं किमिति न[11] । बहुलाधिकारात् । अत्रैव

---

१ M. has इत्याद्यूह्यम् after it. २ सप्पळावो । सप्रलापः । M. ३ बद्धफलः । बद्धफळो । बद्धप्फलो । M. ४ वक्रादेश्वाकृति॰ M. ५ कस्मान्न भवति M. ६ तत्र M. ७ नेडो । नेड्डो । M. ८ ईत एत् । M. ९ थूलो । थुल्लो । M. १० स्याली for स्तौ M. ११ M. adds भवति after it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थूले रलूतश्चौत् ॥ १ । ३ । ८३ ॥

'लो ललाटे च' इत्यतः 'लः' इत्यनुवर्तते। स्थूले ऊकारस्योत् स्यात् तत्संनियोगेन लस्य च रः। थोरो। व्याहृतः। वाहित्तो। वाहिओ। अत्र कृपादित्वादृत इत्[1]। तलोपश्च। मूकः। मुक्को। मूओ। इत्यादि। दैवादिः—दैवव्याहृतव्याकुलनीडनिहितमातृक[2]कुतूहलस्थूलएकतूष्णीकमूकसेवाअस्मदीयहुतस्त्यानस्थाणु। इत्यादि ॥

तैलादौ ॥ १ । ४ । ९३ ॥

तैलादौ यथादर्शनमन्त्यस्यानन्त्यस्य व्यञ्जनस्य द्वित्वं भवति। पृथक्त्वान्नित्यम्। तैलप्रियः। तेल्लप्पिओ। मण्डूकः। मण्डुक्को। इत्यादि। तैलादि—तैलव्रीडाप्रेमस्रोतःप्रभूतमण्डूकयौवनऋजुविचै[3]किल। इत्यादि ॥

पूर्वमुपरि वर्ग[4]स्य युजः ॥ १ । ४ ।९४ ॥

वर्गसंबन्धिनो युग्वर्णस्य शेषस्यादेशस्य वा द्वित्व[5]प्रसङ्गे उपरि पूर्वाक्षरं स्यात्। वर्गाणां द्वितीयस्योपरि प्रथमं चतुर्थस्योपरि तृतीयमिति वेदितव्यम्। रुक्खो। विग्घो[6]। लच्छी। णिज्झरो। णिट्ठुलो[7]। इत्यादि बोध्यम्[8] ॥

प्राक् श्लाघाप्लक्षशार्ङ्गे ङ्लोत् ॥ १ । ४ । ९५ ॥

श्लाघादिषु ङ्लः ङकारलकारयोः प्रागत्[9] स्यात्। श्लाघायुतः। सलाहाजुओ। प्लक्षः। पलक्खो। क्षस्य खः। शार्ङ्गधरः। सारङ्गहरो ॥

क्ष्मारत्नेन्त्यहलः ॥ १ । ४ । ९६ ॥

'प्राक्' इत्यनुवर्तते। 'अत्' इति च। अनयो[10]र्युक्तस्यान्त्यहलः प्रागत् स्यात्। रत्नाकरः। रअणाअरो। क्ष्माधरः। छमा[11]हरो। अत्र 'उत्सवऋक्ष—' इत्यतः 'छः' इत्यनुवर्तते ॥

---

१ इल् M. २ मृदुत्व for मातृक M. ३ विचिकिल M. ४ वर्गयुजः M. ५ द्वित्वम्। प्रसङ्गे सति उपरि &c. M. ६ दिग्घो M. ७ M. drops णिट्ठुलो. ८ बोद्धव्यम् M. ९ प्रागत् अकारो भवति M. १० अनयोरुक्तस्या° M. ११ छमूहरो M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्ष्मायां कौ ॥ १ । ४ । २० ॥

भूवाचकक्ष्माशब्दे क्ष्मस्य छः स्यात् । अत्र यो भूवाचको मुख्यः क्ष्माशब्दः यश्च 'क्ष्मारत्नेन्त्यहलः' इत्यनेन युक्तयोर्मध्ये अकारविधाने लाक्षणिको भूवाचकः क्ष्माशब्दस्तयोर्द्वयोरपि ग्रहणम् । तेनोभयत्रापि छः ॥

स्नेहाग्न्योर्वा ॥ १ । ४ । ९७ ॥

अनयोर्युक्तस्यान्त्यहलः प्रागत्वं वा । सणेहो । पक्षे 'कग—' इति सलोपे । णेहो । अग्निवर्णः । अगणिवण्णो । पक्षे । 'मनयाम्' इति न लोपे । अग्गिवण्णो ॥

र्शर्षवज्रतप्तेष्वित् ॥ १ । ४ । ९८ ॥

र्शर्ष एतयोः वज्रतप्तशब्दयोश्च[1] युक्तस्यान्त्यहलः प्रागित्वं वा । आदर्शः । आअरिसो । पक्षे । 'लवराम्—' इति रेफलोपे 'शोर्लुप्त—' इति दीर्घः । आआसो । आदर्शः । दरिसो । दासो । इत्यादि । र्षे । वर्षजः । बरिसओ । बासओ । अत्र 'शोर्लुप्त—' इति दीर्घः । तप्तः । तविओ । तत्तो । वज्रधरः । वइअहरो । अत्र जलोपः । वज्जहरो । नात्र जलोपः ॥

हर्षामर्षश्रीह्रीक्रियापरामर्शकृत्स्नदिष्ट्यार्हे[2] ॥ १ । ४ । ९९ ॥

हर्षादिषु युक्तस्य र्हे इत्यत्रान्त्यहलः[3] प्रागित्वं स्यात् । पृथक्त्वान्नित्यम् । हरिसो । अमरिसो । श्रीधरः । सिरिहरो । तत्र[4] 'क्विपः' इतीकारस्य ह्रस्वः । ह्रीयुतः । हिरिजुओ । क्रियापरः । किरिआवरो । परामर्शः । परामरिसो । कृत्स्नः । कसिणो । अत्र 'कग—' इति तलोपः[5] । 'ऋतोत्' इत्यत्वं च । र्हे । बर्हधरः । बरिहहरो । इत्यादि ॥

स्याद्भव्यचैत्यचौर्यसमे यात् ॥ १ । ४ । १०० ॥

एषु चौर्यसमेषु संयुक्तस्य यकारात् प्रागित्वं स्यात्[6] । स्याद्वादः ।

---

१ तप्तवज्रशब्दयो° M. २ दष्ट्यार्हे My. ३ इत्यचान्त्य° M. ४ अत्र M. ५ लोपः My. ६ इत्यमनुवर्तते is in M. before this.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिआवाओ । भव्यः । भविओ । चैत्यपरः । चेइअपरो । अत्रैकारस्य एकारस्तयलोपश्च । चौर्यकुशलः । चोरिअकुसलो । चौर्यशब्दस्याञ्जल्यादिपाठाद्वा स्त्रीलिङ्गतायां चोरिआकुसलो इत्यपि । चौर्यसमास्तु—चौर्यैश्वर्यधैर्यगाम्भीर्यभार्यासौन्दर्यब्रह्मचर्यसूर्यशौर्यवीर्यवर्यचर्याचार्यपर्यङ्काः । चौर्यादिराकृतिगणः ॥

लादक्लीबेषु ॥ १ । ४ । १०१ ॥

संयुक्तस्य लात् प्रागित्वं[1] स्यात् क्लीबप्रकारेषु वर्जयित्वा[2]। क्लिष्टवासः । किलिट्ठवासो । क्लान्तमुखः । किलन्तमुहो । अत्र 'संयोगे' इति लकारस्थाकारस्य ह्रस्वः । प्लुष्टवापः । पिलुट्ठवापो । प्लोषः । पिलोसो । श्लेषः । सिलेसो । शुक्लक्लेदक्लिन्नक्लेशम्लानेत्यादि । 'अक्लीबेषु' इति किम् । क्लीबः। कीओ । विक्लवः । विक्कओ । क्लमः । कमो । प्लवः । पवो । विप्लवः । विप्पवो । शुक्लपक्षः । सुक्कपक्खो[3] । उभयं तिङन्तेपि समानम् ॥

नात्स्वप्ने ॥ १ । ४ । १०२ ॥

स्वप्ने[4] नात् प्रागित्वं स्यात् । इतीत्वे । 'पो वः' इति पस्य वत्वे च वबयोरभेदन्यायात् 'बो मः शबरे' इत्यधिकृत्य

नीवीस्वप्ने वा ॥ १ । ३ । ८५ ॥

अनयोर्वस्य मो वा स्यात् । 'स्वप्नादाविल्'[5] इत्यस्य इत्वे । सिमिणो । पक्षे । सिविणो ॥

स्निग्धे त्वादितौ ॥ १ । ४ । १०३ ॥

अत्र[6] नात् प्रागित्वमत्वं[7] च वा स्यात् । सिणिद्धो । सणिद्धो । पक्षे 'कग—' इति सलोपे । णिद्धो ॥

कृष्णे वर्णे ॥ १ । ४ । १०४ ॥

---

१ भवति M. २ न भवति for वर्जयित्वा M. ३ सुक्खपक्खो My. ४ M. has इत्वमनुवर्तते before this. ५ M. has इति वस्य मत्वे before it. ६ M. has नादित्यनुवर्तते. ७ प्रागत्वमित्वं च वा स्यात् M.

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वर्ण[1]वाचि[2]नि कृष्णशब्दे नात् प्रा[3]गदितौ वा स्तः । क[4]सिणो । कसणो । पक्षे 'श्नष्ण—' इत्यादिना ष्णस्य ण्हः । कण्हो । 'वर्णे' इति किम् । कण्हो । विष्णुः । 'अर्हत्युच—' इत्य[5]तः 'उ' इत्यधिकृत्य

सुघ्ने रात् ॥ १ । ४ । १०७ ॥

अत्र रात् प्रागुत्वं स्या[6]त् । 'मनयाम्' इति नलोपः । सुरुग्घो । सु[7]घ्नं नगरम् ॥

वा च्छद्मपद्ममूर्खद्वारे ॥ १ । ४ । १०९ ॥

ए[8]षु स्तोरन्त्यहलः प्रागुत्वं वा स्यात् । छद्मपरः । छउमपरो । पद्ममुखः । पउमसुहो । पक्षे । 'कग—' इति दलोपे म[9]कारे शिष्टे सति । 'ओदाल्यां पङ्क्तौ' इत्य[10]तः 'ओत्' इत्यधिकृत्य

पद्मे मि ॥ १ । २ । ३१ ॥

पद्मे आदेरत ओत्वं स्या[11]न्मकारे [12]परे स[13]ति । पोम्ममुहो [14]मूर्खः । मुरुहो । अत्रादावेव 'संयोगे' इति ह्रस्वः पश्चादुत्व[15]म् ॥

ईर्ज्यायाम् ॥ १ । ४ । ११० ॥

अत्रान्त्यहलः प्रागीत्वं लित् स्यात् । ज्या[16]वरः । जीआवरो । 'हृश्च महाराष्ट्रे ह्रोर्व्यत्ययः' इत्य[17]तः 'व्यत्ययः' इत्यधिकृत्य

लनोरालाने ॥ १ । ४ । ११२ ॥

'स्तोः' इति निवृत्तम् । अत्र लकारनकारयोर्व्यत्ययः स्यात् । आणालो ॥

---

१ M. has अदितौ नादिति चानुवर्तते । २ °वाचककृष्ण° M. ३ प्रागत्वमित्वं च वा भवतः M. ४ कसणो । कसिणो M. ५ इत्यधिकृत्य M. ६ भवति M. ७ M. drops सुघ्नं नगरम्. ८ M. has उत्वमनुवर्तते । 'क्ष्मारत्न–' इत्यतः 'अन्त्यहलः' इत्यनुवर्तते । before this. ९ मकारेवशिष्टे M. १० इत्यधिकृत्य M. ११ भवति for स्यात् M. १२ M. drops परे. १३ M. has इत्योत्वे after सति । १४ M. drops मूर्खः । मुरुहो. १५ M. has द्वारं । दुवारं after this. १६ ज्यापरः । R. १७ इत्यधिकृत्य M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चलयोरचलपुरे ॥ १ । ४ । ११६ ॥

‘व्यत्ययः’ इत्यनुवर्तते । अचलपुरशब्दे चलयोर्व्यत्ययः स्यात् । अचलपुरधर्मः । अलअपुर[1]धम्मो ॥

ह्ये ह्योर्वा ॥ १ । ४ । ११७ ॥

ह्यशब्दे हकारयकारयोर्व्यत्ययो वा स्यात् । सह्यः । सय्हो । पक्षे । सज्झो । इत्यादि ॥

[2]लघुके लहोः ॥ १ । ४ । ११८ ॥

‘[3]लघुकशब्दे घस्य ह्रस्वे [4]लकारहकारयोर्व्यत्ययो वा स्यात् । हलुओ । पक्षे । लहुओ । घस्य व्यत्यये कृते पदादित्वाद्धत्वं न भवतीति हकरणम् ॥

रलो[5]र्हरिताले ॥ १ । ४ । ११९ ॥

अत्र रलोर्व्यत्ययः स्यात् । हलिआरो ॥

दर्वीकरनिवहौ दव्विरअणिहवौ तु ॥ १ । ४ । १२० ॥

दर्वीकरनिवहशब्दौ यथासंख्यं दव्विरअणिहवौ तु भवतः । दव्विरओ । णिहवो ॥ सज्जन सु इति स्थिते ‘लोपः’ इत्यधिकृत्य

अन्त्यहलोश्रदुदि ॥ १ । १ । २५ ॥

शब्देष्वन्त्यहलोन्त्यव्यञ्जनस्य लोपः स्याच्छ्रदित्यव्ययमुदित्युपसर्गं च वर्जयित्वा । इति सज्जनशब्दस्य समासत्वात् समासे पदविभक्त्यपेक्षया वाक्यविभक्त्यपेक्षया चान्त्यत्वमनन्त्यत्वं च भवतीति न्यायेन यदा पदविभक्तिस्तदा तलोपे सजणो । यदा वाक्यविभक्तिस्तदा [6]लोपाभावे सज्जणो । एवं तद्गुणादयः ॥

निर्दुरि वा ॥ १ । १ । २६ ॥

निर् दुर् इत्येतयोरुपसर्गयोरन्त्यहलो लोपो वा स्यात् । निस्सहः ।

---

१ °चुर° R. २ M. has लघुशब्दे घस्य ह्रस्वे before it. ३ M. drops लघुकशब्दे घस्य ह्रस्वे. ४ अत्र लहयोः for लकारहकारयोः M. ५ वा व्यत्ययः M. ६ तलोपाभावे M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णिसहो । लोपाभावे । णिस्सहो । अत्रैव 'लवराम्—' इति रेफलोपे 'शोर्लुप्त–' इति दीर्घे । णीसहो । एवं निर्घोषादयः । दुःसहः । दुसहो[1] । दुस्सहो[2] । दुःखितः । दुहिओ । 'दोदोनुत्साहोत्सन्नऊच्छसि' इत्यतः 'ऊत्' इत्यधिकृत्य

दुरो रलुकि तु ॥ १ । २ । ६३ ॥

दुरित्युपसर्गस्य रलुकि रेफलोपे सत्यादेरुत ऊद्वा स्यात् इत्यूकारः । दूसहो । दुहिओ[3] । यदा लोपाभावस्तदा । दुःसहो[4] ॥

अन्तरि च नाचि ॥ १ । १ । २७ ॥

अन्तर् शब्दे चकारान्निर्दुरोश्चाचि परे लोपो न स्यात्[5] । अन्तरात्मा । अन्तरप्पा । निरन्तरः । णिरन्तरो । निरवशेषः । णिरवसेसो । निरवगाहः । णिरवगाहो । दुरुत्तरः । दुरुत्तरो । क्वचिदन्ता उपरि इति च दृश्यते । बिन्दुल्' इत्यधिकृत्य

हलि ङञणनानाम् ॥ १ । १ । ४१ ॥

'अन्त्यहलः' इति निवृत्तम् । एषां हलि व्यञ्जने परे बिन्दुः स्यात्[6] । पराङ्मुखः । परंमुहो । 'स्वरस्य बिन्द्वमि' इति ह्रस्वः । कञ्चुकः[7] । कंचुओ । इत्यादि ॥

स्वरेभ्यो वक्रादौ ॥ १ । १ । ४२ ॥

वक्रादिषु यथादर्शनं प्रथमादिभ्यः स्वरेभ्यः परो बिन्दुर्भवति । अत्र गणत्रयम् । वक्रादिगणः । मनस्विन्यादिगणः । उपर्यादिर्गणः[8] । तत्र[9] वक्रादिः । वक्र । कुट्मल । गुच्छ[10] । पुच्छ । बुध्न । गृष्टि । कर्कोटक । दर्शन । पशु । स्पर्श[11] । स्थ्यश्रुव्यश्रमार्जारवृश्चिकमूर्ध्ना प्रथमात् । मनस्विन्यादिः—मनस्विनीप्रतिश्रुन्मनःशिलावयस्यानां द्विती-

---

१ My. omits दुसहो. २ M. omits दुस्सहो. ३ दूहिओ M. ४ M. has इत्यप्यस्ति after it. ५ चान्नि° M. ६ भवति M. ७ कञ्चुकम् My. ८ °गणश्च M. ९ M. drops तत्र. १० पुच्छ । गच्छ । M. ११ पार्श्व for स्पर्श M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यात् । उपर्यतिमुक्तामुक्तकेत्यादीनां तृतीयात् । वंक्रः । वंको । कुं-ट्मलः । कुंपलो । अत्र 'ट्मक्मोः' इति पः । गुच्छः । गुंछो । पुच्छः । पुंछो । बुध्नः । बुंधो । कर्कोटकः । कंकोडओ । अत्र

टो डः ॥ १ । ३ । ३१ ॥

असंयुक्तस्यानादौ वर्तमानस्याचः परस्य टस्य डः स्यात् । इति डः । मार्जारः । मांजारो । क्वचिन्मज्जारो इति च दृश्यते । विंचुओ । अत्र

श्चेर्वृश्चिके ञ्चुर्वा ॥ १ । ४ । १८ ॥

अत्र श्चि इत्यस्य ञ्चु इत्यादेशो वा स्यात् । आदेशाभावे 'ध्यश्च—' इत्यादिना च्छः । 'इल्कृपगे' इतीत्वम् । विंछुओ । क्वचिच्छन्दःपूरणेपि बिन्दुः । देवंणाअसुवत्तो । देवनागसुवक्त्रः । 'डे तु किंशुके' इत्यधिकृत्य 'बिन्दुल्' इति च

वर्गेन्त्यः ॥ १ । १ । ४७ ॥

बिन्दोर्वर्ग्ये परे प्रत्यासन्नो यो वर्ग्यस्तस्यैवान्त्यो वा स्यात् । वङ्को । कुम्पलो । बुन्धो । इत्याद्यपि । अत्र बिन्दोर्वर्गान्तादेशो नित्य इति केचित् । मनस्विन्यादिः । वअंसो । वअस्यः ॥

लुङ् मांसादौ ॥ १ । १ । ४४ ॥

'बिन्दुल्' इत्येतस्य षष्ठ्यन्तविपरिणामः । 'क्त्वासुपोस्तु सुणात्' इत्यतः 'तु' इति चाधिकृत्य । बिन्दोर्मांसादिषु लुग्वा स्यात् । मांसविकारः । मांसविआरो । मांसलः । मासलो । कांस्यविकारः । कासविआरो । एषु सर्वेषु 'आचार्ये चो हश्च' इत्यतः 'हः' इत्यधिकृत्य

स्वरस्य बिन्द्वमि ॥ १ । २ । ३९ ॥

---

१ M. has वक्को । वक्रः. २ कुंपलो । कुट्मलः । M. ३ °रिति ट्मस्य पः M. ४ विंछुवो My. ५ देवं ण्णाअ° My. ६ M. has अनुवर्तते after इति च. ७ वर्गान्त्यादेशो My. ८ मांसादौ M. ९ इत्यस्य M. १० इत्यधिकृत्य M. ११ M. has मासविआरो after मांसविआरो. १२ M. has मांसलो after it. १३ M. has कंसविआरो after it. १४ इत्यधिकृत्य M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमि द्वितीयैकवचने बिन्दौ च परे स्वरस्य ह्रस्वः स्यात्[1] । मंसेलो । मंसविआरो[2] । इत्यादि[3] । मांसादि—मांस । मांसल । पांसु[4] । कांस्य । कथम् । इदानीम् । तदानीम्[5] । किं करोमि । संमुखम् । नूनम् । एवम् । इत्यादि ॥

संस्कृतसंस्कारे ॥ १ । १ । ४५ ॥

'लुक्'[6] अनुवर्तते । 'बिन्दोः' इति च । अनयोर्बिन्दोर्लुक् स्यात् । संस्कृतः । सँकओ । संस्कारः । सक्कारो[7] ॥

डे तु किंशुके ॥ १ । १ । ४६ ॥

'बिन्दोः' इत्यनुवर्तते । अत्र बिन्दोर्डानुबन्ध एकारो वा स्यात् ॥ केसुओ । किंसुओ ॥

विंशतिषु त्या श्लोपल् ॥ १ । १ । ४८ ॥

विंशतिप्रकारेषु ति इत्यव्ययेन सह बिन्दोर्लोपः स्यात्[8] । शित्वात् पूर्वस्य दीर्घः । इति विंशतिगणपठिते सिंहशब्दे बिन्दोः श्लोपलि पूर्वस्य दीर्घे । सीहो । सिंघो इत्यपि[9] नाम्नि दृश्यते । सिंघदत्तो । सिंघराओ । अत्र लित्वाद्बिन्दोर्लोपे 'नित्येपि दृश्यते' इत्युक्त्या लोपाभावः । तथा च 'हस्य घो बिन्दोः' इत्यनेन सूत्रेण बिन्दोः परस्य हस्य घः सिद्धः । विंशत्यादि–विंशति । त्रिंशत् । दंष्ट्रा । सिंह । इत्यादि । 'स्नमदामशिरोनभो नरि' इत्यतः 'नरि' इत्यधिकृत्य[10]

अक्ष्यर्थकुलाद्या वा ॥ १ । १ । ५१ ॥

अक्षिपर्यायाः कुलादयश्च नरि पुंलिङ्गे वा प्रयोक्तव्याः । लोअणो । लोअणं । णअणो[11] । णअणं । कुलादि[12]–कुलो । कुलं । वअणो । वअणं । कुलवचनमाहात्म्यात् दुःखभाजनविद्युच्छन्द इत्यादि ॥

---

१ भवति M. २ मंसविआरो । मंसलो । M. ३ इत्याद्यपि भवति M. ४ कांस्य । पांसु । M. ५ M. drops तदानीम्. ६ लुगित्यनुवर्तते M. ७ संस्कारः । सकओ । M. ८ भवति M. ९ इति च for इत्यपि नाम्नि M. १० इत्यधिकृत्य M. ११ My. drops the portion from णअणो to वअणं. १२ M. has इत्यादि after णअणं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्लीबे गुणगाः ॥ १ । १ । ५२ ॥

'वा' इत्यनुवर्तते । गुणादयः शब्दाः नपुंसके वा प्रयोक्तव्याः । गुणो । गुणं । मंडलग्गो । मंडलग्गं । गुणादि—गुण । देव । मंडलाग्र । खड्ग । कण्ठ[1] । बिन्दु । कररुह । वृक्ष । इत्यादि । पृष्ठशब्दे

'[2]स्त्रियामिमाञ्जलिगाः ॥ १ । १ । ५३ ॥

ईमान्ता अञ्जल्यादयश्च शब्दाः स्त्रीलिङ्गे वा प्रयोक्तव्याः । इत्यञ्जल्यादिपाठात् स्त्रीलिङ्गेपि प्रयोगः । पिट्ठी[3] । पिट्ठं । अत्र 'इत्कृपगे' इत्येतः 'इत्' इत्यधिकृत्य[4] 'शृङ्गमृगाङ्कमृत्युदृष्टमसृणेषु वा' इत्यतः 'वा' इति '[5]ऋतोत्' इत्यतः 'ऋतः' इति च

पृष्ठेनुत्तरपदे ॥ १ । २ । ७८ ॥

पृष्ठशब्देनुत्तरपदे ऋत इत्वं वा स्यात् । पक्षे 'ऋतोत्' इत्यत्वम् । इत्वं स्त्रियामेवेत्येके । 'अनुत्तरपदे' इति किम् । महिपट्ठं । अञ्जल्यादि—अञ्जलि । बलि । निधि । प्रश्न । रश्मि । अक्षि । ग्रन्थि । विधि । कुक्षि । चौर्य । पृष्ठ । इत्यादि । इमान्ता इत्यत्र 'पृथ्वादिभ्य इमनिज्वा' इति य इमनिच् यश्च 'त्वस्य तु डिमात्तणौ' इति त्वप्रत्ययादेश इमनिच् तयोर्द्वयोरपि तन्त्रेण ग्रहणम् । तेनोभयोरपि विकल्पेन स्त्रीत्वम् । त्वादेशस्य नित्यं स्त्रीत्व[6]मेवेच्छन्त्येके ॥

निष्प्रत्योरोत्परी माल्यस्थोर्वा ॥ १ । २ । १ ॥

निर् प्रति इत्येतावुपसर्गौ माल्यशब्दे स्थाधातौ च परे ओ परि इत्येतद्रूपौ यथासंख्यं वा स्तः[7] । निर्माल्यम् । ओमल्लं । णिम्मल्लं । प्रतिष्ठितः । परिट्ठिओ । पइट्ठिओ ॥

आदेः ॥ १ । २ । २ ॥

'आदेः' इत्यधिकारः 'यमस्तोरखोरचः' इति सूत्रात् प्रागेव वेदितव्यः ॥

---

१ कन्द M. २ M. has 'वा' इत्यनुवर्तते before it. ३ पिठी My. ४ इत्यधिकृत्य M. ५ 'ऋतोत्' इति च M. ६ °मेवलेके M. ७ भवतः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोर्लुप्तयवरशोर्दिः ॥ १ । २ । ८ ॥

यवरशषसानां लोपे येवशिष्टाः शषसास्तेषामादेरचो दीर्घः स्यात् । कश्यपः । कासवो[1] । अश्वः । आसो । विश्रमः । वीसमो । दुःशासनः । दूसासणो । शिष्यः । सीसो । कर्षकः । कासओ । वर्षः । वासो । षस्य लोपे । निष्षिक्तः । णीसित्तो । कृतसस्यः । कअसासो । विकस्वरः । विआसरो । उस्रः । ऊसो । विस्रम्भः । वीसंभो । निःसहः । णीसहो । एवं तिङन्तेप्यूह्यम् ॥ 'शोर्लुप्तयवरशोर्दिः' इत्यतः 'दिः' इत्यधिकृत्य 'हे दक्षिणेस्य' इत्यतः 'अस्य' इति च

तु समृद्ध्यादौ ॥ १ । २ । १० ॥

समृद्ध्यादिष्वादेरवर्णस्य वा दीर्घः स्यात् । पासुत्तो । पसुत्तो । प्रसुप्तः । आफंसो । अफंसो । अस्पर्शः । अत्र 'ष्पस्पोः—' इति फत्वम् । वक्रादित्वाद्बिन्दुः । पारोहो परोहो । प्ररोहः । समृद्ध्यादि—समृद्धि । प्रतिसिद्धि[2] । प्रतिपद् । प्रवासी । अभिजाति । प्रकृत । प्रवचन[3] । प्ररोह । परकीय । चतुरन्त । अस्पर्श । प्रस्तुत[4] । प्रकट । प्रसुप्त । सदृक्ष । मनस्विनी । इत्यादि ॥

स्वप्नादाविल् ॥ १ । २ । ११ ॥

स्वप्नादिष्वादेरवर्णस्येत्वं लित् स्यात्[5] । किविणो[6][7] । कृपणः । अत्र[8] 'इल्कृपगे' इति इः[9] । मिइंगो[10] । अत्रापि[11] कृपादित्वादृत इल् । वेतसः । वेडिसो । अत्र 'टो डः' इत्यतः 'डः' इत्यधिकृत्य

---

१ कासओ M. २ M. has after समृद्धि, प्रसिद्ध । सदृक्ष । मनस्विनी । प्रसुप्त । प्रतिस्पर्धि । and then प्रतिसिद्धि &c. ३ M. has प्रतिषिद्ध for प्रवचन । प्ररोह । ४ M. has प्रवचन । प्ररोह । इत्यादि for प्रस्तुत &c. up to मनस्विनी । ५ M. has अस्यत्येनुवर्तते before it. ६ M. has स्वप्नः । सिविणो before it. ७ M. has कृपणः । किविणो । ८ M. has मृदङ्ग । मिइंगो before it. ९ उभयत्र ऋत इत्वम् for इः । M. १० M. drops मिइंगो. ११ M. drops अत्रापि कृपादित्वादृत इल् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेतस इति तोः ॥ १ । ३ । ३२ ॥

अत्र अत इत्वे सति तोर्डः स्यात् । इति डः । उत्तिमो ।[1] स्वप्नः । सिमिणो । स्वप्नादि—स्वप्न । व्यजन । व्यलीक । कृपण । मृदङ्ग । ईषद् । वेतस । दत्तोत्तम । मरिच । इत्यादि । बहुलाधिकारात् णत्वमापन्ने दत्त-शब्दे इत्वम् । अन्यत्र दत्तं ॥

पक्वाङ्गारललाटे तु ॥ १ । २ । १२ ॥

इलनुवर्तते । एष्वादेरवर्णस्येत्वं वा स्यात् । पक्वः । पिक्को । अ-ङ्गारः । इंगालो । इंगालो इत्यत्र हरिद्रादिपाठाद्रेफस्य लत्वम् । तच्च बहुलाधिकारादित्वे कृते सत्येव । इत्वाभावे । अंगारो ॥

हरे त्वी ॥ १ । २ । १५ ॥

अत्रादेरत ईत्वं वा स्यात् । हीरो ॥

उल्ध्वनिगवयविष्वचि वः ॥ १ । २ । १६ ॥

एषु वकारसंबन्धिनोवर्णस्योत्वं लिद् भवति । गवयः । गउओ । अत्र 'प्रायो लुक्—' इति वकारयकारयोर्लोपः ॥

स्नावकसास्ने ॥ १ । २ । १८ ॥

अनयोरादेरवर्णस्योत्वं लित् स्यात् । थुवओ । अत्र 'प्रायो लुक्—' इति कलोपः । 'स्तः' इति स्तस्य थत्वम् ॥

चण्डखण्डिते णा वा ॥ १ । २ । १९ ॥

'उल्' इत्यनुवर्तते । अनयोर्णकारेण सहादेरवर्णस्योत्वं वा स्यात् । चूंडो । चंडो । खुडिओ । खंडिओ ॥

आसारे तु ॥ १ । २ । २२ ॥

---

१ M. has उत्तम । इत्यादि after it. २ M. drops स्वप्नः । सि-मिणो । ३ अत्र for इत्यत्र M. ४ M. drops लिद्. ५ यवकारयो° M. ६ M. drops 'प्रायो लुक्—' इति. ७ णा वा चण्डखण्डिते M. ८ उत्वमनु° T. ९ एतयो° T., M. १० चूंदो । चंदो । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आर्यायां र्यः श्वश्र्वामूल्' इत्यतः 'ऊल्'[1] इत्यनुवर्तते । अत्रादेरवर्णस्य ऊत्वं वा स्यात् । ऊसारो । आसारो ॥

तोन्तर्येल् ॥ १ । २ । २३ ॥

अन्तर्[2]शब्दे तकारसंबन्धिनोवर्णस्य एत्वं लित् स्यात् । अन्तःपुरवरः । अन्ते[3]उरवरो । अन्तःसहवासः । अन्तेसहवासो । इत्यादि । क्वचिन्न [4]भवति । अन्तर्गतः । अन्तगओ ॥

पारावते तु फोः ॥ १ । २ । २४ ॥

'एँल्'[5] अनुवर्तते । अत्र द्वितीय[6]स्यास्य एत्वं वा स्यात् । पारेवओ । पारावओ ॥

उत्करवल्लीद्वारमात्रचि ॥ १ । २ । २५ ॥

'एँल्'[7] अनुवर्तते । 'तु' इति च । एषु मात्रच्प्रत्यये चादेरवर्णस्य एत्वं वा स्यात् । उक्केरो । उक्करो ॥ 'ओदाल्यां पङ्क्तौ' इत्यतः 'ओत्' इत्यधिकृत्य[8]

फोः परस्परनमस्कारे ॥ १ । २ । ३० ॥

[9]परस्परनमस्कारे एतयोः फोः द्वितीय[10]स्यावर्णस्य ओका[11]रो भवति । परस्परविनयः । [12]परोप्फरविणओ । [13]णमोक्कारो ॥

त्वर्पौ ॥ १ । २ । ३२ ॥

'ओत्'[14] इत्यनुवर्तते । अर्पयतेर्धातोरादेरवर्णस्य [15]ओत्वं वा स्यात् । अर्पितः । ओप्पिओ । अप्पिओ ॥

---

१ ऊत्वमनुवर्तते T. २ °रत T. ३ °उरवरो M. ४ संभवति M. ५ एत्वमनु° T. ६ °यस्यावर्णस्य M.; T. drops अस्य. ७ एत्वमनु° T. ८ इत्यधिकृत्य M. ९ P., My., and R. drop परस्परनमस्कारे. १० द्वितीयावर्णस्य P., My., R. ११ ओकारः स्यात् P., My., R. १२ परोप्पर° M. १३ T. has नमस्कारः before it. १४ ओत्वमनु° T. १५ ओत्वं तु भवति M.; ओत्वं भवति तु T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईत्खल्वाटस्त्यान आतः ॥ १ । २ । ३३ ॥

अनयोरात ईत्वं स्यात्[1] । खल्लीडो[2] । अत्र 'टो डः' इति डः । वलोपद्वित्वे ॥

इत्तु सदादौ ॥ १ । २ । ३४ ॥

सदा इत्यादिषु आदेराकारस्य[3] इत्वं वा स्यात् । कुप्पिसो । कुप्पासो । उभयत्रापि 'संयोगे' इति ह्रस्वः । कूर्पासः । नात्र ह्रस्वे कृते 'स्तौ' इत्युत ओत्वम् । बहुलाधिकारादुतो लाक्षणिकत्वाद्वा । णिसिअरो[4] । णिसाअरो । निशाकरः । सदादि—सदा । कूर्पास । निशाकर । इत्यादि ॥

आचार्ये चो ह्रश्च ॥ १ । २ । ३५ ॥

'आतः' इत्यनुवर्तते । 'इत्' इति च । अत्र चकारसंबन्धिन आकारस्य ह्रस्वो वा स्यात्[5] । चकारात् पक्षे तस्यैवेकारश्च । इत्याकारस्य ह्रस्वपक्षे चलोपे । आअर्य । आइर्य[6] । ह्रस्वाभावे । आआर्य इति स्थिते । 'स्याद्भव्यचैत्यचौर्यसमे यात्' इत्यनेन चौर्यसमाचार्यशब्दस्य[7] संयुक्तयकारात्प्रागित्वे[8] । आअरिओ । आइरिओ । आआरिओ[9] ॥

न वाव्ययोत्खातादौ ॥ १ । २ । ३७ ॥

अव्यये उत्खातादौ च आदेराकारस्य विकल्पेन ह्रस्वो भवति । उत्खातः । उक्खओ[10] । उक्खाओ । कुमरो[11] । कुमारो । चमरो[12] । चामरो । कलओ[13] । कलाओ । कलादः । स्वर्णकारः । हलिओ[14] । हलिओ । हालिकः । इत्यादि । उत्खातादि—उत्खात । कुमार । बलाका । प्राकृत । चामर । कलाद । हालिक । नाराच । तालपुट[15] ।

---

१ लित् स्यात्. २. खल्लेडो M. ३ °रात T. ४ णिसिआरो । णिसाआरो । M. ५ भवति M., T. ६ T. has इत्वे before आइर्य. ७ °शब्दे T., M. ८ प्रागित्वम् M. ९ M. drops आआरिओ. १० उक्खाओ । उक्खओ । M. ११ कुमारो । कुमरो । M. १२ चामरो । चमरो । M. १३ कलादः । कलओ । कलाओ । M. १४ हालिकः । हालिओ । हलिओ । M. १५ M. has पूर्वाह्ण and T. संस्थापित for तालपुट.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तालवृन्त । स्थापित[1] । संस्थापित[2] । प्रस्थापित[3] । इत्यादि । स्थापित[4]-प्रस्थापित[5]संस्थापितेषु[6] 'स्थष्ठकुकुरौ[7]' इत्यतः 'ष्ठः' इत्यधिकृत्य[8]

निरप्पढक्कठाचिट्ठाः ॥ २ । ४ । १२७ ॥

स्थः[9] तिष्ठतेः निरप्पढक्कठाचिट्ठ इति चत्वार आदेशा भवन्ति । इति ठादेशे । ठविओ । ठाविओ । संठविओ । संठाविओ । पट्ठविओ[10] । पट्ठाविओ । इति सिद्धम् ॥

घञि वा ॥ १ । २ । ३८ ॥

'हः' इत्यनुवर्तते । 'आतः' इति च । घञि निमित्ते यो वृद्धिरूप आकारस्तस्यादिभूतस्य ह्रस्वो वा स्यात् । पवहो[11] । पवाहो । प्रवाहः । पहरो[12] । पहारो । प्रहारः ॥ पअरो[13] । पआरो । प्रकारः । इत्यादि । क्वचिन्न भवति । रागः । राओ । भागः । भाओ ॥

संयोगे ॥ १ । २ । ४० ॥

'ह्रस्वः' इत्यनुवर्तते । संयोगे परे पूर्वस्य ह्रस्वो भवति । आम्रः । अम्बो[14] । अमात्यः । अमच्चो । मुनीन्द्रः । मुणिंदो । पूर्वः । पुव्वो । नरेन्द्रः । णरिन्दो । अधरोष्ठः । अहरुट्ठो । अत्रानुक्तन्यायेन 'एच इग्घ्रस्वादेशे' इति[15] एदोतोरिकारोकारौ । एदोतोः क्वचित् स्वरूपेण ह्रस्वः । एकः । एक्को । स्तोकः । थोक्को । इत्यादि ॥

अथेकारस्यादेशाः ॥

त्वेदितः ॥ १ । २ । ४१ ॥

---

१ M. drops स्थापित and T. has प्रस्थापित for स्थापित. २ R. and T. drop संस्थापित. ३ T. has खादिर in place of प्रस्थापित. ४ संस्थापित for स्थापित M. ५ M. has स्थापित for प्रस्थापित. ६ संस्थापितशब्देषु M. ७ °कुकुरौ M. ८ इत्यधिकृत्य M. ९ स्थाधातोः M. for स्थः तिष्ठतेः. १० पंठाविओ P.; R. drops पट्ठविओ. ११ प्रवाहः । पवहः । पवाहः ॥ M.; T. १२ पहारः । पहरो । प्रहारो । M., T. १३ प्रकारः । पअरो । पआरो । M. १४ अम्भो M., T. १५ इतीत्वे M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'संयोगे' इत्यनुवर्तते । आदेरिकारस्य युक्ते परे एत्वं तु भवति । धम्मिल्लधरः । धम्मेल्लहरो । धम्मिल्लहरो । इत्यादि ॥

मूषिकविभीतकहरिद्रापथिपृथिवीप्रतिश्रुत्यत् ॥ १ । २ । ४३ ॥

'इतः' इत्यनुवर्तते । एष्वादेरिकारस्याकारः स्यात् । मूसओ । विभीतक शब्दे इतः अत्वे भस्य हत्वे 'ईतः काश्मीरहरीतक्योर्लौ' ईत्यतः 'ईतः' इत्यधिकृत्य

एल्पीडनीडकीदृशपीयूषविभीतकेदृशापीडे ॥ १ । २ । ५७ ॥

पीडादिष्वादेरीकारस्य एत्वं लित् स्यात् । लित्वान्नित्यम् । इत्येत्वे । 'प्रतिगेप्रतीपगे' इति प्रत्यादिपाठात् तस्य डकारः । वहेडओ ।

वेङ्गुदशिथिलयोः ॥ १ । २ । ४६ ॥

'इतः' इत्यनुवर्तते । 'अत्' इति च । इङ्गुदशिथिलयोरादेरितः अत्वं वा स्यात् । इङ्गुदरसः । अंगुअरसो । इंगुअरसो । शिथिलः । सढिलो । सिढिलो । अत्र 'प्रथमशिथिल—'इत्यादिना तोर्ढत्वम् ।

णिम्माणं णिम्मिअं ॥ १ । २ । ४७ ॥

इत्येतौ निर्मातृनिर्मिताभ्यां भविष्यतः ।[३]

उ युधिष्ठिरे ॥ १ । २ । ४८ ॥

'त्वेदितः' इत्यतः 'तु' 'इतः' इति चानुवर्तते । असिन्नादेरित उत्वं वा स्यात् । जत्वहत्वषलोपद्वित्वानि । मुकुरादिपाठादुत अत्वं हरिद्रादित्वाल्लत्वं च । जहुट्ठिलो । जहिट्ठिलो ॥

द्विनीक्षुप्रवासिषु ॥ १ । २ । ४९ ॥

'उत्'[४] इत्यनुवर्तते । द्विशब्दे नीत्युपसर्गे इक्षुप्रवासिशब्दयोश्चादेरित उत्वं भवति । पृथग्योगान्नित्यम् । द्विगुणः । दुउणो । अत्र गलोपः । क्वचिन्न[५] भवति । निपतति । णिपडइ ॥

---

१ °रितो M. २ इत्यधिकृत्य M. ३ After this M. notices also this addition—निर्मेणिम्मवणिम्माणौ इत्युत्तरत्र निपातप्रकरणे निरूपयिष्यते तौ च निर्मितनिर्माणेत्याकारकसंस्कृतरूपतुल्ययोगक्षेमावित्यर्थः ॥ ४ उत्वमनुवर्तते । R., T.; उ इत्यनुवर्तते । M. ५ क्वचिन्नित्यं न भवति । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु निर्झरद्विधाकृञोरोन्ना ॥ १ । २ । ५० ॥

'इतः' इत्यनुवर्तते । अनयोरादेरितो ना नकारेण सहौकारो वा स्यात् । ओझरो । पक्षे । णिज्झरो । दोहाइओ । द्विधाकृतः । अत्र व-लोपहृत्वतलोपाः । कृपादित्वादृत इत्वं कलोपश्च[1] । पक्षे 'द्विनीक्षुप्रवा-सिषु' इत्युत्वम् । दुहाइओ । 'कृञः' इति किम् । द्विधागतः । दिहागओ ॥ 'ईतः काश्मीरहरीतक्योर्ललौ' ईत्यतः 'ईतः' इत्यधिकृत्य[2]

गभीरग इत् ॥ १ । २ । ५२ ॥

गभीरादिष्वादेरीकारस्येत्वं भवति । गहिरो । गभीरः । सिरि-सो । शिरीषः । आणिओ । आनीतः । स्त्रियामीकारोपि दृश्यते । आणीदा भुवणब्भुदेक्कजणणी जोईसरेणामुणो । आनीता भुवनाद्भुतै-कजननी योगीश्वरेणामुना । अयं **कर्पूरमञ्जर्या**मन्तिमचरणः । गहिओ । गृहीतः । विळिओ । व्रीडितः । अत्र बडिशादिपाठाड्डस्य ळत्वम् । प्रदीपितः । पळीविओ । अत्र 'पो वः[3]' इति पस्य वत्वम् । 'दोहद-प्रदीप—' इत्यादिना दस्य ळत्वम् । तइओ । तृतीयः । अत्र 'ऋतोत्' इति ऋतोत्वं तयलोपश्च[4] । वम्मिओ । वल्मीकः । इत्यादि । गम्भी-रादि—गभीर । शिरीष । आनीत । गृहीत । व्रीडित । प्रदीपित । तृतीय । जीवत् । अवसीदत् । प्रसीद । वल्मीक । तदानीम्[5] ॥

वा पानीयगे ॥ १ । २ । ५३ ॥

ईतः' इत्यनुवर्तते । 'इत्' इति च । पानीयादिष्वादेरीकारस्येत्वं वा स्यात् । पानीयगुणः । पाणिअगुणो । करीषदहनः । करिसदहणो । इत्यादि । पक्षे दीर्घ एव । पानीयादि—पानीय । द्वितीय । अलीक । करीष । उपनीत । जीवति[6] ॥

उल् जीर्णे ॥ १ । २ । ५४ ॥

---

१ कलोपः । P., My., R. २ इत्यधिकृत्य M. ३ My., P., and M. omit पो वः । ४ M. has तलोपश्च. ५ T. has इत्यादि for तदानीम्. ६ M. has ईषत् after जीवति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ईतः' इत्यनुवर्तते । अत्र ईत उत्वं लित् स्यात् । जीर्णः । जुण्णो । क्वचिन्न भवति । जिण्णे भोअणमेत्ते । जीर्णे भोजनमात्रे । अत्र 'उत्करवल्ली—' इत्यादिना मात्रचोस्य एत्वम् । 'तीर्थे ह्लूल्' इत्यतः 'ऊल्' इत्यधिकृत्य

विहीनहीने वा ॥ १ । २ । ४६ ॥

'ईतः' इत्यनुवर्तते । अनयोरीत ऊंद्वा स्यात् । विहूणो । विहीणो[२] । हूणो । हीणो[३] । 'अनयोः' इति । किम् । प्रहीणो ।[४] कीदृश पीयूषेद्दशेषु 'एत्पीड—'इत्यादिना ईत एत्वम् । 'दृश्यक्सक्किनि' इति ऋतो रिः । केरिसो । एरिसो । पिअँप्पेऊसो । प्रियपीयूषः । अत्र यलोपः । बहुलाधिकारात् पीडनीडयोरेत्वस्य विकल्पः । गअपेडो । गअपीडो । नेडो । नीडो । आमेलो । आवेलो । आपीडः । अत्र बडिशादिपाठाड्डस्य लः । 'नीपापीडे मो वा' इति पस्य वा मः ।

अथोकारस्यादेशाः ।

त्वदुत उपरिगुरुके ॥ १ । २ । ५८ ॥

कप्रैत्ययान्तयोरनयोरादेरुत अत्वं तु भवति । गरुँओ । गुरुओ । कप्रत्ययान्तपरिग्रहात् केवले न भवति ॥

मुकुलादौ ॥ १ । २ । ५९ ॥

'उतः' इत्यनुवर्तते । 'अत्' इति च । मुँकुलादिष्वादेरुतोत्वं तुं भवति । मँउलो । मुउलो । मुकुलः । मउरो । मुउरो । मुकुरः । इत्यादि । मुकुलादि—मुकुल । मुकुर । मुकुट । अगुरु । गुल्छी । गुर्वी । युधिष्ठिर । सौकुमार्य । इत्यादि । मकुटशब्दः संस्कृतेप्यस्ति ।

---

१ ऊत्वं वा स्यात् M. २ M. has विहीनः after it. ३ M. has हीनः after it. ४ M. has प्रहीनः after it. ५ °दृशे M. ६ पिअ-पेऊसो P. ७ °प्रत्ययान्ते गुरुशब्दे उपरिशब्दे चादे° T. ८ °रुतः for° रादेः M. ९ गुरुओ । गरुओ । M. १० 'तु' इति च after this in M. ११ भवति तु for तु भवति T. १२ मुउलो । मउलो । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुलाधिकारात् क्वचिदात्वमपि । विद्रुतः । विरुथाओ ॥ 'दोदोनुत्साहो-त्सन्नऊच्छसि' इत्यतः 'ऊत्' इत्यधिकृत्य 'दुरो रलुकि तु' इत्यतः 'तु' इति च ।

सुभगमुसले ॥ १ । २ । ६४ ॥

एतयोरुत ऊत्वं वा स्यात् । मूसलो । मुसलो । सूहवो । सुहओ । अत्र 'ऊत्वे सुभगदुर्भगे वः' इति कोर्वत्वम् ॥ 'हृश्चौत्कुतूहले' इत्यतः 'ओत्' इत्यधिकृत्य

स्तौ ॥ १ । २ । ६६ ॥

संयुक्ते परे आदेरुत ओत्वम्[१] । मुद्गरः । मोग्गरो । पुद्गरः । पोग्गरो[२] । इत्यादि । एवं संयुक्ते परे उत[३] ओत्वं सर्वत्र संचारणीयम् । नात्र लाक्षणिकस्य उत ओत्वम् । किं त्वलाक्षणिकस्यैव । 'सूक्ष्मेद्वोतः' इति ज्ञापकात् । अन्यथा तत्रापि 'संयोगे' इति ह्रस्वे कृते अनेनैवोत्वं स्यात् । न च विकल्पार्थं तत् सूत्रम् । तदा 'सूक्ष्मेद्वा' इत्येव ब्रूयान्न तु 'ऊतः' इति ॥

ईदुद्व्यूढे ॥ १ । २ । ६९ ॥

'ऊतः' इत्यनुवर्तते । उद्व्यूढे ऊत ईत्वं स्यात्[४] । उव्वीढो ॥

उत्कण्डूयतिहनूमद्वातूले ॥ १ । २ । ७० ॥

कण्डूयतौ धातौ हनूमद्वातूलयोश्चादेरूत उत्वं लित् स्यात् । कण्डूयनपरः । कण्डुअणपरो[५] । हनुमान् । हणुमन्तो । अत्र 'मन्तमण–' इत्यादिना मतुपो मन्तादेशः[६] । वातूलः । वाउलो ॥

ओत्[७]स्थूणातूणमूल्यतूणीरकूर्परगुलूचीकूश्माण्डीताम्बूलीषु ॥ १ । २ । ७३ ॥

---

१ T. has स्यात् after it. २ पोग्गळो M., T. ३ आदेरुत for उत My., P. ४ भवति M. ५ °अरो M., T. ६ मन्तादेशो वा स्यात् T. ७ M. makes two Sûtras—'ओत् स्थूणात् स्थूणे ।' 'वा' इत्यनुवर्तते । 'ऊतः' इति च । अनयोरूत ओत्वं वा स्यात् । तोणो । तूणो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सूक्ष्मेद्धोतः' इत्यतः 'ऊतः' इत्यनुवर्तते । एषूत ओत्वं भवति । लित्वान्नित्यम् । बाहुलकत्वात् स्थूणातूणयोर्विकल्पः । तोणो । तूणो । तूणः । बहुमोल्लो । बहुमूल्यः । तोणीरो । तूणीरः । कोप्परो । कूर्परः ॥

अथ[1] ऋकारस्यादेशाः[2] ॥

'ऋतोत्' इत्यतः[3] 'ऋतः' इत्यधिकृत्य

इल्कृपगे ॥ १ । २ । ७६ ॥

कृप इत्यादिषु आदेर्ऋत इत्वं लित् स्यात् । कृपः । किओ[4] । पलोपः[5] । नृपः[6] । णिवो । कृपणः । किविणो । कृपाणः । किवाणो । इत्यादि । कृपादि—कृप[7] । नृप । कृपाण । कृशानु । कृति[9] । कृसर । कृच्छ्र । कृपण । कृषि । ऋषि । धृति[10] । वृश्चिक । वृत्त । वृत्ति । पृथ्वी । कृत्या । घुसृण । घृणा । ऋद्धि । समृद्धि । गृष्टि । वृद्ध—कवि । स्पृहा । बृसी । हृदय । उत्कृष्ट । मृष्ट[11] । दृष्ट । तृष्णा । सकृत् । दृष्टि । सृष्टि । सृगाल । व्याहृत । बृंहित । तृप्त[12] । सृष्ट । शृङ्गार । भृङ्ग । भृगु । भृङ्गार । इत्यादि ॥

शृङ्गमृगाङ्कमृत्युदष्टमसृणेषु वा ॥ १ । २ । ७७ ॥

'इल्' अनुवर्तते । 'ऋतः' इति च । एषु ऋत इत्वं वा स्यात् ।

'कूर्परमूल्यं कुष्माण्डताम्बूलगुडूचीतूणीरे' । 'उतः' इत्यनुवर्तते । 'ओत्' इति च । एषूत ओत्वं भवति । कोप्परो । कूर्परः । बहुमोळो । बहुमूल्यः । तोणीरो । तूणीरः ॥

१ M. and T. drop अथ. २ ऋत आदेशाः । M., T. ३ इत्यधिकृत्य M., T. ४ किवो । M. ५ अत्र 'पो वः' इति वत्वम् । M. ६ M. has आकृतिगणोयम् in place of नृपः—इत्यादि. ७ T. has कृपण before it. ८ M. has कृपण । कृश । कृशानु. ९ T. has कृश for कृति. १० T. has वृश्चिक । धृति । ११ दृष्ट । मृष्ट । M. १२ M. has हृत before तृप्त.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिअंको । मैअंको[1] । अत्र 'स्वरस्य बिन्दुमि' इति ह्रस्वः । दिट्ठो । दट्ठो । इत्यादि ॥

उदृषभे वुः[2] ॥ १ । २ । ७९ ॥

अत्र वृ इत्यवयवस्योत्वं वा स्यात् । पक्षे अत्वम् । उसहो । वसहो ॥

वृन्दारकनिवृत्तयोः ॥ १ । २ । ८० ॥

'उत्' इत्यनुवर्तते । अनयोर्ऋत उत्वं वा स्यात् । पक्षे अत्वम् । वुन्दारओ[3] । णिवुत्तो । णिवॅत्तो[4] ।

ऋतुगे ॥ १ । २ । ८१ ॥

उत्वमनुवर्तते । 'ऋतः' इति च । ऋत्वादिष्वादेर्ऋत[5] उत्वं भवति । उसहो । 'ऋतुऋजुऋण—'इत्यादिना रीत्यादेशे रिसहो । उत्तन्तो[6] । इत्यादि । ऋत्वादि—ऋतु । ऋषभ । प्राभृत । प्रभृति । निभृत । संभृत[7] । निवृत । संवृत । निर्वृति । निर्वृत । प्रवृत्ति । प्रावृट् । वृत्तान्त । वृन्द । वृन्दावन । पृथिवी । ऋजु । मृणाल । पृथ्वी । वृद्ध । स्पृष्ट । प्रवृद्ध । परामृष्ट । भ्रातृक । पितृक । जामातृक । मातृक । इत्यादि ॥ 'इदुन्मातुः' इत्यतः[8] 'इत्' इत्यधिकृत्य

वृष्टिपृथङ्मृदङ्गनमृकवृष्टे[9] ॥ १ । २ । ८४ ॥

एषु ऋत इदुतौ भवतः । मिअंगो । मुअंगो[10] । णंत्तिओ । णत्तुओ[11] । विट्ठो । वुट्ठो[12] ।

दृशेरि स्रा ॥ १ । २ । ८९ ॥

---

१ M. drops मअंको. २ उः M. ३ M. and T. have वृन्दारकः after it. ४ M. has निवृत्तः after it. ५ ऋत्वादेरादे° R. ६ वृत्तन्तो M. ७ M. has परभृत after it. ८ इत्यधिकृत्य M., T. ९ M. has मृदङ्गः । after it. १० M. and T. have विट्ठो । वुट्ठो । णत्तिओ । णत्तुओ । ११ M. has नमृकः after णत्तुओ. १२ After this (i. e. णत्तुओ) T. inserts नमृकशब्दे 'कग—' इत्यादिना पलोपः शेषस्य द्वित्वम् । वृष्टशब्दे 'ष्टः' इति ष्टस्य ठत्वम् । 'शेषादेशस्य' इति द्वित्वं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृसेरितः पकारतकाराभ्यां सह अरि इत्यादेशो भवति। दरिओ। दृसः॥

केवलस्य रिः॥ १। २। ९०॥

ऋतः[2] केवलस्य व्यञ्जनेनासंयुक्तस्य रि इत्यादेशो भवति। [3]रिच्छो। ऋक्षः। इत्यादि॥

ऋतुऋजुऋणऋषिऋषभे वा॥ १। २। ९२॥

रीत्यनुवर्तते। एषु ऋतो रित्वं वा स्यात्। ऋणमुक्तः। रिणमुत्तो। उणमुत्तो। [4]ऋषभः। रिसहो। उसहो॥

क्लृप्त इलिः॥ १। २। ९३॥

क्लृप्तेरादेरच इलिरित्या[5]देशः स्यात्। क्लृप्तः। किलित्तो॥

---

[6]अथ एच आदेशाः॥

[7]चपेटकेसरदेवरसैन्यवेदनास्वेचस्त्वित्[10]॥ १। २। ९४॥

एष्वेर्[8]चः इत्वं वा स्यात्। किसरो। केसरो। दिअरो। दे[9]अरो॥

सैन्धवशनैश्चरे॥ १। २। ९५॥

'एचः' इत्यनुवर्तते 'इत्वं' इति च। अनयोरादेरेच इत्वं स्या[11]त्। पृथग्योगान्नित्यम्। सि[12]न्धवो। सणिच्छरो॥

त्वत्सरोरुहमनोहरप्रकोष्ठातोद्यान्योन्ये वश्च क्तोः॥ १।२।९६॥

'एचः' इत्यनुवर्तते। एष्वेचः अत्वं तु स्यात्तत्संनियोगेन यथायोगं ककारतकारयोर्वत्वं च[13]। मणहरो। मणोहरो। पवट्ठो। प[14]ओट्ठो। आवज्जो। [15]आओज्जो। अन्योन्यकलहः। अण्णोण्णकलहो। अण्णण्णकलहो॥

---

१ ऋतः M. २ केवलस्य ऋतः T. ३ ऋक्षः। रिच्छो। T. ४ M. drops ऋषभः। ५ °त्यादेशो भवति। M. ६ T. drops अथ. ७ चपेटा M. ८ M. and T. have सन्ध्यक्षराणां after एष्वेचः ९ T. has देवरः after it. १० इत् M., T. ११ भवति M., T. १२ सिन्धओ M. १३ M. and T. have भवति for च. १४ My. drops पओट्ठो। १५ अओज्जो M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कौक्षेयक उत् ॥ १ । २ । ९७ ॥

[1]कौक्षेयके आदेरैच उत्वं तु भवति । कुच्छेअओ । कोच्छेअओ । पौरादिपाठादउ इत्यपि । कउच्छेअओ । स्पृहादित्वात् क्षस्य छः ॥

शौण्डगे ॥ १ । २ । ९८ ॥

उत्वमनुवर्तते । शौण्डादिष्वादेरैच उत्वं तु भवति । पृथक्कृत्वान्नित्यम् । सुण्डो । शौण्डः । मुंजाअणो । मौञ्जायनः । सुवण्णिओ । सौवर्णिकः । [2]शौण्डादि—शौण्ड । शौद्धोदनि । मौञ्जायन । सौन्दर्य । सौगन्ध्य । दौवारिक । सौवर्णिक । पौलोमी । इत्यादि ॥ स्तेनशब्दे ।

ऊ स्तेने वा ॥ १ । २ । १०० ॥

अत्र सन्ध्यक्षरस्य ऊत्वं वा [3]भवति । 'स्तः' इति स्तस्य थत्वम् । थूणो । थेणो ॥

सोच्छ्वासे ॥ १ । २ । १०१ ॥

'ऊ स्तेने वा' [4]इत्यत [5]ऊत्वमनुवर्तते । अत्रैच ऊत्वं [6]स्यात् । पृथग्योगान्नित्यम् । सूसासो । अत्र 'दोदो[7]नुत्साह—' इत्यनेन [8]शकारसकारयोः परयोरुकारस्य दकारेण सह ऊत्वे ऊसास इति स्थिते सन्धौ सति सोसासो[9] । 'ऐच एङ्' [10]इत्यतः 'ऐचः' इत्यधिकृत्य

अइ तु वैरादौ ॥ १ । २ । १०३ ॥

वैरादिष्वादेरैचः अइ इत्या[11]देशो भवति । वैशंपायनः । वइसंपाअणो । पक्षे ऐच एङि । वेसंपाअणो । चइत्तो । चेत्तो । चैत्रः । इत्यादि । [12]वैरादि—वैर । वैशंपायन । वैदेशिक । वैश्रवण । चैत्र । कैलास । वैतालिक । कैरव । दैव । इत्यादि ॥

दैत्यादौ ॥ १ । २ । १०४ ॥

---

१ कौक्षेयकादावादे° M., T. २ शौण्डादिः T. ३ स्यात् R., T. ४ इत्यनुवर्तते । ५ उ इत्यनुवर्तते P., My. ६ भवति T. ७ दोदोनुत्साहोत्सन्नऊच्छसि M., T. ८ M. has शसि before it. ९ M. and T. have after it एच ऊत्वे सूसासो इति भवति । १० इत्यधिकृत्य M., T. ११ °देशो वा भवति । M. १२ वैरादिः M.

'ऐचः' इत्यनुवर्तते । 'अइ' इति च । दैत्यादिष्वादेरचः अइ इत्येयमादेशो भवति । पृथक्त्वान्नित्यम् । दइच्चो । दैत्यः । वइअब्भो । वैदर्भः । इत्यादि । दैत्यादि—दैत्य । दैन्य । दैवत । कैतव । वैदर्भ । वैदेह । ऐश्वर्य । वैजनन । भैरव । वैतालीय । वैदेश । वैश्वानर । स्वैर । वैशाख । वैशाल । स्थैर्य । चैत्य । इत्यादि । चैत्यविशेषे न भवति । चेत्तं ॥

मौरव आत् ॥ १ । २ । १०६ ॥

अत्रैच आत्वं भवति । गौरवप्रियः । गारवप्पिओ ॥

पौरगे चाउत् ॥ १ । २ । १०७ ॥

पौरादिष्वेचैश्चकाराद् गौरवे च अउ इत्यादेशो भवति । गौरवप्रियः । गउरअप्पिओ । पौरः । पउरो । कौरवः । कउरवो । इत्यादि । पौरादि—पौर । सौर । मौलि । कौरव । गौड । कौल । कौशल । पौरुष । कौक्षेयक । सौध । मौन । गौरव । इत्यादि । स्थविरार्यस्कारयोर्विशेषः ॥

एत् साज्झलात्रयोदशगेचः ॥ १ । ३ । १ ॥

त्रयोदशादिष्वादेरचः साज्झला सस्वरव्यञ्जनेन परेण सहैत्वं भवति । थेरो । स्थविरो वृद्धो ब्रह्मा वा । अत्र 'कग—' इति सलोपे थकारस्याकारस्य साच्कवकारस्य च स्थाने एकारः । एवं सर्वत्र साच्कपरसवर्णस्य पूर्वाचश्च स्थाने त्रयोदशादिष्वेकारः कल्पनीयः । एक्कारो । अयस्कारः । इत्यादि । त्रयोदशादि—त्रयोदश । स्थविर । अयस्कार । विचकिल । त्रयोविंशति । त्रयस्त्रिंशत् । इत्यादि । विचकिलेत्यत्र तैलादिपाठाद् द्वित्वे । वेइल्लो । मुद्धविअइल्लपसूणपुंजा इति

---

१ M. drops 'अइ' इति च । २ इत्यादेशो M. ३ दइच्छो । M. ४ °ष्वादेरेच° M., T. ५ पऊरो M. ६ T. has सौरः । सऊरो in place of कौरवः । कउरवो । ७ P. and My. drop सौर. ८ °यस्कारशब्दयो° M., T. ९ ब्रह्म वा M.; बंह्मो T. वा T. १० °श्चावस्थाने R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृश्यते । मुग्धविचकिलप्रसूनपुञ्जाः ॥ 'कदले तु' ईत्यतः 'तु' इत्यधिकृत्य

कर्णिकारे फोः ॥ १ । ३ । ३ ॥

अत्र फोर्द्धितीयस्याचः परेण साज्झला सह एत्वं तु स्यात् । कण्णेरो । कण्णिआरो ॥

नवमालिकाबदरनवफलिकापूगफलपूतर ओत् ॥ १ ।३ ।४ ॥

एष्वादेरचः परेण साज्झला सह ओत्वं लिङ्गवति । नवमालिकाधेरः । णोमाळिआहरो । बदरप्रियः । बोरप्पिओ । नवफलिकानिर्मितः । णोहळिआणिम्मिओ । अत्र 'अस्तोरखोरचः' इत्यधिकृत्य

फस्य भहौ वा ॥ १ । ३ । ६० ॥

अस्तोरखोरचः परस्य फकारस्य भकारहकारौ यथासंभवं व्यवस्थितविभाषया भवतः । क्वचिद् भः । क्वचित् तु हः । क्वचिदुभावपि । रेफशिफयोः फस्य भ एव । मुक्ताफले फस्य ह एव । सफलशेफालिकानवफलिकागुम्फतीत्यादावुभावपि । तेनात्रानेन सूत्रेण फस्य हः । पूगफलप्रियः । पोहळप्पिओ । पूतरः । पोरो । जलजन्तुः ॥

तु मयूरचतुर्थचतुर्द्वारचतुर्दशचतुर्गुणमयूखोलूखलसुकुमारोदूखललवणकुतूहले ॥ १ । ३ । ५ ॥

'ओत्' इत्यनुवर्तते । मयूरादिष्वादेरचः परेण सस्वरव्यञ्जनेन सह ओत्वं वा स्यात् । [10]मोरो । मऊरो । चोत्थो । चउत्थो । चोट्ठो । चउट्ठो । अत्र 'स्त्यानचतुर्थे—' इत्यादिना र्थस्य वा [11]ठः । चोद्धारो । चउद्धारो । चोग्गुणो । चउग्गुणो । मोहो । मउहो । मयूखः । खस्य हः । सोमारो । [12]सउमारो । ओहलो । उऊहलो । उदूखलः ।

---

१ इत्यधिकृत्य M. २ °धवः. ३ णिमा° M. ४ °हवो T. ५ °शफयोः M. ६ °गुम्फती° M. ७ पोफळप्पिओ M. ८ M. drops जलजन्तुः. ९ ओत् M. १० मऊरो । मोरो । M. ११ ढत्वम् T. १२ सुउमारो M.

कुतूहलपरः । कोहलपरो । अत्रैव 'त्वदुत उपरिगुरुके' इत्यतः 'तु' 'उतः' इत्यधिकृत्य[1]

ह्रश्चौत्कुतूहले ॥ १ । २ । ६५ ॥

अत्र उत ओत्वं तु भवति तसन्नियोगेन ऊतो ह्रस्वश्च । इत्योत्वे ह्रस्वे च । कोहल्लपरो । कोउहल्लपरो[2] । अत्र तैलादित्वाद् द्वित्वम् ॥[3]

निषण्ण उमः ॥ १ । ३ । ६ ॥

'तु मयूर—' इत्यतः 'तु' इत्यनुवर्तते । असिन्नादेरचः परेण साज्झला सहितस्य उम इत्यादेशः स्याद्वा[4] । णुमण्णो । णिसण्णो ॥

अस्तोरखोरचः ॥ १ । ३ । ७ ॥

अधिकारोऽयम् । 'लोहललाङ्गललाङ्गूले वा' इति यावत् । इत ऊर्ध्वं यदनुक्रमिष्यते[5] तदस्तोरसंयुक्तस्याखोरनादौ वर्तमानस्याचः परस्य भवतीति वेदितव्यम् ।

अथ[6] कवर्गस्यादेशाः ॥

खोपुष्पकुब्जकर्परकिले कोः ॥ १ । ३ । १२ ॥

अपुष्पवाचिनि कुब्जशब्दे कर्परकिलयोश्च कोः कवर्गस्य खकारो भवति । बबयोरभेदाद्[7] 'लवरामधश्च' इति बलोपे । खुज्जो । पुष्पे तु कुज्जो । खप्परो । खिलओ[8] । अत्र 'स्वार्थे तु कश्च'[9] इति कः ॥

छागशृङ्खलकिराते लकचाः[10] ॥ १ । ३ । १३ ॥

'कोः' इत्यनुवर्तते । एषु कवर्गस्य यथाक्रमं लकच इत्यादेशा[11] भवन्ति । छागः । छालो । किरातः । चिलाओ । पुलिन्दपर्याय एव । कामरूपिणि तु नेष्यते । णमिमो हरकिराअं । चिलाओ । इत्यत्र हरिद्रादिपाठाद्रेफस्य लत्वम् ॥

---

१ इत्यधिकृत्य R., M. २ कोउहळपरो । M. ३ M. drops कोउहल्ल-परो । ४ वा स्यात् । M., T. ५ M. drops यत्. ६ M. and T. drop अथ. ७ °रभेदन्यायेन M. ८ खप्परओ for खिल्लओ. ९ कप्रत्ययः for कश्चेति कः M. १० लकचम् M. ११ इत्येते आदेशा भवन्ति M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैकादौ गः ॥ १ । ३ । १४ ॥

एकादौ कोर्गः[1] स्याद्वा । एकः । एँगो । एकादि—एक । आकर्ष । लोक । अमुक । तीर्थंकर । उद्योतकर । श्रावक । असुकर । आकर । इत्यादि ॥

खोः कन्दुकमरकतमदकले ॥ १ । ३ । १५ ॥

'गः' इत्यनुवर्तते । 'कोः' इति च । एषु खोः कवर्गस्य गँः स्यात् । पृथक्त्वान्नित्यम् । कन्दुकपरः । गंदुअपरो । मरकतमयः । मरगअमओ । मदकलः । मअगलो ॥

पुन्नागभागिनीचन्द्रिकासु मः ॥ १ । ३ ॥ १६ ॥

'कोः' इत्यनुवर्तते । एषु कोर्मो भवति । पुँन्नागः । पुण्णामो ।

शीकरे तु महौ ॥ १ । ३ । १७ ॥

अत्र कोः भकारहकारौ वा भवतः । शीकरो । सीभरो । सीहरो । सीअरो ।

ऊत्वे सुभगदुर्भगे वः ॥ १ । ३ । १८ ॥

अनयोरुत ऊत्वे सति कोर्वकारो भवति । सूँहवो । दूहवो । अत्र भस्य हः । 'दुरोरलुकि तु' 'सुभगमुसले' इत्याभ्यामुत ऊत्वम् । 'ऊत्वे' इति किम् । सुहओ । दुहओ । अत्र

दुरोरलुकि तु ॥ १ । २ । ६३ ॥

'दोदोनुत्साहोत्सन्नऊच्छसि' इत्यतः 'ऊत' इत्यनुवर्तते । दुरित्युपसर्गस्य रेफलोपे आदेरुत ऊद्वा स्यात् । इति रेफलोपे विकल्पेन ऊत्वविधानाद् दुहओ इत्यत्र ऊत्वाभावः । 'सुभगमुसले' इत्यूत्वस्य वैकल्पिकत्वात् पक्षे । सुहओ ।

---

१ °गों भवति । M. २ एग्गो । M. ३ M. has 'वैकादौ गः' इत्यतः before it. ४ गो भवति । M. ५ °भोगिनी° M. ६ M. drops पुन्नागः । ७ M. has सीभरो । सीहरो । पक्षे । सीअरो in place of शीकरो । सीभरो । सीहरो । सीअरो । ८ दूहवो । सूहवो । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निकषस्फटिकचिकुरे हः ॥ १ । ३ । १९ ॥

एषु कवर्गस्य हत्वं भवति । णिहसो । फलिहो । अत्र 'ष्पस्पोः' इति फत्वम् । 'स्फटिके' इत्यनेन टस्य लत्वम् । चिहुरो । 'चिहुरः संस्कृतेपि' इति भृङ्गाचार्यः ।

अथ चवर्गादेशाः ॥

चोः खचितपिशाचयोः सल्लौ ॥ १ । ३ । २२ ॥

'ढः पृथकि तु' इत्यतः 'तु' इत्यनुवर्तते । अनयोश्चोश्चवर्गस्य सकारद्विरुक्तलकारौ यथासंख्यं तु भवतः । खसिओ । पक्षे । खइओ । पिसल्लो । अत्र 'संयोगे' इति ह्रस्वः । पिसाओ ।

झो जटिले ॥ १ । ३ । २३ ॥

'तु' इत्यनुवर्तते । अत्र चोर्झत्वं वा स्यात् । झडिलो । जडिलो । अत्र 'टो डः' इति टस्य डत्वम् ।

अथ टवर्गादेशाः ॥

टोर्बडिशादौ लः ॥ १ । ३ । २४ ॥

'तु' इत्यनुवर्तते । बडिशादौ टोष्टवर्गस्य लत्वं तु स्यात् । गुडः । गुलो । गुडो । बडिशादि—बडिश । गुड । नेड । चपेट । आपीड । नाडी । वांटी । वेणु । दाडिमं । इत्यादि ।

स्फटिके ॥ १ । ३ । २५ ॥

अत्र टोर्लत्वं स्यात् । पृथक्कृत्वान्नित्यम् । फलिहो ॥

ढः कैटभशकटसटे ॥ १ । ३ । २७ ॥

---

१ 'चिहुर इति संस्कृतेपि' M. २ भृङ्ग्याचार्यः M. ३ M. and T. drop अथ. ४ चवर्गस्यादेशाः My., P. ५ ह्रस्वपक्षे M., R. ६ पिसवो । M. ७ M. drops अथ. ८ टवर्गस्यादेशाः P., My. ९ M. drops नड. १० M. drops वाटी; R. has वेणु । वाटी । ११ M. has हटी । and T. पालयति after दाडिम ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'टोः' इत्यनुवर्तते । एषु टवर्गस्य ढो भवति । केढवो । अत्र

वो भस्य कैटभे ॥ १ । ३ । ६४ ॥

अत्र भकारस्य वः स्यात् । इति भस्य वः । सअढो । शकटः ॥

ठः ॥ १ । ३ । २८ ॥

'डः' इत्यनुवर्तते । असंयुक्तस्यानादौ वर्तमानस्याचः परस्य ठस्य ढः स्यात् । मठः । मढो । कमठः । कमढो । कुठारः । कुढारो । अस्तोरित्येव । चिट्ठइ । अखोरित्येव । ठाइ । अच इत्यैव । कंरो ।

पिठरे ह्रस्तु रश्च ढः ॥ १ । ३ । २९ ॥

'ठः' इत्यनुवर्तते । अत्र ठस्य ह्रस्वं तु स्यात् तत्संनियोगेन रश्च । रेफस्य ढः । पिहढो । पक्षे । पिढरो अत्र 'ठः' इति ठस्य ढत्वम् ।

लत्वडोनुडुगे ॥ १ । ३ । ३० ॥

अस्तोरखोरचः परस्य डेस्य लकारो भवति अनुडुगे उत्वादिगणं वर्जयित्वा । लित्वान्नित्यम् । गरुडः । गलुलो । अत्र हरिद्रादिपाठाद्रेफस्य लत्वम् । वडवानलः । वलआणलो । अस्तोरित्येव । कुड्यम् । कुड्डं । अखोरित्येव । डमरुओ । डमरुगः । अच इत्येव । तोंडो । 'अनुडुगे' इति किम् । णिविडो । उडुगौडनिविडनाडीपीडितनीडेत्यादि ॥

टो डः ॥ १ । ३ । ३१ ॥

अस्तोरखोरचः परस्य टस्य डः स्यात् । घटः । घडो । एतत्तिङन्तेपि समानम् । 'अस्तोः' इति किम् । खट्वंगं । खट्टांगं । 'अखोः' इति किम् । टंको । 'अचः' इति किम् । घंटा । क्वचिन्न भवति । अटति[3] । अटइ ॥

अथ[4] तवर्गादेशाः[5] ॥

चेतस इति तोः ॥ १ । ३ । ३२ ॥

---

१ M. drops ठस्य. २ My. drops डस्य. ३ अटइ । अटति । M.
४ M., R., and T. drop अथ. ५ तवर्गस्यादेशाः Mr., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'टो डः' इत्यतः 'डः' इत्यनुवर्तते। अत्रादेरवर्णस्य स्वप्नादित्वादित्वे सति तोस्तवर्गस्य उत्वं भवति। वेडिसो। 'इति' इति किम्। वेअसो।

प्रतिगेप्रतीपगे ॥ १ । ३ । ३३ ॥

'तोः' इत्यनुवर्तते। प्रत्यादिषु तवर्गस्य डो भवति। अप्रतीपगे। प्रतीपादीन् वर्जयित्वा। प्रतिपन्नः। पडिवण्णो। प्रतिभासः। पडिहासो। इत्यादि। प्रत्यादि—प्रतिपन्न। प्रतिभास। प्रतिहार। प्रतिस्पर्धि। प्रतिनिवृत्त। प्रतिकरोति। प्रतिपद्। प्रतिश्रुत्। प्रतिमा। प्रभृति। भृत। भिन्दिपाल। पताका। प्राभृतक। विभीतक। व्यापृत। कन्दलिका। हरीतकी। इत्यादि। 'अप्रतीपगे' इति किम्। प्रतीपम्। पईवम्। प्रतीपादि—प्रतीप। प्रतिज्ञान। प्रतिसमय। प्रतिष्ठा। प्रतिष्ठान। इत्यादि॥

दम्भदरदर्भगर्दभदष्टदशनदग्धदाहदोहददोलादण्डकदने तु ॥ १ । २ । ३५ ॥

'डः' इत्यनुवर्तते। 'तोः' इति च। दम्भादिषु तवर्गस्य डो वा स्यात्। डंभो। डरो। डब्भो। डट्ठो। पक्षे। दंभो। दरो। दब्भो। दट्ठो। दरशब्दोऽत्र भयार्थ एव ग्राह्यः। अन्यत्र। दरदलिआ। दरदलिता। दोहदे दम्भादिसाहचर्याद्दाद्यस्यैव। डोहओ॥

तुच्छे चच्छौ ॥ १ । ३ । ३६ ॥

अत्र तवर्गस्य चकारच्छकारौ क्रमाद्भवतः। तुच्छः। चुच्छो। छुच्छो॥

टल् त्रसरवृन्ततूवरतगरे ॥ १ । ३ । ३७ ॥

एषु तवर्गस्य टकारो भवति। लित्वान्नित्यम्। टसरो। टूवरो।

---

१ इत्यनुवर्तते M.; इत्यतो डत्वमनुवर्तते T. २ P., My., and M. drop प्रतिपद्. ३ भिन्दिवाल। Mr., P., M. ४ R. and T. have after this प्रपादः। प्रतिपदम् पइपदम्। ५ प्रतिज्ञा। संप्रति। R., T. ६ M. and R. drop अत्र. ७ भयार्थो वृत्तो T., R. ८ एवात्र माद्यः। M. ९ R. drops माद्यः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तूवरः शृङ्गरहितो[1]ऽनड्वान् श्मश्रुरहितो वा[2] । टगरो औषधविशेषो वृक्ष-विशेषो वा ॥

हः कातरककुदवितस्तिमातुलुङ्गेषु ॥ १ । ३ । ३८ ॥

'तोः' इत्यनुवर्तते । एषु तवर्गस्य हत्वं भवति । काहरो । कहो । मातुलुङ्गप्रियः । माहुलुंगप्पिओ ॥

तु[3] वसतिभरते ॥ १ । ३ । ३९ ॥

'हः' इत्यनुवर्तते । अनयोस्तवर्गस्य हकारो[4] वा स्यात् । भरहो । भरओ ॥

लः पलितनितम्बकदम्बे ॥ १ । ३ । ४० ॥

'तु' इत्यनुवर्तते । एषु तवर्गस्य लो वा स्यात् । पलितकेशः । पलिलकेसो । [6]नितम्बः । निलंबो । कदम्बः । कलंबो । पक्षे । पलि-अकेसो । इत्यादि ॥

दोहदप्रदीपशातवाहनातस्याम् ॥ १ । ३ । ४१ ॥

'लः' इत्यनुवर्तते । दोहदे प्रपूर्वे दीप्यतौ च शातवाहनशब्दे[7] अतसीशब्दे च तवर्गस्य लत्वं भवति । पृथक्त्वान्नित्यम् । दोहलो । पलीवो । प्रदीपः । सालाहणो । शातवाहनः । अळसिप्पसूणवण्णो । अतसीप्रसूनवर्णः ॥

रल् सप्तत्यादौ ॥ १ । ३ । ४२ ॥

तवर्गस्य रत्वं भवति । लित्वान्नित्यम् । इति सप्तत्यादिगणपठितग-द्गदशब्दे तवर्गस्य रः । गग्गरो । सप्तत्यादि—सप्तति । सप्तदश । एकादश । द्वादश । त्रयोदश । पञ्चदश । अष्टादश । गद्गद[8] इत्यादि ॥ 'कदर्थिते वोर्वः' इत्यतः 'वः' इत्यधिकृत्य[9]

---

१ शृङ्गरहितः । P., My., M. २ वा वृषभः M.; पुरुषो वा R., T. ३ R. drops तु. ४ R. has तु after it. ५ हत्वं R. ६ M. has निम्बः । तिंबो for नितम्बः । निलंबो । ७ °शब्दे च M. ८ M. has गद्गदः । before it. ९ इत्यधिकृत्य M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पीते ले वा ॥ १ । ३ । ४५ ॥

पीते स्वार्थिके लकारे सति तोर्वकारो वा स्यात् । पीवलो । पीअ-लो[1] । 'ले' इति किम् । पीओ । अत्र 'स्वार्थे तु कश्च' इत्यधिकृत्य 'लो वा विद्युत्पीतयोः' इत्यनेन स्वार्थे वा लः ॥

ढः पृथिव्यौषधनिशीथे ॥ १ । ३ । ४७ ॥

'वा'[2] इत्यनुवर्तते । एषु तवर्गस्य ढत्वं वा भवति । औषधगुणः । ओसढगुणो । पक्षे । ओसहगुणो । अत्र 'खघथधभाम्' इति हत्वम् । णिसीढो । णिसीहो । निशीथः ॥

णो दिना रुदिते ॥ १ । ३ । ४९ ॥

अत्र दिना दीत्यवयवेन सह णत्वं रिर्भवति[3] । रित्वाद्वित्वम् । रुदि-तकरः । रुण्णअरो । 'णो वातिमुक्तके' इत्यतः 'णो वा' इत्यधिकृत्य[4]

गर्भिते ॥ १ । ३ । ५१ ॥

अत्र तवर्गस्य णत्वं भवति[5] । गब्भिणो । गब्भिओ ॥

नः ॥ १ । ३ । ५२ ॥

'णः' इत्यनुवर्तते । अस्तोरखोरचः परस्य नकारस्य णकारो भवति । मानवः[6] । माणवो । ईशानः[7] । ईसाणो । इत्यादि ॥

आदेस्तु ॥ १ । ३ । ५३ ॥

'नः' इत्यनुवर्तते । आदेर्नकारस्य णो वा स्यात् । नरः । णरो । नरो । नतः । णओ । नओ । इत्यादि । अस्तोरित्येव । न्यायः । नाओ ॥

नापिते ह्नः[8] ॥ १ । ३ । ५४ ॥

---

१ M. has पीतः after पीअलो । २ R. and T. have 'पीते लो वा' इत्यतः before 'वा' इत्यनुवर्तते । ३ रिर्भवति । M. ४ इत्यधिकृत्य M. ५ भवति तु P., My. ६ माणवो । मानवः । M. ७ ईसाणो । ईशानः । M. ८ ह्नः । T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'णः' इत्यनुवर्तते । 'नः'[1] इति च । अत्र नकारस्य णकारहकारौ वा भवतः[3] । हाविओ[4] । णाविओ । नाविओ ॥

अथ[5] पवर्गादेशाः[6] ॥

पो वः ॥ १ । ३ । ५५ ॥

असंयुक्तस्यानादौ वर्तमानस्याचः परस्य पकारस्य प्रायो वः[7] स्यात् । शापः । सावो । इत्यादि । अस्तोरित्येव । विप्रः । विप्पो । अस्तोरित्येव । पढइ । पठति । अच इत्येव । कम्पो[8] । प्राय इत्येव । कपिः । कई । रिपुः । रिऊ । एतेन[9][10] प्रायो लोपवकारयोः पकारस्य युगपत् प्राप्तयोर्यत्र श्रुतिसुखमुत्पद्यते स तत्र विधेयः ॥

फः पाटिपरिघपरिखापरुषपनसपारिभद्रेषु[11] ॥ १ । ३ । ५६ ॥

'पः' इत्यनुवर्तते । णिजन्ते पटिधातौ परिघादिषु च पस्य फत्वं भवति । परिघः । फलिहो । अत्र घस्य हः । हरिद्रादित्वाद्रस्य लत्वम् । पनसः[12] । फणसो[13] । फणसः संस्कृतेपि । परुषः । फरुसो । पारिभद्रः । फालिहद्दो । भस्य हः । हरिद्रादित्वाद्रेफस्य लत्वम् ॥

प्रभूते वः ॥ १ । ३ । ५९ ॥

'पः' इत्यनुवर्तते । अत्र पकारस्य वकारः स्यात् । वहुत्तो । तैलादित्वाद् द्वित्वम् ॥

नीपापीडे मो वा ॥ १ । ३ । ५७ ॥

नीपे आपीडे च पस्य मो वा स्यात् । णीमो । पक्षे । नीवो ।

---

१ M. drops 'नः' इति च. २ ह्रकारो वा स्यात् । R., T. ३ स्यात् । M. ४ ह्णाविओ । R. ५ M. and R. drop अथ. ६ पवर्गस्यादेशाः । My.; P., पस्यादेशाः । R. ७ वकारः R. ८ R. has कम्पः before कम्पो. ९ R. has इत्यादि after रिऊ । १० R. has पकारस्य for एतेन. ११ पनसपरुष M. १२ R. has परुषः । परुसो before पनसः । १३ पणसो M., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमेलो । पंक्षे । आवेलो । अत्र 'एल्पीड—' इत्यादिना ईकारस्य एत्वम् ॥

फस्य भहौ वा ॥ १ । ३ । ६० ॥

अस्तोरखोरचः परस्य फकारस्य भकारहकारौ यथासंभवं व्यवस्थितविभाषया भवतः । क्वचिद्भः । रेफः । रेभो । क्वचिद्धः । मुक्ताफलम् । मोत्ताहळं । कैंचिदुभावपि । सफलम् । सभळं । सहळं । इत्यादि । अस्तोरित्येव । गुल्मः । गुम्भो । अखोरित्येव । फणी । अँच इत्येव । गुंफति । गुंफइ । माय इत्येव । कसणफणी ॥

बो वः ॥ १ । ३ । ६१ ॥

असंयुक्तस्यानादौ वर्तमानस्याचः परस्य बस्य वो भवति । शबलः । सवलो । इत्यादि ॥

ङ्व्यौ कबन्धे ॥ १ । ३ । ६२ ॥

अत्र बैंकारस्य वकारयकारौ ङितौ भवतः । ङित्वात् सानुर्नासिक उच्चारः । कवन्धो । कयन्धो ॥ 'त्वभिमन्यौ मः' इँत्यतः 'मः' इत्यधिकृत्य

तु डो विषमे ॥ १ । ३ । ६७ ॥

अत्र मस्य डो वा स्यात् । विसडो । विसमो ॥

यो जर्तीयानीयोत्तरीयकृत्येषु ॥ १ । ३ । ६८ ॥

'तु' इत्यनुवर्तते । तीये अनीये च प्रत्यये उत्तरीयशब्दे कृद्विहितप्रत्यये च यकारस्य जकारो वा स्यात् । रित्वाद् द्वित्वम् । तृतीयः । तइज्जो । पक्षे । तँईओ । अत्र 'ऋतोत्' इत्यत्वम् । गभीरादिपाठादी-

---

१ M. drops पक्षे. २ एत्वं भवति । M. ३ P. and My. drop the portion from क्वचिद्धः to इत्यादि । ४ पुप्पम् । पुप्पम् M. for गुल्मः । गुम्भो । ५ भोरित्येव । गुंफइ । for अच इत्येव । गुंफति । गुंफइ । M. ६ M. has कृष्णफणी after कसणफणी । ७ बस्य M. ८ °नासिकोच्चारः । M. ९ इत्यधिकृत्य M. १० तइवो M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारस्य इत्वं तलोपश्च । अनीगे । करणीयः । करणिज्जो । करणीओ । उत्तरीयपटः । उत्तरिज्जपडो । उत्तरीअवडो । कृत्ये । मेयः । मेज्जो । मेओ । इत्यादि ॥

इन्मयटि ॥ १ । ३ । ६९ ॥

'यः' इत्यनुवर्तते । 'तु' इति च । मयट्प्रत्यये यकारस्य इकारो वा स्यात् । विषमयः । विसमइओ । विसमओ । इत्यादि ॥

कतिपये वहशौ ॥ १ । ३ । ७२ ॥

'यः' इत्यनुवर्तते । अत्र यस्य वत्वहत्वे भवतः । हत्वे शित्वात् पूर्वस्य दीर्घः । कइवओ । कइवाहो ॥

अर्थपरे तो युष्मदि ॥ १ । ३ । ७३ ॥

'यः' इत्यनुवर्तते । अर्थपरे युष्मच्छब्दे यकारस्य तकारः स्यात् । तुम्हकेरो । 'अर्थपरे' इति किम् । जुम्हअम्हप्पअरणं । युष्मदस्मत्प्रकरणम् ॥

आदेर्जः ॥ १ । ३ । ७४ ॥

'यः' इत्यनुवर्तते । आदेर्यस्य जः स्यात् । यमः । जमो । इत्यादि । 'आदेः' इति किम् । अवयवो । बहुलाधिकारात् सोपसर्गस्यानादेरपि । संयोगः । संजोओ । संयमः । संजमो । क्वचिन्न भवति । प्रयोगः । पओओ ॥ 'भ्यौ बृहस्पतौ तु बहोः' इत्यतः 'तु' इत्यनुवर्तते । 'रो डा पर्याणे' इत्यतः 'रः' इति च ।

लो जठरवठरनिष्ठुरे ॥ १ । ३ । ७७ ॥

जठरादौ रस्य लत्वं वा स्यात् । जठरानलः । जढलाणलो । जढराणलो । वढलो । वढरो । अत्र 'ठः' इति ठस्य ढत्वम् । णिट्ठुलो ।

---

१ करणीयो M. २ उत्तरीअपडो M. ३ M. drops विसमओ । ४ M. and T. have युष्मदीयः before it. ५ जुह्माअह्मापअरणं । M. ६ संजोओ । संयोगः । M., R., T. ७ संजमो । संयमः । M., R., T. ८ जढरानलो M. ९ पढलो । पढरो । M.

निड्डुरो । अत्र 'कग—' इति षलोपे शेषस्य द्वित्वम् । भसलशब्दो भ्रमरपर्यायः संस्कृत इव ॥

हरिद्रादौ ॥ १ । ३ । ७८ ॥

'रः' इत्यनुवर्तते । 'लः' इति च । हरिद्रादौ रेफस्य लत्वं भवति । पृथक्कृत्वान्नित्यम् । चरणः । चलणो । इत्यादि । हरिद्रादि—हरिद्रा । अङ्गार । चरण । युधिष्ठिर । सुकुमार । शिथिर । सत्कार । मुखर । वरुण । किरात । रुग्ण । अपद्वार । करुण । दरिद्र । परिघ । परिखा । मत्सर । संवत्सर । पारिभद्र । दारिद्र्य । कातर । इत्यादि ॥

किरिबेरे[2] डः ॥ १ । ३ । ७९ ॥

किरिशब्दे[3] बेरशब्दे च रस्य डः स्यात् । बेडो[4] । बेरः । करभो मण्डूको दुन्दुभिर्वा ॥

खोः करवीरे णः ॥ १ । ३ । ८० ॥

'रः' इत्यनुवर्तते । अत्र खोरादे रेफस्य णत्वं स्यात् । कणवीरो ॥

लोहललाङ्गललाङ्गूले वा ॥ १ । ३ । ८२ ॥

अस्तोरखोरश्च इति निवृत्तम् । 'लो ललाटे च' इत्यतः 'लः' इत्यनुवर्तते । पूर्वसूत्रात् 'णः' इति च । लोहलादिष्वादेर्लकारस्य णो वा स्यात् । लंगलहत्थो । णोहलो । लोहलो । शब्दविशेषः[5] । णंगलहत्थो[6] । लांगलहस्तः । अत्र 'स्वरस्य बिन्दुमि' इति ह्रस्वः । 'संयोगे' इति वा । दीर्घलाङ्गूलः । दिग्घणंगूलो[7] । दिग्घलंगूलो[8] ॥

बो मः शबरे ॥ १ । ३ । ८४ ॥

अत्र बस्य मः स्यात् । शबलः[9] । समरो[10] ॥ 'नीवीस्वप्ने वा' इत्यतः 'वा' इत्यधिकृत्य

---

१ वदेव R., T. २ °भेरे M. ३ M. has 'रः' इत्यनुवर्तते before it. ४ भेरः । भेडो । M. ५ शफरविशेषः R., T. ६ लाङ्गलहस्तः । णंगळहत्थो । लंगळहत्थो । M. ७ दिग्घणंगूळो । M. ८ M. drops दिग्घलंगूलो । ९ M., R. and T. drop शबलः । १० सम्मरो । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्स घो विन्दोः ॥ १ । ३ । ८६ ॥

बिन्दोः परस्य ह्स घो वा स्यात् । संहारः[1] । संघारो । संहारो[2] । सिंहः । सिंघो । अस्य विंशत्यादिपाठाद्बिन्दोः श्लोपलि शित्वात् पूर्वस्य[3] दीर्घे सीहो इत्यपि । क्वचिदबिन्दोरपि । दाहः । दाघो ॥ 'शोः सल्' इत्यतः 'शो.' इत्यधिकृत्य

प्रत्यूषदिवसदशपाषाणे तु हः ॥ १ । ३ । ८८ ॥

एषु शोः शषसानां हकारो वा स्यात् । प्रत्यूषः । पँचूहो[4] । पच्चूसो[5] । अत्र 'त्योचैत्ये' इति त्यस्य चः । दिअहो[6] । दिअसो । पाहाणो । पासाणो ॥

छल् षद्छमीसुधाशावसप्तपर्णे ॥ १ । ३ । ९० ॥

'शोः' इत्यनुवर्तते[7] । एषु शोश्छत्वं लित् स्यात्[8] । षण्मुखः । छम्मुहो । षट्पदः । छप्पओ । शावः । छावो । सप्तपर्णे । 'हे दक्षिणेस्य' इत्यतः 'अस्य' इत्यधिकृत्य 'खभादाविल्' इत्यतः 'इल्' इति च

सप्तपर्णे फोः ॥ १ । २ । १३ ॥

अत्र द्वितीयस्यावर्णस्येत्वं लिद्भवति । छत्तिवण्णो । सुधाकरः । छुहाअरो ॥ पादपीठादिषु विशेषाः कथ्यन्ते । 'सिरायां[9] वा' इत्यतः[10] 'वा' इत्यधिकृत्य

लुक् पादपीठपादपतनदुर्गादेव्युदुम्बरेचान्तर्दः[11] ॥ १।३।९२ ॥

पादपीठादिष्वन्तर्वर्तमानस्य दः[12] दकारस्य अचा सहितस्य लुग्वा स्यात् । नतपादपीठः । णअपावीढो । णअपाअवीढो[13] । अत्र 'ठः' इति

---

१ P. and My. have संघारो । संहारो । संहारः । २ R. drops संहारो. ३ पूर्वस्याचो M. ४ पच्चूहो । M. ५ M. drops पच्चूसो. ६ M. has पच्चूसो before दिअहो । ७ इत्यनुवर्तते R. ८ लित् स्यात् R. ९ सीरायां M. १० इत्यधिकृत्य M., R. ११ चादोन्तः M. १२ R. and T. drop दः. १३ M. drops णअपाअवीढो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठस्य ढत्वम् । कृ[1]तरामपादपतनः । कँ[2]अरामपावडणो । कँ[3]अरामपाअवडणो । अत्र प्रत्यादित्वात् तस्य डः । दुर्गादेवीरमणः । दुग्गाईरमणो । दुग्गादेईरमणो । उदुम्बरः । उंबरो । उउंबरो । 'अन्तर्' इति किम् । दुर्गादेव्यामा[4]दौ मा भूत् ॥

व्याकरणप्राकारागते कगोः ॥ १ । ३ । ९३ ॥

'लुक्' अनुवर्तते । 'अचा' इति च । व्याकरणादिषु ककारगकारयोरचा सह लुग्वा स्यात् । व्याकरणपाठः । वारणपाढो । वाअरणपाढो । प्राकारः । पारो । पाँ[5]आरो । आँ[6]ओ । आअओ । आगतः ॥

एवमेवदेवकुलप्रावारयावज्जीविताव़टावर्तमानतावति वः ॥ १ । ३ । ९४ ॥

एवमेवादिष्वन्तर्वर्तमानस्य वँ[7]कारस्य अचा सह लुग्वा स्यात् । देवकुलनाथः । दे[8]उलणाहो । देवँ[9]उलणाहो । पारो । पाँवँ[10]ारो । प्राँवँ[11]ारः । [12]जीअणाहो । जीविअणाहो । जीवितनाथः । अडो । अवडो । अवटः । [13]अत्र 'टो डः' इति टस्य डत्वम् । अत्तमाणो । आवत्तमाणो । आवर्तमानः । 'अन्तर्' इति किम् । एवमेवेत्यत्रान्त्यस्य मा भूत् ॥

ज्योर्दनुजवधराजकुलभोजनकालायसकिसलयहृदयेषु ॥ १ । ३ । ९५ ॥

दँ[14]नुजवधादिषु ज्योर्जकारयकारयोरचा सह लुग्वा स्यात् । दँ[15]णुवहो । दणुअवहो । दनुजवधः । राँ[16]उलप्पसूओ । राअउलप्पसूओ । राजकुलप्रसूतः । भोणप्पिओ । भो[17]अँणप्पिओ । भोजनप्रियः । इत्यादि ॥

---

१ कृतपादपतनः । R. २ कअपावडणो R. ३ कअपाअवडणो R. ४ °मादेर्मा My., P. ५ पाअरो M. ६ आगतः । आगओ । आओ । M. ७ वस्य R. ८ देउलणहो । M. ९ M. drops देवउलणाहो । १० पाअरो । M. ११ M. drops प्रावारः । १२ जीवितनाथः । जीअणाहो । जीविअणाहो । १३ M., My. and P. drop अत्र 'टो डः' इति टस्य डत्वम् । १४ दनुजादिषु R. १५ दनुजवधः । दणुवहो । M. १६ राजकुलप्रसूतः । राउलप्पसूदो । राअवुलप्पसूदो । M. १७ M. drops भोअणप्पिओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपतौ घरो गृहस्य ॥ १ । ३ । ९९ ॥

गृहशब्दस्य अपतौ पतिशब्दः परो न भवति चेद् घर इत्यादेशो भवति । घरो । राअघरो । 'अपतौ' इति किम् । गहवई ॥ स्मरशब्दे

स्मरकद्वोरीसरकारौ ॥ १ । ३ । १०० ॥

अनयोर्यथासंख्यं ईसरकार इत्यादेशौ भवतः । ईसरो । पक्षे सरो । एकादशः । द्वादशः । अष्टादशः[1] । सप्तदशः । अत्र सर्वत्र सप्तत्यादिपाठाद् दस्य रत्वम् । 'प्रत्यूष' इत्यादिना शोर्हत्वम् । एक्कारहो[2] । बारहो । अत्र[3] 'कग—' इत्यादिना दस्य लुक् । अट्ठारहो । अत्र[4] 'ष्टः' इति ष्टस्य ठत्वम् । सत्तरहो । अत्र[5] 'कग—' इति पस्य लुक् । पञ्चदशः । पण्णरहो । अत्र 'पञ्चदश—' इत्यादिना स्तोर्णः । त्रयोदशः । तेरहो । अत्र 'एत्साज्झला—' इत्येत्वम् । चतुर्दशः । चोद्दहो । चउद्दहो[6] । अत्र 'तु मयूर—' इत्यादिना[7] आदेरचः परेण साज्झला सह वा ओत्वम्[8] । एतेषां संख्यावाचित्वेप्युक्ता आदेशाः समाः । विशेषस्तु नकारान्तत्वादात्मशब्दवत् प्रक्रिया । पूरणप्रत्ययान्तास्तु[9] रामशब्दवत्[10] ॥

इत्यकारान्ताः ॥

अथ[11] आकारान्तः पुंलिङ्गः सोमपाशब्दः ।

सोमपा सु इति स्थिते 'ह्रस्वलीदूतः' इत्यतः 'ह्रस्व' इत्यधिकृत्य

क्विपः ॥ २ । २ । ४७ ॥

[12]क्विप्प्रत्ययान्तानां ह्रस्वः स्यात् । इति क्विप्प्रत्ययान्तानां ह्रस्वविधानेपि प्राकृतप्रतिपादकशास्त्रान्तरे क्विबादिप्रत्ययान्तानामित्यादि

---

1 M. has सप्तदशः । अष्टादशः । 2 एआरहो । M. 3 My., M. and P. drop the portion from अत्र to दस्य लुक्. 4 The portion from अत्र to ठत्वम् is dropped in My., P. and M. 5 M., My., P. drop the portion from अत्र to लुक्. 6 चउद्दहो is omitted in M. and My. 7 इत्यादेरचः M. 8 ओकारः । M. 9 पूरणप्रत्ययान्ताः M.; पूरणप्रत्ययान्तो R., T. 10 R. drops शब्द. 11 M. and T. drop अथ. 12 क्विप्प्रत्ययान्तस्य P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहणदर्शनाद्विच्प्रत्ययान्तसोमपाशब्दस्यापि ह्रस्वः । यद्वा 'क्विपः' इति सूत्रे[1] क्विब्ग्रहणं विजादीनामप्युपलक्षकम्[2] । न च सूत्रे उपलक्षकत्वमदृष्टचरमिति वाच्यम् । प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमित्यत्र साधर्म्यग्रहणं वैधर्म्यस्याप्युपलक्षणमिति सर्वसंप्रति[3]पन्नत्वात् । तन्न्यायेनात्राप्युपलक्षितविच्प्रत्ययान्तस्य सोमपाशब्दस्यापि ह्रस्वः । तथा च सोमप सु इति स्थिते 'प्रायो लुक्—' इति पलोपे प्राप्ते 'नात्पः'[4] इति प्रतिषेधात्[5] पलोपाभावे[6] 'पो वः' इति पस्य वः[7] । 'सोः' इत्यादि-सूत्रैर्विधीयमाना आदेशाः पूर्ववत् । सोमवो । सोमवा । इत्यादि । रामवत् । एवं कीलालपाप्रभृतयः ॥

इकारान्तः पुंलिङ्गः कविशब्दः । कवि सु इति स्थिते । 'इदुतोर्दिः' इत्यधिकृत्य

श्लुगनपि सोः ॥ २ । २ । २९ ॥

इदुद्भ्यां परस्य सोः शानुबन्धो लुक् स्यात् । अनपि नपुंसकलिङ्गे तु[9] न भवति । 'शिति दीर्घः' इति दीर्घः । वलोपः । कई ॥ कवि जस् इति स्थिते 'चतुरो वा' इत्यतः[10] 'वा' इत्यधिकृत्य 'इदुतोः—' इति च इदुतोरित्यस्य सुब्व्यत्ययेन पञ्चम्यन्तविपरिणामः ।

पुंसो जसो डउ डओ ॥ २ । २ । २४ ॥

पुंलिङ्गादिदुतोः परस्य जसः अउ अओ इत्यादेशौ डितौ वा भवतः । कवऊ । कअओ[11] । पक्षे 'णो शसश्च' इति वौ[12] णः । कइणो । पक्षे 'श्लुग्जश्शसोः' इति श्लुक् । कई । संबुद्धौ कवि सु इति स्थिते 'डोश्लुकौ तु संबुद्धेः' इति सोर्वा श्लुक् । शित्वात् पूर्वस्य[13] दीर्घः ।

---

१ सूत्रे is dropped in P. and My. २ °लक्षणम् R., T. ३ सर्वत्र संप्रति° R., T. ४ M. has नात्पः । अवर्णात् परस्य पकारस्य लोपः स्यात् इति पलोपाभावः । 'पो वः' इति &c. ५ R. drops प्रतिषेधात्. ६ °भावः किंतु R., T. ७ वत्वम् । R. T. ८ भवति । R. ९ M. and T. drop तु. १० इत्यधिकृत्य M., R. ११ कवओ । M. १२ णो वा । R. १३ M. drops पूर्वस्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दे कई । श्लुगभावे 'सोर्लुक्' इति लुक् । दे कइ । नात्र डो । अनदन्तत्वात् ॥ जसि पूर्ववत् ॥ द्वितीयैकवचने 'अमः' इति मः कइं ॥ शसि 'ईदुतोर्दिः' इत्यतः 'इदुतोः' इति 'चतुरो वा' इत्यतः 'वा' इति 'पुंसो जसः—' इत्यतः 'पुंसि' इति चाधिकृत्य

णो शसश्च ॥ २ । २ । २६ ॥

पुंलिङ्गादिदुतः परस्य शसश्चाज्जसश्च णो वा स्यात् । कइणो[3] । पक्षे 'श्लुग्जश्शसोः' इति श्लुक् । कई[5] । पुंस इत्येव । बुद्धी[6] ॥ तृतीयैकवचने कवि टा इति स्थिते 'इदुतोर्दिः' इत्यतः 'इदुतोः' इत्यधिकृत्य 'नृनपि ङसिङसोः' इत्यतः 'नृनपि' इति च

टो णा ॥ २ । २ । २८ ॥

पुंनपुंसके वर्तमानादिदुतः परस्य टावचनस्य णा भवति । कइणा[9] ॥ कविभिस् इति स्थिते भिसि हिमादयः पूर्ववदेव विधेयाः ॥ 'भिस्भ्यसूसुपि' इत्यधिकृत्य

इदुतोर्दिः ॥ २ । २ । २२ ॥

भिस्भ्यसूसुपि परे इदुतोर्दीर्घः स्यात् । कईहिं[10] । बहुलाधिकारात् 'इदुतोर्दिः' इति दीर्घः क्वचिन्न भवति । दिअभूमिसु[11] दाणजलद्धिताइं । द्विजभूमिषु दानजलार्द्रितानि ॥ पञ्चम्येकवचने [12]कवि ङसिति स्थिते 'णो शसश्च' इत्यतः[13] 'णो' इत्यधिकृत्य 'इदुतोः' इति च

नृनपि ङसिङसोः ॥ २ । २ । २७ ॥

पुंलिङ्गे नपुंसकलिङ्गे च वर्तमानादिदुतः[14] परयोः ङसिङसोर्णो

---

१ My. and P. have हरिं after कइं. २ 'इदुतोर्दिः' 'चतुरो वा' 'पुंसो जसः—' इत्यतः डउ डओ इत्यधिकृत्य M. ३ My., P. and M. have हरिणो after it. ४ इति शसः श्लुकि M. ५ My., P. and M. have हरी after it. ६ ऋद्धी My. ७ इत्यधिकृत्य M. ८ इति च M. ९ हरिणा after this in My., P. and M. १० M., My. and P. have हरीहिं after it. ११ डिअभूमिसु M. १२ हरि ङसिति P., My., M. १३ इत्यधिकृत्य M. १४ °दिदुतोः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादेशो वा स्यात्[1] । कविणो[2][3] । 'नृनपि' इति किम् । बुद्धीए । पक्षे हिंतोत्तोदोदुवश्च[4] । कवीहिंतो[5] । कइत्तो । कईओ । कईउ । ङसिङसोर्हिरिति नास्ति । अनदन्तत्वात् ॥ भ्यसि उक्ता हिंतोप्रभृतयः सुन्तो च । 'इदुतोर्दिः' इति दीर्घः । कईहिन्तो[6] । इत्यादि ॥ षष्ठ्येकवचने 'नृनपि ङसिङसोः' इति वा[7] णो । कइणो[8] । पक्षे 'ङसोस्त्रियां सर्' इति द्विरुक्तः सकारः । कइस्स[9] ॥ सप्तम्येकवचने मिरेव । कविम्मि[10] ॥ बहुवचने 'इदुतोर्दिः'[11] इति दीर्घः । कवीसुं[12] । कवीसु ॥ शेषं रामवत् ॥

अथ इकारान्तेषु केचिद्विशेषाः प्रदर्श्यन्ते ॥ ध्वनि सु इति स्थिते 'उल्ध्वनि—' इत्यादिना वकारसंबन्धिनो वर्णस्योत्वम् । 'लवराम्—'[13] इति वलोपः । धुणी ॥

त्वथ्वद्ध्वां क्वचिच्चछजझाः ॥ १ । ४ । ६५ ॥

त्वथ्वद्ध्व इत्येषां यथासंख्यं[14] क्वचित् प्रयोगानुसारेण चछजझ इत्येते आदेशा भवन्ति । इति ध्वस्य झादेशे । झणी ॥ शेषं कविवत्[15] ॥

तित्तिरिशब्दे

रस्तित्तिरौ ॥ १ । २ । ४४ ॥

'मूषिकविभीतक—'[16] इत्यादेरदित्यनुवर्तते । 'स्वेदितः'[17] इत्यतः 'इतः' इति च । अत्र रेफसंबन्धिनः इवर्णस्यात्वं भवति । तित्तिरो ॥ शेषं रामवत् ॥ ऋषिशब्दे 'ऋतुऋजुऋणर्षि—'[18] इत्यादिना ऋका-

१ भवति for वा स्यात् R. २ My. and P. have हरिणो in place of कविणो. ३ M. has हरिणो after it. ४ °दश्च । M. ५ My., P. and M. have हरिहिंतो । हरित्तो । हरीओ । हरीउ । in place of कवीहिंतो । &c. ६ कइहिन्तो । M. ७ णो वा M. ८ M., My. and P. have हरिणो in place of कइणो । ९ M., My. and P. have हरिस्स । १० My. and P. have हरिम्मि; M. has both. ११ इदुतोरिति दीर्घः । M. १२ My. and P. have हरीसुं । १३ रवलेति वलोपः । M., T. १४ My. and P. have यथासंख्यं after प्रयोगानुसारेण. १५ कविवद्धरिवच्च । My., M., P. १६ र इत्यनु° M. १७ M. drops 'स्वेदितः' इत्यतः. १८ °ऋषिऋषभ—' M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रस्य वा रिः । रिसी । पक्षे । कृपादित्वादिल् । इसी । अग्निशब्दे 'स्नेहाग्न्योर्वा' इति सूत्रेण युक्तस्यान्त्यहलः प्राग्वा अत्वे । अगणी । पक्षे । अग्गी । अत्र 'मनयाम्' इति नलोपः । शेषद्वित्वं च ॥ पदातिशब्दे

तिर्यक्पदातिशुक्तेस्तिरिच्छिपायिक्कसिप्पि ॥ १ । ३ । १०४ ॥

तिर्यगादेस्तिरिच्छ्याद्य आदेशा यथाक्रमं वा स्युः । इति पायिकादेशे । पायिक्को ॥ शेषं रामवत् । पक्षे । दंतयोर्लोपे । पआई ॥ अक्षिशब्दे 'अक्ष्यर्थकुलाद्या वा' इति पुंलिङ्गतायां स्पृहादित्वात् क्षस्य छत्वे । अच्छी । अस्यैवाञ्जल्यादिपाठात् स्त्रीलिङ्गेपि प्रयोगः ॥ रश्मिशब्दे मलोपे रस्सी । नात्र 'श्मष्म—' इत्यादिना ह्मादेशः । 'असमररश्मौ' इति प्रतिषेधात् ॥ किरिशब्दे 'किरिबेरे[6] डः' इत्यनेन रेफस्य डत्वम् । किडी ॥ शौद्धौदनिशब्दे 'शोण्डगे' इत्यनेन शोण्डादिपाठादादेरेच उत्वम् । सुद्धोअणी ॥ बृहस्पतिशब्दे 'ऋतोत्' इत्यधिकृत्य 'इदुन्मातुः' इत्यतः 'इदुः' इति च

तु बृहस्पतौ ॥ १ । २ । ८५ ॥

अत्र ऋत इदुतौ वा भवतः । पक्षे अत्वम् । तथा च बिहस्पति बुहस्पति बहस्पति इति स्थिते

भ्यौ बृहस्पतौ तु बहोः ॥ १ । ३ । ७५ ॥

अत्र बकारहकारयोर्यथाक्रमं भकारयकारौ भवतः । तथा च भियस्पति । भुयस्पति । भयस्पति । पक्षे उक्तानि त्रीणि रूपाणि । एवं षट्स्वपि रूपेषु 'ष्पस्पोः फः' इत्यतः 'फः' इत्यधिकृत्य

श्लेष्मबृहस्पतौ तु फोः ॥ १ । ४ । ४६ ॥

अनयोः फोर्द्वितीयस्य स्तोः फो वा स्यात् । इति फत्वे बिहप्फई । बुहप्फई । बहप्फई । भियप्फई । भुयप्फई । भयप्फई । फत्वाभावे

---

१ प्रागत्वे M.; प्रागत्वं वा स्यात् R., T. २ नलोपः शेषद्वित्वे च । M.; नलोपे शेषद्वित्वम् । R. ३ °स्तिरिच्छ्या° M. ४ तदयोर्लोपे My., P. ५ ह्मादेशः । M. ६ °भेरे M. ७ इति च M. ८ तु भवतः । M. ९ भुअप्फई । M. १० भअप्फई । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो बृहस्पतिवनस्पत्योः ॥ १ । ४ । ७४ ॥

'[1]तो ढोरश्चारब्धे तु' इत्यतः 'तु' इत्यनुवर्तते । अनयोर्युक्तस्य वा[2] सः स्यात् । इति स्पस्य वा सत्वे । बिहस्सई । बुहस्सई । बहस्सई । भियस्सई । भुयस्सई । भयस्सई ॥ यदा युक्तस्य फत्वसत्वयोरभावस्तदा 'कग—' इति सलोपे शेषस्य[3] द्वित्वे बिहप्फई इत्यादीनि[4] षड् रूपाण्युदाहर्तव्यानि । इति बृहस्पतिशब्दस्या[5]ष्टादश प्रकाराः ॥ वनस्पतिशब्दे 'सो बृहस्पतिवनस्पत्योः' इति वा युक्तस्य सत्वे[6] वणस्सई । सत्वाभावे 'ष्पस्फोः' इति फः । वणप्फई ॥ द्विशब्दस्य सर्वत्र[7] बहुवचनमेव । 'चतुरो जश्शस्भ्याम्—' इत्यतः 'जश्शस्भ्याम्' इत्यधिकृत्य

दोण्णि दुवे बेण्णि द्वेः ॥ २ । ३ । ३० ॥

द्विशब्दस्य जश्शस्भ्यां सह दोण्णि दुवे बेण्णि इति त्रय आदेशा भवन्ति । दोण्णि । दुवे । बेण्णि । इति स्थिते 'संयोगे' इति ह्रस्वे[8] कर्तव्ये अनुक्तमन्यन्यायेन एच इग्ध्रस्वादेश इति इगेव भवति । दुण्णि पुरिसा । बिण्णि पुरिसा । अत्रानुक्तन्यायेन ईग्ध्रस्वो नास्तीति केचित् । तदा दोण्णि । बेण्णि । दुवे । 'दोवे टादौ च' इति विधास्यमानौ दो वे इत्यादेशावपि । तथा च जसि । दोण्णि[9] । दुण्णि । बेण्णि । बिण्णि । दो । वे । दुवे[10] । शस्येतान्येव ।

दो वे टादौ च ॥ २ । ३ । ३१ ॥

[11]'द्वेः' इत्यनुवर्तते । द्विशब्दस्य टादौ तृतीयादौ[12] सुपि परे चकाराज्जश्शस्भ्यां सह दो वे इत्यादेशौ भवतः । अत्र सूत्रे 'टादौ' इत्यत्रा[13]तद्गुणं बहुव्रीहिमङ्गीकृत्य टावचनस्य विधेयान्वयः परिहर्तव्यः । अन्यथा

---

१ M. drops 'तो ढो रश्चारब्धे तु' इत्यतः 'तु' इत्यनुवर्तते २ सो वा M. ३ शेषद्वित्वे M. ४ इत्यादि M. ५ °शब्दरूपस्य M. ६ सत्वम् । T. ७ My. and P. drop सर्वत्र. ८ ह्रस्वो M. ९ M. drops दोण्णि । १० R. and T. add इति सप्तादेशाः after it. ११ My. M. and P. drop 'द्वेः' इत्यनुवर्तते । १२ तृतीयादौ is dropped by M., R., T. १३ °त्रातद्गुणसंविज्ञानबहुव्रीहि° P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रापि दो वे स्याताम् । तथा च द्विशब्दस्याप्येकवचनतापातः । तत्तु विरुद्धम् । तस्मादतद्गुणबहुव्रीहिमाश्रित्य भिसादीनामेव विधेयान्वयो न तु टावचनस्य । अथ यद्यतद्गुणबहुव्रीह्याश्रयणाद्भिसादीनां[1] विधेयान्वयस्तर्हि ङसाद्येकवचनानामपि भिसादित्वात् तेषामपि विधेयान्वयापात इति तदिदम[2]विदितमीमांसावृत्तान्तस्य भाषितम् । यथा हस्तेनावद्यति । स्रुवेणावद्यति । स्वधितिनावद्यति । इत्यत्र हस्तादीनां सामान्येन द्रवसहिताज्यमांसपुरोडाशाद्यवदानसाधनत्वे[3] प्रतीतेपि सामर्थ्यपर्यालोचनया हस्तादीनामवदानविशेषान्वयः कल्पितस्तथात्रापि भिसादीनां सर्वेषां सामान्येन विधेयान्वये प्रतीतेपि एकवचनसामर्थ्यपर्यालोचनया ङसा[4]द्येकवचनानां द्विशब्दे[5] विधेयान्वयः परिहर्तव्यः । यद्वा 'दो वे टादौ' इत्यत्र द्विशब्दस्य नित्यद्विवचनवाचित्वेपि गौणतायामेकवचनस्यापि संभवाट्टाद्येकवचनेष्वप्येतयोः प्रयोग इत्यलं सूत्रकलहचर्चया । प्रकृतमनुसरामः । भिसि दो भिस् वे भिस् इति स्थिते हिमादयः पूर्ववद् भिसादीनां विधेयाः[6] । दोहिं । दोहिँ । दोहि । एवं वेहिं । इत्यादि । भ्यसि । दोहिंतो । दोत्तो । दोओ । दोउ । दोसुंतो । एवं वेहिंतो । इत्यादि । आमि

ण्ह ण्हं संख्याया आमोविंशतिगे ॥ २ । ३ । ३३ ॥

संख्यायाः परस्यामः ण्ह ण्हं इत्येतावादेशौ भवतः अविंशतिगे विंशत्यादीन् वर्जयित्वा । दोण्ह । दोण्हं । वेण्ँह । वेण्हं । दोसुं । दोसु । वेसुं । वेसु ॥[7] त्रिशब्दस्य 'चतुरो जश्शस्भ्याम्—' इत्यतः 'जश्शस्भ्याम्' इत्यनुवर्तते ।

तिण्णि त्रेः ॥ २ । ३ । २९ ॥

त्रिशब्दस्य जश्शस्भ्यां सह तिण्णि इत्यादेशो भवति । जसि । तिण्णि । शसि । तिण्णि । 'दो वे टादौ च' इत्यतः 'टादौ' इत्यधिकृत्य

---

१ °द्भिसादीनामेव M. २ °मविदितं T. ३ °साधनत्वेपि My., P. ४ ङस्या° M. ५ द्विशब्देन M. ६ ज्ञेयाः T. ७ वेह्लं । वेह्ल । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ति त्रेः ॥ २ । ३ । ३२ ॥

त्रिशब्दस्य टादौ तृतीयादौ सुपि परे ति इत्यादेशो भवति । तिहिं[1] । तिहिँ । तिहि । शेषं द्विशब्दवत् । द्विव्योर्लिङ्गत्रयेपि समानं रूपम् ॥ विधिशब्दे धस्य हत्वे विही । अस्याञ्जल्यादिपाठात् स्त्रीलिङ्गेपि प्रयोगः । एवं बलिनिधिग्रन्थीनामपि स्त्रीलिङ्गे प्रयोगः ॥

इति इकारान्ताः ॥

ईकारान्तः पुंलिङ्गो ग्रामणीशब्दः । 'क्विपः' इति ह्रस्वः । गामणी ॥ जसि । गामणउ । गामणओ । गामणिणो ॥ संबुद्धौ तु 'डोश्लुकौ तु संबुद्धेः' इत्यतः 'संबुद्धेः' इत्यधिकृत्य[2]

ह्रस्वलीदूतः ॥ २ । २ । ४६ ॥

संबुद्धिनिमित्तयोरीदूतोर्ह्रस्वो लिग्भवति । दे गामणि । शेषं कविशब्दवत्[3] ॥ एवमग्रणीसेनानीवातप्रमीसुधीसुश्रीप्रभृतयः[4] ॥

इति[5] ईकारान्ताः ॥

उकारान्तः पुंलिङ्गः कारुशब्दः । एकवचनं कविशब्दवत्[6] । कारू ॥ जसि । 'पुंसो जसो डउ डओ' इत्यधिकृत्य 'चतुरो वा' इत्यतः 'वा' इति च

डवो उतः ॥ २ । २ । २५ ॥

पुंलिङ्गादुतः परस्य डित् अवो इत्यादेशो[7] वा भवति[8] । कारवो । पक्षे डउ डओ च । कारउ । कारओ ॥ संबुद्धौ 'डोश्लुकौ तु संबुद्धेः' इति वा श्लुक् । दे कारू । श्लुगभावे 'सोर्लुक्' इति लुक् । दे कारु । उकारान्तत्वमेव विशेषः । शेषं कविवत् । एवं वायुसेतुप्रभृतयः ॥

---

१ तीहिं । तीहि । तिहि । P., My.; M. has तिहि । तिहिङ् । तीहि । २ इत्यधिकृत्य M. ३ T. drops शब्द. ४ °सुश्रीसुधी° T. ५ M. drops इति ईकारान्ताः । ६ M., R. and T. drop शब्द. ७ इति वा । M. ८ स्यात् । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथोकारान्तेषु केचिद्[1]विशेषाः प्रदर्श्यन्ते । पशुशब्दे वक्रादित्वाद्बिन्दुः । पंसू ॥ पांसुशब्दे 'लुक् मांसादौ' इति मांसादित्वादित्वाद्[2] बिन्दोर्वा लुक् । पासू । पक्षे 'स्वरस्य बिन्द्वमि' इति ह्रस्वे । पंसू ॥ स्थाणुशब्दे 'स्तोः' इत्यधिकृत्य 'क्ष्वेडकगे खल्' इत्यतः 'खल्' इति च ।

स्थाणावहरे ॥ १ । ४ । ९ ॥

अहरवाचिनि स्थाणुशब्दे स्तोः खत्वं लित् स्यात् । खाणू । अस्य दैवादिपाठाद् द्वित्वे खण्णू । हरे तु थाणू । अत्र 'कग—' इति सलोपः । इक्षुप्रवासिशब्दयोः 'द्विनीक्षुप्रवासिषु' इत्यनेन आदेरित उत्वम् । उच्छू । अस्य स्पृहादित्वात् क्षस्य छः । पैवासू[3] । पावासू । प्रवासी । अत्र समृद्ध्यादिपाठादादेरचो वा दीर्घः ॥ कृशानुशब्दे कृपादित्वादृत ईत्[4] । किसाणू । भृगुः । भिऊ । मृत्युशब्दे 'शृङ्गमृगाङ्क-मृत्यु—' इत्यादिना वा ऋत इत्वम् । मिच्चू[5] । पक्षे अत्वम्[6] । मच्चू[7] । उभयत्र 'त्योचैत्ये' इति त्यस्य चः ॥ ऋतुऋजुशब्दयोः ऋत्वादिपाठादृत उत्वम्[8] । ऋतुः । उऊ । ऋजुः । उज्जू । अत्र तैलादित्वाद् द्वित्वम् । अनयोरेव 'ऋतुऋजुऋण—'[10] इत्यादिना ऋतो वा रित्वे[11] रिऊ । रिज्जू ॥ अभिमन्युशब्दे 'बो वः' इत्यतः 'वः' इत्यधिकृत्य

त्वभिमन्यौ मः ॥ १ । ३ । ६५ ॥

अत्र मस्य वो वा भवति । अहिवण्णू । अहिमण्णू ॥ अत्रैव

त्वभिमन्यौ जजौ ॥ १ । ४ । २५ ॥

'स्तोः' इत्यनुवर्तते । अत्र स्तोः जर् ज इत्येतावादेशौ वा भवतः ।

---

१ केषुचिद् T. २ My. and P. drop मांसादित्वात्. ३ My. has पावासू । पवासू । प्रवासी । ४ इत् My. ५ मिछू T. ६ ऋत अत्वम् M., T. ७ मच्छू M. ८ ऋत्वादित्वात् M. ९ उः My, P. १० 'ऋतुऋण—' इत्यादिना My. ११ ऋत्वे My.

आदिमेरित्वाद् द्वित्वम् । अहिवज्जू । अहिमज्जू । अहिवजू । अहिमजू ॥ मन्युशब्दे

वा न्तन्धौ मन्युचिह्नयोः ॥ १ । ४ । ३२ ॥

'स्तोः' इत्यनुवर्तते । अनयोर्यथाक्रमं त न्ध इत्यादेशौ वा भवतः । मन्तू । पक्षे । मण्णू । अत्र 'मनयाम्' इति । यलोपः ॥ कटुशब्दे 'सरकट्टोरीसरकारौ' इति कटुशब्दस्य[1] वा कारादेशे । कारो । इत्यादि रामवत् । पक्षे । कडू इत्याद्यूह्यम् ॥ उकारान्तः पुंलिङ्गः क्रोष्टुशब्दः । क्रोष्टु सु इति स्थिते 'तृज्वत् क्रोष्टुः' 'विभाषा तृतीयादिष्वचि' इति यदा तृज्वद्भावस्तदा 'उद्दतां त्वस्वमामि' इत्यतः 'ऋतः' इत्यधिकृत्य[2]

आ सौ वा ॥ २ । २ । ५२ ॥

ऋदन्तस्य सौपरे आत्वं वा स्यात् । क्रोष्टा सु इति स्थिते 'लवराम्—' इति रेफलोपः । 'ष्टः' इति ष्टस्य ठत्वे 'सोर्लुक्' इति सोर्लुक् । कोट्ठा । यदा आत्वाभावस्तदा

आरः सुपि ॥ २ । २ । ४९ ॥

'ऋताम्' इत्यनुवर्तते । ऋदन्तस्य सुपि परे आर इत्यादेशो भवति । कोट्ठारो । इत्यादि[3] सर्वत्र वचनेषु रामवत् । समासे त्वन्तर्वर्तिनीं विभक्तिमाश्रित्य रादेशस्तेन कोट्ठारकअमित्याद्यपि[4] सर्वत्र ऋकारान्तेषु[5] संचारणीयम् । लुप्तविभक्त्यपेक्षया भर्तार विहिअमिति भवतीति त्रिविक्रमदेववचनात्[6] ।

उद्दतां त्वस्वमामि ॥ २ । २ । ४८ ॥

'आरः सुपि' इत्यतः 'सुपि' इत्यनुवर्तते । ऋदन्तानामुत्वं वा स्यादस्वमामि सु अम् आम् वर्जिते सुपि परे ॥ अत्र 'ऋताम्' इति बहुवचनं व्याप्त्यर्थम् । तेन यथादर्शनं नाम्न्युत्वं भवतीति वेदितव्यम् । इति यत्रोत्वं तत्र कारुवत् । सौ । कोट्ठारो । जसि । कोट्ठओ ।

---

१ कट्टकशब्दस्य My. २ इत्यधिकृत्य M. ३ M. has कोट्ठार after it. ४ °यप्येव M. ५ °रान्तेष्वपि M. ६ त्रिविक्रमवचनात् R., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोट्टुउ । कोट्टुणो । कोट्टुवो । उत्वाभावे आरः । कोट्टारा[1] । अमि । कोट्टारं । आमि । कोट्टाराणं । नात्रोत्वम् । 'अस्वमामि' इति प्रतिषेधात् । शेषं रामवत् कारुवच्च ॥ ऊकारान्तः पुंलिङ्गः खलपूशब्दः । 'क्विपः' इति ह्रस्वः । पस्य वः । खलपू । इत्यादि । कारुवत् । एवं कांडलू स्वयंभू मनोभू प्रतिभूप्रभृतयः ॥

इत्यूकारान्ताः ॥

ऋकारान्तः पुंलिङ्गः पितृशब्दः ॥ पितृ सु इति स्थिते 'असौ'[2] इति ऋत अत्वं तलोपः । सोर्डुक् । पिआ । 'आरः सुपि' इत्यधिकृत्य

संज्ञायामरः ॥ २ । २ । ५१ ॥

ऋदन्तस्य संज्ञायां सुपि परे अर इत्यादेशो वा स्यात्[3] । पिअरो ॥ जसि पिअरा । 'उद्दतां त्वस्वमामि' इत्युत्वं च । पिअओ । पिअउ । पिअवो । पिउँ[4] । णो पिउ । संबुद्धौ 'डोरलुकौ तु संबुद्धेः' इत्यतः[5] 'संबुद्धेः' इत्यधिकृत्य

ड ऋदन्तात् ॥ २ । २ । ४३ ॥

ऋकारान्तान्नाम्नः परस्य संबुद्धेर्डत्वं तु[6] स्यात् । दे पिअ ।

नाम्नि डरम् ॥ २ । २ । ४४ ॥

'संबुद्धेः' इत्यनुवर्तते । नाम्नि संज्ञायां ऋदन्तात् परस्य संबुद्धेः डित् अरमित्यादेशो वा स्यात् । दे पिअरं । 'नाम्नि' इति किम् । दे कत्तार । अरादेशे दे पिअरो । दे पिअर । अमि । पिअरं । आमि । पिअराणं । पिअराण । नात्रोत्वम् । 'अस्वमामि' इति प्रतिषेधात् । आरादेशे रामवदुत्वे कारुवत् । एवं भ्रातृजामातृप्रभृतयः ॥ कर्तृशब्दस्य तु 'तस्याधूर्तादौ टः' इति तस्य टत्वम् । बहुलाधिकारादत्र विकल्पि-

---

१ कोट्टारो M. २ असौ वेत्युत आत्वम् M. ३ भवति for वा स्यात् M., R. ४ पिअणो for पिउ । णो पिउ M. ५ इत्यधिकृत्य M. ६ भवति for स्यात् M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तम् । टत्वपक्षे 'आ सौ वा' इत्यात्वम् । कट्टा । टत्वाभावे 'लवराम्—' इति रेफलोपः । शेषे[1]द्वित्वम् । कत्ता । 'आरः सुपि' इत्यारश्च । कट्टारो । कत्तारो ॥ जसि । कट्टारा । कत्तारा । 'उद्दताम्' इत्यु[2]त्वे । कट्टउ । कत्तउ । इत्यादि । संबुद्धौ 'उ ऋदन्तात्' इत्युत्वम् । दे कट्ट । दे कत्त । नात्र डरमरौ । तयोः संज्ञाविषयत्वात् । शेषमारादेशे रामवदुत्वादेशे कारुवत् । एवं भर्तृहर्तृनेतृप्रभृतयः । ॠकारान्तलृकारान्तए[3]कारान्तश्च[4]प्रसिद्धाः । ऐकारान्तः पुंलिङ्गः सुरैशब्दः । 'ऐच एङ्[5]' इत्येत्वे एदन्तस्य प्रयोगाभावात् 'स्वार्थे तु कश्च' इति कप्रत्ययः । ककारलोपः । सुरेओ ॥ जसि । सिद्धावस्थापेक्षया सु[6]रा । दे सु[7]रेअ । दे सु[8]रेओ । सु[9]रेअं । इत्यादि रामवत् । भिस्भ्यस्सुपि सिद्धावस्थापेक्षया 'रायो हलि' इत्याकारश्च । सुराहि । सुराहिंतो । सुरासु । इत्यादि ॥ ओकारान्तः पुंलिङ्गो गोशब्दः । गो सु इति स्थिते 'चपेटकेसरदेवरसैन्यवेदनास्वेचस्त्वित्' इत्यतः 'एचः' इत्यनुवर्तते ।

गव्य उदाइत् ॥ १ । २ । ९९ ॥

गोशब्दे एच अउ आ[10]इ इत्यादेशौ भवतः । गऊ ॥ जसि । ग[11]वउ । गवओ । गववो । इत्यादि । कारुवत् । गाई कविवत् ॥ औकारान्तः पुंलिङ्गो ग्लौशब्दः । लादक्कीवेष्वन्त्यहलः प्रागित्वम् । ऐच एङ् । कप्रत्ययः । गिळोओ । गिळोआ । इत्यादि । रामवत् ॥ हसितव्य इत्यादिषु 'अदेल्लुक्यात् खोः—' इत्यतः 'अतः' इत्यधिकृत्य 'मोममुष्विच्च' इत्यतः 'इत्' इति च ।

एच्च क्त्वातुम्तव्यभविष्यति ॥ २ । ४ । १८ ॥

क्त्वादिषु परेषु भविष्यत्कालविहिते च प्रत्यये परतोत एत्वं

---

१ शेषद्वित्वानि M., R. २ इत्युत्वं च M. ३ ओकारान्त M. ४ °श्चाप्रसिद्धाः । My. ५ एच् M. ६ सुराआ । M. ७ सुरेओ M. ८ सुरेआ M. ९ सुरेआं M. १० आयि M. ११ गउ गओ गवो M.

चकारादित्वं च वा स्यात् । हंसिअव्वो[1] । हसेअव्वो । णंदिअव्वो[2] । णंदेअव्वो । इत्याद्यूह्यम् । एवं हलन्तेषु अगागमे सर्वत्रोह्यम् ॥

इत्यजन्ताः पुंलिङ्गाः ॥

अथाजन्ताः[3] स्त्रीलिङ्गाः ॥

आकारान्तः स्त्रीलिङ्गो जायाशब्दः । जाया सु इति स्थिते यकारस्य 'प्रायो लुक्—' इति लोपे[4] 'यश्रुतिरः' इत्याकारस्य यश्रुतित्वम् । 'सोर्लुक्' इति सोर्लुक् । जाआ ॥ जसि जाआ जसिति स्थिते 'श्चि शिं शिङ् जश्शसोः' इत्यतः[5] 'जश्शसोः' इत्यधिकृत्य

शो शु स्त्रियां तु ॥ २ । २ । ३२ ॥

स्त्रियां वर्तमानान्नाम्नः[6] परयोः जश्शसोः ओ उ इत्यादेशौ शितौ वा भवतः । जाआओ । जाआउ । शित्करणस्यात्र प्रयोजनाभावेपि इकारान्तस्त्रीलिङ्गादौ दीर्घार्थं भविष्यति । पक्षे 'श्लुग्जश्शसोः' इति श्लुक् । जाआ । संबुद्धौ 'डोश्र्लुकौ तु संबुद्धेः' इत्यतः 'तु संबुद्धेः' इत्यधिकृत्य

टापो डे ॥ २ । २ । ४५ ॥

टाबन्तात् परस्य संबुद्धेरेत्वं डिद्वा भवति । दे[7] जाए । पक्षे सोर्लुक् । दे जाआ । बहुलाधिकारात् कचिदोत्वमपि । दे जाओ ॥ अमि जाआ[9] अमिति स्थिते 'अमः' इत्यमो[10] मत्वम् । 'स्वरस्य बिन्द्वमि' इति ह्रस्वः । जाअं ॥ शसि जस्वत् ॥ जाआ[11] टा इति स्थिते 'ङसेः श शा शि शे' इत्यतः[12] 'श शा शि शे' इत्यधिकृत्य

टाङिङसाम् ॥ २ । २ । ३५ ॥

---

१ हसेअव्वो । हसिअव्वो । M. २ णदेअव्वो । णंदेअव्वो । णंदिअव्वो । M. ३ अथाजन्तस्त्रीलिङ्गाः My., P., M. ४ यलोपे T., R. ५ इत्यधिकृत्य M., T., R. ६ वर्तमानयोर्नाम्नः T., R. ७ दो M., R. ८ इत्यधिकृत्य M., T., R. ९ जाया M. १० इति मत्वम् T. ११ जाया M. १२ इत्यधिकृत्य M., T., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रियां नाम्नः परेषां टाङिङस् ईत्येतेषां स्थाने अ आ इ ए इत्येते चत्वार आदेशाः शितो भवन्ति । पृथक्त्वान्नित्यम् । जाआअ। जाआइ । जाआए । अत्रापि शित्करणस्य इकारान्तेस्त्रीलिङ्गेषु फलम् ।

नातः शा ॥ २ । २ । ३६ ॥

स्त्रियां वर्तमानान्नाम्नः परेषां टाङिङसां प्रोप्तं शा इति शिदात्वमाकारान्तान्न भवति । इति प्रतिषेधादत्र शाकारस्योदाहरणं न संभवति ॥ भिसि जाआहिं । इत्यादि पूर्ववत् ॥ ङसौ

ङसेः श शा शि शे ॥ २ । २ । ३४ ॥

'शो शू स्त्रियाम्' इत्यतः 'स्त्रियाम्' इत्यनुवर्तते । स्त्रियां वर्तमानान्नाम्नः परस्य ङसेः अ आ इ ए इति चत्वार आदेशाः शितो भवन्ति ॥ जाआअ । जाआआ । जाआइ । जाआए । अत्र सर्वत्र 'अपदे' इति प्रतिषेधान्न संधिः । पक्षे हिन्तोत्तोदोदवश्च । भ्यसि सुंतो च । जाआहिन्तो । इत्यादयः । पूर्ववत् । 'भिस्भ्यस्सुपि' ईति एत्वं न भवति । अनदन्तत्वात् । शेषं पूर्ववत् । एवं मालादयः ॥ जराशब्दस्य तु अनुक्तमन्यन्यायेन 'जराया जरसन्यतरस्याम्' इति यत्र यत्र जरसादेशस्तत्र तैत्र 'अन्त्यहलोश्रदुदि' ईत्यतः 'अन्त्यहलः' इत्यधिकृत्य

अविद्युति स्त्रियामाल् ॥ १ । १ । २९ ॥

स्त्रीलिङ्गे वर्तमानस्यान्त्यहल आत्वं भवति । लित्वान्नित्यम् । इति सस्यात्वे जरआ । जरआओ । जरआउ । इत्यादि । जायावत् । जरसभावे जरा इत्यादि । जायावत् । वृक्षत्वं कवित्वमित्यादौ त्वप्रत्ययस्य

त्वस्य तु डिमात्तणौ ॥ २ । १ । १३ ॥

---

१ इत्येषां M. २ स्त्रीलिङ्गे परम् M. ३ प्राप्तः My., P. ४ शिदाकारः My., P. ५ शाप्रत्ययस्यो° My., P. ६ इत्येतेष्वेत्वं T., R. ७ M. drops one तत्र. ८ इत्यधिकृत्य M., R., T. ९ °मात् T., R. १० जरआइ । My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वप्रत्ययस्य डित् । इमात्तण इत्यादेशौ वा भवतः । इति त्वस्ये-मादेशे 'स्त्रियामिमांजलिगाः' इति स्त्रीलिङ्गतायां अनुक्तमन्यन्यायेन डित्वाट्टिलोपे रुक्खिमा । वच्छिमा । कइमा । इत्यादि । जायावत् ।

अथाकारान्तेषु केषुचिद्विशेषाः प्रदर्श्यन्ते । सास्नाशब्दे 'हे दक्षिणेस्य' इत्यतः 'अस्य' इत्यधिकृत्य 'उलूध्वनि गवयविश्वचि वः' इत्यतः 'उल्' इति च

स्नावकसास्ने ॥ १ । २ । १८ ॥

अनयोरादेरवर्णस्योल् स्यात् ॥ 'श्नष्ण—' इत्यादिना ण्हादेशः । सुण्हा । नात्र 'स्नौ' इत्युत ओत्वम् लाक्षणिकत्वाद्बहुलाधिकाराद्वा स्वभावतोनुदन्तत्वाद्वा ॥ आर्याशब्दे

आर्यायां र्यः श्वश्र्वामूल् ॥ १ । २ । २१ ॥

श्वश्रूवाचिन्यार्यशब्दे र्यकारसंबन्धिनोवर्णस्य ऊत्वं लित् स्यात् । 'द्यय्यर्यां जः' इति र्यस्य जत्वम् । 'संयोगे' इति ह्रस्वः । उज्जू । रूपाणि तु वक्ष्यमाणोकारान्तस्त्रीलिङ्गवत् । 'श्वाश्र्वाम्' इति किम् । अज्जा ॥ जिह्वाशब्दे 'ऊर्ध्वे भो वा' इत्यतः 'भः' इत्यधिकृत्य

ह्वः ॥ १ । ४ । ५१ ॥

ह्वस्य भो वा स्यात् ॥ जिब्हा । पक्षे 'लवराम्—' इति वलोपे 'शोर्लुप्तयवरशोर्दिः' इति इति लुप्तयादीनां शषसानामादेरचो दीर्घप्रसङ्गे बहुलाधिकारादन्यस्याप्यादेरचो दीर्घ इति **त्रिविक्रमदेवेन** जिह्वाशब्दस्योदाहरणादादेरचो दीर्घे जीहा इत्यादिषु दीर्घप्रयोगः सिद्धः ।

---

१ M. drops वच्छिमा । कइमा । २ T. and R. add after it—'अत्र सर्वत्र डित्वाट्टिलोपः । ३ इत्यधिकृत्य M.; इत्यनुवर्तमाने T. ४ इति च M., T. ५ °रवर्णस्य उ स्यात् M., T., R. ६ इत्यादिना युक्तस्य M., R. ७ My. and P. drop स्वभावतोनुदन्तत्वाद्वा । ८ R. has हे दक्षिणस्येत्यधिकृत्य after it. ९ अज्जू । M., T. १० इत्यधिकृत्य M., T. ११ °दन्यस्यादे° M., T., R. १२ सिध्यति T., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]दीर्घाभावपक्षे जिह्वा । नात्र शेषत्वेपि हस्य द्वित्वम् । 'अह्रे' इति प्रतिषेधात् । इष्टाशब्दे 'प्रवृत्तसन्दष्ट—' इत्यादिना[2] स्तोष्टत्वम् । इट्ठा ॥
[3]'त्वेदितः' इत्येतः[4] 'एदितः' इत्यनुवर्तमाने

मिरायां लित् ॥ १ । २ । ४२ ॥

अत्र इत एत्वं लित् स्यात् । मेरा । सीमेति[5] यावत् ॥ स्थूणाशब्दे 'ओलृस्थूणातूण[6]—' इति वा[7] ऊत ओत्वम् । [8]थोणा । पक्षे थूणा । कृशाशब्दे 'वा मृदुत्वमृदुककृशाश्वात्[9]' इति ऋत आत्वं वा । कासा । पक्षे अत्वम् । कसा । चपेटावेदनाशब्दयोः '[10]चपेटा' इत्यादिना एचो वा इत्वम् । चविडा । चवेडा । विअणा । वेअणा । सिरविअणा । सिरवेअणा । इत्येतौ शिरोवेदनायाः साध्यमानसिद्धावस्थयोरेव भवतः ॥ यमुनाचामुण्डाशब्दयोः 'कामुकयमुना—' इत्यादिना मकारस्य लुकि शेषस्य सानुनासिक उच्चारः । यस्य जः । जउँणा । चाउँडा । चन्द्रिकाशब्दे 'पुन्नागभागिनी—' इत्यादिना कोर्मत्वम् । [11]चन्दिमा । चन्द्रिमा । [12]अत्र 'धात्रीदे रस्तु' इति वा रेफलोपः[13] । छायाशब्दे 'यो जर्ती—' इत्यादेः 'यः' इत्यधिकृत्य

छायायां होकान्तौ ॥ १ । ३ । ७० ॥

अकान्तौ वर्तमाने छायाशब्दे यकारस्य हकारो वा स्यात् । इति वा हत्वे 'पुंसोजातेर्ङीब्वा' इत्येतः[14] 'ङीब् वा' इत्यधिकृत्य

हरिद्राच्छाया ॥ २ । २ । ३९ ॥

---

१ दीर्घाभावे M.; My. and P. drop दीर्घाभावपक्षे. २ संयुक्तस्य उत्वम् T.; संयुक्तस्य एत्वम् R. for स्तोष्टत्वम्. ३ M. has मिराशब्दे before it. ४ इत्यनुवर्तमाने T., R.; इत्यनुवर्तते M. ५ सीमा । My., P. ६ तूणा My. ७ M. drop वा. ८ M. has 'कग—' इत्यादिना सलोपः before थोणा; T. has 'कग—' इति सलोपः before थोणा. ९ °कृशाभूते स्यात् M. १० 'चपेटाकेसरी—' इत्यादिना M., T. ११ M. drops चन्दिमा । चन्द्रिमा । १२ M. drops अत्र. १३ रेफस्य लोपः । T. १४ इत्यधिकृत्य M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनयोः ङीब् वा स्यात् । इति ङीपि[1] अनुक्तमन्यन्यायेन 'यस्येति च' इत्यकारलोपे । छही । गौरीवत् । ङीबभावे । छाहा । हत्वा भावे । छाऊ । छाआ । उभयत्र यलोपः ॥ हरिद्राशब्दे 'हरिद्रादौ' इति रेफस्य लत्वम् । 'मूषिकविभीतक—' इत्यादिना इत अत्वम् । युक्तरेफस्य वा लोपः । द्वित्वम् । पूर्वसूत्रेण वा ङीप् । हळद्दी[3] । हळद्दा । अत्र युक्तरेफलोपस्य विकल्पितत्वात् हळद्री[4] । हळद्रा । इत्यप्यस्ति ॥ स्नुषाशब्दे 'शोः सल्' इत्यतः[5] 'शोः' इत्यधिकृत्य 'प्रत्यूषदिवसदशपाषाणे तु हः' इत्यतः[6] 'तु' इति च

स्नुषायां ण्हः ष्णोः ॥ १ । ३ । ८९ ॥

अत्र ष्णोः द्वितीयस्य शोः ण्ह इत्यादेशस्तु स्यात् । सुण्हा । नात्र 'स्नौ' इत्युत ओत्वम् । बहुलाधिकारात् । पक्षे 'मनयाम्' इति नलोपे । सुसा । नन्वत्र पुरस्स्फूर्तिकत्वात् 'कग—' इति सलोप एव किमिति न भवति । उच्यते । अनुक्तमन्यन्यायेन विप्रतिषेधे परं कार्यमिति 'मनयाम्' इति सूत्रस्य परत्वान्नलोप एव युक्त[7] इति सन्तोष्टव्यम् ॥ सुधाशब्दे 'छल्षट्छमी—' इत्यादिना शोश्छत्वम् । छुहा । सिराशब्दे 'शोः सल्' इत्यतः 'शोः' इत्यधिकृत्य[8] 'छल्षट्छमी—' इत्यादेः 'छल्' इति च

सिरायां वा ॥ १ । ३ । ९१ ॥

अत्र शोश्छत्वं वा स्यात् । छिरा । पक्षे सिरा ॥ स्पृहाशब्दे 'स्पृहादौ' इति युक्तस्य छत्वम् । कृपादित्वादृत इत्वम् । छिहा ॥ श्रद्धाशब्दे 'ढोधर्द्धि—' इत्यादिना युक्तस्य वा ढः । सड्ढा । पक्षे सद्धा । दंष्ट्राशब्दे 'दग्धविदग्ध—' इत्यादिना युक्तस्य ढत्वम् । 'विंशतिषु त्या श्लोपल्' इत्यनेन विंशत्यादिपाठाद् बिन्दोः श्लोपलि शि-

---

१ ङीप् M. २ छाई M., T.; T. has छाआ । छाई । ३ हळद्दि । M. ४ हळद्रि । M. ५ इत्यधिकृत्य M., T. ६ इति च M., T. ७ युक्तः T. ८ इत्यधिकृत्य T.

त्वात् पूर्वस्य दीर्घे दाढा । मनःशिलाशब्दे वक्रादौ मनस्विन्याद्यवान्तरगणपाठात् द्वितीयादचः परे बिन्दौ मणंसिळा । मणासिळा इति च दृश्यते । श्लाघाशब्दे 'प्राक् श्लाघा—' इत्यादिना लात् प्रागत्वम् । घस्य हत्वम् । सळाहा ॥ क्रियाशब्दे 'हर्षामर्ष—' इत्यादिना युक्तस्यान्त्यहलः प्रागित्वम् । किरिआ ॥ ज्याशब्दे 'ईल् ज्यायाम्' इत्यनेनान्त्यहलः प्रागील्। जीआ । सटाशब्दे 'ढः कैटभशकटसटे' इति टोर्ढत्वम् । सढा ॥ वनिताशब्दे

स्त्रीभगिनीदुहितृवनितानामित्थीबहिणीदुआविळआ वा ॥ १ । ३ । ९७ ॥

स्त्रीप्रमुखानां इत्थी प्रमुखा आदेशा वा स्युर्यथाक्रमम् ॥ विळआ । वनिता । विळया संस्कृतेपीति केचित् । इत्यादिविशेषा ऊह्याः ॥ इकारान्तः स्त्रीलिङ्गो रुचिशब्दः । 'श्लुगनपि सोः' इति शोः श्लुक् । रुँई । जसि 'शोशु स्त्रियां तु' इति शितावोदुतौ । रुईओ । रुईउ । पक्षे रुई । संबुद्धौ कविवत् । अमि रुइं । शसि जस्वत् । 'टाङिङसाम्' इति शशा शिशे रुईअ इत्यादि । भिसि रुईहिं । इत्यादि । जसौ उक्ताः शादयः । पक्षे हिंतो इत्यादयः । ङसि ङौ च उक्ता आदेशाः । ङौ मिइ च । शेषं कविवत् । एवं मतिप्रभृतयः ॥ विशेषास्तु बुद्धिशब्दे ऋत्वादिपाठादत उत्वे 'ढोधर्द्धि—' इत्यादिना युक्तस्य वा ढत्वे उढी । अस्त्येव कृपादिपाठादत इत्वे इड्ढी । ढत्वाभावे । उद्धी । इद्धी ॥ आलीशब्दे 'हे दक्षिणेस्य' इत्यतः 'अस्य' इत्यधिकृत्य 'आदेः' इति च

ओदाल्यां पङ्क्तौ ॥ १ । २ । २९ ॥

पङ्क्तिवाचिन्यालीशब्दे आदेरवर्णस्य ओत्वं स्यात् । ओळी । 'पङ्क्तौ'

---

१ M. drops द्वितीयाद्. २ इत्यपि My., P. ३ M. has द्वितीया before it. ४ प्रागित्वम् । T. ५ जिआ । M. ६ यथाक्रमं वा स्युः । T.; वा यथाक्रमं स्युः । M. ७ ऊई My. ८ इत्यधिकृत्य R. ९ ओत्वं वा स्यात् T., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति किम् । आळी सखी ॥ मृत्तिशब्दे 'प्रवृत्तसन्दष्ट—' इत्यादिना स्तोर्ष्टत्वम् । ऋतः अत्वम् । मट्टी । छदिवितर्द्योः 'डल् फोर्मर्दित—' इत्यादिना स्तोर्डत्वम् । छड्डी । विअड्डी ॥ समृद्धिप्रवृद्धिप्रतिसिद्ध्यभिजातिषु तु 'समृद्ध्यादौ' इति समृद्ध्यादित्वादादेरचो वा दीर्घः । सामिद्धी । समिद्धी । अत्र कृपादित्वादृत इत्वम् । पासिद्धी । पसिद्धी । पाडिसिद्धी । पडिसिद्धी । अत्र प्रत्यादित्वात्तस्य डत्वम् । आहिआई । अहिआई[2] । अत्र तजयोर्लोपः । भस्य हः ॥ कृतिसृष्टिशब्दयोः कृपादित्वादृत इत्वम् । किई । सिट्ठी । अत्र 'ष्टः' इति ष्टस्य ठत्वम् ॥ गृष्टिशब्दे वक्रादित्वाद्बिन्दुः[3] । कृपादित्वादृत इत्वं च[4] । गिंठी गिट्ठी इति च दृश्यते । प्रभृतिनिर्वृतिप्रवृत्तिवृद्धिषु ऋत्वादित्वादृत उत्वम् । पहुडि । पाहुडी । अत्र भस्य हः । प्रत्यादित्वात्तस्य डत्वम्[5] । समृद्ध्यादित्वादादेरचो वा दीर्घः[6] । भृतिः । भुई । निर्वृतिः । णिवुई । प्रवृत्तिः । पउत्ती । वृद्धिः । उड्ढी ॥ वितस्तिशब्दे 'हः कातर—' इत्यादिना तस्य हत्वम् । 'स्तः' इति थत्वम्[7] । विहत्थी ॥ वसतिशब्दे तु 'वसति भरते—' इत्यनेन तस्य[8] हत्वं वा[9] स्यात् । वसही । पक्षे वसई ॥ पापर्धिशब्दे 'पो वः' इत्यतः 'पः' इत्यनुवर्तते 'अखोः' इति च

रत्पापर्धौ ॥ १ । ३ । ५८ ॥

अत्राखोः पस्य रत्वं लित् स्यात् । पारद्धी । मृगया । धृतिशब्दे 'मलिनधृति—' इत्यादिना धृतिशब्दस्य वा दिहि इत्यादेशो दिही । पक्षे धिई ॥ शुक्तिशब्दे 'तिर्यक्पदाति—' इत्यादिना शुक्तेः शिप्पि इत्यादेशे सिप्पी । पक्षे सुत्ती । बहुलाधिकारान्नात्र 'स्तौ' इत्युत ओत्वम् । सोत्तीति केचित् । उभयत्र 'कग—' इति पलोपद्वित्वे ॥ सप्ततिशब्दे 'रल् सप्तत्यादौ' इति तस्य नित्यं रत्वम् । सत्तरी । अत्र

---

१ युक्तस्य उत्वम् T; युक्तस्य उत्वे एत्वम् R. २ M. has अभिजातिः after it. ३ वक्रादित्वादादिस्वराद्बिन्दुः । M. ४ M. drops च. ५ डः । T. ६ समृद्ध्यादित्वाद्वा दीर्घः । M. ७ स्तोःथत्वम् M. ८ तकारस्य My., P. ९ वा हत्वम् । My., P., M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कग—' इति पलोपद्वित्वे । विंशतिः त्रिंशत् पञ्चाशत्—अत्र सर्वत्र 'विंशतिषु त्या श्लोपल्' इति विन्दोः 'ति' इत्यवयवेन सह लोपे शित्वात् सर्वस्य दीर्घे । वीसा । विंशतिः । तीसा त्रिंशत् । पञ्चाशत् । पण्णासा । अत्र 'पञ्चदशदत्तपञ्चाशति णः' इति स्तोर्णत्वम् । त्रयाणां रूपाणि जायावत् । सप्तविंशतिः पञ्चविंशतिः इत्यादौ 'दिहौ मिथः सः' इति ह्रस्वस्य दीर्घे । सत्तावीसा । पण्णावीसा । शेषं जायावत् ॥ अन्तर्वेदिः । अत्र रेफलोपे पूर्ववद्दीर्घः । अंतावेई ॥ ईकारान्तः स्त्री लिङ्गो गौरीशब्दः । 'ऐच एङ्' इत्योत्वम् । गोरी सु इति स्थिते 'श्नि शिं शिङ् जश्शसोः' इत्यतः 'जश्शसोः' इत्यधिकृत्य 'शो शु स्त्रियां तु' इत्यतः 'स्त्रियां तु' इति च

आदीतः सोश्च ॥ २ । २ । ३३ ॥

स्त्रियामीकारान्तान्नाम्नः परस्य सोः चकाराज्जश्शसोश्च आत्वं तु भवति । गोरीआ । पक्षे सोर्लुक् । गोरी । जसि । गोरी । गोरीओ । गोरीउ । आत्वे । गोरीआ । संबुद्धौ 'ह्रस्वलीदूतः' इति ह्रस्वः । दे गोरि । शसि जस्वत् । टादौ टाङिङसांङसेः शशाशिशे इत्यादि सर्वं रुचिशब्दवत् । एवं तरुणीरमणीप्रभृतयः ॥ स्त्रीशब्दस्य 'स्त्रीभगिनी—' इत्यादिना इत्थीत्यादेशः । इत्थी ॥ श्रीशब्दस्य 'हर्षामर्ष—' इत्यादिना अन्त्यहलः प्रागित्वम् । सिरी । एवं हिरी । अत्रापि 'क्विपः' इति ह्रस्वः । शेषं गौरीवत् ॥ नीलीत्यादिषु

पुंसोजातेर्ङीब् वा ॥ २ । २ । ३७ ॥

अजातिवाचिनः पुंलिङ्गात् स्त्रियां वर्तमानात् ङीप् प्रत्ययो वा स्यात् । नीली । पक्षे नीला । सहमाणी सहमाणा । सुप्पणही । सुप्पणहा । काळी । काळा । इत्यादि । 'अजातिवाचिनः' किम् ।

---

१ पलोपः M. २ इत्यधिकृत्य M., R., T. ३ इति च । M., R., T. ४ T. drops शब्द. ५ R. and T. drop रमणी. ६ R. and T. drop एवम्. ७ सुप्पणहा । सुप्पणही । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजा । अआ । एडका । एडआ । अप्राप्ते विभाषाविधिरयम् । तेन गौरीकुमारीत्यादिषु[1] संस्कृतवदेव नित्यं ङीप् । पृष्ठशब्दस्याञ्जल्यादिपाठात् स्त्रीलिङ्गतायां पूर्वसूत्रेण[2] वा ङीप् । 'पृष्ठेनुत्तरपदे' इत्यनेन ऋतो वा इत्वम्[3] । पिट्ठी[4] । ऋत इत्वाभावे 'ऋतोत्'[5] इत्यत्वे पट्ठी । इति द्वयं सिद्धम्[6] ॥ साधनीत्यादिषु

ङीप् प्रत्यये ॥ २ । २ । ३८ ॥

'वा' इति वर्तते[7] । 'टिड्ढाणञ्—' इत्यादिसूत्रेण प्रत्ययनिमित्तो यो ङीप् प्रत्ययो विहितः स स्त्रियां वर्तमानान्नाम्नो वा भवति[8] । साहणी । साहणा । कुरुअरी[9] । कुरुअरा । ऊरुद्दअसी । ऊरुद्दअसा । ऊरुद्दग्घी[10] । ऊरुद्दग्घा । ऊरुमेत्ती । ऊरुमेत्ता । अत्र 'उत्करवल्ली—' इत्यादिना मात्रचोकारस्य एत्वम् । सोवण्णेई[11] । सोवण्णेआ । पक्षे विकल्पसामर्थ्यादेव टाप् । समशिष्टयोरेव विकल्प इति न्यायात् ॥

अथ[12] ईकारान्तस्त्रीलिङ्गेषु विशेषाः प्रदर्श्यन्ते । भगिनीशब्दे 'स्त्रीभगिनी—'इत्यादिना बहिणीत्यादेशो वा स्यात्[13] । बहिणी । पक्षे भइणी[14] ॥ वल्लीशब्दे 'उत्करवल्ली—' इत्यादिना अवर्णस्य एत्वम् । वेल्ली ॥ पृथिवीशब्दे 'मूषिकविभीतक—' इत्यादिना आदेरिवर्णस्यात्वम् । ऋत्वादिपाठादवर्णस्योत्वम्[15] । थस्य हः[16] । पुहई । 'ढः पृथिव्यौषधनिशीथे' इत्यादिना थस्य ढत्वे पुढई ॥ पृथ्वीशब्दे कृपादित्वादृत इत्वे 'त्वथ्वद्वध्वां क्वचिच्छजझाः' इति सूत्रेण थ्वस्य यथाक्रमं छत्वे पिच्छी ॥ पिशाचीशब्दे 'प्रायो लुक्—' इति चलोपे प्राप्ते बहुलाधिकारात् क्वचिदन्यदेवेति वच-

१ °कुमार्यादिषु M. २ °सूत्रेणैव M. ३ इत्वे M., T. ४ पिट्ठी । M. ५ ऋतः अत्वे M., T. ६ My. and P. drop इति द्वयं सिद्धम्. ७ इत्यनुवर्तते । M. ८ संभवति । R., T. ९ कुरुचरी । कुरुचरा M., R. १० My. and P. give ऊरुदग्घी । ऊरुद्दग्घा after मात्रचोकारस्य एत्वम् । ११ सोवण्णेयी M. १२ My., P., and T. drop अथ. १३ भवति M; My. and P. drop स्यात्. १४ M. has भगिनी after it. १५ M. drops ऋत्वादिपाठादवर्णस्योत्वम् । १६ हत्वं च । T.

नाद्यस्य जः । पिसाजी ॥ हरीतकीशब्दे 'ईतः काश्मीर—' इत्यादिना आदेरीकारस्यात्वम् । प्रत्यादित्वात्तस्य वा डत्वम् । हरडई । डत्वाभावे हरअई । अत्र 'प्रायो लुक्—' इति तलोपः ॥ गुडूचीशब्दे मुकुलादिपाठादादेरुतोत्वम् । 'ओत्कूष्माण्डी—' इत्यादिना ऊत ओत्वम् । गळोई ॥ भ्रुकुटीशब्दे 'रो भ्रुकुटीपुरुषयोः—' इत्यनेन रेफसंबन्धिन उकारस्येत्वं कलोपश्चस्य डत्वम् । भिउडी ॥ कूष्माण्डीशब्दे 'ओत्कूष्माण्डी—' इत्यादिना ऊत ओत्वे 'बाष्पे होश्रुणि' इत्यतः 'हः' इत्यधिकृत्य

कूष्माण्ड्यां ण्डश्च तु लः ॥ १ । ४ । ६४ ॥

अत्र युक्तस्य हः स्यात् तत्संनियोगेन ण्डस्य वा लः । कोहली । कोहण्डी ॥ ताम्बूलीशब्दे 'ओत्कूष्माण्डी—' इत्यादिना ऊत ओत्वे 'स्वरस्य बिन्दुमि' इति ह्रस्वे तंबोली ॥ भागिनीशब्दे 'पुन्नागभागिनी—' इत्यादिना कोर्मत्वम् । भामिणी ॥ अतसीशब्दे 'दोहदप्रदीप—' इत्यादिना तस्य लत्वम् । अलसी ॥ कदलीशब्दे 'वेतस इति तोः' इत्यतः 'तोः इत्यधिकृत्य 'रल् सप्तत्यादौ' इत्यतः 'रल्' इति च

अद्रुमे कदल्याम् ॥ १ । ३ । ४३ ॥

अद्रुमवाचिनि कदलीशब्दे तोः रत्वं भवति । करळी । 'अद्रुमे' इति किम् । कअळी ॥ बिसिनीशब्दे 'बो वः' इत्यतः 'बः' इत्यनुवर्तते ।

बिसिन्यां भः ॥ १ । ३ । ६३ ॥

अत्र बस्य भो भवति । भिसिणी ॥ नीवीशब्दे 'नीवीस्वप्ने वा' इति वकारस्य वा मः । णीमी । पक्षे णीवी ॥ शमीशब्दे 'छल षट्छमी' इत्यादिना शोश्छत्वम् । छमी ॥ वाराणसीशब्दे 'ह्रश्च महाराष्ट्रे ह्रोर्व्यत्ययः' इत्यतः 'व्यत्ययः' इत्यधिकृत्य

---

१ डत्वाभावे तलोपः । M., R., and T. २ M., R., and T. drop अत्र 'प्रायो लुक्–' इति तलोपः । ३ मुकुलादित्वादा॰ M. ४ इत्यधिकृत्य M., R., T. ५ इत्यधिकृत्य M. ६ इति च M. ७ इत्यनुवर्तते । M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाराणसीकरेण्वां रणोः ॥ १ । ४ । ११३ ॥

अत्र रेफणकारयोर्व्यत्ययः स्यात् । वाणारसी ॥ मनस्विनीशब्दे वक्रादौ मनस्विन्यादित्वाद् द्वितीयादचः परो बिन्दुः । [1]वलोपे मणंसिणी । समृद्ध्यादिपाठाद् विकल्पेन दीर्घे माणंसिणी । उभयत्र 'लवराम्—' इति वलोपः । शेषत्वेपि नात्र सकारस्य द्वित्वम् । अचः परत्वाभावात् । न चानुक्तमन्यन्यायेन विप्रतिषेधे परं कार्यमिति न्यायेन परत्वाद् द्वित्वमेव युक्तम् । सामान्यविशेषयोर्विशेषो बलवानिति न्यायात् । बहुलाधिकाराद्वा बिन्दुरेव पूर्वमित्यलमति[2]प्रपञ्चेन ॥ तन्वीप्रभृतिषु 'क्ष्मारत्नेन्त्यहलः' इत्यतः[3] 'अन्त्यहलः' इत्यधिकृत्य 'अर्हत्सु च' इत्यतः 'उँ'[4] इति च

तन्व्याभे ॥ १ । ४ । १०६ ॥

उकारान्तात् ङीप्रत्ययान्ताः तन्व्याभाः तेषु संयुक्तस्यान्त्यहलः प्रागुत्वम् । तन्वी । तणुई । लघ्वी । लहुई । अत्र घस्य हत्वम् । गुर्वी । गरुई । [5]मुकुलादित्वादुत अत्वम् । बह्वी । बहुई । मृद्वी । मउई । [6]अत्र ऋतोत्वम् । पृथ्वी । पहुई । अत्रापि ऋतोत्वम् । थस्य हत्वम् । इत्यायू[7]हनीयम् ॥ उकारान्तः स्त्रीलिङ्गस्तनुशब्दः । 'नः' इति नस्य णत्वम् । तणू । 'शो शु स्त्रियां तु' इति जश्शसोरोदुतौ । [8]तणूउ । तणूओ । 'टाङिङसाम्' 'ङसेः श शा शि शे' । इत्यादि । रुचिवत् । एवं रज्जुधेनुप्रभृतयः ॥ ऊकारान्तः स्त्रीलिङ्गो जम्बूशब्दः । सौ जंबू । जसि जंबू । जंबूओ । जंबूउ । संबुद्धौ 'ह्रस्वलीदूतः' इति ह्रस्वः । दे जंबु । इत्यादि । गौरीवत् । एवं वधूचमू[9]श्वश्रूयवागूप्रभृतयः ॥ अलाबूशब्दे

---

१ M., R., and T. drop वलोपे. २ °मतिप्रसङ्गेन । My., P., R. ३ इत्यधिकृत्य M. ४ उदिति च M. ५ M. has अत्र before मुकुलादित्वाद्. ६ My., P., T., and R. drop अत्र ऋतोत्वम्. ७ °यूह्यम् My., P., M. ८ तणूओ । तणूउ । M. ९ My., P., and M. drop श्वश्रूयवागू.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वालाब्वरण्ये ॥ १ । २ । ४ ॥

'लुगव्यय—' ईत्यादिना लुगनुवर्तते । 'आदेः' इति च । अलाब्वरण्ययोरादेरचो लुग्वा स्यात् । ईत्यादेरचो वा लुक् । लाबू अलाबू ॥ भ्रूशब्दे 'स्वार्थे तु कश्च' ईत्यतः 'स्वार्थे' इत्यधिकृत्य

डुमयडमयौल् भ्रुवः ॥ २ । १ । २५ ॥

भ्रूशब्दात् स्वार्थे उमय अमय इत्येतौ डितौ लितौ स्तः । रेफलोपः । भुमय भमय इति स्थिते अनुक्तमन्यन्यायेन टाप् । भुमया भमया । इत्यादि । जायावत् ॥ करेणूशब्दे 'वाराणसीकरेण्वां रणोः' इति रणोर्व्यत्ययः । कणेरू । 'करेण्वाम्' इति स्त्रीलिङ्गनिर्देशादन्यत्र न भवति । एसो करेणू । इदुतोरीदूतोरन्येषां च 'स्वार्थे तु कश्च' इति कप्रत्यये जायावद्रूपम् ॥ ऋकारान्तः स्त्रीलिङ्गो मातृशब्दः । 'आरः सुपि' इत्यतः 'सुपि' इत्यधिकृत्य

मातुरा आरा ॥ २ । २ । ५० ॥

बहुलाधिकाराज्जननीदेवतार्थयोर्मातृशब्दयोः क्रमात् आ आरा ईत्येतावादेशौ भवतः सुपि परे ॥ माआ । माआरा । माआओ । माआरारो । इत्यादि । उभयत्र जायावत् ।

इदुन्मातुः ॥ १ । २ । ८३ ॥

'ऋतोत्' ईत्यतः 'ऋतः' इत्यनुवर्तते । अत्र ऋत इदुतौ भवतः ॥ माई । माऊ । शेषमुभयत्र रुचिवत्तनुवच्च । सर्वत्र तलोपः । यद्यपि 'इदुन्मातुः' इत्यत्र 'गौणस्य' इत्यनुवर्तते तथापि क्वचिदगौणस्यापि भवतीति त्रिविक्रमदेवेन माईणमिति प्रदर्शनाद्बहुलाधिकारादगौण-

---

१ इत्यतो M., R., T. २ My., M., and P. drop इत्यादेरचो वा लुक् । ३ इत्यधिकृत्य M., R., T. ४ भवतः T. ५ इत्युभावादेशौ M. ६ इत्यनुवर्तते । M., R. ७ The portion from यद्यपि to मातृशब्दस्येदुतौ भवतः is omitted in R. and T. ८ °दगौणस्यापि **हेमचन्द्र**वचनादपि भवतीति शास्त्रान्तरेऽपि केवलस्य &c. M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यापि भवतीति हेमचन्द्राचार्यवचनादपि केवलस्य मातृशब्दस्येदुतौ भवतः ॥ स्वसृशब्दस्य विशेषः ।

स्वस्रादेर्डाल् ॥ २ । २ । ४१ ॥

स्वस्रादेः स्त्रियां डाल् स्यात्[1] । ससा । णणंदा ॥ दुहितृशब्दस्य 'स्त्रीभगिनी—' इत्यादिना वा दूआ इत्यादेशः । दूआ । पक्षे दुहिआ । इत्यादि । जायावत् ॥ ओकारान्तः स्त्रीलिङ्गो घोशब्दः । कप्रत्ययः । जोआ । जोआओ । जायावत् ॥ गोशब्दस्य 'गव्यउदाइत्' इति अउत्वे गऊ । आइत्वे गाई । इत्यादि । तनुवद्धुचिवच्च ॥ रैशब्दे कप्रत्ययः । 'ऐच एङ्' । रेआ । रेआओ । जायावत् ॥ नौ शब्दे

नाव्यावः ॥ १ । २ । १०५ ॥

'ऐच एङ्' इत्यतः 'ऐचः' इत्यनुवर्तते । अत्रैचः आव इत्यादेशो भवति । टाप् । णावा । इत्यादि । जायावत् ॥

इत्यजन्तस्त्रीलिङ्गाः ॥

अथाजन्तनपुंसकलिङ्गाः[2] ।

अकारान्तनपुंसकलिङ्गो[3] वनशब्दः । वन[4] सु इति स्थिते 'श्लुगनपि सोः' इत्यतः[5] 'सोः' इत्यधिकृत्य

मङ्लुगसंबुद्धेर्नपः ॥ २ । २ । ३० ॥

नपुंसकलिङ्गात् परस्य सोर्मकारो ङानुबन्धो लुक् च[6] भवति । असंबुद्धेरामन्त्रणार्थे न भवति । वणं[7] । बहुलाधिकारादकारान्तेषु लुङ् न दृश्यते ॥ जश्शसोः

श्निशिंशिङ्जश्शसोः ॥ २ । २ । ३१ ॥

---

1 After this M. has डिति अकारो लित् स्यात्. 2 The heading is dropped in P. and My. 3 °लिङ्गः कुण्डशब्दः M., R. 4 कुण्ड for वन M., R., T. 5 इत्यधिकृत्य M., R. 6 R. drops च. 7 कुंडं T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नपः' इत्यनुवर्तते । नपुंसकलिङ्गात् परयोः जश्शसोः नि इं इ इति त्रय आदेशा भवन्ति । शानुबन्धत्वाद्दीर्घः । कुण्डाणि[1] । कुंडाइं । कुंडाइ । वेणानि । वणाइं । वणाइ[2] । एवं शस्यपि ॥ अन्यत्र रामवत् । एवं सदनवदनप्रभृतयः ॥ सर्वादौ 'सर्वादेर्जसोतो ङेत्' इत्यस्य पुँल्लिङ्गविषयत्वात् ञिंशिशिङ एव भवन्ति । सव्वं । सव्वाणि । सव्वाइं । सव्वाइ । इत्यादि । शेषं पुँल्लिङ्गसर्वशब्दवत्[3] ।

अथ अकारान्तनपुंसकलिङ्गेषु[4] विशेषाः प्रदर्श्यन्ते । पतिगृहम् । वेणुवनम् । शिलास्खलितम् । यमुनातटम् । वधूमुखम्—इत्यादिषु 'दिहौ मिथः से' इति दीर्घह्रस्वयोरन्योन्यादेशे । पईघरं । वेणूवणं । दीर्घस्य ह्रस्वः । सिळखळिअं । जेउणतडं[5] । वहुमुहं । पक्षे । पइघरं वहूमुहं इत्याद्यपि ॥ गुणदेवमण्डलाग्रकररुहवृक्षादीनां 'क्लीबे गुणगाः' इति यदा नपुंसकता तदा वनवत्[6] ॥ निर्माल्यशब्दे 'निष्प्रतीओत्—' इत्यादिना निरः ओ इत्यादेशः । 'संयोगे' इति ह्रस्वः । ओमल्लं ॥ अरण्यशब्दे 'वालाब्वरण्ये' इत्यादेरचो वा लुक् । रण्णं । अरण्णं ॥ पक्वललाटयोः । 'पक्वाङ्गारललाटे तु' इत्यवर्णस्य वा इत्वे । पिक्कं । पक्कं । ललाटे 'खोः करवीरे णः' इत्यतः[7] 'खोः' इत्यधिकृत्य

लो ललाटे च ॥ १ । ३ । ८१ ॥

अत्रादेर्लस्य णत्वं भवति । णिलाट इति स्थिते 'टो डः' इति टस्य डत्वे 'हश्च महाराष्ट्रे ह्रोर्व्यत्ययः' इत्यतः[8] 'व्यत्ययः' इत्यधिकृत्य

ललाटे डलोः ॥ १ । ४ । ११४ ॥

अत्र डकारलकारयोर्व्यत्ययः स्यात् । णिडालं । इत्वाभावे णडालं ॥ द्वारशब्दे 'उत्करवल्ली—' इत्यादिना आदेरवर्णस्य वा एत्वे 'लवराम्—' इति वलोपे । देरं । दारं । 'वा छद्म—' इत्यादिना वकारात्

---

१ कुण्डानि M., R. २ M., R., and T. drop वणानि । वणाइं । वणाइ । ३ M. drops शब्द. ४ °नपुंसके R., T. ५ जउणअडं M. ६ कुण्डवत् M., R., T. ७ इत्यधिकृत्य M., R. ८ इत्यधिकृत्य M., R., T.

प्रागुत्वे । दुवारं । तदैव च वलोपे । दुआरं । 'कग—' इति दलोपे । वारं । वेरमित्यपि ॥ आर्द्रशब्दे 'हे दक्षिणेस्य' इत्यतः 'अस्य' इत्यधिकृत्य

त्वार्द्रे उदोत् ॥ १ । २ । २७ ॥

आर्द्रशब्दे आदेरवर्णस्य उत्वमोत्वं च वा भवतः । आर्द्र । उद्र्द । ओर्द्र । इति स्थिते 'लो वार्द्रे' 'स्तोः' इत्यनुवर्तते । अत्र स्तोर्लो वा स्यात् इति वा लत्वे रेफलोपे शेषस्य द्वित्वे 'संयोगे' इति ह्रस्वे च । अल्लं । उल्लं । ओल्लं । लत्वाभावे । अद्दं । उद्दं । ओद्दं ॥ स्त्यानशब्दे 'ईल्खल्वाट—' इत्यादिना अकारस्य ईत्वम् । 'स्त्यानचतुर्थे—' इत्यादिना स्तस्य वा ठत्वम् । ठीणं । ठत्वाभावे 'स्थोस्पन्दे' इत्यनुवर्तमाने एतत्सूत्रे चकारानुकृष्टं थत्वम् । थीणं । दैवादित्वाद् द्वित्वे थिण्णं ॥ तालवृन्ते उत्खातादिपाठादाकारस्य विकल्पेन ह्रस्वे तलवृन्त तालवृन्त इति स्थिते 'ऋतोत्' इत्यधिकृत्य

वृन्त इदेङ् ॥ १ । २ । ८७ ॥

अत्र ऋत इदेतौ वा भवतः । 'टल् त्रसरवृन्त—' इत्यादिना तस्य टत्वम् । तलविंटं । तलवेंटं । तालविंटं । तालवेंटं ॥ 'संयोगे' इत्यधिकृत्य

त्वेदितः ॥ १ । २ । ४१ ॥

इत आदेरिकारस्य संयोगे परे वा एकारः स्यात् । धम्मेल्लं । धम्मिल्लं । सेंदूरं । सिंदूरं । पेंडं । पिंडं । इत्यादि ॥ क्षुतशब्दे 'त्वदुत उपरि गुरुके' इत्यतः 'उतः' इत्यधिकृत्य

क्षुत ईत् ॥ १ । २ । ६१ ॥

---

१ इत्यधिकृत्य M., R. २ आर्द्रा M. ३ उद्रा M. ४ ओर्द्रा M. ५ M. and R. drop च. ६ तालविंटं is dropped in P., R., T., My. ७ धमेल्लं । धमिल्लं My. ८ क्षुते M. ९ इत्यधिकृत्य M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोत ईत्वं[1] भवति । स्पृहादित्वात् क्षस्य[2] छः । छीअं[3] ॥ 'सूक्ष्मेद्बोतः' ईत्यतः 'ऊतः' इत्यधिकृत्य

अल् दुकूले ॥ १ । २ । ६८ ॥

अत्र ऊतः अलित्यादेशो वा[4] । लकारो नानुबन्धः । कलोपः । दुअल्लं । अत्रादेशलकारस्वभावलकारयोर्मेलनाद् द्वित्वम् । पक्षे दुऊलं ॥ 'उल्कण्डूय—' इत्यतः 'उल्' इत्यनुवर्तमाने 'ऊतः' इति च

वा मधूके ॥ १ । २ । ७१ ॥

अत्र ऊत उत्वं वा स्यात्[5] । धस्य हः । महुअं । पक्षे[6] महूअं ।

इदेन्नूपुरे ॥ १ । २ । ७२ ॥

'ऊतः' इत्यनुवर्तते । अत्र ऊत इदेतौ वा भवतः । णिउरं । णेउरं । पक्षे[7] णोउरं । अत्र सर्वत्र पलोपः ॥ 'ऋतोत्' ईत्यतः 'ऋतः' इत्यधिकृत्य[8] 'उद्वृषभे वुः' इत्यतः 'उत' इति च

गौणान्त्यस्य ॥ १ । २ । ८२ ॥

गौणपदस्य योन्त्य ऋत् तस्य उद्भवति । मातृमुदितम्[9] । माउमुइअं । मातृगृहम् । माउघरं । पितृकुलम् । पिउकुळं । इत्यादि ॥ लवणशब्दे 'तु मयूर—' इत्यादिना आदेरचः परेण साज्झला सह वा ओत्वे लोणं । लवणं ॥ उलूखलेऽपि पूर्ववत्[10] । ओहलो । उऊहळं ॥ मृदुत्वशब्दे[11] 'कः शक्त—' इत्यादिना युक्तस्य वा कत्वे 'ऋतोत्' इत्यतः[12] 'ऋतः' इत्यधिकृत्य

आद्वा मृदुत्वमृदुककृशासु ॥ १ । २ । ७५ ॥

---

१ ईद्वा स्यात् R., T. २ संयुक्तस्य छत्वम् for क्षस्य छः । R. ३ R. and T. have पक्षे छुअं after it. ४ इत्यनुवर्तमाने M. ५ वा स्यात् M. ६ M. drops पक्षे. ७ M. and R. drop पक्षे णोउरं. ८ इत्यधिकृत्य M., R. ९ माउमुइअं । मातृमुदितम् । माउघरं । मातृगृहम् । पिउकुळं । पितृकुलम् । My., P. १० M. has बहुलम् after पूर्ववत्. ११ मृदुत्वेM., R., T. १२ इत्यधिकृत्य M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषु ऋत आद्वा स्यात् । इत्यतो वा आत्वे माउक्कं । पक्षे अत्वम् । मउक्कं । कत्वाभावे 'त्वस्य तु डिमात्तणौ' इति त्वस्य वा तणादेशे । माउत्तणं । मउत्तणं । तणाभावे । माउत्तं । मउत्तं । अत्र सर्वत्र दलोपः ॥ पत्तनशब्दे 'प्रवृत्तसंदष्ट—' इत्यादिना स्तोष्टत्वम् । पट्टणं ॥ प्रवृत्तशब्दे पूर्वसूत्रेणैव स्तोष्टत्वम् । पवट्टं । अत्र 'ऋतोत्' इत्यत्वं च । आश्चर्यशब्दे 'र्यः सौकुमार्य—' इत्यादिना 'र्यः' इत्यनुवर्तमाने[1]

अररिअरिज्जमाश्चर्ये ॥ १ । ४ । ५६ ॥

अत्र र्यस्य अर रिअ रिज्ज इति त्रय आदेशा भवन्ति । अच्छअरं । अच्छरिअं । अच्छरिज्जं ॥ श्मशानशब्दे 'शोर्लुक् खोः—'इत्यादिना शोर्लोपे । मसाणं ॥ सरोरुहशब्दे 'स्वत्सरोरुह—'इत्यादिना एचो वा अत्वम् । सररुहं । सरोरुहं ॥ अन्योन्यशब्देप्येवम् । अण्णण्णं । अण्णोण्णं ॥ कालायसकिसलयहृदयशब्देषु[2][3] 'ज्योर्दनुज—'इत्यादिना[4] यकारस्य साच्कस्य[5] वा लोपे । कालासं । कालाअसं । किसलं । किसलअं । हिअं । हिअअं ॥ चत्वरशब्दे[6] 'चः कृत्तिचत्वरे' इति स्तोश्चत्वम्[7] । चच्चरं ॥ सैन्यशब्दे 'चपेटकेसरदेवर—'[8] इत्यादिना एचो वा ईत्वम् । सिण्णं । सेण्णं । दैवादिपाठात् सइण्णं ॥ चिह्नशब्दे 'वा न्तन्धौ मन्यु-चिह्नयोः' इत्यनेन वा न्धादेशे । चिन्धं । पक्षे 'श्ष्ण—'इत्यादिना ण्हादेशे[10] । चिण्हं । इन्धं । इण्हं । इत्यप्यस्ति । बहुला[11]धिकारात् क्वचि[12]दादेरपि चस्य लोपः ॥ मलिनशब्दे[13] 'मलिनधृति—'इत्यादिना मलिनशब्दस्य वा मइलादेशे । मइलं । पक्षे मलिणं ॥ वैडूर्यशब्दे[14] अनेनैव[15]

---

१ इत्यनुवर्तते M., R. २ राजकुलभाजनकालायस° R., T. ३ °हृदयेषु M., R. ४ M. has अत्र before 'ज्यार्दनुज°. ५ After this R. has कयोर्वा लोपे राउरं । राअउरं । भाणं । भाअणं. ६ चत्वरे M., R. ७ श्चुत्वम् M. ८ °केसर—' इत्यादिना M. ९ इत् M. १० ण्हादेशः M., T. ११ अत्र बहुला° T. १२ M. and T. have प्रायो लुक् before क्वचिदादेरपि. १३ T. has वैडूर्यशब्दे च after this. १४ T. drops वैडूर्यशब्दे; M. has वैडूर्यशब्दस्य. १५ M. drops अनेनैव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेरुलि आदेशो[1] वेरुलिअं। पक्षे वेडुज्जं। इत्याद्यूहनीयम्[2] ॥ आकारान्तनपुंसकलिङ्गः सोमपाशब्दः। 'क्विपः' इति ह्रस्वः। शेषं पुंलिङ्गसोमपाशब्दवत् ॥ इकारान्तनपुंसकलिङ्गो दधिशब्दः। दधि सु इति स्थिते 'मङ्लुगसंबुद्धेर्नपः' इत्यनेन सोर्मङ्लुक् च। ङित्वात् सानुनासिक उच्चारः। दहिं। दहिँ। सिद्धावस्थापेक्षया दहि इत्यपि भवति। जश्शसोश्शिशिमादयः। दहीणि। दहीइं। दहीइँ। दे दहि। इत्यादि। शेषं पुंलिङ्गकविवत्। एवं वारिप्रभृतयः ॥ अस्थिशब्दे 'विसंस्थुलास्थि—'इत्यादिना युक्तस्य ठत्वम्। वक्रादित्वाद्[3] बिन्दुः। अंठिं। अन्यत्र दधिवत् ॥ अक्षिशब्दस्य स्पृहादित्वात् क्षस्य छत्वम्। अच्छिं। दधिवत् ॥ द्वित्रिशब्दयोर्लिङ्गत्रयेपि समानं रूपम् ॥ ग्रामणीशब्दे 'क्विपः' इति ह्रस्वः। गामणिं। इत्यादि। दधिवत् ॥ उकारान्तनपुंसकलिङ्गो मधुशब्दः। प्रथमाद्वितीययोर्दधिवत्। सिद्धावस्थापेक्षया महु इति च भवति[4]। अन्यत्र पुंलिङ्गकारुवत् ॥ विंदशब्दस्य गुणादिपाठात् 'क्लीबे[5] गुणगाः' इति वा नपुंसकत्वे मधुवत्[6] ॥ श्मश्रुशब्दे 'शोर्लुक्स्खोः—' इत्यादिना शोर्लुक्। वक्रादित्वाद्बिन्दुः[7]। मंसुं। इत्यादि मधुवत् ॥ खलपूशब्दे ह्रस्वः। खलबुं। श्शिमादौ पुनर्दीर्घः। खलबूनि इत्यादि मधुवत्। एवं काण्डलूप्रभृतयः ॥ ऋकारान्तनपुंसकलिङ्गः कर्तृशब्दः। 'आरः सुपि' इत्यारादेशः। कत्तारं। कत्ताराणि इत्याद्यारादेशे कुण्डवत्। 'उद्दतां त्वस्वमामि' इत्युत्वे कत्तूनि इत्याद्युत्वपक्षे मधुवत्। स्वमामि तु आर एव ॥ ओकारान्तनपुंसकलिङ्ग उपगोशब्दः। सिद्धावस्थापक्षेया उवउ। उवऊं। इत्यादि मधुवत् ॥ ऐकारान्तनपुंसकलिङ्गोतिरैशब्दः। अनुक्तमन्यन्यायेन। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'एच इग्घ्रस्वादेशे' इति एच इक्। तलोपः। अइरिं। अइरीणि।

---

१ T. has वैडूर्यस्य after आदेशो. २ °द्यूह्यम् M., R., T. ३ M. and R. drop वक्रादित्वाद्बिन्दुः. ४ दृश्यते R. ५ M. and R. drop क्लीबे गुणगाः. ६ M. and R. have बिन्दु इत्यादि before मधुवत्. ७ M. has आदिस्वरात् before बिन्दुः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि दधिवत् ॥ गोशब्दस्य साध्यावस्थापेक्षया अउ आइ इत्या[1]देशयोः [2]उवगउं । उवगाइं[3] । इत्यादि मधुवद्दधिवच्च ॥ औकारान्तनपुंसकलिङ्गोतिनौ शब्दः । अनुक्तमन्यन्यायेन ह्रस्वादि पूर्ववत्तल्लोपः । [4]अइणुं । इत्यादि । पक्षे 'नाव्यावः' इत्यावादेशे अइणावं अइणावाणि । इत्यादि कुण्डवत् ॥

इत्यजन्ता नपुंसकलिङ्गाः ॥

क्तप्रत्ययान्ते विशेषः । 'अदेल्लुक्यादेरत आः' इत्यतः[5] 'अतः' इत्यधिकृत्य 'मोभमुष्विच्च' इत्य[6]तः 'इत्'[7] इति च

क्ते ॥ २ । ४ । १७ ॥

क्तप्रत्यये परे अत इत्वं स्यात् । हसिअं[8] । पढिअं । इत्यादि । णअं गअं इत्यादि[9] तु सिद्धा[10]वस्थापेक्षया । अत इत्येव । जाअं । लूअं । भूअं । इत्याद्यूह्यम् ॥ ण्यन्तक्ते तु

लुगाविल्भावकर्मक्ते ॥ २ । ४ । १३ ॥

'णिजदेदावावे' इत्यतः 'णिच्' अनुवर्तते । भाव[11]कर्मविहिते क्तप्रत्यये परे णिचो वा लुक् आविलित्या[12]देशश्च वा भवति । लित्वान्नित्यम् । कारिअं । काराविअं । हासिअं । हासाविअं । इत्याद्यू[13]ह्यम् ॥

अथ हलन्ताः ॥

हकारान्तः पुंलिङ्गो गोधुक्शब्दः । गोदुह् सु इति स्थिते

---

१ इत्यादेशे M. २ उवगउ before उवगउं M. ३ उवगाइ after उवगाइं M. ४ M. has अइणु after this. ५ इत्यधिकृत्य M., R., T. ६ इति च M. ७ इत् R., T. ८ पढिअं । कारिअं M., T. ९ इत्यादिषु M. १० सिद्धावस्थाया for सिद्धावस्थापेक्षया R., T. ११ भावकर्मविहिते is dropped in P. and My. १२ °त्यादेशं वाप्नोति M., T. °त्यदेशो चाप्नानीतिः R. १३ °यूह्यम् P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हलोक् ॥ २ । ४ । ६९ ॥

धातोर्न्त्यस्य[1] हलः पेरः[2] अगागमः स्यात् । इत्यगागमे । गोदुहो । गोदुहा । इत्यादि । रामवत् । एवमनडुह्प्रभृतयः ॥ यकारान्तोप्रसिद्धः । वकारान्तः पुंलिङ्गो सुदिव्शब्दः । वकारस्य 'अन्त्यहलोश्रदुदि' इति लोपः । धातुत्वाभावादगागमो न भवति । कप्रत्ययः । सुदिओ । सुदिआ । इत्यादि । रामवत् । भिस्भ्यस्सुप्सु 'दिव उत्' इत्युत्वे कृते[4] सिद्धावस्थापेक्षया सुद्यु इत्यस्य द्यस्य 'र्यो जः' इति जत्वे[5] । सुज्जूहिं । सुज्जूसुंतो । सुज्जूसुं । इत्यादि । कारुवत् । अत्र धातुत्वाधातुत्वविवेकस्तु प्रायौगिकः । धातुत्वपक्षे[6] अगागमः । अन्यत्र कप्रत्ययः ॥ रेफान्तः पुंलिङ्गः सुगिर्शब्दः । अगागमः । सुगिरो । सुगिरा । इत्यादि रामवत् । एवं सुधुर्सुपुर्प्रभृतयः ॥ चतुर्शब्दस्य

चतुरो जश्शस्भ्यां चउरो चत्तारो चत्तारि ॥ २ । ३ । २८ ॥

चतुर्शब्दस्य[7] जश्शस्भ्यां सह चउरो चत्तारो चत्तारि इति त्रय आदेशा भवन्ति । जसि चउरो चत्तारो चत्तारि । शसि तान्येव । अन्यत्र भिसादिष्वन्त्यहलो लोपे 'भिस्भ्यः सुपि' इत्यधिकृत्य 'इदुतोर्दि' इत्यतो 'दि' इति च

चतुरो वा ॥ २ । २ । २३ ॥

उदन्तस्य चतुर्शब्दस्य भिस् भ्यस् सुपि परे वा दीर्घः स्यात् । चउहिं । चऊहिं । चउहिंतो । चऊहिंतो । एवं त्तो दो दवः सुंतो च । चउसु । चऊसु । इत्यादि । आमि 'ण्हण्हं संख्याया—' इत्यादिना ण्हण्हं । चउण्ह[8] । चउण्हं । शेषं कारुवत् ॥ मकारान्तः पुंलिङ्गः प्रशाम्शब्दः । 'हलोक्' इत्यगागमः । शोः सत्वम् । पसामो । पसामा ।

---

१ °र्न्त्यहलः R., T. २ परे T. ३ °शब्दः T. ४ कृते is dropped in T., My., P. ५ जत्वे कृते M. ६ M. omits धातुत्वपक्षे— कप्रत्ययः । ७ M. omits चतुर्शब्दस्य. ८ चउण्हं चउण्ह M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि । रामवत् । एवं प्रतामादयः ॥ किंशब्दस्य तु भेदः । 'क्वचित्सुपि तदो णः' इत्यतः 'सुपि' इत्यधिकृत्य[1]

त्रतसि च किमो ल्कः ॥ २ । २ । ७५ ॥

किंशब्दस्य त्रतसोः सुपि च परे क इत्यादेशो लित् स्यात् । 'सोः' इत्योत्वम् । को । सर्वनामत्वाज्जस एत्वम् । के । शसि सर्ववत् । टा

इदमेतत्किंयत्तद्भ्यष्टो डिणा[2] ॥ २ । २ । ७३ ॥

'अनिदमेतदस्तु किंयत्तद्भ्यः स्त्रियामपि हिं' इत्यतो मण्डूकप्लुतिन्यायेन 'तु' इत्यनुवर्तते[3] । एभ्यः सर्वादिभ्योदन्तेभ्यः परस्य टावचनस्य इणा इति डिद्वा स्यात् । किणा । केण । केणं । भिसि सर्ववत् । ङसौ

म्हा ङसेः ॥ २ । २ । ७० ॥

'अनिदमेतद्—' इत्यादेः 'किंयत्तद्भ्यः' इत्यनुवर्तते 'तु' इति च । किंयत्तद्भ्यः परस्य ङसेः म्हा इत्यादेशो वा स्यात्[4] । कम्हा । पक्षे सर्ववत् ।

किमो डीसडिणो ॥ २ । २ । ७१ ॥

'ङसेः' इत्यनुवर्तते । किमः परस्य ङसेः ईस इणो इत्यादेशौ डितौ वा भवतः । कीस । किणो । पक्षे सर्ववत् । ङसि 'किंयत्तद्भ्यः सश्' इत्यतः 'सश्' इत्यधिकृत्य

किंयत्तद्भ्यो ङस[5] ॥ २ । २ । ६७ ॥

ङस[6] इति विभक्तिव्यत्ययेन षष्ठी । एभ्यः परस्य ङसः सश् वा भवति[7] । कास । पक्षे कस्स । आमि 'आमां डेसिं' इति वा डेसिमादेशः । केसिं । पक्षे

किंयत्तद्भ्यः सश्[8] ॥ २ । २ । ६६ ॥

---

१ इत्यधिकृत्य M., R., T. २ दिणा M. ३ इत्यनुवर्तमाने My., P. ४ भवति M. ५ ङसी M. ६ ङसी M. ७ स्यात् M., R. ८ शसी M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आमां' इत्यनुवर्तते। एभ्यः परस्य आमः शित् सकारो वा स्यात्। कास। पक्षे सर्ववत्। काणं[1]। काण। ङौ 'ङेस्त्थस्सिम्मि'। कत्थ। कस्सि। कंमि। 'अनिदमेतद्—' इत्यादिना वा हिं च। कहिं। ङावेव विशेषः।

ङिरिआडाहेडाला काले ॥ २। २। ६९ ॥

किंयत्तद्भ्यः परो ङिः इआ इत्यादेशं आहे आला इत्येतौ डितौ चापद्यते वा कालेभिधेये[2]। कइआ। काहे। काला। कदेत्यर्थः। एवं यत्तदोरप्येते आदेशाः कालेभिधेये। शेषं सर्ववत् ॥ इदं शब्दस्य तु इदम् स् इति स्थिते 'क्वचित् सुपि तदो णः' इत्यतः[3] 'सुपि' इत्यधिकृत्य

इदम इमः ॥ २। २। ७६ ॥

इदंशब्दस्य इम इत्यादेशो भवति सुपि परे। इमो ॥

पुंसि सुना त्वयं स्त्रियामिमिआ ॥ २। २। ७७ ॥

'इदमः' इत्यनुवर्तते। इदमः सुना सहितस्य पुंलिङ्गे अयमिति स्त्रीलिङ्गे इमिआ इति वा भवति। अयं। यद्यप्येतद्रूपं सिद्धावस्थापेक्षयापि भवति[4] तथापि इमिआर्थं वचनम्। जसि सर्ववत्। इमे। द्वितीयातृतीययोः

टामसि णः ॥ २। २। ७९ ॥

'इदमः' इत्यनुवर्तते। टास् तृतीया अमु द्वितीया तयोः परयोरिदमो ण इत्यादेशो वा स्यात्। अमि णं। पक्षे इमं।

इहेणं ङ्यमा ॥ २। २। ८० ॥

'इदमः' इत्यनुवर्तते। ङि अम् इत्येताभ्यां सहितस्येदमः स्थाने इह इणं इत्येतौ क्रमेण भवतः[5]। इणं। 'शस्येत्' इति वा एत्। णे। णो। शसः श्लुक्। इमे। इमा। टा। एणं। णेण। पक्षे। इमेणं।

---

१ काण। काणं M. २ कालोभिधीयते M. ३ इत्यधिकृत्य M., R. ४ अस्ति R. ५ क्रमेण तु भवतः R., T.; क्रमेण स्तः My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इमेण । अत्र 'टो डेणल्' इत्येणादेशः । 'इदमेतत्—' इत्यादिना टो डिणा च । इमिणा । भिसि । णेहिं । इमेहिं । इत्यादि । रामवत् ।

अत्सुस्सिंहिस्से ॥ २ । २ । ७८ ॥

'इदमः' इत्यनुवर्तते । इदमः सुप् ङि भिस् ङस् एतेषु सु स्सिं हि स्स इत्यादेशानापन्नेषु अत्वं वा[1] स्यात् । इति इदमः सर्वस्यात्वे 'भिस्भ्यस्सुपि' इत्येत्वे । एहिं इत्यपि । अत्र सूत्रे 'हि' इत्यनेन भिस्भ्यसोरादेशस्य हेर्ग्रहणम् । तेनोभयत्राप्यत्वम् । ङसाविमादेशे । इमाहिंतो । इत्यादि । रामवत् । भ्यसि । इसोहिंतो । इमाहिंतो । इत्यादि । रामवत् । अत्रैव 'ङसिसो हि' इत्यादेशे तस्मिन्निदमः अत्वे भ्यसि । एहि । आहि । ङसि अस्स । इमस्स ॥

तदिदमेतदां सेसिं तु ङसामा ॥ २ । २ । ८४ ॥

ऐषां[2] स्थाने ङस् आम् इत्येताभ्यां सह से सिं इत्यादेशौ यथासंख्यं वा[3] भवतः । ङसि । से । आमि । सिं । इमेसिं । इमाणं । इमाण । ङौ

न त्थः ॥ २ । २ । ८१ ॥

'इदमः' इत्यनुवर्तते । इदमः परस्य ङेः 'ङेस्त्थस्सिम्मि' इति प्राप्तः त्थो न भवति । अस्सिं । इमस्सिं । इमम्मि । इह सुपि एत्[4] । एसुं । एसु । इमेसुं । इमेसु । सुपि इदमो णादेश इति केचित् । णेसुं । णेसु ॥ ङकारान्तोप्रसिद्धः ॥ णकारान्तः[6] पुंलिङ्गः[7] सुगण्शब्दः । अणागमः । सुगणो । सुगणा । इत्यादि । रामवत् । एवं सुषर्ण् सुरण्प्रभृतयः[8] ॥ नकारान्तः पुंलिङ्गो राजन्शब्दः । राजन् सु इति स्थिते 'अन्त्यहलोश्रदुदि' इति नलोपे 'आ सौ वा' इत्यधिकृत्य

---

१ तु for वा M.; भवति for स्यात् R., T. २ एतेषां R., T. ३ तु for वा M., R., T.; स्तः for भवतः My., P. ४ स्यात् P.; My. ५ एत्वे M. ६ णकारान्तपुंलि° R. ७ पुंलिङ्गसुगण्° M., R. ८ सुभण् M., T.

राज्ञः ॥ २ । २ । ५३ ॥

राजन्शब्दस्य नलोपे सत्यन्त्यस्य सौ परे आत्वं वा स्यात् । राआ । पक्षे

पुंस्याणो राजवच्चानः ॥ २ । २ । ६० ॥

पुंलिङ्गे वर्तमानस्य अन् इत्यस्य स्थाने आण इत्यादेशो वा स्यात् राजवत्कार्यं च यथादर्शनम् । 'टोणा' 'जश्शसूङसिङसां णोश्' इति च[1] भवति । अत्राणादेश एव अन्यत्राणादेशो राजवत् कार्यं च । आणादेशे च 'सोः' इत्यादयः प्रवर्तन्ते । राआणो । जसि 'आ सौ वा' इत्यतः[2] 'वा' इत्यधिकृत्य

जश्शसूङसिङसां णोश् ॥ २ । २ । ५५ ॥

रा[3]ज्ञः परेषामेषां[4] णोश्[5] वा स्यात् । राजन् णो इति स्थिते

णोणाङिष्विदना जः ॥ २ । २ । ५६ ॥

'वा' इत्यनुवर्तते । राजन्शब्द[6]संबन्धिनो जस्य अनासहितस्य णो णा इत्यादेशयोः ङि[7] वचने च परे इकारो वा स्यात् । इतीत्वे । राइणो । इत्वाभावे । राआणाणो । राआणो । णो शभावे । राआ । आणादेशे । राआणा । संबुद्धौ । दे राआ । दे राअ । दे राओ । दे राआणो । अमि

इणममामा ॥ २ । २ । ५७ ॥

अनाज इत्यनुवर्तते । राजन्शब्द[8]संबन्धिनो जस्य अनासहितस्य अम् आम् इत्येताभ्यां सहितस्य इणमित्यादेशो वा स्यात् ॥ राइणं । पक्षे । राअं । आणादेशे[9] । राआणं । शसि । राआणाणो । राआणो । राइणो । राआणा । 'शस्येत्' । राआणे । राआ ॥

---

१ च is omitted in My. २ इत्यधिकृत्य M., R. ३ M. and R. have 'राज्ञः' इत्यनुवर्तते before it. ४ °मेतेषां M. ५ शित् णो वा स्यात् M., R., T. ६ My. and P. drop शब्द. ७ ङौ च My., P. ८ M. drops शब्द. ९ णाआदेशे M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टो णा ॥ २ । २ । ५४ ॥

राजन्शब्दात् परस्य टा इत्यस्य णा इत्यादेशो वा स्यात् । 'णो-णाङिषु—' इत्यादिना वा इत्वे । राइणा । पक्षे ।

ङस्ङसिटां णोणोर्डण् ॥ २ । २ । ५९ ॥

[1]राजन्शब्दस्यानासहितस्य जस्य ङस् ङसि टा वचनानां [2]यौ णोणा इत्यादेशौ तयोः परयोः [3]डैण् इत्यादेशो वा स्यात् । टिलोपः । रण्णा । नजयोर्लोपे । राएणं । राएण । आणादेशे । राआणेणं । राआणेण । भिसि

भिस्भ्यसांसुप्स्वीत् ॥ २ । २ । ५८ ॥

'राज्ञः' इत्यनुवर्तते । राजन्शब्दस्यानासहितस्य जस्य भिस्भ्यस् आम् सुप् इत्येतेषु परेषु ईकारो वा [4]स्यात् । राईहिं । इत्यादि । ईत्वाभावे नजयोर्लोपे । राएहिं । इत्यादि । आणादेशे । राआणेहिं । इत्यादि । ङसौ णोश् । [5]ईल् । डण् । राआणाणो । राइणो । रणो । पक्षे । राआहिंतो । इत्यादि । आणादेशे । राआणाहिंतो । इत्यादि । भ्यसि आणादेशे । राआणासुंतो । इत्यादि । रामवत् । नजयो-र्लोपे । राआहिंतो । राएहिंतो । राईहिंतो । इत्यादि । रामवत् । ङसि । राइणो । रण्णो । राआणाणो । राआणो । राअस्स । राआणस्स । आमि । राईणं । राईण । आणादेशे । राआणाणं । राआणाण । पक्षे । राआणं । राआण । ङौ । इत्वे । राइम्मि । पक्षे । राअम्मि । आणादेशे । राआणे । राआणम्मि । पक्षे । राए । सुपि । राईसुं । राईसु । राएसुं । राएसु । राआणेसुं । राआणेसु ॥ आत्मन्शब्दस्यान्त्य-हलो लुक् । आत्म सु इति स्थिते 'स्तोः' इत्यधिकृत्य

वात्मभस्मनि पः ॥ १ । ४ । ४२ ॥

आत्म भस्म अनयोः स्तोः पो वा स्यात् । अप्पा । पक्षे । 'मन-

---

१ राज्ञोना° M. २ My. drops यौ. ३ डित् अण् M. ४ भवति M., T. ५ इत् M., T.

याम्—' इति मलोपे शेषद्वित्वे अत्ता । अत्र राजवदित्यतिदेशात् 'आ सौ वा' इत्यनुवर्तमाने राज्ञ इत्यात्वं विकल्पेन भवति । पक्षे । अप्पो । अत्तो । 'पुंस्याणो राजवच्चानः' इत्याणादेशे राजवत्कार्यं च । अप्पाणो । अत्ताणो । जसि । 'जश्शस्ङसिङसां णोश्' । अप्पाणो । अप्पा । आणादेशे । अप्पाणा । संबुद्धौ । दे अप्प । दे अप्पा । दे अप्पो । दे अप्पाण । जसि । तान्येव । अमि । अप्पं । अप्पाणं । शसि । अप्पादेशे [1]आणादेशे च रामवत् । टा

टो वात्मनो णिआणइआ ॥ २ । २ । ६१ ॥

आत्मनः परस्य टावचनस्य णिआ णइआ इत्यादेशौ वा स्तेः । अप्पणिआ । अप्पणइआ । अयमेव विशेषः । [3]इतरत् [4]सर्वमाणादेशे अप्पादेशे च [5]रामवद्रूपम् । एवम[6]त्तशब्दोपि ॥ युवन्शब्दस्य जुवाणो । जुवा । जुवो ॥ पूषन्श[7]ब्दस्य पू[8]साणो । पूसा । पूसो ॥ तक्षन् । क्ष्वेडकादित्वात् क्षस्य खः । तक्खाणो । तक्खा । तक्खो ॥ मूर्धन्शब्दस्य रेफलोपह्रस्वौ । वक्रादित्वाद्बिन्दुः । मुंधाणो । मुंधा । मुंधो । 'ढोर्धर्द्धि—' इत्यादिना स्तोर्ढत्वे । मुंढाणो । इत्याद्यपि ॥ श्वन्शब्दस्य साणो । [9]सां । इत्यादि ॥ सुकर्मन्शब्दस्य सुकम्माणो । [10]सुकम्मो । इत्यादि । [11]एतेषामात्मशब्दवत् प्रक्रिया । अन्येषां नपुंसकलिङ्गानामपि नकारान्तानाम्

स्नमदामशिरोनभो नरि ॥ १ । १ । ४९ ॥

सान्तं नान्तं च यच्छब्दरूपं तन्नरि पुंलिङ्गे प्रयोक्तव्यं दामन्

---

१ आणादेशे च is omitted in M. २ भवतः M. ३ अन्यत् R., T. ४ सर्वं रामवद्रूपम् R., T. ५ रामवद्रूपम् is dropped in R., T. ६ °मुत्तर for मत्त My.; °मत्ता M.; °मुत्ता R.; °मंता T. ७ शब्दस्य is dropped in M., R., T. ८ पूसानो M. ९ सासो M. १० M. has सुकम्मा before it. ११ एतेषाम् is dropped in M., My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिरस् नभस् एतान् वर्जयित्वा । इति पुंलिङ्गतायां कर्मन् कम्मो नर्मन् नम्मो इत्यादि । रामवत् । जन्मन्शब्दस्य

तु सक्खिणभवंतजम्मणमहंताः ॥ १ । १ । ३७ ॥

साक्ष्यादयः शब्दाः विहितान्त्यव्यञ्जनादेशा वा निपात्यन्ते । इति[1] निपातात् जम्मणो । पक्षे । जम्मो ॥ भसन्शब्दे 'वात्मभस्मनि पः' इति स्तोर्वा पः । भप्पो । पत्वाभावे 'मनयाम्' इति मलोपे शेषद्वित्वे[2] च भस्सो ॥ छद्मन्शब्दे 'वा च्छद्म—' इत्यादिना अन्त्यहलः प्रागुत्वे । छउमो । पक्षे । छम्मो । उभयत्रान्त्यहलो लोपः दलोपश्च ॥ श्लेष्मन्शब्दे 'श्लेष्मबृहस्पतौ तु फोः' इति द्वितीयस्य स्तोः फत्वे । सेफो । सिलेह्मो । अत्र 'लादक्लीबेषु' इति संयुक्तस्यान्त्यहलः प्रागित्वम् । 'श्मष्म—' इत्यादिना ह्मादेशः । इन्नन्तेषु सर्वत्र नलोपे कविशब्दवत् । करी । करिणो । इत्यादि । मनस्विन्शब्दे वक्रादिपाठाद् द्वितीयादचः परो बिन्दुः । मणंसी ॥ साक्षिन्शब्दस्य 'तु सक्खिण—' इत्यादिना निपातनात् सक्खिणो । पक्षे । सक्खी ॥ पथिन्शब्दस्य 'मूषिकविभीतक—' इत्यादिना इतः अत्वम् । अन्त्यहलो लोपः । थस्य हत्वम् । पहो । पहा । इत्यादि । रामवत् ॥ ञकारान्तोप्रसिद्धः ॥ भकारान्तः पुँल्लिङ्गः सुककुप्शब्दः ।

हः क्षुत्ककुभि ॥ १ । १ । ३१ ॥

'अन्त्यहलोश्रदुदि' इत्यतः[3] 'अन्त्यहलः' इत्यनुवर्तते । क्षुत्ककुभोरन्त्यहलो हकारो भवति । लोपापवादः । सुककुहो । सुककुहा । इत्यादि । रामवत् ॥ घढान्तावप्रसिद्धौ । धकारान्तः पुँल्लिङ्गः तत्त्वभुत्शब्दः । अगागमः । तत्तबुहो[4] । तत्तबुहा । इत्यादि । रामवत् । एवं सुयुत्सुसमित्प्रभृतयः ॥ जकारान्तः पुँल्लिङ्गो विश्वसृक्शब्दः ।

---

१ इति निपातात् is dropped in My., P. २ शेषद्वित्वे च is dropped in M., T. ३ इत्यनुवर्तते M. ४ M. drops तत्तबुहो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगागमः । वलोपः । 'शोर्ल्लुप्त—' इति दीर्घः । 'ऋतोत्' इत्यत्वम् । वीससओ । वीससआ । एवं हुतभुगादयः[1] ॥ भिषक्शब्दस्य

शरदामत् ॥ १ । १ । ३६ ॥

शरत्प्रकाराणामन्त्यहलः अत्वं भवति लित्वान्नित्यम् । इति शरत्प्रकारत्वादत्वम्[2] । भिसओ । भिसआ । इत्यादि । वगडान्ता अप्रसिद्धाः । दकारान्तः पुँल्लिङ्गो वेदविच्छब्दः । अगागमः । वेदविदो । वेदविदा । इत्यादि[3] । एवं तत्त्वविदादयः । यच्छब्दस्य तु भेदः । अन्त्यहलो लोपः । जत्वम् । जो । जसि । जे । अमि । जं । शसि । जे । जा । शस्येत्वं श्लुक् च । 'इदमेतद्—' इत्यादिना वा[4] डिणा । जिणा । जेण । जेणं । भिसि । जेहिं । इत्यादि । ङसौ 'म्हा ङसेः' इति वा म्हादेशः[5] । जम्हा[6] । पक्षे । जाहिंतो । इत्यादि । सर्ववत् । भ्यसि । जाहिंतो । जेहिंतो । जासुंतो । जेसुंतो । इत्यादि । सर्ववत् । ङसि । किंयत्तद्भ्यो ङसः सश्चा । जास । पक्षे । जस्स । आमि वा डेसिं । जेसिं । पक्षे । जाणं । जाण । ङौ 'ङेस्त्थसिंसम्मि' । जत्थ । जसिं । जम्मि । 'अनिदमेतद्—' इत्यादिना हिं च । जहिं । ङौ काले 'डिरिआडाहे—' इत्यादिना इआ इत्यादयः । जइआ । जाहे । जाला । यदेत्यर्थः । सुपि[7] । जेसुं । जेसु ॥ तच्छब्दस्यान्त्यहलो लोपः । त सु इति स्थिते । 'एत्तो एत्ताहे ङसिनैतदः' इत्यत 'एतदः' इत्यनुवर्तमाने

तस्सौ सोऽक्लीबे तदश्च ॥ २ । २ । ८९ ॥

तदश्चकारादेतदस्तकारस्य सौ परे सकारो भवति अक्लीबे अनपुंसके[8] नपुंसकलिङ्गे तु न भवति[9] । सो । 'अक्लीबे' इति किम् । तं । एअं । जसि । ते । अमि । तं ।

---

१ हुतभुज् इत्यादयः M. २ °दत्वं भवति T. ३ इत्यादि is omitted in P., My. ४ डिणा वा M. ५ म्हा for म्हादेशः M., T. ६ जम्हा is omitted in M., T. ७ सुपि परे T. ८ अनपुंसके is dropped in P., My. ९ नपुंसके तु M., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वचित् सुपि तदो णः ॥ २ । २ । ७४ ॥

तच्छब्दस्य सुपि परे णो भवति । क्वचिल्लक्ष्यानुरोधेन । इत्यम्-शसोः टा वचने सुपि च लक्ष्यते । इत्यमि तदो णे सति । णं । शसि । ते । ता । णे । णा । टावचने । 'इदमेतद्—' इत्यादिना टो वा डिणा । तिणा । तेणं । तेण । णिणा । णेणं । णेण । भिसि । तेहिं । इत्यादि । ङसौ 'म्हा ङसेः' इति वा म्हा । तम्हा । तस्मात् । 'ङसेः' इत्यनुवर्तमाने

डो तदस्तु ॥ २ । २ । ७२ ॥

तदः परस्य ङसेर्डित् ओत्वं वा भवति । तो । पक्षे । ताहिंतो । इत्यादि । भ्यसि । तोहिंतो । तेहिंतो । तासुंतो । तेसुंतो । इत्यादि । सर्ववत् । ङसि 'किंयत्तद्भ्यः—' इति ङसः शस् । तास । पक्षे । तस्स । 'तदिदमेतदाम्—' इत्यादिना से । से । आमि । सिं । तास । तेसिं । ताणं । ताण । इतः परं यद्वत् । सुपि । तेसुं । तेसु । णेसुं । णेसु ॥ एतच्छब्दस्य एतद् सु इति स्थिते अन्त्यहलो लोपः । 'तस्सौ सोक्लीबे तदश्च' इति चकारविहितः सादेशः । एसो । 'एत्तो एत्ताहे ङसिनैतदः' इत्यस्मात् 'एतदः' इत्यनुवर्तते ।

सुनैस इणमो इणं ॥ २ । २ । ८८ ॥

एतदः सुना सह एस इणमो इणं इत्यादेशा भवन्ति । एस । इणमो । इणं । जसि तलोपे । एए । अमि । एअं । शसि । एए । एआ । टा । एइणा । एएणा । एएणं । भिसि । एएहिं । इत्यादि । ङसौ 'तदिदमेतद्—' इत्यादेः 'तु' इत्यनुवर्तते ।

एत्तो एत्ताहे ङसिनैतदः ॥ २ । २ । ८५ ॥

---

१ टा for टावचने M., R. २ तेहिंतो । ताहिंतो M. ३ तेसुंतो । तासुंतो M. ४ तेसु । तेसुं M. ५ णेसु । णेसुं M. ६ इत्यनुवर्तमाने M., R., T. ७ इति त्रय आदेशा M., R., T. ८ M. has एआ after एए. ९ एआ । एए M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदो ङसिना सह एत्तो एत्ताहे इत्यादेशौ वा भवतः। एत्तो। एत्ताहे। पक्षे। एआहिंतो। इत्यादि। भ्यसि। एआहिंतो। एए-हिंतो। एआसुंतो। एएसुंतो। इत्यादि। ङसि। 'तदिदमेतदाम्—' इति से च। से। एअस्स। आमि। सिं। एएसिं। एआणं। एआण। ङौ। थेस्सिम्मयः।

थे डेत्॥ २। २। ८६॥

'एतदः' इत्यनुवर्तते। एतदः स्थाने थानुबन्धथकारे परे लानुबन्ध एकारो डिद्भवति। लित्वान्नित्यम्। एत्थ।

एतो म्मावदितौ वा॥ २। २। ८७॥

'एतदः' इत्यनुवर्तते। सप्तम्येकवचनादेशे म्मौ परे एतदः एकारस्य अ इ इत्येतावादेशौ वा भवतः। अअम्मि। इअम्मि। पक्षे। एअम्मि॥ शरच्छब्दे 'शरदामल्' इत्यत्वे बहुलाधिकारात् शरत्प्रावृषौ पुंस्येव प्रयोक्तव्याविति त्रिविक्रमदेववचनात् पुंलिङ्ग एव प्रयोगः। सरओ। सरआ। इत्यादि। रामवत्। खफछढान्ता अप्र-सिद्धाः। थकारान्तः पुंलिङ्गः अग्निमच्छब्दः। अगागमः। अग्गिमहो। अग्गिमहा। पक्षे। 'स्नेहाग्योर्वा' इत्यन्त्यहलः प्रागत्वे अगणिमहो। इत्यादि। रामवत्। एवं दधिमदादयः। चकारान्तः पुंलिङ्गो वारि-मुक्शब्दः। अगागमः। चलोपः। वारिमुओ। वारिमुआ। इत्यादि। एवं जलमुगादयः। तिर्यक्शब्दस्य 'तिर्यक्पदातिशुक्तेस्तिरिच्छिपा-यिक्कसिप्पि' इति निपातनात् तिरिच्यादेशे। तिरच्ची। इत्यादि। कविवत्॥ टकारान्तोऽप्रसिद्धः। तकारान्तः पुंलिङ्गो मरुच्छब्दः। अन्त्यहलो लोपे। मरू। मरुणो। इत्यादि। कारुवत्। भवन्मह-

१ एएहिंतो। एआहिंतो M. २ एएसुंतो। एआसुंतो M. ३ रानुबन्धन-काले M. ४ °थकारपरे R. ५ M. and T. drop इअम्मि. ६ M. and T. have after एअम्मि, एअस्सिं। सुपि। एएसु। एएसुं. ७ वक्तव्या° My., P. ८ तिर्यक्शब्दस्य तिरिच्यादेशे M., R., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छब्दयोः 'तु सक्खिणभवंतजम्मणमहंताः' इति निपातनात् भवंत-महंत इति क्रमाद्वा भवतः । भवंतो । भवंता । महंतो । महंता । इत्यादि । रामवत् । पक्षे । अन्त्यहलो लोपे । भवो । भवा । महो । महा । इत्यादि । रामवत् । शत्रन्तस्य भवच्छब्दस्य भू शतृ इति स्थिते

होहुवहवा भुवेस्तु ॥ ३ । १ । १ ॥

भुवेर्धातोर्हो[1] हुव हव इति त्रय आदेशा भवन्ति । हो शतृ हुव शतृ हव शतृ इति स्थिते 'माणन्तौऌ च ऌङः' इत्यतो[2] 'माणन्तौऌ इत्यधिकृत्य

शतृशानचोः ॥ २ । ४ । ४२ ॥

शतृशानचोः स्थाने माणन्त इत्येतावादेशौ प्रत्येकं स्तः[3] ॥ होमाणो । होन्तो । हुवमाणो । हुवन्तो । हवमाणो । हवन्तो । अत्रैव 'एच्च क्त्वातुम्तव्यभविष्यति' इत्यतः 'एत्' इत्यधिकृत्य 'अदेल्लुक्यात्स्वोरतः' इत्यतः 'अतः' इति च

वा लङ्लोट्शत्रुषु ॥ २ । ४ । २० ॥

एषु परेष्वत एत्वं वा स्यात् । इत्येत्वे । हुवेमाणो । हुवेन्तो हवेमाणो । हवेन्तो । होमाणो । होन्तो । इत्यत्र एत्वं न भवति अनदन्तत्वात् ।

हुरचिति ॥ ३ । १ । ५ ॥

'भुवेः' इत्यनुवर्तते । चिद्वर्जिते प्रत्यये परे भुवेर्धातोर्हु इत्यादेशः स्यात् । हुन्तो । सर्वत्र भवने । एवं हसमाणो । हसंतो । हसे-माणो । हसेन्तो । भजमाणो । भजन्तो । भजेमाणो । भजेन्तो । इत्यादयः । त्वरतेस्तु 'तुवरजअडौ त्वरेः' इत्यतः 'त्वरेः' इत्यधिकृत्य

अतिङि तुरः ॥ २ । ४ । १४९ ॥

---

१ भवतेर्धातो° My., P. २ इत्यधिकृत्य M., T. ३ भवतः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिङ्वर्जिते प्रत्यये परे त्वरतेस्तुर इत्यादेशः स्यात् । तुरन्तो । तुरमाणो । तुरेन्तो । तुरेमाणो ॥

तूरः शतृतिङि ॥ २ । ४ । १५० ॥

'त्वरेः' इत्यनुवर्तते । ञित्वरा संभ्रम इत्यस्य तिङि शतृप्रत्यये च परतः तूर इत्यादेशः स्यात् । तूरन्तो । तूरेन्तो । तूरमाणो । तूरेमाणो । इत्यादि । एवं सर्वधातुषु तदादेशेषु च शतृशानचोः स्थाने माणन्तौ विधातव्यौ । शेषं रामवत् । कर्मणि तु शानचि कृते तस्य माणन्तयोः कृतयोर्धातोर्हो इत्यादेशेषु कृतेषु अणुहो यक् माण इति स्थिते

ईअइज्जौ यकः ॥ २ । ४ । ९१ ॥

यकः स्थाने ईअइज्ज इत्येतावादेशौ भवतः । इति ईअइज्जादेशयोः । अणुहोईअमाणो । अणुहोइज्जमाणो । अणुहोईअन्तो । अणुहोइज्जन्तो । एवं हसीअन्तो । हसिज्जन्तो । हसीअमाणो । हसिज्जमाणो । इत्यादि सर्वधातुषु तदादेशेषु च कैल्पनीयम् । कर्मणि हलन्तधातुष्वगागमात् पूर्वमेव ईअइज्जयोः कृतयोः । हसिज्जमाणो । हसीअमाणो । इत्यादयः सिद्धाः ॥ अर्हच्छब्दे 'स्निग्धे त्वदितौ' इत्यतः 'अदितौ' इत्यधिकृत्य 'क्ष्मारत्नेन्त्यहलः' इत्यतः 'अन्त्यहलः' इति च

अर्हत्यु च ॥ १ । ४ । १०५ ॥

अर्हच्छब्देऽन्त्यहलः प्रागुत्वं चकाराददितौ च भवतः । अरुहन्तो । अरिहन्तो । अरहन्तो । एवं अरुहमाणो इत्यादयः । अन्त्यहलो लोपे तु । अरुहो । अरिहो । अरहो । इत्याद्यपि । शेषं रामवत् ॥ पकारान्तः पुँल्लिङ्गो धर्मगुप्शब्दः । अगागमः । धम्मगुवो । धम्मगुवा । इत्यादि ॥ शकारान्तेषु सदृगादिष्वगागमे 'केवलस्य रिः' इत्यनुवर्तमाने

१ T. has तुरन्तो । तुरेन्तो । तुरमाणो । तुरेमाणो. २ कल्पनीयाः M., R., T. ३ इत्यधिकृत्य M., R., T. ४ इति च M., R., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'दृश्यक्सक्विनि' इति 'ऋतोत्' इति च । सरिसो । सरिसा । एवं तारिसो । इत्यादि ॥ षकारान्ते रत्नमुट्शब्दे अगागमे 'क्ष्मारत्नेन्त्यहलः' प्रागत्वे च । रअणमुसो । इत्यादि ॥ प्रावृट्शब्दे शरत्प्रावृषौ पुंस्येवेति त्रिविक्रमदेववचनात् पुँल्लिङ्गतायां 'स आयुरप्सरसोः' इत्यतः 'सः' इत्यनुवर्तमाने 'अन्त्यहलोश्रदुदि' इत्यतः 'अन्त्यहलः' इति च

दिक् प्रावृषि ॥ १ । १ । ३५ ॥

अनयोरन्त्यहलः सो भवति । लोपापवादः । ऋत्वादिपाठादृत उत्वम् । पाउसो । पाउसा । इत्यादि । रामवत् ॥ षट्छन्दस्यान्त्यहलो लोपे 'छल् षट्छमी—' इत्यादिना शोश्छत्वे । छो । छा । छेहिं । छेहिंतो । आमि । छण्हं । छण्ह । छेसुं । छेसु ॥ सकारान्ते सुवर्चस्शब्दे अन्त्यहलो लोपे । सुवच्चो । सुवच्चा । इत्यादि । रामवत् ॥ मनस् यशस्[३] महस् इत्यादीनां 'स्नमदामशिरोनभो नरि' इति पुँल्लिङ्गतायामन्त्यहलो लोपे । मणो । जसो । महो । इत्यादि । रामवत् । एवं तमस्प्रभृतयः ॥ सुमनस् शब्दस्यान्त्यहलो लोपे । सुमणो । सुमणा । इत्यादि ॥ धनुःशब्दे तु 'हः क्षुत्ककुभि' इत्यतः 'हः' इत्यधिकृत्य 'अन्त्यहलोश्रदुदि' इत्यतः 'अन्त्यहलः' इति च

धनुषि वा ॥ १ । १ । ३२ ॥

अत्रान्त्यहलो हत्वं वा स्यात् । धणुहो । धणुहा । इत्यादि । पक्षे । अन्त्यहलो लोपे । धणू । इत्यादि । कारुवत् । धनुर्मनसोर्नपुंसकत्वमिति केचित् । तदा । मणं । धणुहं । धणु । इत्यादि । कुण्डवन्मधुवच्च ॥ अदस् शब्दस्य अदस् सु इति स्थिते 'सुप्यदसोमुः' इत्यतः 'अदसः' इत्यधिकृत्य

अहद्धा सुना ॥ २ । २ । ९१ ॥

---

१ M. and R. drop च. २ इत्यनुवर्तते M. ३ महस् यशस् R., T. ४ इत्यधिकृत्य M., T. ५ इति च M., R., T. ६ धनुःसुमनसो° M. ७ सुमणं M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदसः सुना सह अहदित्यादेशो वा स्यात् । तकारस्तावन्मात्रदर्शनार्थः । अह । पक्षे ।

सुप्यदसोमुः ॥ २ । २ । ९० ॥

अदसः सुपि परे अमु इत्यादेशः स्यात् । अमू । जसि । अमू । अमओ । अमउ । अमुणो । अमि । अमुं । शसि । अमू । अमुणो । इत्यादि सर्वं[१] कारुवत् ।

इआओ म्मौ ॥ २ । २ । ९२ ॥

अदसो ङिवचनादेशे म्मौ परे इअ अअ इत्यादेशौ वा भवतः । इअम्मि । अअम्मि । पक्षे । अमुम्मि । सर्वनामत्वेपि नात्र ङेर्थादयः । अनदन्तत्वात् ॥

इति हलन्ताः पुंलिङ्गाः ॥

अथ हलन्ताः स्त्रीलिङ्गाः ।

हकारान्तः स्त्रीलिङ्ग उपानहशब्दः । 'अन्त्यहलोश्रदुदि' इत्यतः[१] 'अन्त्यहलः' इत्यधिकृत्य

अविद्युति स्त्रियामाल् ॥ १ । १ । २९ ॥

स्त्रीलिङ्गे वर्तमानस्यान्त्यहलः आत्वं भवति विद्युच्छब्दं[२] वर्जयित्वा । उलोपापवादः । 'पो वः' । उवाणआ । इत्यादि । जायावत् ॥ यकारान्तोप्रसिद्धः ॥ वकारान्तः स्त्रीलिङ्गो दिव्शब्दः । पूर्ववदात्वम्[३] । दिआ । इत्यादि[४] । जायावत् ॥ रेफान्तस्त्रीलिङ्गो गिर्शब्दः । 'अविद्युति स्त्रियामाल्' इत्यतः[५] 'स्त्रियाम्' इत्यधिकृत्य 'अन्त्यहलोश्रदुदि' इत्यतः 'अन्त्यहलः' इति च

रो रा ॥ १ । १ । ३० ॥

---

१ इत्यधिकृत्य M., R., T. २ My. and P. drop विद्युच्छब्दं वर्जयित्वा. ३ M. has लिंत्वान्नित्यम् after it. ४ M. and T. drop इत्यादि. ५ इत्यधिकृत्य M., R., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रियां वर्तमानस्यान्त्यरेफस्य रा इत्ययमादेशो भवति । गिरा । धूर् । धुरा । पूर् । पुरा । इत्यादि । जायावत् ॥ चतुर्शब्दस्य पुँल्लिङ्गवत् ॥ लकारनकारान्तावप्रसिद्धौ ॥ मकारान्तस्त्रीलिङ्गः किंशब्दः । पूर्ववत् कादेशे । 'पुंसोजातेर्ङीब्वा' इत्यतः 'ङीब् वा' इत्यधिकृत्य

किंयत्तदोऽस्वमामि सुपि ॥ २ । २ । ४० ॥

सु अम् आम् वर्जिते सुपि परे किंयत्तद्भ्यो ङीब् वा स्यात् । पक्षे विकल्पसामर्थ्यादेव टाप् । विकल्पस्य प्रायः समशिष्टवस्तुद्वयविषयत्वनियमात् । का । कीओ । कीउ । की । काओ । काउ । का । अमि । कं । शसि । जस्वत् । जश्शसोः 'शोशू स्त्रियां तु' इति शोशू । टावचने । कीअ । कीआ । कीइ । कीए । टापि शावर्जितं त्रयम् । काअ । काइ । काए । अत्र 'टाङिङसाम्' इति शशाशिशे । भिसि । कीहिं । इत्यादि । काहिं । इत्यादि च । ङसौ । शशाशिशे । टावत् । भ्यसि । कीहिंतो । इत्यादि । काहिंतो । इत्यादि । ङसि । 'किंयत्तद्भ्यो ङस्' इत्यतः 'ङस्' इत्यधिकृत्य 'अनिदमेतदस्तु—' इत्यादेः 'तु' इत्यनुवर्तते ।

ईतः से सार् ॥ २ । २ । ६८ ॥

ईकारान्तेभ्यः किंयत्तद्भ्यः परो ङस् से सा इत्यादेशावापद्यते । कीसे । किस्सा । अत्र रित्वाद्द्वित्वम् । पक्षे । कीअ । कीआ । कीइ । कीए । काअ । काइ । काए । 'किंयत्तद्भ्यो ङस्' इति सकारश्च । कीस । कास । काणं । काण । ङौ । शशाशिशे । कीअ । इत्यादि । काअ । इत्यादि च । टावत् । 'अनिदमेतदस्तु किंयत्तदस्त्रियामपि हिं' इति ङेर्हिं । काहिं । ईकारान्ते हिं नास्ति । हिमोऽकारान्तविषय-

---

१ °मादेशः स्यात् R., T. २ चतुर्शब्दः P., My. ३ इत्यधिकृत्य M., R., T. ४ टा M. ५ M. and T. drop च. ६ M. and T. drop टावत्. ७ हिमोदन्तविषयत्वात् । M. and T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वात् । सुपि । कीसुं । कीसु । कासुं । कासु ॥ इदम्शब्दस्य 'इदम इमः' इति इमादेशः ।

पुंसोजातेर्ङीब् वा ॥ २ । २ । ३७ ॥

अजातिवाचिनः पुँल्लिङ्गात् स्त्रियां वा ङीप्[१] । अनुक्तमन्यन्यायेन । 'यस्येति च' इत्यकारलोपः । इमी । पक्षे टाप् । इमा । 'पुंसि सुना त्वअं स्त्रियामिमिआ' इति इमिआ च । इमिआ । सिद्धावस्थापेक्षया इअं च । जसि । इमाओ । इत्यादि । अमि । इमिं । इमं । शसि जस्वत् । टा शशाशिशे । इमीअ । इत्यादि । इमाअ । इत्यादि । भिसि । इमीहिं । इत्यादि । इमाहिं । इत्यादि । ङसौ । शशाशिशे । इमीअ । इत्यादि । इमाअ । इत्यादि । पक्षे । इमीहिंतो । इमाहिंतो । इत्यादि । भ्यसि । इमीहिंतो । सुंतो च । इमीसुंतो । इमाहिंतो । इमासुंतो । इत्यादि च । ङसि । शशाशिशे । इमीअ । इत्यादि । पक्षे । 'तदिदमेतदाम्—' इत्यादिना से । से । आमि । अनेनैव सिमादेशः । सिं । पक्षे । 'आमां डेसिं' । इमेसिं । इमीणं । इमीण । इमाणं । इमाण । ङौ । शशाशिशे । इमीअ । इत्यादि । इमाअ । इत्यादि । पक्षे । इमस्सिं । इमम्मि । अस्सिं । अत्र तु 'अत्सुप्स्सिं-हिस्से' इत्यत् । 'इहेणं ड्यमा' । इह । अत्र ईकारान्ते स्सिम्मी न स्तः । अनदन्तत्वात् । सुपि[२] । ईमीसुं[३] । इमीसु । ईमांसु[४] । इमासु । इदमः अत् । आसुं । आसु ॥ ङेकारणकारान्तावप्रसिद्धौ[५] ॥ नकारान्तः स्त्रीलिङ्गः सीमन्शब्दः । 'अविद्युति स्त्रियामाल्' इत्यात्वम् । सीमआ । गरिमन् लघिमन् महिमन् इत्येवमादीनामिमनिजन्तानाम् 'स्त्रियामिमा-ञ्जलिगाः' इति स्त्रीलिङ्गत्वेन प्रतिज्ञाने सत्यपि बहुलाधिकारादात्वं नास्ति किं तु नलोप एव । टाप्[६] । गरिमा । लहिमा । महिमा । इत्यादि । जायावत् । स्त्रीत्वस्य वैकल्पिकत्वात् गरिमो लहिमो महिमो

१ ङीप् स्यात् M., T. २ My. and P. drop सुपि. ३ M. has इमीसु । इमीसुं. ४ इमासु । इमांसु M. ५ ङणान्तावप्रसिद्धौ P., My. ६ T. and R. drop टाप्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यपि भवति ॥ ज्ञान्तोप्रसिद्धः ॥ भकारान्तः स्त्रीलिङ्गः ककुप्शब्दः । 'अन्त्यहलोश्रदुदि' इत्यतः 'अन्त्यहलः' इत्यधिकृत्य[1]

हः क्षुत्ककुभि ॥ १ । १ । ३१ ॥

क्षुत् ककुभ् अनयोरन्त्यहलो हत्वम्[2] । टाप् । ककुहा[3] । क्षस्य स्पृहादित्वाच्छः । छुहा ॥ जकारान्तः स्त्रीलिङ्गः स्रक्शब्दः । आत्वम् । सआ ॥ दकारान्तः स्त्रीलिङ्गो दृषच्छब्दः । आत्वम् । कृपादित्वादृत इत्वम् । दिसआ । एवं संपत्प्रभृतयः ॥ प्रतिपच्छब्दस्य समृद्ध्यादिपाठादादेरचो वा दीर्घः । आत्वम् । प्रत्यादिपाठात्तस्य डत्वम् । पस्य वत्वं च । पडिवआ । पाडिवआ । प्रतिपद् ॥ दकारान्तः स्त्रीलिङ्गो यच्छब्दः । 'किंयत्तदोस्यमामि' इति वा ङीप् । जत्वम् । जा । जसि । जीओ । जीउ । जी । जाओ । जा । इत्यादि । स्त्रीलिङ्गकिंशब्दवत् ॥ तच्छब्दस्य 'किंयत्तदोस्यमामि' इति ङीप् । सौ । 'तस्सौ सोक्लीबे—' इत्यादिना सः । सा । जसि । तीओ । तीउ । ती । ताओ । ताउ । ता । तं । इत्यादि । स्त्रीलिङ्गकिंशब्दवत् ॥ एतच्छब्दस्य 'पुंसोजातेर्ङीब् वा' इति वा ङीप् । पक्षे टाप् । उभयत्रान्त्यहलो लोपः । सौ । 'सुनैसइणमोइणं ।' इत्यादेशा वा भवन्ति । 'तस्सौ सोक्लीबे तदश्च' इति चकारात् प्राप्तं सत्वं च । एस । इणमो । इणं । एसा । एई । अत्रान्त्यहलो लोपः । जसि । शो शु । एईओ । इत्यादि । अमि । एअं । एइं । शसि । जैस्वत् । शशाशिशे । एइअ । इत्यादि । एआअ । इत्यादि । भिसि । एईहिं । इत्यादि । एआहिं । इत्यादि । ङसौ । शशाशिशे । पक्षे । हिंतो । इत्यादयः । एईअ । इत्यादि । एआअ । इत्यादि । एईहिंतो । इत्यादि । एआहिंतो । इत्यादि । ङसि । शशाशिशे । एईअ । इत्यादि । एआअ । इत्यादि । सुपि । एईसुं । एइसु । एआसुं । एआसु ॥ खफछढथान्ता अप्र-

---

१ इत्यधिकृत्य M., R. २ M. has भवति after हत्वं. ३ M. adds जायावत् after it. ४ तान्येव M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धाः ॥ चकारान्तः स्त्रीलिङ्गो वाक्शब्दः । आत्वम् । वाआ ॥ त्वक्-शब्दस्य 'अविद्युति—' इत्यात्वे 'त्वथ्वद्वध्वाम्—' इति सूत्रेण त्वस्य चत्वे । चआ । एवं रुचादयः ॥ तकारान्तः स्त्रीलिङ्गो योषिच्छब्दः । आत्वम् । जत्वम् । जोसिआ । एवं सरिदादयः ॥ विद्युच्छब्दस्य 'अविद्युति स्त्रियामाल्' इत्यत्र 'अविद्युति' इति पर्युदासादात्वं न भवति । किं त्वन्त्यहलो लोप एव । 'द्यय्यर्यां जः' इति जत्वम् । विज्जू । तनुवत् । कुलादिपाठाद्वा पुँल्लिङ्गतायां कारुवत् । 'लो वा विद्युत्—' इत्यादिना स्वार्थे वा ले सति[1] । विज्जुला । शतृशानजन्तेषु स्त्रियां विशेषः । पुँल्लिङ्ग इव[2] शतृशानचोः कृतयोः

स्त्रियामी च ॥ २ । ४ । ४२ ॥

'शतृशानचोः' इत्यनुवर्तते । शतृशानचोः स्थाने स्त्रियामीत्वम् । चकारान्माणन्तौ च भवतः । हसई । हसमाणी । हसंती । भजई । भजमाणी । भजंती । 'पुंसोजातेर्ङीब् वा' इति वा ङीप्[3] । हसमाणा । इत्याद्यपि । एवं सर्वत्रोह्यम् । शेषं गौरीवत् ॥ ककारान्तोप्रसिद्धः ॥ पकारान्तः स्त्रीलिङ्गोप्छब्दः । अन्त्यहल आत्वम् । आआ । पलोपः[4] । जसि । सिद्धावस्थापेक्षया आओ इति[5] दृश्यते । बह्वर्थवाचित्वात् सर्वत्र बहुवचनमेव । जायावत्[6] ॥ शकारान्तः स्त्रीलिङ्गो दिक्शब्दः । 'दिक्-प्रावृषि' इत्यन्त्यहलः सत्वम् । दिसा दिसाओ । इत्यादि । जायावत् ॥ दृक्शब्दस्यात्वम् । कृपादित्वादृत इत्वम् । दिआ । षकारान्तः स्त्रीलिङ्ग-स्त्विट्शब्दः । आत्वम् । त्वस्य चत्वम् । चिआ । चिआओ ॥ षट्छब्दः पुँल्लिङ्गवत् ॥ सकारान्तः स्त्रीलिङ्ग आसीस् शब्दः । 'धनुषि वा' इत्यतः 'वा' इत्यधिकृत्य[7]

सशाशिषि ॥ १ । १ । ३३ ॥

---

१ लः for वा ले सति M. २ वत् for इव M., T. ३ ङीपि M. ४ पलोपे M. ५ इत्यपि M. ६ जायाशब्दवत् M., T. ७ इत्यधिकृत्य M., T., R.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आशीः शब्दे अन्त्यहलः सकारो वा स्यात् । शित्वात् पूर्वस्य दीर्घः । आसीसा । पक्षे । आत्वम् । आसिआ ॥ अप्सरस्‌शब्दे

स आयुरप्सरसोः ॥ १ । १ । ३४ ॥

'धनुषि वा' ईत्यतः[1] 'वा' इत्यनुवर्तते । अनयोरन्त्यव्यञ्जनस्य सकारो वा स्यात् । इति सत्वे 'ध्यश्चत्सप्सामनिश्चले' ईति[2] प्सस्य छत्वम् । अच्छरसा । पक्षे । आत्वम् । अच्छरआ ॥ अदस्‌शब्दस्य 'अहद्वा सुना' इति वा अहः । अह । पक्षे । 'सुप्यदसोमुः' इति अमुः । अमू । अमूओ । इत्यादि । तैनुशब्दवत्[3] ॥

इति हलन्ताः स्त्रीलिङ्गाः ।

अथ हलन्ता नपुंसकलिङ्गाः ।

हैकारान्तनपुंसकलिङ्गः[4] स्वनडुट्छब्दः । अगागमः । सु अनडुहं । इत्यादि । कुण्डवत् ॥ वकारान्ते सुदिव्‌शब्दे कप्रत्यये सुदिअं । इत्यादि ॥ रेफान्तः सुगिरं । इत्यादि[5] ॥ चतुर्शब्दः पुँल्लिङ्गवत् । इदम्‌शब्दस्य 'इदम इमः' ईत्यतः[6] 'इदमः' इत्यधिकृत्य

क्लीबे स्वमेदमिणमिणमो ॥ २ । २ । ८२ ॥

नपुंसके वर्तमानस्येदमः सु अम् इत्येताभ्यां सह इदं इणं इणमो इत्यादेशा भवन्ति । इदं । इणं । इणमो । अन्यत्र पुँल्लिङ्गवत् ॥

किं किं ॥ २ । २ । ८३ ॥

'क्लीबे' इत्यनुवर्तते 'स्वम्' इति च । क्लीबे वर्तमानः किंशब्दः स्वमा सह किमेव भवति । किं । किं । अन्यत्र पुँल्लिङ्गवत् ॥ दामन्‌-शब्दे 'स्नमदाम—' इति सूत्रे 'अदाम' इति पर्युदासान्नपुंसकत्वम् । अन्त्यहलो लोपः । दामं दामाणं । कुण्डवत् ॥ शर्मवर्मशब्दयोः 'स्नमदाम—' इत्यादिना पुँल्लिङ्गत्वप्रतिज्ञाँनेपि[7] सम्मं वम्मं इति च

---

१ इत्यधिकृत्य R., M. २ इत्यनेन M. ३ तनुवत् My., P. ४ हलन्त° R. ५ इत्यादि कुण्डवत T. ६ इत्यधिकृत्य M., R. ७ प्रतिज्ञाने सत्यपि T.

दृश्यत इति वचनान्नपुंसकत्वे कुण्डवत् ॥ नपुंसके असृङ्शब्दे ऋत इत्वम् । 'मङ्लुगसंबुद्धेः–' इति मङ्लुक् । अन्त्यहलो लोपः । असि । असिं । दधिवत् ॥ यद् । जं । इजाणि । इत्यादि प्रथमाद्वितीययोः कुण्डवत् । अन्यत्र पुँल्लिङ्गवत् ॥ यद्वत्तच्छब्दः ॥ एतदः 'सुनैसइणमो-इणं' इत्यादेशाः[1] । एस । इणमो । इणं । पक्षे । एअं । इत्यादि । कुण्डवत् पुँल्लिङ्गवच्च ॥ शकृत् । ऋत इत्वम् । सइं । दधिवत् ॥ तादृश् । अक् । रित्वम् । तारिसं । एवं यादृशादयः ॥ षष् । पूर्ववत् ॥ शिरस् नभस् एतयोः[2] 'स्नमदाम—' इति सूत्रे पर्युदासान्न-पुंसकत्वम् । सिरं । णहं ॥ वयस् सदस् सुमनस् वअं सअं सुमणं इति[3] दृश्यत इति वचनान्नपुंसकत्वम् ॥ 'हः क्षुत्ककुभि' इत्यतः 'हः' इत्यधिकृत्य

धनुषि वा ॥ १ । १ । ३२ ॥

अत्रान्त्यहलो हत्वं वा । धणुहं । धणु । अदस् । अमु । अह च सौ । अह । अमूनि । अमूइं । अमूइ । शस्येत्वम् । अन्यत्र पुँल्लिङ्गवत् ॥

इति हलन्ता नपुंसकलिङ्गाः ॥

---

१ इत्यादेशा एव M. २ अशिरो न भवतीति for एतयोः 'स्नमदाम–' इति सूत्रे. ३ इति च M.

अथ युष्मच्छब्दः ।

अथ युष्मदस्मच्छब्दावलिङ्गाविति केचित् । अभिधेयवल्लिङ्गावित्य-परे । पक्षद्वयेपि रूपनिर्णयः समानः । युष्मद् सु इति स्थिते

युष्मत् सुना तुवं तुं तुमं तुह ॥ २ । ३ । १ ॥

युष्मच्छब्दः सुना सह तुवं तुं तुमं तुह इति चतुर आदेशाना-पद्यते । तुवं । तुं । तुमं । तुह । त्वमित्यस्त्येव सिद्धावस्थापेक्षया वलोपे तं इत्यपि ॥ युष्मद् जस् इति स्थिते

जसा भे तुब्भे तुय्हे उय्हे तुब्भ ॥ २ । ३ । ३ ॥

युष्मच्छब्दो जसा सह भे इत्यादि पञ्चादेशानाप्नोति । भे । तुब्भे । तुय्हे । उय्हे । तुब्भ । यूयम् ।

वा ब्भो म्हज्झौ ॥ २ । ३ । १४ ॥

युष्मदादेशेषु द्विरुक्तभकारस्य म्हज्झ इत्यादेशौ वा भवतः । तुम्हे । तुज्झे । तुम्ह । तुज्झ । इति जसि नैव रूपाणि ॥ अमि 'युष्मत् सुना तुवं तुं तुमं तुह' इत्यतः 'सुना' इत्यन्यदधिकृत्य

अमा तुमे तुए च ॥ २ । ३ । २ ॥

युष्मच्छब्दोमा सह तुमे तुए इत्यादेशौ चकारात् तुवं आदि चतुष्टयं चापद्यते । तुमे । तुए । तुवं । तुं । तुमं । तुह । त्वामित्यस्य सिद्धावस्थापेक्षाया वलोपे 'स्वरस्य बिन्द्वमि' इति ह्रस्वे तं इत्यपि भवति ॥ शसि 'जसा भे तुब्भे तुय्हे उय्हे तुब्भ' इत्यतः 'जसा' इत्यन्यदनुवर्तमाने

शसा वो च ॥ २ । ३ । ४ ॥

युष्मच्छसा सह वो इति चकाराद् भे इत्यादीन् नवादेशांश्चापद्यते । वो । भे । तुय्हे । तुम्हे । तुज्झे । उय्हे । तुब्भ । तुम्ह । तुज्झ । तुब्भे ॥ १० ॥ युष्मान् ॥

---

१ °त्येके R., T. २ °नापद्यते My., P. ३ स्तः P., My. ४ T. drops जसि. ५ M. drops नव; T. has जसि after नवरूपाणि. ६ इत्यधिकृत्य M., R., T. ७ चाप्नोति My., P. ८ इत्यनुवर्तमाने M., R., T. ९ °नुवर्तते P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टा भे ते दे दि तुमं तुमइ ॥ २ । ३ । ५ ॥

युष्मत् टावचनेन सह भे इत्यादि षडादेशानापद्यते ॥

ङिटाभ्यां तुमए तुइ तुए तुमाइ तुमे ॥ २ । ३ । ६ ॥

युष्मद् ङिटाभ्यां सह तुमए इत्यादि पञ्चादेशानाप्नोति । एवं च टावचने । भे । ते । दे । दि । तुमं । तुमइ । तुमए । तुइ । तुए । तुमाइ । तुमे । त्वया ॥ भिसि

भिसा भेतुब्भेह्युब्भेह्युय्हेहितुय्हेहि ॥ २ । ३ । १० ॥

युष्मद् भिसा सह भे इत्यादि पञ्च रूपाण्यापद्यते । 'वा ब्भो म्हज्झौ' इति वचनात् ताभ्यां योगे चत्वारि । [1]मिलित्वा नव रूपाणि । भे । तुब्भेहि । तुम्हेहि । तुज्झेहि । उब्भेहि । उम्हेहि । उज्झेहि । उय्हेहि । तुय्हेहि ॥ ९ ॥ युष्माभिः ॥ ङसौ

तुब्भतुहिंतोतुय्ह ङसिना ॥ २ । ३ । ७ ॥

युष्मद् ङसिना सह तुब्भादीन् त्रीनादेशाना[2]प्नोति । वा ब्भो म्हज्झावपि । तुब्भ । तुम्ह । तुज्झ । तुहिंतो । तुय्ह ॥ ५ ॥ त्वत् ॥

तु तइ ङिप्ङसौ ॥ २ । ३ । ८ ॥

ङिबिति सप्तमी ङसीति पञ्चम्येकवचनम् । तयोः परयोर्युष्मच्छब्दः तु तइ इत्यादेशौ [3]यथाक्रममापद्यते । सप्तमीङस्योर्यथोक्ता एवादेशाः । ङसौ हिंतोत्तोदोदवः । तईहिंतो । तइत्तो । तईओ । तईउ । अत्र सर्वत्र 'दिदोत्तो—' इत्यादिना दीर्घः । त्वत् ॥

तुव तुम तुह तुब्भ ॥ २ । ३ । ९ ॥

'ङिप्ङसौ' इत्यनुवर्तते । ङिपि ङसौ च परे युष्मद् तुव आदींश्चतुर आदेशानापद्यते । ङिप्ङस्योर्यथाप्राप्तमेव । ङसौ हिंतोत्तोदोदवः । तुवाहिंतो । तुवत्तो । तुवाओ । तुवाउ । तुवाहि । तुवा । इति षट् । एवं तुमतुहयोरपि प्रत्येकं षट् । तुब्भेत्यत्र म्हज्झाभ्यां योगे

---

१ M., R., and T. drop मिलित्वा नवरूपाणि. २ °नापद्यते P., My. ३ आपद्यते यथासंख्यम् P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुब्भ तुम्ह तुज्झ इति त्रयः । इति त्रयाणामपि प्रत्येकं हिंतो इत्यादि षट् । एवं च ङसौ पूर्वसूत्रद्वयोक्तानि नव । तृतीयसूत्रोक्तानि षट्त्रिंशत् । मिलित्वा पञ्चचत्वारिंशद्रूपाणि । अत्र युष्मदोदन्तादेशपक्षे 'ङसिसो हि' 'ङसेः श्लुक्' इति द्वयमप्युदाहार्यम् ॥ भ्यसि

उम्होय्ह तुय्ह तुब्भ भ्यसि ॥ २ । ३ । ११ ॥

युष्मद् भ्यसि परे उम्ह उय्ह तुय्ह तुम्भ इति चतुर आदेशानाप्नोति ॥ भ्यसस्तु यथाप्राप्तमेव । 'वा ब्भो म्हज्झौ' इति ताभ्यां योगे षट् । षण्णामप्यैकैकस्य नव रूपाणि । एवं भ्यसि चतुःपञ्चाशद्रूपाणि । एकस्य नव रूपाणि प्रदर्श्यन्ते । उम्हेहिंतो । उम्हाहिंतो । उम्हेसुंतो । उम्हासुंतो । उम्हेहि । उम्हाहि । उम्हत्तो । उम्हाओ । उम्हाउ । एवं उय्ह तुय्ह तुब्भ तुम्ह तुज्झ एष्वपि प्रत्येकं नव नव रूपाण्युदाहरणीयानि । अत्र सर्वत्र रामशब्दवद् दीर्घैत्वे ॥ ङसि

तुब्भोब्भोय्हतइतुहंतुहतुम्हंतुवतुमतुमेतुमाइतुमोदेतेदितुइए ङसा ॥ २ । ३ । १२ ॥

युष्मद् ङसा सह तुब्भ उब्भ उय्ह तइ तुहं तुह तुम्हं तुव तुम तुमे तुमाइ तुमो दे ते दि तु इ ए इत्याष्टादशादेशानापद्यते[1] । 'वा ब्भो म्हज्झौ' इति ताभ्यां योगे चत्वारि । एवं मिलित्वा द्वाविंशतिः रूपाणि । ननु 'वा ब्भो म्हज्झौ' इत्यनेन तुंह इति रूपसिद्धावत्र सूत्रे पुनस्तुंहग्रहणं व्यर्थम् । छन्दोवत् सूत्राणीति सूत्राणां छन्दस्तुल्यत्वादभिप्रायापरिज्ञानात् । यद्वात्र शास्त्रे सर्वत्र बहुलाधिकारादत्र पुनस्तुंहाभावमाशङ्क्य पुनस्तद्ग्रहणम् ॥ आमि

तुम्हाण तुब्भं तुब्भाण तुमाण तुवाण तुहाण तुब्भ वो भे त्वामा ॥ २ । ३ । १३ ॥

युष्मद् आमा सह तुम्हाण तुब्भं तुब्भाण तुमाण तुवाण तुहाण तुब्भ वो भे त्वा इति दशादेशानापद्यते । म्हज्झाभ्यां योगे 'क्त्वासु-

---

[1] °नापद्यते My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पोस्तु सुणात्' इति वा बिन्दौ च बिन्द्वन्ताः सप्त । अबिन्द्वन्ताः सप्त । तुब्भं इत्यत्र त्रीणि । तुब्भ इत्यत्रापि तथैव । शिष्टैस्त्रिभिः सह त्रयोविंशतिः रूपाणि । ननु तुम्हाणमित्यत्र सूत्रे न ग्रहीतव्यम् । स्वभावत एव तद्रूपस्य निरूपयितुं शक्यत्वात् । तथाहि । युष्मद् आम् इति स्थिते अन्त्यहलो लोपे आमो णशि कृते 'अर्थपरे तो युष्मदि' इति यस्य तत्वे 'शिति दीर्घः' इति दीर्घे ष्मस्य म्हत्वे च सिध्यतीति सत्यमेव । तथापि सूत्रकृतां प्रवृत्तिर्विचित्रेति विज्ञापयितुं[1] तद्ग्रहणमिति संतोष्टव्यम् । युष्माकम् ॥ ङौ 'ङिहाभ्यां तुमए—' इत्यादिना तुमए इत्यादय आदेशाः[2] पञ्च 'तु तइ ङिप्ङसौ' इति ङिपि यथाक्रमं प्राप्तस्तु इत्यादेश एकः । एवं षट् । तुमए । तुइ । तुए । तुमाइ । तुमे । तुम्मि । अत्र 'ङेर्मिः' इति मिरेव न तुत्थादयः । सर्वनामत्वेप्यनद-[3]न्तत्वात् ॥ सुपि 'ङिप्' इत्यनुवर्तमाने 'तुव तुम तुह तुब्भ' इति सूत्रेण युष्मदस्तुवादयश्चत्वार आदेशाः सुपि परे[4] । तुवेसुं । तुवेसु । तुमेसुं । तुमेसु । तुहेसुं । तुहेसु । तुब्भेसुं । तुब्भेसु । तुम्हेसुं । तुम्हेसु । तुज्झेसुं । तुज्झेसु । अत्र 'भिस्भ्यः सुपि' इत्येत्वम् । 'तु तइ ङिप्ङसौ' इति सुप्यपि तु इत्यादेशः । 'इदुतोर्दिः' इति दीर्घः । तासुं । तासु ॥

इति युष्मच्छब्दः ॥

अथास्मच्छब्दः ।

सौ

अस्मत्सुना अम्हिहमहअमहमहम्म्यम्मि ॥ २ । ३ । १५ ॥

अस्मत् सुना सह अम्हि हं अहअं अहं अहम्मि अम्मि इति षडादेशानापद्यते । अम्हि । हं । अहअं । अहं । अहम्मि । अम्मि । अहमित्यर्थः ॥ जसि

---

१ ज्ञापयितुं My., P. २ इत्याद्यादेशाः P., My. ३ सर्वनामशब्दत्वे P., My. ४ परेपि M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मो भे वअं जसा ॥ २ । ३ । १६ ॥

अस्मज्जसा सह मो इत्यादि त्रीनादेशानाप्नोति ।

अम्हे अम्हो अम्ह ॥ २ । ३ । १७ ॥

'अस्मत्' 'जसा' इति चानुवर्तते । अस्मज्जसा सह अम्हे इत्यादि त्रीनादेशानाप्नोति । योगविभाग उत्तरार्थः । मो । भे । वअं । अम्हे । अम्हो । अम्ह । वयम् ॥ अमि

मं णे णं मि मिमं ममं अम्मि अहं मम्ह अम्ह अमा ॥ २ । ३ । १९ ॥

अस्मदमा सह ममित्यादि दशादेशानापद्यते । मं । णे । णं । मि । मिमं । ममं अम्मि । अहं । मम्ह । अम्ह ॥ १० ॥ माम् ॥ शसि । 'अम्हे अम्हो अम्ह' इत्यधिकृत्य

णे च शसा ॥ २ । ३ । १८ ॥

अस्मच्छब्दः शसा सह णे इति चकाराद् अम्हे इत्यादीन् त्रीनादेशांश्चापद्यते । अम्हे । अम्हो । अम्ह । णो ॥ ४ ॥ अस्मान् ॥ टा

मि मइ ममाइ मए मे ङिटा ॥ २ । ३ । २० ॥

अस्मत् टावचनेन ङिवचनेन च सह मि इत्यादि पञ्चादेशांश्चापद्यते ।

ममं णे मआइ ममए टा ॥ २ । ३ । २१ ॥

अस्मत् टावचनेन सह ममं इत्यादींश्चतुर आदेशानाप्नोति । मि । मइ । ममाइ । मए । मे । ममं । णे । मआइ । ममए ॥ ९ ॥ मया ॥ भिसि

णे अम्हेह्यम्हाह्यम्हे अम्ह भिसा ॥ २ । ३ । २२ ॥

असद् भिसा सह णे इत्यादीन् पञ्चादेशानाप्नोति । अत्र हिग्रहणेन भिसादेशसाम्यात हिंहिङोरपि परिग्रह इति केचित् । णे । अम्हेहिं ।

---

१ °श्चाप्नोति My., P.

अम्हेहिँ । अम्हेहि । अम्हाहिं । अम्हाहिँ । अम्हाहि । अम्हे । अम्ह ॥ ९ ॥ अस्माभिः ॥ ङसौ

मइ मम मह मज्झ ङसौ ॥ २ । ३ । २३ ॥

ङसौ पञ्चम्येकवचने परतः अस्मद् मइ इत्यादींश्चतुर आदेशानापद्यते । ङसेस्तु यथाप्राप्तमेव । इदन्ते चत्वारि । अदन्तेषु त्रिषु प्रत्येकं षट् । मईहिंतो । मइत्तो । मईओ । मईउ ॥ ४ ॥ ममाहिंतो । ममत्तो । ममाओ । ममाउ । ममा । ममाहि ॥ ६ ॥ एवं शिष्टयोरप्यदन्तयोः ॥ २२ ॥ मत् ॥ भ्यसि

अम्ह मम भ्यसि ॥ २ । ३ । २४ ॥

अस्मत् पञ्चमीबहुवचने भ्यसि परतः अम्ह मम इत्येतावादेशावापद्यते । भ्यसस्तु यथाप्राप्तमेव । एकैकस्य अम्हाहिंतो ममाहिंतो इत्यादीनि रामवन्नव[1] रूपाणि कैल्पनीयानि[2] ॥ १८ ॥ अस्मत् ॥ ङसि

अम्हं मज्झं मज्झ मइ मह महं मे च ङसा ॥ २ । ३ । २५ ॥

अस्मद् ङसा सह अम्हं इत्यादीन् सप्तादेशान् चकारादम्हममौ चापद्यते । अम्हं । मज्झं । मज्झ । मइ । मह । महं । मे । अम्ह । मम ॥ ९ ॥ मम ॥ आमि

अम्हे अम्हो अम्हाण ममाण महाण मज्झाण मज्झाम्हाम्हं णे णो आमा ॥ २ । ३ । २६ ॥

अस्मदामा सह अम्हे इत्यादीनेकादशादेशानापद्यते । 'क्त्वासुपोस्तु सुणात्' इति बिन्दुयोगे चत्वारि । अम्हे । अम्हो । अम्हाण । अम्हाणं । मज्झाण । मज्झाणं । ममाण । ममाणं । महाण । महाणं मज्झ । अम्ह । अम्हं । णे । णो ॥ १५ ॥ अस्माकम् ॥ ङौ 'मि मइ ममाइ मए मे ङिटा' इत्यनेन पञ्चादेशाः ।

अम्ह मम मज्झ मह ङिपि ॥ २ । ३ । २७ ॥

---

१ नवनवरूपाणि रामशब्दवत् P., My., नवरूपाणि रामवत् T., R.
२ परिकल्पनीयानि My., P., M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ङिपि सप्तम्यां परतः अस्मद् अम्हेत्यादि चतुरादेशानापद्यते । ङि सुपोर्यथाप्राप्तो 'ङेर्डे' 'ङेर्म्मिः' इति च । मि । मयि । ममाई । मए । मे । अम्हे । अम्हम्मि । ममे । ममम्मि । मज्झे । मज्झम्मि । महे । महम्मि ॥ १३ ॥ मयि ॥ ङावस्मदः अम्हाद्यादेशस्थले 'ङेस्त्थ-सिम्मि' इति थाद्यादेशान्तोदाहरणप्रदर्शनाभावस्तु विचारणीयस्त्रै-विक्रमे । सुपि अम्हादयः । अत्र सुपि अत एत्वं विकल्पितमिति केचित् । अम्हेत्यस्य सुपि अत आत्वमित्यपरे । अम्हासु । अम्हेसु । अम्हसु । ममेसु । ममसु । मज्झेसु । मज्झसु । महेसु । महसु । ममेसु । ममसु । एतेषामेव 'क्त्वासुपोस्तु सुणात्' इति वा बिन्दौ सति सबिन्दुका नव इतरे नवेत्यष्टादश रूपाणि । सुपः ॥ १८ ॥ अस्मासु ।

इत्यस्मच्छब्दप्रक्रिया ॥

---

१ °नाप्नोति P., My. २ °र्यथाप्राप्तं M. ३ °स्त्रैविक्रमीये T. ४ सबिन्दुका अपि नवेति परे नवेत्यष्टादश° M. ५ इति युष्मदस्मत्प्रक्रिया My. P.; इत्यस्मच्छब्दः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाव्ययानि ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

अव्ययम् ॥ २ । १ । ३१ ॥

अधिकारोऽयमापादपरिसमाप्तेः । इतः परं ये[1] वक्ष्यन्ते तेव्ययसंज्ञा विज्ञेयाः ॥

[2]आम अभ्युपगमे ॥ २ । १ । ३२ ॥

अभ्युपगमार्थे आमेति प्रयोक्तव्यम् । आम बहुळावणावळी । आम संस्कृतेऽपीति केचित् ॥

तं वाक्योपन्यासे ॥ २ । १ । ३३ ॥

तमित्यव्ययं वाक्योपन्यासे प्रयोक्तव्यम् । तंति[3] ॥

णइ चेअ चिअ च्चँ एवार्थे ॥ २ । १ । ३४ ॥

अवधारणेर्थे णइ चेअ चिअ च्च इत्येते चत्वारः[5] प्रयोक्तव्याः । गहिओ णइ । गृहीत एव । जं चेअ । यदेव । तं चिअ । तदेव । दैवादिपाठाद्द्वित्वे ते च्चिअ धण्णा । त एव धन्याः । ते च्चिअ सुउरिसा । त एव सुपुरुषाः । सो च्चँ[6] वयोरूवेण । स एव वयोरूपेण ।

हद्धि निर्वेदे ॥ २ । १ । ३५ ॥

हद्धीति निर्वेदे प्रयोक्तव्यः हाधिक्शब्दवत् । हद्धि कट्ठं ।

दर अर्धे अल्पे वा ॥ २ । १ । ३६ ॥

दरेत्यव्ययमर्धे अल्पे वा प्रयोक्तव्यम् । दर विअसिअं । अर्धमीषद्वा विकसितम् ॥

किणो प्रश्ने ॥ २ । १ । ३७ ॥

---

१ यद्वक्ष्यते तदव्ययसंज्ञं ज्ञेयम् M. २ अभ्युपगमे आम M. ३ M. adds यसंबन्धिमेक्खं; T. has असधिडि मोखं. ४ व्व P. ५ T. has आदेशाः after it. ६ व्व P.

प्रश्ने किणो इति प्रयोज्यम्[1] । किणो[2] चिट्ठसि । किमिति[3] तिष्ठसि ॥

मिव पिव विव विअ व व्व इवार्थे ॥ २ । १ । ३८ ॥

मिव पिव विव विअ व व्व षडेते[4] इवार्थे प्रयोक्तव्याः । कमळं मिव । चंदेण पिव । हंसा[5] विव । बालो विअ । उअअस्स व सीअळत्तणं । उदकस्येव शीतलत्वम् । साअरस्स व गंभीरिअं । सागरस्येव गाम्भीर्यम् । पक्षे कमलमिवेत्यादि ॥

किर इर हिर किलार्थे ॥ २ । १ । ३९ ॥

एते त्रयः किलार्थे वा प्रयोक्तव्याः[6] । कअं किर । कृतं किल । तस्स इर पिअवअंसो । तस्य किल प्रियवयस्यः । वाहित्ता हिर । व्याहृता किल । पक्षे कअं किलेत्यादि ।

अम्हो आश्चर्ये ॥ २ । १ । ४० ॥

अम्हो इत्याश्चर्ये वा प्रयोक्तव्यम् । अम्हो कहं भाइ । आश्चर्यं कथं भाति । पक्षे कहमच्छरिअं[7] ॥

अब्भो पश्चात्तापसूचनादुःखसंभाषणापराधानन्दादरखेदविस्मयविषादभये ॥ २ । १ । ४१ ॥

अब्भो इति पश्चात्तापादिष्वेकादशसु प्रयोक्तव्यम्[8] । पश्चात्तापे । अब्भो महं खु पावमाअरिअं । मह्यखलु पापमाचरितम् । सूचनायाम् । अब्भो दुक्करो आरद्धो । दुष्कर आरब्धः । दुःखे । अब्भो सव्वं गअं । सर्वं गतम् । संभाषणे । अब्भो किमिणं । किमिदम् । अपराधे । अब्भो परधणं हरंति खला । परधनं हरन्ति खलाः । आनन्दे । अब्भो सुप्पहाअमिणं । सुप्रभातमिदम् । इत्यादीनि यथायोगं कविभिः प्रयोक्तव्यानि ॥

---

१ प्रयोक्तव्यम् M. २ M. has प्रश्ने before it. ३ My. and P. omit किमिति तिष्ठसि. ४ इति षद् प्रयोज्या इवार्थे T.; इति षड् इवार्थे प्रयोक्तव्याः M. ५ हंसो विव M. ६ प्रयोज्याः T. ७ °मचरिअं M. ८ प्रयोज्यम् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हुं[1] पृच्छादाननिवारणे ॥ २ । १ । ४२ ॥

हुमित्यव्ययं[2] पृच्छायां दाने निवारणे च प्रयोज्यम् । पृच्छायाम् । हुं कहअ सब्भावं । कथय सद्भावम् । दाने । हुं मह धनं । मम धनम् । निवारणे । हुं चिट्ठ ॥

वणे निश्चयानुकम्प्यविकल्पे ॥ २ । १ । ४३ ॥

वणे इति निश्चयादौ प्रयोज्यम् । निश्चये । वणे होइ । निश्चयो भवति । अनुकम्प्ये । दासो वणे ण मुच्चइ । दासोनुकम्प्यो न मुच्यते । विकल्पे । होइ वणे ण होइ । भवति न भवति वा ॥

संभावने अइ च ॥ २ । १ । ४४ ॥

संभावने अइ इति चकाराद्वणे इति च प्रयोज्यम् । अइ देअर किं ण मेच्छसि । अइ देवर किं न पश्यसि । एवं वणेपि ॥

आनन्तर्ये णवरिअ ॥ २ । १ । ४५ ॥

णवरिअ इत्यानन्तर्यार्थे प्रयोज्यम् । णवरिअ से रहुवइणो । अनन्त-[3] रमस्य रघुपतेः ॥

केवले णवर ॥ २ । १ । ४६ ॥

णवरेति केवले प्रयोज्यम् । णवर दोज्जण्णं पअडिअं । केवलं दौर्जन्यं प्रकटितम् । केचित्तु[4] 'केवलानन्तर्ययोर्णवरणवरी' इत्येकमेव सूत्रमाहुः । तन्मते उभावप्युभयार्थौ ॥

हंद[5] गृहाणार्थे ॥ २ । १ । ४७ ॥

[6]हंदेति गृहाणार्थे वा प्रयोज्यम् । [7]हंद पोप्फं । गृहाण पुष्पम् ॥

हंदि[8] विकल्पविषादसत्यनिश्चयपश्चात्तापेषु च ॥ २ । १।४८ ॥

---

१ हं M. २ हमित्येतत् M. ३ आनन्तर्यमावश्यकम् M.; आनन्तर्यमवश्यम् R., T. ४ M. drops तु from केचित्तु. ५ भंद P. ६ भंदे° P. ७ भंद P. ८ भंदि P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]हंदीत्येतद्विकल्पादिषु चकाराद् गृहाणार्थे च प्रयोज्यम् । विकल्पे । [2]हंदि होज्ज एत्ताहे । वा भवेदिदानीम् । विषादे । हंदि[3] चळणाणओ सो ण माणिओ । हन्त चरणानतः स न मानितः । सत्ये । [4]हंदि तुह फणामो । सत्यं तव फणामः । निश्चये । साहिज्जइ हंदि तुह कज्जं । साध्यते निश्चयेन तव कार्यम् । पश्चात्तापे । [5]हंदि न दिट्ठो पिओ । हन्त न दृष्टः प्रियः । गृहाणार्थे । [6]हंदि धणं ॥

संभाषणरतिकलहे रे अरे ॥ २ । १ । ४९ ॥

संभाषणे रतिकलहे च रे अरे इति प्रत्येकं प्रयोज्यम् । संभाषणे । रे धुत्त । अरे धुत्त । रतिकलहे । रे किअअ । अरे किअअ । कितव ॥

हरे क्षेपे च ॥ २ । १ । ५० ॥

क्षेपे चकारात् संभाषणरतिकलहयोश्च हरे इति प्रयोज्यम् । क्षेपे । हरे णिल्लज्ज । संभाषणे । हरे पुरिसा । रतिकलहे । हरे बहुवल्लह ॥

धू कुत्सायाम् ॥ २ । १ । ५१ ॥

धू इति कुत्सायां प्रयोज्यम् । धू णिळज्जाळाहो ॥

ऊ गर्हाविस्मयसूचनाक्षेपे ॥ २ । १ । ५२ ॥

ऊ इति गर्हादिषु प्रयोज्यम् । गर्हायाम् । ऊ णिल्लज्ज । विस्मये । ऊ कहं फणिअं । सूचनायाम् । ऊ केण विण विण्णाअं । केनापि न विज्ञातम् । प्रक्रान्तस्य वाक्यस्य विपर्यासशङ्कानिवर्तनलक्षण आक्षेपः । तत्र । ऊ भणिदव्वं । कथं भणितव्यम् ॥

पुणरुत्तं कृतकरणे ॥ २ । १ । ५३ ॥

पुणरुत्तमिति कृतकरणे प्रयोज्यम् । [7]अयि सहसु पुणरुत्तं । [8]कृतकरणं सहस्वेत्यर्थः ॥

---

१ भंदी° P. २ भंदि P. ३ भंदि P. ४ भंदि P. ५ भंदि P. ६ भंदि P. ७ अयि पिय M.; R. adds स्वपइपसुरे after अयि पिअ. ८ M. has अयि पिय and R. अयि प्रिय स्वपति पांसुले before कृतकरणं &c.

हु खु निश्चयविस्मयवितर्के ॥ २ । १ । ५४ ॥

हु खु इत्येतौ निश्चयादिषु प्रयोज्यौ । निश्चये । हु पढिअं । असंशयं पठितम् । विस्मये । हु एसो को धणुहरो । वितर्को नाम ऊहः संशयो वा । ऊहे । हु पिओ आअमिस्सदि । संशये । हरी हु हरो हु । एवं खु इत्यपि प्रयोज्यम् । बहुलाधिकारादनुस्वारात् परो हुर्न प्रयोज्यः ॥

णवि वैपरीत्ये ॥ २ । १ । ५५ ॥

णवि इत्येतद्वैपरीत्ये प्रयोज्यम् । णवि विहिपरिणामो । विपरीतो विधिविपरिणामः ॥

वे[1]व्वे विषादभयवारणे ॥ २ । १ । ५६ ॥

वि[2]षादभयवारणार्थेषु वे[3]व्वे इति [4]प्रयोज्यम् । [5]वेव्वे फणिअं ण विम्हरामो । विषादफणितं न विस्मरामः । भये । वे[6]व्वे पलाइदं तेण । भयेन पलायितं तेन । वारणे । वे[7]व्वे चापलं । [8]मा चापलम् ॥

आमन्त्रणे पेव्वे च ॥ २ । १ । ५७ ॥

पेव्वे इति चकाराद्वेव्वे इति चामन्त्रणे प्रयोज्यम् । पेव्वे पिअ ॥

वा सख्या मामि हळा हळे ॥ २ । १ । ५८ ॥

आमन्त्रण इत्यनुवर्तते । सख्या आमन्त्रणे मामि हळा हळे इति त्रयो वा प्रयोज्याः । मामि भामिणि । एवं हळा हळे च । पक्षे सहि ॥

दे सम्मुखीकरणे च ॥ २ । १ । ५९ ॥

संमुखीकरणे चकारात् सख्या आमन्त्रणे च दे इति प्रयोज्यम् । दे सहि । दे राम । दे जाइ[9]ण ॥

ओ पश्चात्तापसूचने ॥ २ । १ । ६० ॥

---

१ चेच्छे M.; चच्छे P. २ चेच्छे विषाद° M. ३ M. drops वेव्वे इति. ४ प्रयोक्तव्यम् M. ५ चेच्छे M.; चच्छे P. ६ चच्छे P. ७ चच्छे P. ८ मा खु चापलम् M. ९ जाणइ M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्चात्तापे सूचने च ओ इति प्रयोज्यम् । ओ कअं पावं । सूचने । ओ तुह चरिअं सव्वं विण्णाअं ॥

अण णाइं नञर्थे ॥ २ । १ । ६१ ॥

नञर्थे अण णाइ इत्येतौ प्रयोज्यौ[1] । अण चिंतिअं मुणंति । न चिन्तितं जानन्ति । णाइं करेमि रोसं । न करोमि रोषम् ॥

निश्चयनिर्धारणे वले ॥ २ । १ । ६२ ॥

निश्चये निर्धारणे च वले इति प्रयोज्यम् । निश्चये । वले सीहो । सिंह एवायम् । निर्धारणे । वले पुरिसो धणंजओ खत्तिआणं । क्षत्रियाणां धनंजय एव पुरुषः ॥

मणे विमर्शे ॥ २ । १ । ६३ ॥

विमर्शे मणे इति प्रयोज्यम् । मणे सूरो । किंस्वित्सूरः ॥

माइ मार्थे ॥ २ । १ । ६४ ॥

माइ इति माकारार्थे प्रयोज्यम् । माइ होदु रोसो । मा भवतु रोषः ॥

आलाहि[2] निवारणे ॥ २ । १ । ६५ ॥

निवारणे आलाहि[3] इति प्रयोज्यम् । आलाहि[4] विसाएण । अलं विषादेन ॥

लक्षणे जेण तेण ॥ २ । १ । ६६ ॥

एतौ लक्षणे प्रयोज्यौ[5] । भमररुअं जेण तेण कमलवणं ॥

त्वोदवापोताः ॥ २ । १ । ६७ ॥

अव अप इत्येतावुपसर्गौ उत इति विकल्पार्थो निपातश्च ओत्वं वापद्यन्ते । ओआरो । अवतारः अपकारो वा । ओ विरएमि णहत्थळे । उत विरचयामि नभस्थले । पक्षे अवआरो इत्यादि ॥

---

१ अण णाइं इत्येतावुक्तार्थे स्याताम् P., My; अण णाइं इत्येतौ नञर्थे प्रयोज्यौ R. २ अलाहि M. ३ अलाहि M. ४ अलाहि M. ५ प्रयोक्तव्यौ M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उ ओ उपे ॥ २ । १ । ६८ ॥

उप इत्युपसर्गे उ ओ इति[1] द्विधा प्रयोज्यम्[2] । उआरो । ओ-आरो । उवआरो । उपचारः ॥

प्रत्येकमः पाडिएक्कं पाडिक्कं ॥ २ । १ । ६९ ॥

प्रत्येकमित्यस्मिन्नर्थे पाडिएक्कं पाडिक्कं इति तु प्रयोज्यम् । पाडि-एक्कं । पाडिक्कं । पक्षे । पच्चेअं । अत्र 'त्योचैत्ये' इति त्यस्य चः ॥

स्वयमो अप्पणा ॥ २ । १ । ७० ॥

स्वयमित्यस्यार्थे अप्पणेति वा[3] प्रयोज्यम् । अप्पणा पाओ । स्वयं पाकः ॥

एक्कसरिअं झडिति संप्रति ॥ २ । १ । ७१ ॥

झडित्यर्थे संप्रत्यर्थे च एक्कसरिअमिति तु प्रयोज्यम् । एक्कसरिअं । झडिति संप्रति वा । पक्षे । झत्ति । संपइ ॥

इहरा इतरथा ॥ २ । १ । ७२ ॥

इहरा इति इतरथार्थे वा प्रयोज्यम् । इहरा । पक्षे । इअहरा ॥

मुधा मोरउल्ला ॥ २ । १ । ७३ ॥

मुधेत्यर्थे मोरउल्लेति तु प्रयोज्यम् । मोरउल्ला । पक्षे । मुद्दा ॥

अयि ऐ ॥ २ । १ । ७४ ॥

अयि इत्यर्थे ऐ इति वा प्रयोज्यम् । अत एव वचनादैकारस्यापि प्राकृते प्रयोगः । ऐ सहि । पक्षे अइ सहि ॥

उव पश्य ॥ २ । १ । ७५ ॥

पश्येत्यर्थे उवेति वा स्यात्[4] । उव णिप्फळणिप्फंदा । पश्य निष्फ-लनिष्पन्दा । पश्यतेत्यर्थे उवह इति च दृश्यते । उवह गोट्ठमज्झम्मि । पश्यत गोष्ठमध्ये ॥

---

१ इति तु for इति M., T. २ प्रयोक्तव्यः T. ३ तु for वा M.
४ तु प्रयोज्यं for वा स्यात् M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इजेराः पादपूरणे ॥ २ । १ । ७६ ॥

पादपूरणेऽर्थे[1] इ जे र इत्येते तु प्रयोक्तव्याः[2] । रामो इ । एवं जेरयोरपि । अहो अंहो हा नाम हे अहह हि आ इत्यादयः संस्कृतवदेव सिद्धाः[3] ।

इत्यव्ययानि ।

अथाव्ययेषु केचिद्विशेषाः[4] प्रदर्श्यन्ते[5] ।

कहं । कह । इआणिं । इआणि । अत्र मांसादित्वाद्विकल्पेन बिन्दुलोपः ॥

एण्हिं एत्ताहे इदानीमः ॥ १ । ३ । १०३ ॥

इदानींशब्दस्य[6] एण्हिं एत्ताहे इत्यादेशौ भवतः[7] । एण्हिं । एत्ताहे ॥

बाहिंबाहिरौ बहिसः ॥ १ । ३ । १०१ ॥

बहिस्शब्दस्य बाहिं बाहिर इत्येतौ वा स्याताम्[8] । बाहिं । बाहिर । उवरिं । अत्र वक्रादित्वाद्विन्दुः ॥

यत्तत्सम्यग्विष्वक्पृथको मल् ॥ १ । १ । ३८ ॥

'अन्त्यहलोऽश्रदुदि' इत्यतः 'अन्त्यहलः' इत्यनुवर्तते[9] । एषामन्त्यहलो मः स्यात् । यत् । जं । तत् । तं । सम्यक् । सम्मं । अत्र 'मनयाम्' इति यलोपः[10] । विष्वक् । वीसुं । अत्र 'उत्ध्वनि—' इत्यादिना वकारसंबन्धिनो वर्णस्य उत्वम् । 'लवराम्—' इति वलोपः । 'शोर्लुप्त—' इत्यादिना दीर्घः । उच्चैः[11] । अत्र 'ऐच एङ्' इत्यतः 'ऐचः' इत्यधिकृत्य

उच्चैर्नीचैसोरअः ॥ १ । २ । १०८ ॥

---

१ T. drops पादपूरणेऽर्थे. २ पादपूरणे प्रयोज्याः T. ३ संस्कृत एव सिद्धाः T. ४ केषुचिद्विशेषाः T. ५ कथ्यन्ते M. ६ इदानीमित्यर्थे M. ७ वा भवतः M ; तु भवतः T. ८ इत्यादेशौ वा स्याताम् T. ९ इत्यनुवर्तते M., T. १० यलोपे शेषद्वित्वम् T. ११ नीचैः after उच्चैः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनयोरैचः अअ इत्यादेशो भवति । उच्चअ । नीचअ । पृथक् । अत्र 'खघ—' इत्यादिना थस्य हः ॥

ढः पृथकि तु ॥ १ । ३ । २१ ॥

अत्र थस्य ढो वा स्यात् । पक्षे हत्वम् । यत्तत्सम्यक्—' इत्यादिनान्त्यहलो मत्वम् । 'वृष्टिपृथक्—' इत्यादिना ऋत इत्वमत्वं च । पिढं । पुढं । पिहं । पुहं । मिथ्या । अत्र 'थ्यश्चत्सप्साम्' इति सूत्रेण थ्यस्य छेः । मिच्छा । ईषत् । अत्र स्वप्नादित्वादत इल् । इसि ॥

कूरो गौणेषतः ॥ १ । ३ । १०२ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो भवति । चिंचव्व कूर वंका । चिंचेवेषद्वक्रा ॥ यथा । तथा । अथवा । कदा । तदा । मुधा । उभयथा । अन्यथा इत्यादौ 'न वाव्ययोत्खातादौ' इत्यादेराकारस्य विकल्पेन ह्रस्वः । जह । जहा । तह । तहा । अहव । अहवा । इत्यादि ॥ मृषा

उदूदोल् मृषे ॥ १ । २ । ८६ ॥

अत्र ऋत उत्वमूत्वमोत्वं च स्यात् । शोः सत्त्वे । मूसा । मुसा । मोसा ॥ श्वः । अत्र 'एकाचि श्वस्स्वे' इति संयुक्तस्यान्त्यहलः प्रागुत्वम् । सुवो । क्त्वाप्रत्ययस्य

तुमत्तुआणतूणाः क्त्वः ॥ २ । १ । २९ ॥

क्त्वाप्रत्ययस्य तुं अत् तुआण तूण इति चत्वार आदेशा भवन्ति । तुं । दट्ठुं । तुआण । दट्ठुआण । तूण । दट्ठूण । अत्र 'घेत्तुंतव्यक्त्वासु ग्रहिः' इत्यतः 'तुंतव्यक्त्वासु' इत्यधिकृत्य

---

१ 'खघथभाम्' इत्यतः थ इत्यनुवर्तते M., T. २ छत्वम् T. ३ इत् M., T. ४ चिंचेवे° M. ५ My. and P. omit मृषा. ६ चत्वारि स्यात् M. ७ शोः सत्वे मुसा is omitted by My., P. ८ T. has before अत्र &c. 'क्त्वा सुपोस्तु सुण्' इत्यनुस्वारे दंतुआणं दंतूणं. ९ इत्यधिकृत्य M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता ट्ठो दृशः ॥ २ । ४ । ४५ ॥

दृशोन्त्यस्य तुमादिषु परेषु ता तकारेण सह द्विरुक्तः ठो भवति । इति ठः । 'ऋतोत्' इत्यत्वं च । अत् । भमिआ । भ्रमित्वा ॥

घेत्तुंतव्यक्त्वासु ग्रहेः ॥ २ । ४ । ४३ ॥

तुमादिषु परेषु ग्रहेर्धातोर्घेदित्यादेशो[1] भवति । घेत्तुं । घेत्तुआण । घेत्तूण । अत्र तुंग्रहणेन तुमुन् ग्राहितो न तु क्त्वादेशः । क्त्वाग्रहणेनैव तस्य सिद्धत्वात् । 'घेत्तुंतव्यक्त्वासु ग्रहेः' इत्येतः 'तुंतव्यक्त्वासु' इत्यधिकृत्य[2]

अन्त्यस्य वचिमुचिरुदिश्रुभुजां डोल्[3] ॥ २ । ४ । ४४ ॥

तुमादिषु परेषु एषामन्त्यस्य[4] हलो डोत्वं लित् स्यात् । वचि । वोत्तुं । वोत्तुआण । वोत्तूण । मुचि । मोत्तुं । मोत्तुआण । मोत्तूण । रुदि । रोत्तुं रोत्तुआण । रोत्तूण । श्रु । सोत्तुं । सोत्तुआण । सोत्तूण । भुजे[5] । भोत्तुं । भोत्तुआण । भोत्तूण । अदन्तेषु 'अदेल्लुक्यात्त्वोरतः' इत्यतः[6] 'अतः' इत्यधिकृत्य 'मोममुष्विच्च' इत्यतः[7] 'इत्' इति च

एच्च क्त्वातुंतव्यभविष्यति ॥ २ । ४ । १८ ॥

त्क्वादिषु परेष्वत एद्भवति[8] चकारादिकारश्च । क्त्वा । हसेऊण । हसिऊण । तुं । हसेउं । हसिउं । एवमदन्ते सर्वत्र क्त्वातुमुनोरुदाहार्यम् । 'अतः' इति किम् । काऊण ॥

आ भूतभविष्यति च कृञः ॥ २ । ४ । ४७ ॥

'अन्त्यस्य' इत्यनुवर्तते । 'घेत्तुंतव्य—' इत्येतः[9] 'तुंतव्य—' इत्यादि च । कृञोन्त्यस्य[10] भूते भविष्यति चकारात्तुमादिषु च[11] आकारो भवति । काउं । काउआण । काऊण । कृत्वा ॥ 'धातोः' इत्यधिकृत्य

---

१ °घेंदिति भवति T. २ इत्यधिकृत्य M., T. ३ डोत् M. ४ °मन्त्यहलो M. ५ भुजि M., T. ६ इत्यधिकृत्य M., T. ७ इति च M., T. ८ एत्वं भवति M. ९ इति च M., T. १० आ इत्यादेशो वा भवति before भूते &c. T. ११ परतः for च आकारो भवति T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योरेद् ॥ २ । ४ । ६५ ॥

इश्च उश्च युः । धातोरिवर्णोवर्णयोरेदोतौ यथासंख्यं भवतः[1] । णेऊण । णेउआण । नीत्वा । जेऊण । जेउआण । जित्वा । सोऊण । सोउआण । श्रुत्वा । एवं सर्वत्रेवर्णोवर्णयोरुदाहार्यम् ॥

णो ह्रश्च चिजिपूश्रुधूस्तुहुलूभ्यः ॥ २ । ४ । ७२ ॥

ऐभ्यः[2] परो ण इत्यागमो भवति । तत्संनियोगेन दीर्घस्य[3] ह्रस्वश्च । चिणिऊण । चित्वा । जिणिऊण । जित्वा । पुणिऊण[4] । पवित्वा । सुणिऊण । श्रुत्वा । धुणिऊण । धवित्वा । स्तुणिऊण । स्तुत्वा । हुणिऊण । हुत्वा । लुणिऊण । लवित्वा । अत्र दीर्घस्य ह्रस्वः । अत्र णकारात्परस्याकारस्य 'एच्च क्त्वातुं—' इत्यादिना एकारः । तथा च चिणेऊण इत्यादि सिद्धम् । ज्ञात्वा । अत्र 'जाणमुणौ ज्ञेः[5]' इति ज्ञाधातोर्जाणादेशे जाणिऊण । बहुलाधिकारात् जाणादेशस्य कचिद्विकल्प इति वचनादस्याभावे णाऊण । अत्र 'ज्ञम्नोः[6]' इति ज्ञस्य णादेशः । दीर्घस्य[7] ज्ञस्यादेशाण्णस्यापि दीर्घः । अत्र सर्वत्र क्त्वाप्रत्ययादेशसंबन्धिनो णकारात् परतः 'क्त्वासुपोस्तु सुणात्' इति वा बिन्दौ दट्ठूणं । दट्ठुआणं । काऊणं । काउआणं । इत्याद्यपि संचारणीयम् । वंदित्ता इति तु सिद्धावस्थापेक्षया वलोपे । सदा । अत्र[8] 'इत्तु सदादौ' इत्यादेराकारस्य वा इत्वे सति । सआ । उभयत्र 'प्रायो लुक्—' इति दलोपः । अपि अत्र 'लुगव्ययत्यदाद्यात्तदचः' इत्यधिकृत्य 'वा— लाब्वरण्ये' इत्यतः 'वा' इति च 'आदेः' इति च[9]

अपेः पदात् ॥ १ । २ । ५ ॥

पदात् परस्यापीत्युपसर्गस्य आदेरचो वा लुक् स्यात् । किं वि[10] ।

---

१ स्तः P., My., २ एतेभ्यः M. ३ दीर्घस्य च ह्रस्वः M., T. ४ My. and P. have पूणिऊण । धुणिऊण । लुणिऊण । after हुत्वा. ५ ज्ञि M. ६ ज्ञिम्नोः M. ७ दीर्घान्तज्ञाधात्वादेशत्वाण्ण° M. ८ अत्र is *dropped in My., P.* ९ इति च *M., T.* १० *किमपि । किं वि M.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमपि । तं[1] वि । तमपि । केणं[2] वि । केनापि । अहं[3] वि । इत्यादि । 'पदात्' किम् । अवि णाम । अपि[4] नाम ॥

इतेः ॥ १ । २ । ६ ॥

पूर्वं सर्वमनुवर्तते । पदात्परस्येति शब्दस्यादेरचो लुक् स्यात् । योगविभागान्नित्यम् । किं ति । किमिति । जं ति । यदिति । तं ति । तदिति । अत्र 'यत्तत्सम्यक्—' इति बिन्दुः । जुत्तंति । युक्तमिति । 'पदात्' इति किम् । इअ विंझगुहाणिळआए । इति विन्ध्यगुहानिलयायाः । अत्र 'त्वेदितः' इत्यतः[5] 'इतः' इत्यधिकृत्य 'मूषिकविभीतक—' इत्यादेः 'अत्' इति च

इतौ तो वाक्यादौ ॥ १ । २ । ४५ ॥

वाक्यादिभूते इतिशब्दे तकारसंबन्धिन इकारस्य अत्वं भवति । इतीकारस्यात्वम् । 'वाक्यादिभूते' इति किम् । पिएत्ति । प्रिये इति ।

तोचः ॥ १ । २ । ७ ॥

'इतेः' इत्यनुवर्तते । अचः परस्येतिशब्दस्यादेरचः तकारो भवति । झत्ति । झडिति । नूनं । एवं । किं । सं । अत्र मांसादित्वाद्विकल्पेन बिन्दुलोपे । णूणं । णूण । एवं । एव । किं । कि । सं । स ।

यावत् । तावत् । एवमेव । अत्र 'एवमेव देवकुल—' इत्यादिना सूत्रेण अन्तर्वर्तमानस्य वकारस्याचा सह लोपे । जा । जाव । ता । ताव । एमे अ । एवमेव । कुत्र । कुतः । 'त्रतसि च किमो क्कः' इति किमः कादेशे 'हित्थहास्त्रलः' इति त्रलः । त्रिष्वादेशेषु । किहि । कत्थ । कह । तस् । कादेशे कत इति स्थिते

अतो डो विसर्गः ॥ २ । २ । १२ ॥

अकारात् परो विसर्गो डिदोकारो भवति । कओ । अत्रैव 'दो त्तो तसः' इति तसो दो त्तो । कदो । कत्तो । सिद्धावस्थापेक्षया ।

---

१ तमपि । तं वि M. २ केनापि । केण वि M. ३ हं वि M. ४ अपि नाम is omtted in P., My. ५ इत्यधिकृत्य M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुओ । कुदो । एवमग्रतः । अग्गओ । पुरतः । पुरओ । सर्वतः । सव्वओ । इत्यादि । नपुनश्शब्दे

शिश्लुङ् नपुनरि तु ॥ १ । १ । २८ ॥

'अन्त्यहलोश्रदुदि' इत्यतः[1] 'अन्त्यहलः' इत्यनुवर्तते । नपुनश्शब्दे अन्त्यव्यञ्जनस्य शानुबन्ध इकारो लुक् च वा[2] भवति । शित्वात् पूर्वस्य दीर्घः । णउणाइ । णउणा । पक्षे । णउण । णउणो । पुनश्शब्दे पुणाइ इति च दृश्यते । णउणेत्यत्र पदादित्वात् परस्य लोपाभावेपि बहुलाधिकारात् क्वचिदादेरपि भवतीति पकारस्य लोपो भवति । तेन णउणा । न पुनः ।

प्रसङ्गाद्यद्यहमित्यादौ किंचिदुच्यते । यदि इमाः । वयमन्यत्र इत्यादौ 'आदेः' इत्यधिकृत्य

लुगव्ययत्यदाद्यात्तदचः ॥ १ । २ । ३ ॥

अव्ययात् त्यदादेश्च परस्य तदचस्तयोरेवाव्ययत्यदाद्योरादेरचो बहुलं लुक् स्यात् । अव्ययात् तावत् । जइ अहं । जइ हं । यद्यहम् । जइ इमा । जइमा । यदीमाः । त्यदादेः परस्य । अम्ह अण्णद्ध । अम्हण्णद्ध । वयमन्यत्र । 'आदेः' इति किम् । जइ इमा इत्यादावनादेर्माभूत् । एवं सर्वत्राव्ययसंबन्धिनस्त्यदादेरचो लोपो द्रष्टव्यः ॥

इत्यव्ययानि ॥

---

१ इत्यनुवर्तते T., M. २ M. drops वा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तद्धितादेशाः ।

मन्तमणवन्तमाआलुआलइरइल्लउल्लइन्ता मतुपः ॥ २ । १ । १ ॥

मतुप्प्रत्ययस्य मन्तादय आदेशा यथाप्रयोगं भवन्ति । मन्त । श्रीमान् । सिरिमन्तो । पुण्यवान् । पुण्णमन्तो । मण । धनवान् । धनमणो । वन्त । भक्तिमान् । भक्तिवन्तो । मा । हनुमान् । हणुमा । पटवान् । पडमा । आलु । गेहालू । दयालू । लज्जालू । आल । सद्दालो । जडालो । रसालो । जोह्लालो । इर । गव्विरो । गर्ववान् । अत्रानुक्तन्यायेन यस्येति चेत्यकारलोपः । इल्ल । छाइल्लो । भाइल्लो । उल्ल । दप्पुल्लो । दर्पवान् । अत्र डित्करणाभावेपि बहुलग्रहणादकारलोपः । इंत । मानवान् । माणइन्तो । 'मतुपः' इति किम् । फणी । अत्थी ॥

वतुपो डित्तिअमिदमेतल्लुक् चैतद्यत्तदः ॥ २ । १ । २ ॥

एतद् यद् तद् एतेभ्यः परस्य परिमाणार्थस्य वतुप् प्रत्ययस्य डित् इत्तिअम् इत्यादेशः स्यात् इदमेतदोः लुक् च । एतावत् । इतिअं । यावत् । जित्तिअं । तावत् । तित्तिअं ।

किमिदमश्च डेत्तिअडित्तिलडेद्दहं ॥ २ । १ । ३ ॥

किमिदंभ्यां परस्य चकारादेतद्यत्तदः परस्य वतुप्प्रत्ययस्य डानुबन्धः एत्तिअ इत्तिल एद्दह इत्यादेशा भवन्ति इदमेतल्लुक् च । डानुबन्धादन्त्यस्वरादेर्लुक् । एतावत् । एत्तिअं । इत्तिलं । एद्दहं । कियत् । केत्तिअं । कित्तिलं । केद्दहं । इयत् । एत्तिअं । इत्तिलं । एद्दहं । यावत् । जेत्तिअं । जित्तिलं । जेद्दहं । तावत् । तेत्तिअं । तित्तिलं । तेद्दहं ॥

---

१ मन्तादयो for मन्तादय आदेशा T. २ यथाक्रमं प्रयोगे M. ३ My. and P. omit पुण्यवान्. ४ धनमणो । धनवान् M. ५ दर्पवान् । दप्पुल्लो M. ६ मानवान् is omitted in P., My. ७ धणी M. ८ भवति M. ९ यावत् is omitted in My., P, १० My. and P. omit तावत्. ११ स्युः My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इकः पथो णस्य ॥ २ । १ । ४ ॥

'पंथो ण नित्यम्' इति पथो यो णप्रत्ययो विहितस्तस्य इक इत्यादेशो भवति । पांथः । पहिओ । यद्यपि पथिकशब्दादपि सिद्धावस्थापेक्षयेदं रूपं भवति तथापि पान्थशब्दस्य रूपान्तरनिवृत्त्यर्थमिदमुदाहृतम् ॥

खस्य सर्वाङ्गात् ॥ २ । १ । ५ ॥

इक इत्यनुवर्तते । सर्वाङ्गाद् व्यापिन्यर्थे विहितस्य खप्रत्ययस्य इक इत्यादेशो भवति । सर्वाङ्गीणः । सव्वंगिओ ॥

छस्यात्मनो णअः ॥ २ । १ । ६ ॥

आत्मनः परस्य छप्रत्ययस्य णअ इत्यादेशो भवति । आत्मीयम् । अप्पणअं । अत्र 'वात्म भस्मनि पः' इति पः ।

हित्थ हास्त्रलः ॥ २ । १ । ७ ॥

सप्तम्यन्तान्नाम्नो विहितस्य त्रल्प्रत्ययस्य हि त्थ ह इति त्रय आदेशा भवन्ति । यत्र । जहि । जद्ध । जह । कुत्र । कहि । कद्ध । कह । अत्र 'त्रतसि च किमो ल्कः' इति किमः कादेशः । अन्यत्र । अण्णहि । अण्णद्ध । अण्णह । इत्यादि ॥

केर इदमर्थे ॥ २ । १ । ८ ॥

इदमर्थे विहितस्य प्रत्ययस्य केर इत्यादेशो भवति । युष्मदीयः । तुम्हकेरो । अत्र 'अर्थपरे तो युष्मदि' इति यस्य तकारः । 'श्मष्म—' इत्यादिना ष्मस्य म्हः । अस्मदीयः । अम्हकेरो । अत्रैव दैवादिपाठाद् द्वित्वे अम्हक्केरो । अत्रापि पूर्ववत् म्हादेशः । बहुलाधिकारात् कचिन्न भवति । मदीयपक्षः । मईअपक्खो । मदीयमार्गः । मइज्जमग्गो । पाणिनीयं । पाणिणीअं ।

---

१ भवेत् T. २ इत्यादेशः स्यात् My., P. ३ °न्तात् सर्वनाम्नो T. ४ आदेशाः स्युः P., My. ५ इत्यादेशः स्यात् P., My. ६ मइज्जपक्खो M. ७ My. and P. omit मदीयमार्गः । मइज्जमग्गो । ८ पाणिणिज्जं M.

राजपराड्डिक्कडक्को च ॥ २ । १ । ९ ॥

राजन् पर इत्येताभ्यां परस्य इदमर्थप्रत्ययस्य डित् इक्क अक्क इति भवतः चकारात् केरश्च । राजकीयम् । राइक्कं । अत्र जलोपटिलोपौ । राअक्कं । राअकेरं । परकीयं । पारिक्कं । पारक्कं । पारकेरं । अत्र समृद्ध्यादिपाठादादेरवर्णस्य वा दीर्घः[1] । परिक्कं । परक्कं । परकेरं ॥

डेच्चओ युष्मदस्मदोणः ॥ २ । १ । १० ॥

युष्मदस्मद्भ्यां परस्य इदमर्थस्य अणः डित् एच्च अ इत्यादेशो[2] भवति । यौष्माकम् । तुम्हेच्चअं । आस्माकम् । अम्हेच्चअं ।

वे वतेः ॥ २ । १ । ११ ॥

उपमानार्थस्य वतिप्रत्ययस्य वद् इत्यादेशो[3] भवति । रित्वाद्द्वित्वम् । मुहुरव्व पाडलीवुत्ते पासाओ । मथुरावत् पाटलीपुत्रे प्रासादः ॥

[4]त्वस्य तु डिमात्तणौ ॥ २ । १ । १२ ॥

भावार्थस्य त्वप्रत्ययस्य डित् इमा त्तण इत्यादेशौ तु भवतः । पीनत्वम् । पीणिमा । पीणत्तणं । [5]पृथ्वित्वम् । पुव्विमा । पुव्वत्तणं । पक्षे पीणत्तं । पुव्वत्तं । 'त्वस्य' इति किम् । पीणआ । पीणदा । पीनता ॥

दो त्तो तसः ॥ २ । १ । १४ ॥

पञ्चम्यन्तान्नाम्नः परस्य तसः दो त्तो इति वा भवतः । सव्वदो । सव्वत्तो । अण्णदो । अण्णत्तो । पक्षे । सव्वओ । इत्यादि ॥ अत्र

अतो डो विसर्गः ॥ २ । २ । १२ ॥

---

१ दीर्घे T. २ इत्यादेशः स्यात् T. ३ इत्यादेशः स्यात् T. ४ T. has before it the following:—तैलस्यानंकोलाड्डेलः । अंकोलवर्जिताङ्गात्परस्य तैलस्य एल्ल इत्यादेशो भवति । सुरहेल्ल । सुरभितैलम् । कडेल्ल । कटुतैलम् । 'अनंकोलात्' इति किम् । अंकोलतेल्ल । ५ M. and T. have पुष्पत्वम् before it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकारात् परो विसर्गो डिदोकारः स्यात् । इति विसर्गस्यौकारः । एवमग्रतः पुरतः कुत इत्यादि ॥

एकाद्सिसिअइआ ॥ २ । १ । १५ ॥

एकशब्दात् परस्य दाप्रत्ययस्य सि सिअ इआ इत्यादेशा भवन्ति । एकदा । एक्कसि । एक्कसिअ । एक्कइआ । पक्षे । एक्कआ । अत्र दैवादिपाठाद् द्वित्वम् । पक्षे । एगसिअ । इत्याद्यपि ॥

ल्हुत्तं कृत्वसुचः ॥ २ । १ । १६ ॥

कृत्वसुच्प्रत्ययस्य हुत्तमित्यादेशो लित् स्यात् । सअहुत्तो[1] । शतकृत्वः । सहासहुत्तो । सहस्रकृत्वः । इत्यादि । अत्र 'शोर्लुप्त—' इति दीर्घः ॥

भवेडिल्लोल्लडौ ॥ २ । १ । १७ ॥

भवार्थे नाम्नः परौ इल्ल उल्ल इत्येतौ डितौ भवतः । पुरो भवम् । पुरिल्लं । अधो भवम् । हेट्ठिल्लं । अत्र 'उभयाधसोरवहहेट्ठौ' इत्यधसो हेट्ठादेशः । उल्ल । आत्मभवम् । अप्पुल्लं ॥

स्वार्थे तु कश्च ॥ २ । १ । १८ ॥

स्वार्थे नाम्नः परः कप्रत्ययो[2] वा भवति । चकाराड्डिल्लोल्लौ च । चन्द्रः । चन्द्रो । चन्दओ । इह । इहअ । ककारोच्चारणं पैशाची-भाषार्थम् । तेन तत्र वदनं वतनकं । डिल्ल । पुरिल्लो । पुरा । पुरो वा । उल्ल । पिउल्लो । प्रियः । मुहुल्लं । मुखम् । हत्थुल्लो । हत्थो । हस्तः । पक्षे । चन्दो । इत्यादि । कुत्सादिविशिष्टेषु संस्कृतवदेव कः सिद्धः ॥

उपरेः संव्याने ल्लल् ॥ २ । १ । १९ ॥

उपरिशब्दात् संव्यानेर्थे द्विरुक्तो लो भवति । लित्वान्नित्यम् । उपरिल्लो । 'संव्याने' इति किम् । उपरिं[3] । अत्र वक्रादित्वाद्बिन्दुः ॥

---

१ शतकृत्वः । सअहुत्तो M. २ कप्रत्ययस्तु भवति M. ३ उवरिं M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिंश्राल्लिअञ् ॥ २ । १ । २१ ॥

मिश्रशब्दात् स्वार्थे शिद्वा लिअ इत्यादेशः स्यात् । शित्वात्पूर्वस्य दीर्घः । मीसालिअं । पक्षे । मीसं । अत्र 'शोर्लुक्त—' इति दीर्घः ॥

शनैसो ल्डिअं ॥ २ । १ । २२ ॥

असाल्लिङ्चि इअं स्यात् । सणिअं ॥

मनाको डअं च वा ॥ २ । १ । २३ ॥

असात् डित् अअं चकारादिअं च वा स्यात् । मणअं । मणिअं ॥

रो दीर्घात् ॥ २ । १ । २४ ॥

असात् स्वार्थे रो वा स्यात् । दीहरं । दीहं । दिग्घम् ॥

लो वा विद्युत्पत्रपीतान्धात् ॥ २ । १ । २६ ॥

एभ्यः स्वार्थे लो वा स्यात् । विज्जुला । विज्जू । पत्तलं । पत्तं । पीवैलं । पीअं । अन्धलो । अन्धो ॥

इरः शीलाद्यर्थस्य ॥ २ । १ । २८ ॥

शीलधर्म्यसाध्वर्थे विहितस्य प्रत्ययस्य स्थाने इर इत्यादेशो भवति । हँसनशीलः । हँसिरो । रोदनशीलः । रोइरो । लज्जाशीलः । लज्जिरो । जपशीलः । जपिरो । इत्यादि ॥

इति तद्धितादेशाः ॥

अथ शास्त्रोक्ताः कतिचिद्विभक्त्यर्थाः प्रदर्श्यन्ते ॥

ङसो ङम् ॥ २ । ३ । ३५ ॥

---

१ T. adds before this.—नवैकाद्वा । नव एक इत्येताभ्यां परस्य स्वार्थे द्विरुक्तो लो वा भवति । णवल्लो एक्को । अत्र दैवादित्वाद्वित्वम् । २ T. adds पक्षे मणा after it; P. has इत्युत्तरं पक्षे मणा after it. ३ पीअं । पीवलं M. ४ अन्धो । अन्धलो M. ५ °साधुकार्यार्थे T., M. ६ इत्यादेशः स्यात् T. ७ सहनशीलः T. ८ सहिरो T.

[1]ङेसिति चतुर्थी ङमिति षष्ठी । चतुर्थीस्थाने षष्ठी स्यात् । मुणिस्स मुणिणो भोअणं देहि । णमो देवस्स देवाण[3] ॥

तादर्थ्ये ङेस्तु ॥ २ । ३ । ३६ ॥

तादर्थ्यचतुर्थ्येकवचनस्थाने[4] षष्ठी वा[5] स्यात् । देवस्स । देवाय । देवार्थमित्यर्थः । 'ङेः' इति किम् । देवाणं ॥

वधाड्डाइ[6] च ॥ २ । ३ । ३७ ॥

वधात्[7] परस्य ङे स्थाने आइ इति डिद्वा स्यात् । चात्[8]तु षष्ठी । वहाइ । वहस्स । वहाय । वधार्थम्[9] ॥

क्वचिदसादेः ॥ २ । ३ । ३८ ॥

ङमनुवर्तते । द्वितीयादिविभक्तीनां स्थाने क्वचित् षष्ठी स्यात् । माहवस्स वन्दे । माधवं वन्दे । धणस्स लद्धो । धनेन लब्धः । चोरस्स भिहइ । चोराद्बिभेति । अन्तेउरस्स रमिउं आअओ । अन्तःपुरे रन्तुमागतः ॥

अस्टासोर्ङीप् ॥ २ । ३ । ३९ ॥

अस् द्वितीया टास् तृतीया तयोः स्थानेङीप् सप्तमी क्वचिद्भवति तु । गामे वहामि । ग्रामं वहामि । णअरे णजामि । नगरं नयामि । अत्र द्वितीयायाः । तेसुं अलंकआ पुहवी । तैरलंकृता पृथिवी । अत्र तृतीयायाः ॥

ङसिसष्टास् च ॥ १ । ३ । ४० ॥

ङसिसः पञ्चम्याः टास् तृतीया चकारात् सप्तमी भवति । चोरेण भिहइ । चोराद्बिभेति । अंदेपुरे रमिअ आअओ । अन्तःपुराद्रन्त्वा आगतः ॥

ङिपोस् ॥ २ । ३ । ४१ ॥

---

१ ङेस् चतुर्थी P., My. २ ङं षष्ठी My., P. ३ देवाणं M. ४ °कवचनस्य M. ५ M. drops वा. ६ पदात् M. ७ पदात् M. ८ चात् M.; चकारात् T. ९ पदार्थम् M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ङिपः सप्तम्याः स्थाने अम् द्वितीया क्वचित् स्यात्[1] । विज्जुज्जोअं भरइ रइं । विद्युद् द्योते स्मरति रतिम् ॥

प्रसङ्गादेकैकमित्यादि वीप्सास्थाने किंचिदुच्यते ।

वीप्सार्थात्तदचि सुपो मस्तु ॥ २ । २ । १ ॥

वीप्सार्थात् पदात् परस्य सुपःस्थाने तदचि तस्य वीप्सार्थस्य संबन्धिन्यचि परे मो वा स्यात् । एकैकं । एक्कमेक्कं । एक्कमेक्केण । अंगे अंगे । अंगमंगम्मि । पक्षे । एक्केक्कं । इत्यादि । एवं वीप्सास्थले सर्वत्र रूपाण्युदाहर्तव्यानि ॥

इति विभक्त्यर्थाः ॥

अथ निपाताः प्रदर्श्यन्ते[2] ।

वरइत्तगास्तृनाद्यैः ॥ २ । १ । ३० ॥

वर इत्त इत्यादयस्तृनादिप्रत्ययसहिताः स्वराद्यादेशविशेषिता बहुलं निपात्यन्ते ॥

वरइत्तो नूतनवरे ॥ १ ॥ अस्मिन्[3] वरइत्तो इति निपात्यते । वरइत्तो । **कणइल्लवाअडौ शुके ॥ २ ॥** कणइल्ल[4] वाअड इत्येतौ शुके निपात्येते । कणइल्लो । वाअडो । **मइलपुत्ती पुष्पवत्याम् ॥ ३ ॥** पुष्पवत्यां मइलपुत्ती इति प्रयोज्यम् । मइलपुत्ती । **द्विपे दुग्घोट्टदोग्घोट्टदूणाः ॥ ४ ॥** त्रय एते द्विपे निपात्यन्ते । दुग्घोट्टो । दोग्घोट्टो । दूणो । **धाराविरेचनशीले विरिचिरो ॥ ५ ॥** अस्मिन्नयं निपात्यते । विरिचरो । **सूरल्ली मध्याह्ने ॥ ६ ॥** मध्याह्नेयं प्रयोज्यः[5] । सूरल्ली । **कोमलविलासिनोर्वेल्लपाल्लौ ॥ ७ ॥** अनयोरयं निपात्यते । **नूपुरे सद्दालं ॥ ८ ॥** नूपुरेयं निपात्यते । सद्दालं । **भ्रमरे**

---

१ भवति T. २ T. has श्रीशिवाय नमः after this. ३ P. and My. drop from अस्मिन् to वरइत्तो. ४ P. and My. drop from कणइल्ल to वाअडो. ५ My. and P. drop it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अल्लिल्ल पुल्लंधअ रसाआः ॥ ९ ॥ एते त्रयो भ्रमरे निपात्यन्ते[1]। अल्लिल्लो । पुल्लंधओ । रसाओ । **लअणी कणई लइणा लतायाम्** ॥ १० ॥ त्रय एते लतायां निपात्यन्ते । लअणी । कणई । लइणा । **कनीयस्यां बहुज्जा** ॥ ११ ॥ अस्यामयं निपात्यते । [2]बहुज्जा । **भ्रातृजायायां भाउज्जा** ॥ १२ ॥ अस्यां भाउज्जा इति निपात्यते । [3]भाउज्जा । **मातुलात्मजास्याल्योर्मेहुणिआ** ॥ १३ ॥ अनयोरयं निपात्यते । मेहुणिआ । **रोदनशीले रिमिणो** ॥ १४ ॥ अस्मिन् रिमिण इति निपात्यते । रिमि[3]णो । **अडअणाछिच्छईपुण्णाळ्यः पुंश्चल्याम्** ॥ १५ ॥ त्रै[4]योऽस्यां निपात्यन्ते । अडअणा । छिच्छई । पुण्णाळी । **बहुमिथ्यावा[5]दिनि चप्पळओ** ॥ १६ ॥ अस्मिन्नयं निपात्यते । चप्पळओ । **पिव्वं जले** ॥ १७ ॥ [6]जले अयं निपात्यते । पिव्वं । **मघोणो मघवति** ॥ १८ ॥ [7]मघवत्ययं निपात्यते । मघोणो । **सइलासिओ मयूरे** ॥ १९ ॥ अस्मिन्नयं निपात्यते । स[8]ईलासिओ । [9]**प्रलपिते वाउल्लो** ॥ २० ॥ [10]प्रलपिते वाउल्लो इति निपात्यते । वाउल्लो । **मूर्खे पलहिअओ** ॥ २१ ॥ [11]अस्मिन्नयं निपात्यते । पलहिअओ । उपलहृदय इत्यर्थः । **चण्डि[12]कः कोपे** ॥ २२ ॥ कोपेयं निपात्यते । चण्डि[13]क्को । [14]**चण्डिज्जः पिशुनकोपयोः** ॥ २३ ॥ अनयोरयं निपात्यते । चण्डिज्जो । **म्लाने कुम्मणो** ॥ २४ ॥ अस्मिन्नयं निपात्यते । [15]कुम्मणो । **द्वेष्ये अच्छिहरुल्लो** ॥ २५ ॥ अस्मिन्नयं

---

१ M. drops this Sûtra; M. has it with this remark ग्रन्थान्तरेऽयं दृश्यते. २ My. and P. drop it. ३ My. and P. omit it. ४ अस्यां त्रयो M. ५ °वाचिनि M. ६ My. and P. drop the line. ७ My. and P. drop this line. ८ My. and P. omit it. ९ My. and P. omit it. १० My. and P. drop the line. ११ My. and P. drop from अस्मिन् to पलहिअओ. १२ चण्डिक्को M. १३ My. and P. omit it. १४ चण्डिज्जो M. १५ My. and P. drop it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निपात्यते[1] । अच्छिहरुल्लो[2] । रूपवति चच्छाइल्लो[3] ॥ २६ ॥ रूपवत्ययं[4] प्रयोज्यः । छाइल्लो[5] । कान्तिमान्[6] । **लतागृहे कुडङ्गकुडङ्गकुडुकोः** ॥ २७ ॥ अस्मिन्नेते निपात्यन्ते । कुडुङ्गो । कुडङ्गो । कुडुको । **वृद्धे जरण्डो** ॥ २८ ॥ वृद्धे अयं निपात्यते[7] । जरण्डो[8] । **अच्छिविअच्छी[9] परस्पराकृष्टौ** ॥ २९ ॥ अस्यां अच्छिविअच्छी[10] इति निपात्यते[11] । अच्छि[12] । विअच्छी । **धूमरी तुहिने** ॥ ३० ॥ तुहिने अयं निपात्यते । धूमरी[13] । **सोत्ती तरङ्गिण्याम्** ॥ ३१ ॥ अस्यामयं निपात्यते । सोत्ती[14] । **ग्रहभीते अहिसिओ** ॥ ३२ ॥ अस्मिन्नयं प्रयोज्यः । अहिसिओ[15] । **गवि गावी** ॥ ३३ ॥ गवि गावीति निपात्यते । गावी[16] । **उद्धुलपद्धलौ पार्श्वद्वयाप्रवृत्तौ** ॥ ३४ ॥ अस्यामुद्धल[17] पद्धल इत्येतौ निपात्येते । **अङ्गस्पर्शनिमित्तयोर्हासपुलकयोर्गज्जलिओ** ॥ ३५ ॥ अङ्गस्पर्शनिमित्ते हासे पुलके चायं निपात्यते । गज्जलिओ । **चित्तलं रम्ये** ॥ ३६ ॥ रम्ये अयं निपात्यते । चित्तलं[18] । **पाडहुकः प्रतिभुवि** ॥ ३७ ॥ प्रतिभुव्ययं[19] निपात्यते[20] । पाडहुकः[21] । **पासणिअपासाणिऔ साक्षिणि** ॥ ३८ ॥ अस्मिन्नेतौ[22] निपात्येते । पासणिओ । पासाणिओ । **अवरिज्जलाहिल्लावद्वैतलम्पटयोः** ॥ ३९ ॥ अनयोरेतौ[23] क्रमान्निपात्येते । अवरिज्जं । लाहिल्लो । **कडिल्लमाशीर्गहनदौवारिककटिवस्त्रनिर्विवरविपक्षेषु** ॥ ४० ॥

---

१ प्रयोज्यः My., P. २ Omitted in P., My. ३ चाइल्लो M. ४ My. and P. drop रूप—प्रयोज्यः. ५ चाइल्लो M. ६ M. drops it. ७ प्रयोज्यः T. ८ My. and P. omit it. ९ अच्चिविअच्ची M. १० अच्चिविअच्ची M. ११ निपात्येते M. १२ अच्चि । विअच्ची M. १३ My. and P. drop it १४ Omitted in P., My. १५ My. and P. omit it. १६ Omitted in P., My. १७ My. and P. drop the line. १८ My. and P. omit it. १९ My. and P. omit the line. २० निपात्यः T. २१ पाडहुओ M. २२ My. and P. omit the line. २३ My. and P. drop from अनयो—to निपात्येते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आशीःप्रभृतिषु षट्सु कडिल्लमिति निपात्यते । कडिल्लं[1] । **रूवसिणी कुडुंबीअं रूपवतीसुरतयोः ॥ ४१ ॥** रूपवत्यां सुरते च क्रमादेतौ[2] स्तः । रूवसिणी । कुडुंबीअं । **अन्तरिज्जं रशनाकटिसूत्रयोः ॥ ४२ ॥** अनयोरयं निपात्यः । अन्तरिज्जं । **अवड्डुल्लिअं कूपादिनिपतिते ॥ ४३ ॥** अस्मिन् अवड्डुल्लिअं इति निपात्यते । अवड्डुल्लिअं[3] । अवड्डुक्किअं[4] इति केचित् । **पिप्पडिअबुड्डिरौ यत्किंचित्पठितमहिषयोः ॥ ४४ ॥** यथाक्रमं निपात्येते । पिप्पडिअं । बुड्डिरो । **सरिसाहुलगुमिलौ सदृशमूढयोः ॥ ४५ ॥** अनयोरेतौ क्रमान्निपात्येते । सरिसाहुलो । गुमिलो । **कच्चं कार्ये ॥ ४६ ॥** अस्मिन्नयं[5] स्यात् । कच्चं । **घडिआघडाघड्यौ गोष्ठ्याम् ॥ ४७ ॥** गोष्ठ्यामेतौ निपात्यौ[6] । घडिआ । घडाघडी ॥ **निश्रेण्यां कमणी ॥ ४८ ॥ किरिकिरिआ कर्णोपकर्णिकाकुतुकयोः ॥ ४९ ॥** अनयोरयं प्रयोज्यः । किरिकिरिआ । **अण्णइकः सर्वार्थतृप्ते ॥ ५० ॥** सर्वार्थे[7] यस्तृप्तस्तस्मिन्नयं निपात्यः । अण्णइओ । **साहुली शाखायाम् ॥ ५१ ॥** शाखायामयं निपात्यः । साहुली[8] । **दृष्टार्थयाचनशीले जंपेक्खिमग्गिरओ ॥ ५२ ॥** अस्मिन्नयं निपात्यते । जंपेक्खिमग्गिरओ । **गअसाउल्लसिहंडहिल्लौ[10][11] विरक्तबालकयोः ॥ ५३ ॥** अनयोरेतौ क्रमाद्भवतः । गअसाउल्लो[12] । सिहंडहिल्लो[13] । **धूर्तवृषभे अलवलवसहो ॥ ५४ ॥** अस्मिन्नयं प्रयोज्यः । अलवलवसहो[14] । **प्रणयकोपे खुरहखुडी ॥ ५५ ॥** अस्मिन्नयं निपात्यः[15] । खुरहखुडी । **हिमकालदुर्दिने सीउल्लं सीउट्टं च ॥ ५६ ॥** अस्मिन्नेतौ निपात्येते[16] ।

---

१ My. and P. omit it. २ यथाक्रम° T. ३ My. and P. omit it. ४ M. omits अव—केचित्. ५ My. and P. omit the line. ६ निपात्येते T. ७ M. omits it. ८ My. and P. omit सर्वार्थे—निपात्यः. ९ My. and P. omit it. १० °साहुळ M. ११ °डइलौ M. १२ °साहुळो M. १३ °डइळो M. १४ My. and P. drop it. १५ निपात्यते My., P. १६ प्रयोज्यौ P., My.

सीउल्लं । सीउट्टं । **तित्तिवरण्डौ तात्पर्यप्राकारयोः** ॥ ५७ ॥ अनयोरेतौ क्रमात् स्तः । तित्ति । वरंडो । वरण्डः संस्कृतेपीति केचित् । **त्रपायां हीरणा**[1] ॥ ५८ ॥ अस्यामयं स्यात् । हीरणा[2] । **ग्रामभक्षके गामेरेडो**[4] ॥ ५९ ॥ [3]योन्तः स्थित्वा ग्रामं भुङ्क्ते तस्मिन् गामेरेडो[5] इति निपात्यते । गामेरेडो । **लडहावेल्लर्यौ विलासवत्याम्** ॥ ६० ॥ अस्यामेतौ स्तः । लडहा । वेल्लरी । **डुम्मइणीलज्जालुइण्यौ कलहकारिणीत्रपावत्योः** ॥ ६१ ॥ अनयोरेतौ क्रमात् स्तः । डुम्मइणी । लज्जालुइणी । **तण्णाअचिक्खअणावार्द्रासहनयोः** ॥ ६२ ॥ आर्द्रे असहने चैतौ[6] क्रमात् स्तः । तण्णाअं । चिक्खअणो । **वेणिअसुण्हसिऔ वचनीयनिद्राशीलयोः** ॥ ६३ ॥ अनयोरेतौ क्रमात् स्तः । वेणिअं । सुण्हसिओ । **वप्पिअबन्धोल्लौ**[7] **केदारमेळकयोः**[8] ॥ ६४ ॥ अनयोः क्रमादेतौ स्तः । वप्पिओ । बन्धोल्लो[9] । **वारिज्जो**[10] **विवाहे** ॥ ६५ ॥ [11]अस्मिन्नयं स्यात् । वारिज्जो[12] । **हडहडसाउल्लावनुरागे** ॥ ६६ ॥ अस्मिन्नेतौ स्यातास् । हडहडो । साउल्लो । **माणंसी मायाविमनस्विनोः** ॥ ६७ ॥ अनयोरयं[13] निपात्यः । माणंसी[14] । **कोडिअकोडिल्लौ पिशुने** ॥ ६८ ॥ अस्मिन्नेतौ निपात्येते[15] । कोडिओ । कोडिल्लो । **अट्टणगंजोलौ वार्तज्ञसमाकुलयोः**[16] ॥ ६९ ॥ अनयोरेतौ स्याताम् । अट्टणो । गंजोलो । **वन्दिनि वंडिणो** ॥ ७० ॥ [17]अस्मिन्नयं निपात्यः । वंडिणो । **तत्तिलतच्छिलौ तत्परे** ॥ ७१ ॥ [18]अस्मिन्नेतौ निपात्येते । तत्तिलो । तच्छिलो । **ऊसुंभिअं रुद्धगलरोदने**

---

१ हिरणा M. २ My. and P. omit the line. ३ M. has अस्यामयं स्यात् for योन्तः स्थित्वा—निपात्यते. ४ गावरेडो M. ५ गावरेडो M. ६ च क्रमादेतौ My., T. ७ बन्दोल्लौ M. ८ °मेळकबन्धयोः M. ९ बन्दोल्लो M. १० वारिज्जुर्वि° M. ११ My. and P. drop the line. १२ वारिज्जु M. १३ स्यात् M. १४ My. and P. omit it. १५ प्रयोज्यौ T. १६ आत्मज्ञ° M. १७ My. and P. drop the line. १८ My. and P. drop अस्मिन्नेतौ निपात्येते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ७२ ॥ असिन्नयं स्यात् । ऊसुंभिअं । **णिउक्कबम्हालठाणिज्जउ-वउज्जास्तूष्णीकापसारगौरवोपकारिषु** ॥ ७३ ॥ क्रमादेतेष्वेते स्युः । णिउक्को । बम्हालो । ठाणिज्जं । उवउज्जो । **एक्कल्लमहल्लौ प्रबल-मुखरयोः** ॥ ७४ ॥ [1]अनयोरेतौ [2]स्याताम् । एक्कल्लो । महल्लो । **माउ-सिआ माउच्छा च मातृष्वसरि** ॥ ७५ ॥ अस्यामेतौ स्याताम् । माउसिआ । माउच्छा ॥ **कुच्छिमई गर्भवत्याम्** ॥ ७६ ॥ [3]अस्यामयं स्यात् । कुच्छिमई । [4]**रिंछोळीधोरण्यौ पङ्क्तौ** ॥ ७७ ॥ [5]अस्या-मेतौ स्याताम् । [6]रिंछोळी । [7]धोरंणी । **पटकुट्यां पडमा** ॥ ७८ ॥ **यूनि जुअणो** ॥ ७९ ॥ **करमरी हठहृतायाम्** ॥ ८० ॥ **दववर्त्मनि दड्डाळी** ॥ ८१ ॥ **कृत्रिमे कारिमम्** ॥ ८२ ॥ **जंघालुअजंघामऔ द्रुते** ॥ ८३ ॥ [8]एतौ द्रुते स्याताम् । जंघालुओ । जंघामओ । **बला-मोडी बलात्कारे** ॥ ८४ ॥ असिन्नयं स्यात् । बलामोडी । **चक्कलं वर्तुले** ॥ ८५ ॥ [9]असिन्निदं स्यात् । चक्कलं ॥ **बहुल्ली क्रीडोचित-सालभञ्जिकायाम्** ॥ ८६ ॥ अस्यामयं स्यात् । [10]बंहुल्ली । **मत्ते मत्तवालो** ॥ ८७ ॥ [11]मत्तवालो । **बहुल्लिआ ज्येष्ठभ्रातृवध्वाम्** ॥ ८८ ॥ [12]अस्यामयं स्यात् । बहुल्लिआ । **जंभणंभणः स्वैरभा[13]षिणि** ॥ ८९ ॥ असिन्नयं स्यात् । जंभणंभणो । **भाइरभेज्जलभेज्जओज्जरा भीरौ** ॥ ९० ॥ चत्वार एते निपात्यन्ते । भाइरो । भेज्जलो । भेज्जो । ओज्जरो । **आहडं सीत्कारे** ॥ ९१ ॥ सीत्[14]कारे आहडं स्यात् । आहडं । [15]**कोआपिउला कोकि[16]लायाम्** ॥ ९२ ॥ [17]अस्यामयं निपा-

---

१ My. and P. drop अनयो—स्याताम्. २ क्रमात् स्याताम् T. ३ My and P. omit the line. ४ रिंभोळिदो° M. ५ My. and P. drop the line. ६ रिंभोळि M. ७ दोरणी M. ८ असिन्नेतौ स्याताम् M. ९ P. and My. drop the line. M. has चक्कलं only in place of the line. १० My. and P. drop it. ११ My. and P. omit it. १२ P. and My. omit अस्यामयं स्यात्. १३ °भाषणे T. १४ P. and My. omit the line. १५ राअ° M. १६ कोकिले T. १७ अस्मिन्नयं स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यते । काँअपिउला । **मुहलं मुखे** ॥ ९३ ॥ मुँहलं । **गत्तडी गायिकायाम्** ॥ ९४ ॥ अस्यामयं स्यात् । गैंत्तडी । **दुद्दोलना गवि** ॥ ९५ ॥ गव्ययं निपात्यिते । दुद्दोल्ना । **माभाय्यभये** ॥ ९६ ॥ अभये अयं स्यात् । माँभाइ । **तोमरिकः शस्त्रमार्जने** ॥ ९७ ॥ अँस्मिन्नयं स्यात् । तोमरिओ । **वहुहाडिणी वध्वा उपरि परिणीतायाम्** ॥ ९८ ॥ अस्यामयं स्यात् । वहुहाडिणी । **रूअरूइआ उत्कलिकायाम्** ॥ ९९ ॥ अस्यामयं स्यात् । रूअरूइआ । **पुप्फीपिउसिआपिउच्छाः पितृष्वसरि** ॥ १०० ॥ अस्यामेते स्युः । पुप्फी । पिउसिआ । पिउच्छा । **आसन्नप्रसवायामणुसूआ** ॥ १०१॥ अस्यामयं स्यात् । अणुसूआ । **भाँगिनेये भच्चो** ॥ १०२ ॥ अँस्मिन्नयं स्यात् । भच्चो । **ओहल्ल्यपसृतौ** ॥ १०३ ॥ अपसृतावयं स्यात् । ओहली । **मम्मक्कमडप्परौ गर्वे** ॥ १०४ ॥ अस्मिन्नेतौ स्याताम् । ममक्को । मडप्परो ।

इति वरदत्तादयः ॥

गोणाद्याः ॥ १ । ३ । १०५ ॥

गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमविकारा बहुलं निपात्यन्ते ।

गवि गोणा ॥ १ ॥ गेव्ययं स्यात् । गोणा । **तल्लतल्लडतलानि तल्पे** ॥ २ ॥ अस्मिन्नेते स्युः । तल्लं । तल्लडं । तलं । **धिरत्थु धिगस्त्वित्यर्थे** ॥ ३ ॥ अस्मिन्नयं स्यात् । **गोलागोदे गोदावर्याम्** ॥ ४ ॥ अस्यामेतौ स्याताम् । गोला । गोदा । गोला संस्कृतेपीति

---

१ राअ° M. २ My. and P. omit it. ३ P. and My. omit it. ४ स्यात् My., P. ५ Omitted in My., P.; T. has माभाई. ६ My. and P. omit अस्मिन्नयं स्यात्. ७ भच्चो भागिनेये T. ८ M. omits अस्मिन्—स्यात्. ९ My. and P. omit the line.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचित् । ओसाअण महीशाने ॥ ५ ॥ अस्मिन्नयं स्यात् । आपोशन इति केचित् । वणई वनराजौ ॥ ६ ॥ अस्यामयं स्यात् । वणई । पंगुरणं प्रावरणे ॥ ७ ॥ ओसिरणगोसौ [1]व्युत्सर्जनप्रत्यूषयोः ॥ ८ ॥ अनयोरेतौ क्रमाद् [2]भवतः । थोवथेवथोक्का स्तोके ॥ ९ ॥ आअविरुऔ अविरुद्धयोः ॥ १० ॥ पत्थेवाअवेलम्बौ पाथेयविडम्बनयोः ॥ ११ ॥ अनयोरेतौ क्रमात् स्तः । पत्थेवाओ । वेलम्बो । बालबुद्बुदकरीरेषु बाअबुलुबुलकरिल्लाः ॥ १२ ॥ [3]एष्वेते क्रमात् स्युः । बाओ । बुलबुलो । करिल्लो । ऊआदोग्गधणिआ यूकयुग्मधन्यासु ॥ १३ ॥ एष्वेते क्रमात् स्युः । ऊआ । दोग्गं । धणिआ । उद्वहने णिव्वहणं ॥ १४ ॥ णिव्वहइ । उद्वहतीत्यर्थः । छि छि धिग्धिगित्यर्थे ॥ १५ ॥ धिग्धिगित्यर्थे छिछि इति स्यात् । हूलाकडी ॥ १६ ॥ [4]अस्यामयं स्यात् । ग्रहिल्लो ग्रहले ॥ १७ ॥ अस्मिन्नयं स्यात् । गोसमूहे गोणिक्को ॥ १८ ॥ गोसमूहे गोणिक्को इति स्यात् । अयुजरेवई अचिरयुवत्याम् ॥ १९ ॥ [5]अस्यामयं स्यात् अयुजरेवई । [6]आणरहू नववध्वाम् ॥ २१ ॥ [7]अस्यामयं स्यात् । आणरहू । असुरे अमओ ॥ २२ ॥ [8]असुरे अयं स्यात् । अमओ । पण्णवण्णा पञ्चपञ्चाशति ॥ २३ ॥ अस्मिन्नयं स्यात् । पण्णवण्णा । तेवण्णा त्रिपञ्चाशति ॥ २४ ॥ पण्णा पञ्चाशति ॥ २५ ॥ गामहणघुसिमे ग्रामस्थानघसृणयोः ॥ २६ ॥ अनयोरेतौ क्रमात् स्तः । गामहणं । घुसिमं । छटायां छट्टा ॥ २७ ॥ पाउरणबइल्लौ प्रावरणबलीवर्दयोः ॥ २८ ॥ अनयोरेतौ क्रमात् स्तः । पाउरणं । बइल्लो । हिज्जा ह्यस्थाने ॥ २९ ॥ ह्य इत्यर्थे हिज्जेति निपात्यते ।

---

१ प्रत्यूषव्युत्सर्जनयोः T. २ स्तः T. ३ एषु क्रमादेते T. ४ My. and P. omit the line. ५ My. and P. omit the line. ६ Sûtra 20 is not found. It is given in the Appendix to the P. as घुग्गुळू अभिसारिकायाम् । ७ My. and P. omit the line. ८ P. and My. omit the line.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

हिज्जा । **त्रिचत्वारिंशति तेआलिसा** ॥ ३० ॥ अस्मिन्नयं स्यात् । तेआलिसा । **असंघडोसिण्यावाथाज्योत्स्नयोः** ॥ ३१ ॥ अनयो-रेतौ क्रमात् स्तः । असंघो । डोसिणी । **लकुडो लगुडे** ॥ ३२ ॥ **छेणो स्तेने** ॥ ३३ ॥ **कक्खडकक्खलौ कर्कशे** ॥ ३४ ॥ **अलाबूकलत्रयोः कलबूकत्ते** ॥ ३५ ॥ अनयोरेतौ क्रमात् स्तः । कलबू । कत्तं । **निलये णळिअणिहेळणे** ॥ ३६ ॥ अस्मिन्नेतौ स्याताम् । णळिअं । णिहेळणं । **णिक्कडणिरासौ निश्चयनृशंसयोः** ॥ ३७ ॥ अनयोरेतौ क्रमात् स्तः । णिक्कडो । णिरासो । **विहुंडुअ-णिंप्फंसौ विधुन्तुदनिस्त्रिंशयोः** ॥ ३८ ॥ अनयोरेतौ क्रमात् स्तः । विहुंडुओ । णिंप्फंसो । **बहिअकोलीरे मथितकुरुविन्दयोः** ॥ ३९ ॥ अनयोरेतौ क्रमात् स्तः[3] । वहिओ । कोळीरं । **खेड्डं खेले** ॥ ४० ॥ **विउसग्गव्युडौ व्युत्सर्गविटयोः** ॥ ४१ ॥ [4]अनयोः क्रमादेतौ स्तः । विउसग्गो । व्युडो । **संघअणघाअणौ संहननगायनयोः** ॥ ४२ ॥ अनयोरेतौ क्रमात् स्याताम् । संघअणं । घाअणो । **मत्कुणककुदज-म्बालेषु डेंकुणकउडसेवालाः** ॥ ४३ ॥ एतेष्वेते क्रमात् स्युः । डेंकुणो । कउडं । सेवाळं । **अथक्कखुड्डअवड्डुअरा अकांडक्षुल्लक-बृहत्तरेषु** ॥४४॥ एष्वेते क्रमात् स्युः । अथक्कं । खुड्डुओ । वड्डुअरो । **आनने आणुअं** ॥ ४५ ॥ **संगोल्लसामरीसिप्पितलाराः संघातशा-ल्मलीसूचीतलवरेषु** ॥ ४६ ॥ एषु क्रमादेते स्युः । संगोल्लं । सामरी । सिप्पी । तलारो । **अव्वा अम्बायाम्** ॥ ४७ ॥ [5]अस्यामयं स्यात् । अव्वा । **पम्मिहीमोरजच्छन्दाः पाणिभीमारस्वच्छन्देषु** ॥ ४८ ॥ एतेष्वेते क्रमात् स्युः । पम्मी । हीमोरं । जच्छंदो । **दिनमुखकुडुक शीर्षत्रसंस्तरेष्वणुदिवकुड्डसीसक्कसत्थराः** ॥ ४९ ॥ एषु चत्वारः

---

१ °णिफंसौ My. २ णिफंसो My. ३ स्याताम् T. ४ My. and P. drop अनयोः—स्तः. ५ P. and My. omit the line.

क्रमादेते स्युः ॥ अणुदिवं । कुड्डं । सीसक्कं । सत्थरो । **वित्थिरवी-विकडप्पदूसळा विस्तारवीचिकलापदुर्भगेषु ॥ ५० ॥** एष्वेते क्रमात् स्युः । वित्थिरं । वीवी । कडप्पो । दूसळो । **छिल्लडंभि-अडेड्डुराश्छिद्रदाम्भिकदर्दुरेषु ॥ ५१ ॥** एतेष्वेते क्रमात् स्युः । छिल्लं । डंभिओ । डेड्डुरो । **गण्डस्थले गल्लो ॥ ५२ ॥ वीली वीथ्याम् ॥ ५३ ॥ पाडिपिद्धिपडिसिद्धी प्रतिस्पर्धायाम् ॥५४॥** एतावस्यां स्याताम् । **वंजरमजरौ मार्जारे ॥ ५५ ॥** अस्मिन्नेतौ स्याताम् । वंजरो । मंजरो । **गृध्रे गहरो ॥ ५६ ॥** अस्मिन्नयं स्यात् । गहरो । **उअअजमावृजौ ॥ ५७ ॥** ऋजावेतौ स्याताम् । उओ । अजमो । **अरणितणेसिसाळक्किआः सरणितृणराशिशारिकासु ॥ ५८ ॥** एष्वेते क्रमाद् भवन्ति । अरणी । तणेसी । साळक्किआ । **दुःखचतुष्पथकराळेषु दुग्गचउक्ककलेराः ॥ ५९ ॥** एषु त्रयः क्रमाद् भवन्ति । दुग्गं । चउक्कं । कलेरं ।

इति गोणाद्याः ।

गहिआद्याः ॥ १ । ४ । १२१ ॥

गहिआदयो निर्वचनगोचरा निपात्यन्ते ।

ग्राह्यायां गहिआ ॥ १ ॥ अस्यामयं स्यात् । **णन्दिणीवडिणायौ धेनुघर्घरकण्ठयोः ॥ २ ॥ वइरोडाविणअवइच्छिण्णाणडाजडछि-च्छअच्छिण्णाळा जारे ॥ ३ ॥** एते सप्त जारे निपात्यन्ते । वइरोडो । अविणअवई । च्छिण्णो । अणडो । अजडो । छिच्छओ । च्छिण्णाळो । **दूत्यामत्तिहरीसंचारीमदोळीपेसणआळीमराळीसहउत्थिआः ॥४॥** दूत्यामेते निपात्यन्ते । **पडिसोत्तपडिक्खरौ प्रतिकूले ॥ ५ ॥** अस्मिन्नेतौ स्याताम् । **जोअदोसारअणसमुद्धणवणीअदोसणिजन्ता-**

---

१ My. and P. omit the line. २ निपात्याः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चन्द्रे ॥ ६ ॥ एते चत्वारश्चन्द्रे निपात्यन्ते । जोण्हो । दोसारअणो । समुद्दणवणीअं । दोसणिजन्तो । किमिघरवसणं कौशेये ॥ ७ ॥ कौशेयेयं निपात्यते । मुहरोमराइविसारौ भ्रूसैन्ययोः ॥ ८ ॥ अनयोरेतौ क्रमात् स्तः । मुहरोमराई । विसारो । चिरिचिरिआचिलिचिलिआ धारायाम् ॥ ९ ॥ समुद्दहरमम्बुगृहे ॥ १० ॥ तंबुकुसुमं कुरवककुरण्टकयोः ॥ ११ ॥ फणिनि पाअपअलाओ ॥ १२ ॥ अस्मिन्नेतौ निपात्यौ । पाओ । पअलाओ । अहिअलो क्रोधे ॥ १३ ॥ अयं निपात्यः । स्तने सिहिणं ॥ १४ ॥ अस्मिन्नयं स्यात् । अस्थिरे थिरण्णेसो ॥ १५ ॥ अस्थिरे थिरण्णेसो निपात्यः । जोइक्खसूरंगौ दीपे ॥ १६ ॥ दीपे एतौ स्तः । जोइक्खो । सूरंगो । थेवो बिन्दौ ॥ १७ ॥ पासावअकोप्पौ गवाक्षापराधयोः ॥ १८ ॥ अनयोरेतौ क्रमाद् भवतः । उद्धते उम्महउद्धुणपहट्ठाः ॥ १९ ॥ जणउत्तजण्णहरौ ग्रामप्रधाननरराक्षसयोः ॥ २० ॥ एतयोरेतौ स्तः । जणउत्तो । जण्णहरो । आरनाळथेरोसणबम्हहरमम्बुजे ॥ २१ ॥ अम्बुजे त्रय एते निपात्यन्ते । आरनाळं । थेरोसणं । बम्हहरं । कंदोट्टं कलिमं चोत्पले ॥ २२ ॥ एतावुत्पले प्रयोज्यौ । रअणिद्धअं चंदोज्जं कुमुदे ॥ २३ ॥ एतौ कुमुदे निपात्यौ । रअणिद्धअं । चंदोज्जं । धूमद्धअमहिसी कृत्तिकासु ॥ २४ ॥ अवहोओ विरहे ॥ २५ ॥ लंबावेल्लीवेल्लरिआ वल्लरीकेशयोः ॥ २६ ॥ अनयोरेते स्युः । घरअंदं मुकुरे ॥ २७ ॥ अस्मिन्नयं स्यात् । आआसतअं हर्म्यपृष्ठे ॥ २८ ॥ अस्मिन्नयम् । सुरद्धओ दिवसे ॥ २९ ॥ दिवसेयं स्यात् । सुरद्धओ । प्रथमरजस्वलारक्तवस्त्रे आणंदवसो ॥ ३० ॥ अस्मिन्नयं स्यात् । निमीलनलाक्षारक्तपृष्ठेष्वच्छिवडणवल्लविअणीसंकाः ॥ ३१ ॥ एष्वेते क्रमा-

१ चन्द्रे एते चत्वारः स्युः T. २ निपात्यः T. ३ सिहिणं स्तने T. ४ स्तने सिहिणमिति स्यात् T. ५ थिरण्णेसो अस्थिरे T. ६ My. and P. drop the line. ७ निपात्यौ T. ८ निपात्यौ T. ९ दिवसे सुरद्धओ निपात्यः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निपात्याः । अच्छिवडणं । वल्लविअं । णीसंको । **एलविलो धनिवृषयोः** ॥ ३२ ॥ अनयोरयं निपात्यते । एलविलो । **सुहरओ धारिकागृहचटकयोः** ॥ ३३ ॥ अनयोरयं निपात्यते । सुहरओ । **णिम्मीसुअहट्टमहट्टौ निश्मश्रुकयुवस्वस्थयोः** ॥ ३४ ॥ अनयोरेतौ क्रमात् स्याताम् । णिम्मीसुओ । हट्टमहट्टो । **णिहुअजहणरोहौ सुरतोर्वोः** ॥ ३५ ॥ सुरते ऊरौ चैतौ क्रमात् स्याताम् । णिहुअं । जहणरोहो । **अच्छुद्धसिरी मनोरथाधिकफलप्राप्तौ** ॥ ३६ ॥ फलप्राप्तावयं निपात्यते । अच्छुद्धसिरी । अब्बुद्धसिरीति केचित् । **पल्लोट्टजीहाउज्झहरौ रहस्यभेदिनि** ॥ ३७ ॥ **पिशाचे परेओ** ॥ ३८ ॥ अस्मिन्नयं प्रयोज्यः । [1]**चोरधूर्तयोर्बहुजाणो** ॥ ३९ ॥ [2]अयं चोरे धूर्ते च निपात्यते । जारधूर्तयोरिति केचित् । बहुजाणो । **जोईउज्झल्लौ विद्युत्प्रबलयोः** ॥ ४० ॥ अनयोरेतौ क्रमात् स्तः । जोई । उज्झलो । **भिंगं नीलस्वकृतयोः** ॥ ४१ ॥ नीले स्वकृते चायं स्यात् । **परिधाने णिअद्धणं** ॥ ४२ ॥ **जइणोसुअं चल्लणकं च जघनांशुके** ॥ ४३ ॥ अस्मिन्नेतौ स्याताम् । जहणोसुअं । चल्लणकं । **पाउरणं कवचे** ॥ ४४ ॥ कवचेयं प्रयोज्यः । पाउरणं । [3]**कम्पापचारयोरोअल्लो** ॥ ४५ ॥ [4]अनयोरयं स्यात् । ओअल्लो । **करावाते चपेटा** ॥ ४६ ॥ अस्मिन्नयं स्यात् । **रइलक्खगोसण्णौ जघनमूर्खयोः** ॥ ४७ ॥ अनयोरेतौ क्रमात् स्याताम् । रइलक्खं । गोसण्णो । **वावडपुरिल्लौ कुडुंबिदैत्ययोः** ॥ ४८ ॥ अनयोरेतौ क्रमात् स्तः । वावडो । पुरिल्लो । **परभत्तचच्चिकौ भीरुस्थापकयोः** ॥ ४९ ॥ अनयोरेतौ क्रमात् स्तः । परभत्तो । चच्चिक्को । **काळभट्टिअइद्धग्गिधूमास्तमिस्रविष्णुतुहिनेषु** ॥ ५० ॥ एषु क्रमात् त्रयो निपात्याः । काळं । भट्टिओ । इद्धग्गिधूमो । **पत्थरओवाअऔ पादताडनापातपयोः**

---

१ बहुजाणो चोरधूर्तयोः T. २ अनयोर्बहुजाणो निपात्यः T. ३ ओअल्लो कम्पापचारयोः T. ४ कम्पे अपचारे च ओअल्लो इति स्यात् । T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ५१ ॥ अनयोरेतौ क्रमात् स्तः । पत्थरं । ओवाअओ । **पिउच्चा माउआ च सख्याम्** ॥ ५२ ॥ सख्यामेतौ निपात्येते । पिउच्चा । माउआ । **पोरत्थदोसौ मत्सरिकोपयोः** ॥ ५३ ॥ अनयोरेतौ क्रमात् स्तः । पोरत्थो । दोसो । **चच्चापम्हलौ तलाहतिकेसरयोः** ॥ ५४ ॥ एतयोरेतौ निपात्येते । चच्चा । पम्हलो । **खंधलट्ठि-खंधमसौ स्कन्धयष्टौ** ॥ ५५ ॥ अस्यामेतौ स्याताम् । खंधलट्ठी । खंधमसो । **तंबकिमिअग्गिआयाविन्द्रगोपे** ॥ ५६ ॥ अस्मिन्नेतौ स्याताम् । तंबकिमी । अग्गिआयो । **अनर्थे विहडणो** ॥ ५७ ॥ **जोअणजोअडौ खद्योते** ॥ ५८ ॥ **जोइअदरवल्लहौ खद्योत-कातरयोः** ॥ ५९ ॥ क्रमादनयोरेतौ स्याताम् । जोइओ । दरवल्लहो । **भोइअपंडरंगौ महेशग्रामेशयोः** ॥ ६० ॥ अनयोरेतौ क्रमात् स्तः ॥ **संकरसग्गहौ रथ्यामुक्तयोः** ॥ ६१ ॥ अनयोरेतौ क्रमात् स्याताम् । संकरो । सग्गहो । **अर्थदरे पअरो** ॥ ६२ ॥ **सुरायां मइमोहिणी** ॥ ६३ ॥ **दुर्दुरे धारावासो** ॥ ६४ ॥ **आस्यकलहयोः कमलं** ॥ ६५ ॥ अनयोरयं स्यात् । **वेणुसाअधुअराऔ भ्रमरे** ॥ ६६ ॥ अस्मिन्नेतौ स्याताम् । वेणुसाओ । धुअराओ । अस्मिन् प्रकरणे लिङ्ग-व्यत्ययः प्रयोगाधीनः ॥

इति गहिआद्याः ॥

वा पुआय्याद्याः ॥ १ । २ । ११० ॥

पुआई इत्यादयः शब्दाः स्वराद्यादेशविशेषिता वा निपात्यन्ते ।

उन्मत्तपिशाचयोः[1] पुआई ॥ १ ॥ अनयोरयं निपात्यते[2] । पुआई । **ऊर्णांदिअमानन्दिते** ॥ २ ॥ **तुंबुरौ दोबुरो** ॥ ३ ॥ **माहिवाओ माघवाते** ॥ ४ ॥ **सइकोडी शतकोटौ** ॥ ५ ॥ **माइंदो माकन्दे** ॥ ६ ॥ **ओंदुरो उन्दुरौ** ॥ ७ ॥ **आळिआ**

---

१ पिशाचोन्मत्तयोः T. २ स्यात् T.

आल्याम् ॥ ८ ॥ अस्मिन्नयं स्यात् । आळिआ । **तणसोल्लि तृणशून्ये** ॥ ९ ॥ अस्मिन्नयं स्यात् । तणसोल्ली । **अरिष्टदैत्यकाकेषु रिट्ठो** ॥ १० ॥ एष्वयं स्यात् । रिट्ठो । **द्रुते दुरिअं** ॥ ११ ॥ अस्मिन्नयं स्यात् । दुरिअं । **किरो किरौ** ॥ १२ ॥ **वामलूरो वामलूरौ** ॥ १३ ॥ **विसो वृषमूषिकयोः** ॥ १४ ॥ अनयोरयं स्यात् । विसो । **वंदं वृन्दे** ॥ १५ ॥ वृन्दे अयं स्यात् । वंदं । **हेरिंबो हेरम्बे** ॥ १६ ॥ हेरम्बे अयं स्यात् । हेरिंबो । **चिक्कं स्तोके** ॥१७॥ स्तोके अयं स्यात् । चिक्कं । **चरणायुधे चलणाओहो** ॥ १८ ॥ अस्मिन्नयं स्यात् । चलणाओहो । **उन्मत्तादुश्शीलयोर्वअणिआ** ॥ १९ ॥ अनयोरयं स्यात् । वअणिआ । उन्मत्ता दुःशीला च । **महालयपक्षे महळयपक्खो** ॥ २० ॥ अस्मिन्नयं स्यात् । महळयपक्खो । **चंचरीके चच्चरिओ** ॥ २१ ॥ अस्मिन्नयम् । चच्चरिओ । **मुसलं मांसले** ॥ २२ ॥ इत्यादि ॥

अपुण्णगाः क्तेन ॥ ३ । १ । १३२ ॥

अपुण्णादयः शब्दाः क्तप्रत्ययेन सह निपात्यन्ते ।

आक्रान्ते अपुण्णं ॥ १ ॥ अस्मिन्नयं स्यात् । अपुण्णं । **अम्मच्छपहट्टावसंबद्धाचिरतरदृष्टयोः** ॥ २ ॥ असंबद्धे अचिरतरदृष्टे च एतौ क्रमात् स्याताम् । अम्मच्छं । पहट्टो । **उल्लोक्कमरिअओसण्णात्रुटिते** ॥ ३ ॥ एते त्रयस्त्रुटिते निपात्यन्ते । उल्लोक्को । मरिओ । ओसण्णो । **गुज्जलिअपेज्जलिऔ संघटिते** ॥ ४ ॥ अस्मिन्नेतौ निपात्येते । गुज्जलिओ । पेज्जलिओ । **पसल्लिअगळद्धअऊरुमल्लाः प्रेरिते** ॥ ५ ॥ [2]निपात्यन्ते । पसल्लिओ । गळद्धओ । ऊरुमल्लो । **अवकीर्णे उक्खणं** ॥ ६ ॥ अस्मिन्नयं स्यात् । उक्खणो । **ओसट्टविहिमिहिऔ विकसिते** ॥ ७ ॥ एतौ विकसिते स्तः । ओसट्टो । विहिमिहिओ । **अर्दिते उद्धरिअं** ॥ ८ ॥ **उपसर्पिते उल्लिओ** ॥ ९ ॥

---

१ P. omits it. २ एते चत्वारः प्रेरिते निपात्यन्ते T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मिन्नयं स्यात् । उल्लिओ । **छिन्नच्छिद्रतयोः कडद्दरिअं ॥ १० ॥** अनयोरयं निपात्यते । कडद्दरिअं । **झडिअपरिहाइऔ श्रान्तपरिक्षीणयोः ॥ ११ ॥** अनयोरेतौ क्रमात् स्याताम् । झडिओ । परिहाइओ । **उक्कज्जणिक्कज्जतडकडिअउच्चुगा अनवस्थिते ॥ १२ ॥** अस्मिन्नेते निपात्यन्ते । उक्कज्जो । णिक्कज्जो । तडकडिओ । उच्चुगो । **उद्धअपुव्वंगउच्चुरणउच्चल्लाः शान्तमुण्डितोच्छिष्टोद्विग्नेषु ॥ १३ ॥** एषु चत्वारः क्रमान्निपात्यन्ते । उद्धओ । पुव्वंगो । उच्चुरणो । उच्चल्लो । **चकितक्रान्तयोरुव्विडं ॥ १४ ॥** अनयोरयं निपात्यते । उव्विडं । **वहइअमाकासिअं च पर्याप्ते ॥ १५ ॥** पर्याप्ते द्वयं निपात्यते । वहिइअं । आकासिअं । **उविद्धणाळीगोरडितहिद्धास्त्रस्ते ॥ १६ ॥** चत्वार एते निपात्याः । उविद्धो । णाळी । गोरडिलं । हिद्धो । **क्रुद्धे उव्विव्वो ॥ १७ ॥** क्रुद्धे अयं स्यात् । उव्विव्वो । **सिट्ठविट्ठौ सुप्तोत्थिते ॥ १८ ॥** सिट्ठो । विट्ठो । **ओमंसउव्विक्कावपसृतप्रलपितयोः ॥ १९ ॥** अनयोरेतौ क्रमात् स्तः । ओमंसो । उव्विक्को । **अवरोपितमुक्तयोर्विअंट्टतं ॥ २० ॥** अनयोरयं प्रयोज्यः । विअंट्टतं । **ओहरणणिमिअओअघिआ आघ्राते ॥२१॥** एते त्रय आघ्राते निपात्यन्ते । ओहरणं । णिमिअं । ओअघिअं । **ऊसविअमुद्भ्रान्ते ॥ २२ ॥** उद्भ्रान्तेयं स्यात् । ऊसविअं । **रुद्धगलितयोराहिद्धो ॥ २३ ॥** अनयोरयं स्यात् । आहिद्धो । **वातिते णिसुद्धो ॥ २४ ॥** अस्मिन्नयं स्यात् । णिसुद्धो । **उम्मड्डणिच्चुड्डावुद्वृत्ते ॥ २५ ॥** उद्वृत्ते एतौ स्याताम् । उम्मड्डो । णिच्चुड्डो । **उड्डिअजूसआवुत्क्षिप्ते ॥ २६ ॥** एतौ उत्क्षिप्ते स्याताम् । उड्डिओ । जूसओ । **सुप्ते णिज्जलवव्वणिहवल्लुकाः ॥ २७ ॥** सुप्ते चत्वारो

१ अनवस्थिते एते चत्वारः स्युः T. २ T. drops उच्चुरण. ३ T. drops उच्छिष्ट. ४ क्रमादेते स्युः T. ५ T. has after this उच्चूरणमुच्छिष्टे । उच्छिष्टे उच्चूरणमिति स्यात् । ६ स्युः for एते निपात्याः T. ७ स्तः T.

निपात्यन्ते । णिज्जो । लववो । णिहवो । लुक्को । **रिअं लूने ॥ २८ ॥** अस्मिन्नयं स्यात् । रिअं । **विक्रीतनिम्नीकृतयोरुज्झणिअं ॥ २९ ॥ त्यक्ते जडं ॥ ३० ॥** अस्मिन्नयं स्यात् । जडं । **शुष्कनिम्नीकृतयोरुज्झिअं ॥ ३१ ॥** अनयोरयं स्यात् । उज्झिअं । **घडं मृष्टीकृते ॥ ३२ ॥** अस्मिन्नयं स्यात् । घडं । **जलान्तःपतिते डिंडवो ॥ ३३ ॥** जलावगाहिन्ययं प्रयोज्यः । डिंडवो । **आकीर्णे ओसडिओ ॥ ३४ ॥** अस्मिन्नयं स्यात् । ओसडिओ । **गुलिअं मथिते ॥ ३५ ॥** गुलिअं । **उम्मरिअमुन्मूलिते ॥ ३६ ॥** अस्मिन्नयं स्यात् । उम्मरिअं । **उत्क्षिप्ते परिच्चिअउग्गाहिअउडाहिअाः ॥ ३७ ॥** उत्क्षिप्ते त्रयो निपात्याः । परिच्चिअं । उग्गाहिअं । उडाहिअं । **उदाहिअं च ॥ ३८ ॥** अयमप्युत्क्षिप्ते निपात्यः । [1]उदाहिअं । **रसिते हेसिअदुंदुमिऔ ॥ ३९ ॥** रसिते द्वयं निपात्यम् । हेसिअं । दुंदुमिअं । **परितोषिते चित्तविं[2]अओ ॥ ४० ॥** अस्मिन्नयं निपा[3]त्यते । चित्त[4]विअओ । **परोट्टझपिअपल्लित्ताः पर्यस्ते ॥ ४१ ॥** पर्यस्ते त्रयो निपात्याः ॥ परोट्टं । झपिअं । पल्लित्तं । **प्रमृष्टे अम्हत्तो[5] ॥ ४२ ॥** अस्मिन्नयं प्र[6]योज्यः । अम्हत्तो[7] । **आघूर्णिते गअं ॥ ४३ ॥** अस्मिन्नयं स्यात् । गअं । **व्यासक्तप्रवृद्धयोरोवेवओ ॥ ४४ ॥** अनयोरयं निपा[8]त्यः । ओवेवओ । **ओअम्मअओहामिआवभिभूते ॥ ४५ ॥** एतावभिभूते निपात्यौ । ओअम्मओ । ओहामिओ । **अभिलषितप्रत्युद्गतवृद्धेषु रगिल्लवच्छुद्धलिअअक्कंताः ॥ ४६ ॥** ए[9]षु त्रयः क्रमान्निपात्याः । रगिल्लो । वच्छुद्धलिओ । अक्कंतो । **जअल्लकरमौ च्छन्नक्षीणयोः ॥४७ ॥** [10]अनयोरेतौ क्रमात् स्तः । जअल्लो । करमो । **उपरतक्षीणयोः कथो ॥ ४८ ॥** अनयोः कथो इति

---

१ P. and My. drop it. २ °विआओ M. ३ निपात्यः M. ४ °विआओ M. ५ अह्मत्तो My. ६ निपात्यः M. ७ अह्मत्तो My. ८ स्यात् M. ९ एतेष्वेते निपात्याः M. १० अनयोः क्रमादेतौ निपात्यौ M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निपात्यः । कथो । पेक्किअं वृषरटिते ॥ ४९ ॥ [1]अस्मिन्नयं स्यात् । पेक्किअं ॥ अंकिअमालिङ्गिते ॥ ५० ॥ [2]अस्मिन्नयं स्यात् । अंकिअं । [3]उल्लुओसिअचिमिणोसलिआ रोमाञ्चिते ॥ ५१ ॥ अस्मिन् [4]एते त्रयः प्रयोज्याः । उल्लुओसिअं । चिमिणं । उसलिअं । अस्संगिअमासक्ते ॥ ५२ ॥ अयं स्यात् । अस्संगिअं । मुकुलितमुक्तश्रान्तपुलकितेषु आरोइअं ॥ ५३ ॥ चतुर्षु [5]आरोइअमिति प्रयोज्यम् । आरोइअं । अपहृतशरीरादिव्यथितयोरोच्छंदिअं ॥ ५४ ॥ अनयोरयं स्यात् । ओच्छंदिअं । छंडिअं छन्ने ॥ ५५ ॥ अस्मिन्नयं स्यात् । छंडिअं । ऊसुम्भिअमूसअं चोपधानीकृते ॥ ५६ ॥ [6]एतावुपधानीकृते स्याताम् । ऊसुम्भिअं । ऊसअं । आविअं प्रोते ॥ ५७ ॥ प्रोते अयं स्यात् । आविअं । दर्पिते अवहिट्ठो ॥ ५८ ॥ अस्मिन्नयं स्यात् । अवहिट्ठो । प्रवृद्धगृहागतयोरारोद्धो ॥ ५९ ॥ अनयोरयं स्यात् ॥ आरोद्धो । अन्विष्टे उडिअं घसणिअं च ॥ ६० ॥ [7]अन्विष्टे एतौ स्याताम् । उडिअं । घसणिअं । अशंके फणिते घुग्घुस्सुअं ॥ ६१ ॥ [8]अस्मिन्नयं स्यात् । घुग्घुस्सुअं । आरूढे उल्लूढोच्छूढौ ॥ ६२ ॥ एतावारूढे प्रयोज्यौ । उल्लूढो । उच्छूढो । आविलिओ कुपिते ॥ ६३ ॥ कुपिते अयं स्यात् । आविलिओ । कडिअं प्रीणिते ॥ ६४ ॥ [9]अस्मिन्नयं स्यात् । कडिअं । उप्पत्तो गलितविरक्तयोः ॥ ६५ ॥ [10]अनयोरयं स्यात् । उप्पत्तो । सन्नद्धे उओग्गिओ ॥ ६६ ॥ [11]अस्मिन्नयं स्यात् । उओग्गिओ । अपूरितस्खलितामूलोच्चलितमूढविघटितेषु गुम्मइओ ॥ ६७ ॥ [12]एतेष्वयं

---

१ वृषरटिते पेक्किअमिति स्यात् M. २ आलिङ्गिते अयं निपात्यः M. ३ M. adds उक्त अंकिअं । अस्मिन्नयं स्यात् । अंकिअं । before this. ४ त्रयो निपात्याः My., P. ५ अयं प्रयोज्यः M. ६ उपधानीकृते एतौ M. ७ एतौ अन्विष्टे M. ८ My. and P. drop the line. ९ P. and My. drop the line. १० P. and My. drop the line. ११ My. and P. drop the line. १२ P. and My. omit it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् । गुम्मइओ । भग्ने पडिरिग्गअं ॥ ६८ ॥ असिन्नयं स्यात् । पडिरिग्गअं । प्रकटिते परिअड्डिअं ॥ ६९ ॥ परिच्छन्ने परिअट्ट-विअं ॥ ७० ॥ [1]परिअट्टविअं । ओप्पं मृष्टे ॥ ७१ ॥ [2]ओप्पं । कोज्जरिअमापूरिते ॥ ७२ ॥ [3]कोज्जरिअं । ओमल्लं घनीभूते ॥ ७३ ॥ [4]ओमल्लं । वेल्लइअं घडइअं च संकुचिते ॥ ७४ ॥ [5]असिन्नयं स्यात् । वेल्लइअं । झंदिअं प्रद्रुते ॥ ७५ ॥ असिन्नयं स्यात् । [6]झंदिअं । प्रयतपरिजागरितयोरणुझिअओ ॥ ७६ ॥ अनयोरयं स्यात् । अणुझिअओ । पज्जतरं दलिते ॥ ७७ ॥ असि-न्नयं स्यात् । [7]पंज्जतरं । अवितृप्ते उल्लुहुल्लुअं ॥ ७८ ॥ [8]असिन्निदं स्यात् । उल्लुहिल्लुअमिति केचित् । वप्पिअमारोग्गरिअमुल्लअं च रक्ते ॥ ७९ ॥ त्रय एते निपात्याः । वप्पिअं । आरोग्गरिअं । उल्लअं । उघणमहिरोइअमहुमाअमप्पुण्णं च पूर्णे ॥ ८० ॥ पूर्णे चत्वारो निपात्याः । उघणं । अहिरोइअं । अहुमाअं । अप्पुण्णं । सन्मुखमागते पच्छाणिओ ॥ ८१ ॥ असिन्नयं स्यात् । पच्छा-णिओ । अंगुच्छं प्रमिते ॥ ८२ ॥ प्रमिते अयं स्यात् । [9]अंगुच्छं । पड्डाविअं समापिते ॥ ८३ ॥ असिन्नयं स्यात् । [10]पंड्डाविअं । अभिपीडिते वारड्डं ॥ ८४ ॥ असिन्निदं निपात्यम् । [11]वारड्डं । उद्दारिअं रणद्रुते ॥ ८५ ॥ अत्रैतन्निपात्यम् । [12]उद्दारिअं । उज्झमाणं पलायिते ॥ ८६ ॥ अत्रेदं स्यात् । [13]उज्झमाणं । अर्जिते विढ्ढितं ॥ ८७ ॥ असिन्निदं स्यात् । विढ्ढितं । च्छिक्कं स्पृष्टे[14] ॥ ८८ ॥ [15]असिन्निदं निपात्यम् । [16]च्छिक्कं । हते पणिछ्लिअं ॥ ८९ ॥ हते इदं

---

१ Omitted in P., My. २ Omitted in P., My. ३ Omitted in My., P. ४ Omitted in P., My. ५ P. and My. omit the line. ६ Omitted in My., P. ७ Omitted in My., P. ८ अवितृप्तेयं निपात्यः M. ९ Omitted in My., P. १० Omitted in P., My. ११ P. and My. omit it. १२ Omitted in P., My. १३ Omitted in P., My. १४ स्पृष्टे इदं स्यात् P., My. १५ Omitted in My., P. १६ Omitted in P., My.

स्यात् । पैणिछिअं । **आविन्ने पिंडओ** ॥ ९० ॥ अत्रायं स्यात् । पिंडओ[1] । **साणिअणिक्खाविओ शान्ते** ॥ ९१ ॥ असिन्नेतौ स्याताम् । साणिओ । णिक्खाविओ । **पिष्टे आप्पणसोहिअवक्कसमराइआः** ॥ ९२ ॥ पिष्टे चत्वारो निपात्याः । आप्पणं । सोहिअं । वक्कं । समराइअं । **वड्डिमवडिसाअअवसण्णाः सुते** ॥ ९३ ॥ सुते त्रयो निपात्याः । वड्डिमं । वडिसाअं । अवसण्णं । सुतमित्यर्थः । वंडइअं[3] **पीडिते** ॥ ९४ ॥ असिन्नयं स्यात् । वंडइअं[4] । **विरचितविप्रगृहीतयोरग्गहिओ** ॥ ९५ ॥ अनयोरयं स्यात् । अग्गहिओ । **अवधृते गंविअं** ॥ ९६ ॥ असिन्निदं निपात्यम् । गंविअं[6] । **निषिद्धे विड्डुच्छओ** ॥ ९७ ॥ असिन्नयं निपात्यः । विड्डुच्छओ[7] । **निर्गते णग्गठो** ॥ ९८ ॥ अत्रायं निपात्यः । णग्गंठो[8] । **वोट्टिकिपाडावत्यासक्तस्खलितयोः** ॥ ९९ ॥ अनयोरेतौ क्रमात् स्तः । वोट्टी । किपाडो । **पविरंजवलोट्टौ स्निग्धस्मृतयोः** ॥ १०० ॥ अनयोरेतौ क्रमात् स्याताम्[10] । पविरंजवो । लोट्टो । **उवडिअमुदूळिअमोणअमवनते** ॥ १०१ ॥ अवनते त्रयो[11] निपात्याः । उवडिअं । उदूळिअं । ओणअं । **उज्झळिअं प्रक्षिप्तविक्षिप्तयोः** ॥ १०२ ॥ अनयोरयं स्यात् । उज्झळिअं । **मत्ते अविहिओ** ॥ १०३ ॥ मत्ते अयं स्यात् । अविहिओ[12] । **परिक्खाइअओ परिक्षीणे** ॥ १०४ ॥ परिक्षीणे अयं स्यात् । परिक्खाइअओ । **क्षुते चिंक्कं पिलुअं च**॥१०५॥ असिन्नेतौ स्याताम् । चिंक्कं[14] । पिलुअं । **पविग्घं विस्मृते** ॥ १०६ ॥ असिन्नयं स्यात् । पविग्घं[15] । **उज्झसिअमवडाहिअमुक्कासमुत्कृष्टे** ॥ १०७ ॥ उत्कृष्टे त्रयो निपात्याः । उज्झसिअं । अवडाहिअं ।

---

१ Omitted in P., My. २ Omitted in My., P. ३ पंडइअं M. ४ पंडइअं M. ५ गव्विअं M. ६ गव्विअं M. ७ Omitted in My., P. ८ णग्घट्ठो My. ९ Omitted in P., My. १० भवतः M. ११ त्रय एते स्युः M. १२ Omitted in My., P. १३ छिक्कं M. १४ छिक्कं M. १५ Omitted in P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्कासं । हल्लपविअं त्वरिते ॥ १०८ ॥ त्वरिते अयं स्यात् । [1]हल्लपविअं । उद्दारिअमुत्खाते ॥ १०९ ॥ उत्खाते अयं स्यात् । उद्दारिअं । याते आरिद्दो ॥ ११० ॥ असिन्नयं स्यात् । [2]आरिद्दो । उल्लिक्कं दुश्चेष्टिते ॥ १११ ॥ असिन्नेतन्निपात्यम् । [3]उल्लिक्कं । उच्चदिअं मुषिते ॥ ११२ ॥ मुषिते इदं स्यात् । [4]उच्चदिअं । ऊगिअपट्टिअमिआ अलंकृते ॥ ११३ ॥ अलंकृते त्रयो निपात्याः । ऊगिअं । पट्टिअं । मिअं । उक्कअं प्रसृते ॥ ११४ ॥ प्रसृते अयं स्यात् । [5]उक्कअं । उच्छिरणमुच्छिष्टे ॥ ११५ ॥ ओसरिओ आकीर्णे अक्षिसंकोचात् संज्ञिते च ॥ ११६ ॥ गत्तल्हिक्कगावसत्तो गते ॥११७॥एते चत्वारो निपात्याः । गत्तो । ल्हिक्को । गावो । सत्तो। ओसिअविच्छुरिअपडिहत्था अपूर्वे ॥ ११८॥ अपूर्वे त्रयो निपात्याः । ओसिअं । विच्छुरिअं । पडिहत्थो । णिउरं छिन्नजीर्णयोः ॥११९॥ अनयोरयं स्यात् । [6]णिउरं । अध्यासिते उच्चल्लोप्पल्लोय्यल्लांजडिओत्तत्ताः ॥ १२० ॥ अध्यासिते पञ्चैते निपात्याः । उच्चल्लो । उप्पल्लो । उय्यल्लो । अंजडिओ । उत्तत्तो । ओअल्लअमुक्कंदं च विप्रलब्धे ॥ १२१ ॥ [7]असिन्नेतौ निपात्यौ । ओअल्लअं । उक्कंदं । लिप्ते उडंबो ॥ १२२ ॥ असिन्नयं स्यात् । [8]उडंबो । छूहिअं पार्श्वपरावृत्ते ॥ १२३ ॥ असिन्नयं स्यात् । [9]छूहिअं । अपिट्टवल्लट्टं पुनरुक्ते ॥ १२४ ॥ असिन्नेतौ स्याताम् । अपिट्टं । वल्लट्टं । आस्तृते अण्णासअं ॥ १२५ ॥ असिन्नयं स्यात् । अण्णासअं । अनष्टे [10]अंपंडिअं ॥ १२६ ॥ असिन्नयं स्यात् । [11]अंपंडिअं । अणहवणअं [12]भर्त्सिते ॥ १२७ ॥ [13]असिन्नयं निपात्यः । [13]अणहवणअं । उक्करिअमरि-

१ Omitted in My., P. २ Omitted in P., My. ३ Omitted in P., My. ४ Omitted in P., My. ५ Omitted in P., My. ६ Omitted in P., My. ७ विप्रलब्धे द्वयं स्यात् M. ८ Omitted in P., My. ९ Omitted in P., My. १० उव्वंडिअं M. ११ उव्वंडिअं M. १२ भर्त्सिते M. १३ Omitted in My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अओघिअविवअइसआ विस्तीर्णे ॥ १२८ ॥ विस्तीर्णे पञ्चैते निपात्यन्ते । उक्करिओ । मरिओ । ओघिओ । विवओ । इसओ । **रुद्धवामावगळवेण्णधुत्ता आक्रान्ते ॥ १२९ ॥** आक्रान्ते पञ्चैते [1]निपात्यन्ते । रुद्धो । वामो । अवगळो । वेण्णो । धुत्तो । **आरोपित-खण्डितयोरुक्करिअंउरविअंउक्कंडिअंअण्णंकव्वरिअं च ॥ १३० ॥** [2]एतयोः [3]पञ्चैतानि निपात्यन्ते । उक्करिअं इत्यादि । **चूर्णिते आडविओ ॥ १३१ ॥** अस्मिन्नयं स्यात् । [4]आडविओ । **उल्लुअं धुहअं ओउल्लिअं उक्कोसिअं उच्चरिअं वणनत्तडिअं च पुरस्कृते ॥ १३२ ॥** पुरस्कृते षडेते [5]निपात्याः । **वलक्किअं उत्सङ्गिते ॥ १३३ ॥** अस्मिन्नयं स्यात् । [6]वलक्किअं । **उय्यकिअं पुञ्जीकृते ॥ १३४ ॥** [7]अत्रैतत् प्रयोज्यम् । [8]उय्यकिअं । **पिड्डुइअं प्रशान्ते ॥ १३५ ॥** [9]अत्रैतन्निपात्यम् । [10]पिड्डुइअं । **उलुहुंडिअं हेपिअं हक्किअं हेसमणं चोन्नते ॥ १३६ ॥** उन्नते चत्वार [11]एते निपात्याः । [12]उलुहुंडिअं । हेपिअं । हक्किअं । हेसमणं । **निवासिते ज्झहुराविअं णिगमिअं च ॥१३७॥** [13]अस्मिन्नेतौ स्याताम् । ज्झहुराविअं । णिगमिअं । **उच्छिल्लो अवजीर्णे ॥ १३८ ॥** अस्मिन्नयं स्यात् । उच्छिल्लो । **गुम्मिओ मूलाच्छिन्ने ॥ १३९ ॥** [14]अस्मिन्नयं स्यात् । गुम्मिओ । **जलधौते णिप्पणिओ ॥ १४० ॥** [15]अस्मिन्नयं स्यात् । णिप्पणिओ । **आच्छादिते [16]वँक्खलं ॥ १४१ ॥** अत्रैतत् स्यात् । [17]वँक्खलं । **रञ्जिते [18]तँतुरिअं ॥ १४२ ॥** [19]अत्रैतत् स्यात् । [20]तँतुरिअं । **प्रोक्षिते रोक्कअं ॥ १४३ ॥** [21]अस्मिन्नयं

१ निपात्याः My. २ अनयोरेते पञ्च स्युः T. ३ पञ्चैते प्रयोज्याः My., P. ४ Omitted in My., P. ५ प्रयोज्याः My., P. ६ Omitted in P., My. ७ पुञ्जीकृते इदं स्यात् My. ८ Omitted in P., My. ९ अत्रेदं My., P. १० Omitted in P., My. ११ My. and P. drop एते. १२ Omitted in My., P. १३ Omitted in P., My. १४ Omitted in P., My. १५ Omitted in My., P. १६ पक्खिअं M. १७ पक्खिअं M., १८ तुत्तिरिअं M. १९ रञ्जिते एतत् M. २० तुत्तिरिअं M. २१ अयमत्र स्यात् P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् । [1]रोकअं । **पीतपतितपेटितेषु वरत्तो ॥ १४४ ॥** एष्वयं स्यात् । [2]वेरत्तो । **वर्धितपरिनुत्तयोः सडिअग्गिअं ॥ १४५ ॥** अनयोरयं स्यात् । [3]सैडिअग्गिअं । **दारिते उच्चलो ॥ १४६ ॥** अत्रेदं प्रयोज्यम् । [4]उँच्चलो । **वञ्चिते अवाडिओ ॥ १४७ ॥** अत्रैतत् स्यात् । [5]अँवाडिओ । **ऊरिसंकिअनङ्गअपंसुला रुद्धे ॥ १४८ ॥** रुद्धे त्रय एते निपात्याः । [6]ऊँरिसंकिओ । नङ्गओ । पंसुलो । **अपूर्ण-गूढस्खलितेषु [7]गँमिदो ॥ १४९ ॥** त्रिष्वयं [8]निपात्यः । [9]गंमिदो । **आरूढचूर्णितपीतोद्विग्नेषु संसाओ ॥ १५० ॥** चतुर्ष्वयं निपात्यः । संसाओ । **हृष्टे उत्तुर्वो ॥ १५१ ॥** हृष्टे अयं निपात्यः । उत्तुर्वो । इत्यादि । [10]कृष्टानुपसर्ग[11]घृष्टवा[12]क्यविद्वस्वाचस्पतिविष्टरश्रवस्प्रचेतस्प्रोक्ता-दीनां क्विबादिप्रत्ययान्तानां चाग्निचित्सोमसुदित्यादीनां सुग्लौसुम्लै [13]इत्यादीनां च पूर्वैः कविभिरप्रयुक्तानां प्रतीतिवैषम्यकरः प्रयोगो न कर्तव्यः । शब्दान्तरैरेव [14]तदर्थोभिधेयः । यथा कृष्टः कृशः वाचस्पति-र्गुरुः विष्टरश्रवाः हरिरित्यादि । घृष्टशब्दस्य सोपसर्गस्य प्रयोग इष्यत एव । मंदरअडपरिघट्टं । मन्दरतटपरिघृष्टम् ॥

इति श्रीमदखिलविद्यापरिवारदक्षिणामूर्तिमहादेवप्रसादलब्धवि[15]द्यपूर्वोत्तरमीमांसा-[16]शब्दतर्कसाहित्यसार्वभौम[17]चरकूरियज्ञेश्वरभट्टोपाध्याय[18]तनय[19]कोण्डभट्टोपाध्यायशिष्येण सर्वाम्बिकागर्भ[20]शुक्तिमुक्तामणिना दक्षिणामूर्ति[21]महादेवकिङ्करेण सर्वविद्वत्कवि[22]मतेन लक्ष्मीधरेण विरचितायां षड्भाषाचन्द्रिकायां प्राकृतप्रक्रियायां सुबन्तविभागः [23]संपूर्णः[24] ॥

---

१ Omitted in P., My. २ Omitted in P., My. ३ Omitted in My., P. ४ Omitted in P., My. ५ Omitted in P., My. ६ P. and My. omit the instances. ७ गमिलो M. ८ स्यात् M. ९ गमिलो M.; Omitted in My., P. १० घृष्टा °M. ११ मृष्ट M. १२ M. omits वाक्य. १३ M. drops इत्यादीनां च. १४ तथाभिधेयाः M. १५ °विद्येन T. १६ T. has कर्तृ for शब्दतर्क. १७ T. has दव for चर. १८ °तनयेन T. १९ M. drops कोण्डभट्टोपाध्याय. २० M. drops शुक्ति. २१ M. drops महादेव २२ नुतेन T. २३ समाप्तः T. २४ T. adds श्रीमेधादक्षिणामूर्तये नमः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीहयग्रीवाय नमः ।

नमो ब्रह्मादिदेवानामज्ञानध्वान्तभानवे ।
सर्वार्थ[1]बद्धदीक्षाय दक्षिणामूर्तये नमः ॥ १ ॥

अथ[2] तिङन्तप्रक्रिया निरूप्यते ।

भू सत्तायाम् । भू इति स्थिते

होहुवहवा भुवेस्तु ॥ ३ । १ । १ ॥

भवतेर्धातोर्हो हुव हव इति त्रय आदेशा[3] भवन्ति । अकार उच्चारणार्थः । हो इति स्थिते । अनुक्तमन्यन्यायेन लटस्तिबादौ सति

लटस्तिप्ताविजेच् ॥ २ । ४ । १ ॥

लटः प्रथमपुरुषैकवचनयोस्तिप्तयोः प्रत्येकं इच् एच् इति भवतः । चकारौ 'हुरें[4]चिति' इति विशेषार्थौ[5] । अत्र लड्ग्रहणं लकारमात्रो[6]पलक्षणम् । तेन लटः लस्येत्यर्थः । अनुक्तमन्यन्यायेन शबादिप्राप्तौ

न शपाम् ॥

अत्र शबादीनां प्रयोगो न[7] भवति । इति शबादिप्रतिषेधः । होइ ॥

अत एवैच् से ॥ २ । ४ । ७ ॥

लटः प्रथम[8]पुरुषस्यैकत्वे विहितो य एच् मध्यमपुरुषस्यैकत्वे विहितो यः से तावकारान्तादेव भवतो नान्यस्मात् । इत्यदन्तविषयत्वात् हो इ इत्यत्र तौ न भवतः ॥ 'हलोक्' इत्यतः 'अक्' इत्यनुवर्तमाने

त्वनतः ॥ २ । ४ । ६९ ॥

अकारान्तवर्जितादजन्ताद्धातोरगागमो भवति तु[9] । होअइ । होअए । अत्रागमे कृते अदन्तत्वादेच् भवति ॥

---

१ चन्द्रचारुवराङ्गाय for सर्वार्थबद्धदीक्षाय P., My. २ T. gives this section after the treatment of शौरसेनी and other dialects. ३ आदेशाः स्युः T. ४ हुरचेति M. ५ विशेषणार्थौ T. ६ °मात्रोपलक्षणार्थम् T. ७ नास्ति T. ८ °पुरुषैकत्वे My. ९ M. drops तु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लङ्लटोश्च जर्जारौ ॥ २ । ४ । ३८ ॥

लङ्लटोर्वर्तमानभविष्यतोश्चकाराद्विध्यादिषु च सर्वत्र पुरुषेषु वचनेषु च विहितस्य प्रत्ययस्य स्थाने जजावित्येतौ रितौ वा[१] भवतः। रित्वाद् द्वित्वम् । इति लट्प्रथमपुरुषस्यैकस्थाने एतौ[२] भवतः । होज्ज । होज्जा । पक्षे । होइ । सर्वलकारेषु जर्जाराविति केचित् ॥ 'लङ्लटोश्च जर्जारौ' इत्यधिकृत्य

मध्ये चाजन्तात् ॥ २ । ४ । ३९ ॥

अजन्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकारात् प्रत्ययानां स्थाने[३] जर्जरौ तु[४] भवतो लङ्लटोर्विध्यादिषु च । इति होइकारयोर्मध्ये भवतः[५] । होज्जइ । होज्जाइ । इत्येकवचनम् । तिङन्तेपि द्विवचनस्य बहुवचनमेव ॥

झिझौ न्तिन्तेइरे ॥ २ । ४ । ४ ॥

लटः प्रथमपुरुषबहुत्वे वर्तमानयोः झिझयोः न्ति न्ते इरे इति त्रय आदेशा[६] भवन्ति । होन्ति । होन्ते । होइरे । अत्रैव 'होहुवहवा भुवेस्तु' इत्यतः 'भुवेः' इत्यधिकृत्य

हुरचिति ॥ ३ । १ । ५ ॥

चिद्वर्जिते प्रत्यये परे भुवेर्हुरित्यादेशो भवति । हुति । हुन्ते । हुइरे । इत्याद्यपि बोद्धव्यम् । बहुलाधिकारात् कचिदेकत्वेपि इरे दृश्यते । सूसइरे ताण तारिसो कण्ठो । शुष्यति तासां तादृशः कण्ठः । 'रुषगेचो दिः' इत्युकारस्य दीर्घः । 'त्वनतः' इत्यगागमः । होअन्ति । होअन्ते । होअइरे । 'मध्ये चाजन्तात्' इति जर्जारौ । होज्जन्ति । होज्जन्ते । होज्जइरे । अत्र पूर्वोदाहरणद्वये 'संयोगे' इति ह्रस्वे सति जारोपीदमेवोदाहरणम् । होज्जाइरे इत्यत्र निमित्ताभावान्न 'संयोगे' इति ह्रस्वः । होज्ज । होज्जा ॥ मध्यमपुरुषैकवचने

---

१ T. omits वा २ अपि तौ M., T. ३ च स्थाने M. ४ इत्येतौ स्तः T. ५ तौ भवतः M.; अपि स्तः T. ६ आदेशाः स्युः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिप्थासूसेसि ॥ २ । ४ । २ ॥

'लटः' इत्यनुवर्तते । लटः परस्मैपदात्मनेपदमध्यमपुरुषैकत्वे वर्तमानयोः सिप् थास् इत्येतयोः प्रत्येकं से सि इत्येतौ भवतः । होसि । नात्र से । अनदन्तत्वात् । 'त्वनतः' इत्यगागमे कृते अदन्तत्वात् से सि । होअसि । होअसे । 'मध्ये चाजन्तात्' इति जर्जारौ । होज्जसि । होज्जासि । 'लड्लृटोः—' इति जर्जारो । होज्ज । होज्जा ॥ मध्यमपुरुषबहुवचने

थध्वमित्थाहचौ ॥ २ । ४ । ५ ॥

लटो मध्यमपुरुषबहुवचनयोः थध्वं इत्येतयोः प्रत्येकं इत्थाहच् इत्यादेशौ भवतः । होइत्था । होह । होअइत्था । होअह । होज्जइत्था । होज्जह । होज्जाइत्था । होज्जाह । होज्ज । होज्जा । बहुलाधिकारात् क्वचित् प्रथमपुरुषैकवचनेपि इत्था । जन्ते रोइत्था । यत्ते रोचते ॥ उत्तमपुरुषैकवचने

मिर्मिबिटौ ॥ २ । ४ । ३ ॥

लटः परस्मैपदात्मनेपदोत्तमपुरुषैकवचनयोः मिप् इट् इत्येतयोः प्रत्येकं मि इति भवति । होमि । बहुलाधिकारात् मिबिटोरादेशस्य मेरिकारलोपश्च । बहु वण्णिउ ण्ण सक्कं । बहु वर्णितुं न शक्नोमि । 'त्वनतः' इत्यगागमे 'अदेल्लुक्यात्वोरतः' इत्यतः 'आत्' 'अतः' इति चानुवर्तते ।

तुमौ ॥ २ । ४ । १६ ॥

अदन्ताद्धातोरुत्तमपुरुषैकवचनादेशे मौ परे आत्वं तु भवति । इति धात्ववयवस्यागागमस्य विकल्पेनात्वे होआमि । होअमि । मौपरे इत्वमिति केचित् । होइमि ॥

वा लङ्लोट्छतृषु ॥ २ । ४ । २० ॥

---

१ स्तः T. २ उत्तमैकवचने P., My. ३ स्यात् T. ४ होअमि । होआमि. T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अदेलुकि—' इत्यादेः 'एत्' इत्यनुवर्तते 'अतः' इति च । एषु परेषु अत एत्वं वा स्यात् । इत्यगागमस्यैव धात्ववयवस्य वा एत्वे । होएमि । होअमि । होज्जमि । होज्जामि । इदं सूत्रं लड्लोटोः सर्ववचनेषु अगागमस्य वा एत्वविधायकम् । क्वचिन्न भवति । जअइ । क्वचिदात्वमपि । सुणाइ । 'वा लड्लोट्—' इत्यनेनैव एत्वे होज्जेमि । होज्जमि । 'लड्लटोश्च जर्जारौ' इति जर्जारौ भवतः । हुज्ज । हुज्जा ॥ उत्तमपुरुषबहुवचने[1]

मोमगुमस्महिङ् ॥ २ । ४ । १६ ॥

उत्तमपुरुषस्य बहुत्वे वर्तमानयोः मस् महिङ् एतयोः मो म मु इति त्रय आदेशा भवन्ति । हुमो । हुम । हुमु ॥ 'त्वनतः' इत्यगागमे सति 'अदेलुक्यात्त्वोरतः' इत्यतः 'अतः' इत्यधिकृत्य 'तुमौ' इति 'अस्तु' इति च

मोमगुष्विच्च ॥ २ । ४ । १७ ॥

अकारान्ताद्धातोः मो म मु इत्येतेषु[2] परेषु अत इत्वं चकारादात्वं च वा स्यात् । इत्यगागमस्यैव धात्ववयवस्य इत्वे आत्वे च । हुइमो । हुआमो । पक्षे । हुअमो । 'वा लड्लोट्—'इत्येत्वे । हुएमो । हुइम । हुआम । होअम । हुएम । हुइम । हुइमु । हुआमु । हुअमु । होएमु । 'मध्ये चाजन्तात्' इति जर्जारौ । हुज्जिमो । होज्जमो । होज्जामो । होज्जेमो । एवं मम्वोरप्युदाहार्यम् । 'लड्लटोश्च जर्जारौ' । हुज्ज । हुज्जा । एवमजन्तानां लटि रूपं नेयम् । हवादीनां हलन्तानां तु भेदः । हृ व इति स्थिते । अनुक्तमन्यन्यायेन 'उपदेशेजनुनासिक इत्' इत्यकारलोपः । सुखोच्चारणं प्रयोजनम् । 'हलोक्' इत्यगागमः । इजादयश्च । हवइ । हवए । 'लड्लटोश्च—' इति जर्जारौ ॥

आज्ञे ॥ २ । ४ । २१ ॥

'अदेलुक्यात्त्वोरतः' इत्यतः[3] 'अतः' इति 'एत्' इति चानुवर्तते ।

---

१ उत्तमस्य बहुवचने M. २ इत्येतौ प्रत्येकं मो म मु इत्यादेशानापद्येते. T. ३ इत्यनुवर्तते M.

'वा लड्लोट्—' इत्येतो 'वा' इति च । जीर्ज इत्येतयोः परयोरत एत्वं वा स्यात् । हवेज्जा । हवेज्ज । 'अतः' इत्येव । हुज्जा । स्वतोनजन्तत्वात् 'मध्ये चाजन्तात्' इत्ययं विधिर्न भवति । 'वा लड्लोट्—' इत्येत्वं वा । हवेइ । हवइ । हवन्ति हवन्ते । हवइरे । एवमेदन्तेपि । मध्यमे । हवसि । 'अत एवैच्से' इति से । हवसे । हवेसि । हवेज्जा । हवेज्ज । हवज्जा । हवज्ज । हवइत्था । हवह । हवेइत्था । हवेह । हवज्जा । हवज्ज । हवेज्जा । हवेज्ज । उत्तमे 'तुमौ' इत्यात्वम् । हवामि । हवमि । मावित्वमिति केचित् । हविमि । हवेमि । जर्जारौ च । 'मोममुष्विच्च' इति आदितौ वा । 'लड्लोट्—'इत्येत्वं च । हवमो । हवामो । हविमो । हवेमो । हवमु । हवामु । हविमु । हवेमु । हवम । हवाम । हविम । हवेम । हवेज्जा । हवेज्ज । एवमन्येषां हलन्तानां लटि रूपं नेयम् ॥ 'हुहुवहवा भुवेस्तु' इत्यतः 'भुवेः' इत्यधिकृत्य

पृथक्स्पष्टे णिव्वडः ॥ ३ । १ । २ ॥

पृथग्भूते स्पष्टे च कर्तरि भुवेः णिव्वड इत्यादेशो भवति । णिव्वडइ । णिव्वडए । पृथग्भवति । स्पष्टो भवति वेत्यर्थः ॥

प्रभौ हुप्पः ॥ ३ । १ । ३ ॥

'भुवेः' इत्यनुवर्तते । 'तु' इति च । प्रभुकर्तृकस्य भुवेः हुप्प इत्यादेशो वा भवति[१] । हुप्पइ । हुप्पए । प्रभवतीत्यर्थः । पक्षे पहवइ । बहुलाधिकारादन्यदपि । परिभवति संभवति उद्भवतीत्यर्थेपि । परिभवइ । संभवइ । उब्भवइ ॥ लुङ्लङ्लिट्सु

भूतार्थस्य सिहिअहि ॥ २ । ४ । २२ ॥

भूतार्थे विहितो यो लुङादिप्रत्ययः तस्य लुङो लङो लिटश्च स्थाने प्रत्येकं सि हिअ हि इति त्रय आदेशा भवन्ति[२][३] । उत्तरत्र 'हल ईअ' इति विधानात् स्वरान्तादेवायं[४] विधिः । होसि । होहिअ । होहि ।

१ इति च M. २ स्यात् M., ३ आदेशाः स्युः T. ४ स्वरान्तादेशोयं विधिः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'त्वनतः' इत्यगागमः । होअसि । होअहिअ । होअहि । सर्वत्र अभूत् अभवत् बभूव वा । स्यादयस्तु तिप्तयोरेव । अस्मिन् शास्त्रे वर्तमानार्थवाचिनोपि भूतार्थवाचित्वमस्तीति लडादेशा इजादयोपि भवन्ति । तेन 'लड्लृटोश्च जजौरौ' 'मध्ये चाजन्तात्' इति जर्जारौ सर्वत्र भवतः । तथा च होइ । होन्ति । होमि । इत्यादीनि सर्वाणि लड्रूपाण्युदाहर्तव्यानि । ग्रन्थविस्तरभयान्न लिख्यन्ते । एवमन्येषामजन्तानां भूतलकारेषु रूपनिर्णयः ॥ हलन्तानां तु

हल ईअ ॥ २ । ४ । २३ ॥

'भूतार्थस्य' इत्यनुवर्तते । भूतार्थे वर्तमानयोः हलन्तात् परयोः तिप्तयोः ईअ इत्यादेशो भवति । हवीअ । हवइ । हवन्ति । इत्यादि हलन्तवद्रूपाणि सर्वाण्युदाहर्तव्यानि । एवमन्येषां हलन्तानां भूतार्थवाचिषु रूपं नेयम् ॥ लृलुटोः

भविष्यति हिरादिः ॥ २ । ४ । २५ ॥

भविष्यदर्थे विहितप्रत्यये परे तस्यैव हिरित्यादिः प्रयोक्तव्यः । पूर्ववदिजादयः । होहिइ । बहुलाधिकारात् क्वचिदेकपदेपि सन्धिः । होही । भविष्यति । भविता वा । बहुत्वे हिः । होहिन्ति । इत्यादि लड्वत् । लकारात् प्राक् हिकार एवाधिकः । मध्यमे । होहिसि । होज्जहिसि । होज्जाहिसि । होहिज्ज । होहिज्जा । होहिद्धा । होहिह । इत्यादि सर्वं लड्वत् । लकारात् प्राक् हिकार एवाधिकः ॥ उत्तमे

हासौ मिमोमुमे वा ॥ २ । ४ । २६ ॥

'भविष्यति' इत्यनुवर्तते । 'आदिः' इति च । भविष्यदर्थे विहितेषु उत्तमपुरुषादेशेषु मिमोमुम इत्येतेषु परेषु एषामेवादिः हासौ इत्येतौ वा प्रयोक्तव्यौ । पक्षे हिरपि । होहामि । होस्सामि । अत्र रित्वाद् द्वित्वम् । होहामो । होस्सामो । होहामु । होस्सामु । होहाम । होस्साम ।

---

१ वा स्यात् T. २ M. and T. drop 'आदिः' इति च.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पक्षे । होहिमि । होहिमो । होहिमु । होहिम । कचित्तु[1] हा न भवति ॥ 'डं मेश्छात्ततः' इत्यतः 'मेः इत्यनुवर्तते 'भविष्यति' इति च

सङ् ॥ २ । ४ । ३३ ॥

धातोः परतो भविष्यति काले मेः स्थाने सङ् इति वा भवति । रित्वाद् द्वित्वम् । होहिस्सं । पक्षे । होहिमि ॥

हिस्साहित्था मुमोमस्य ॥ २ । ४ । २७ ॥

'वा' इत्यनुवर्तते 'भविष्यति' इति च । भविष्यति काले मु मो म इत्येतेषां स्थाने हिस्सा हित्था इत्येतौ धातोः परतो वा प्रयोक्तव्यौ । होहिस्सा । होहित्था । पक्षे । होहिमु । इत्यादि । पूर्ववत् जर्जारौ च[2] । 'स्वनतः' इत्यगागमादिलङ्वत् । एवमन्येषामजन्तानां भविष्यति रूपम् ॥ हलन्तानां तु भविष्यति अगागमे कृते 'अदेल्लुक्यात्खोरतः' इत्यतः[3] अतः' इत्यधिकृत्य 'मोममुष्विच्च' इत्यतः[4] 'इत्' इति च

एच्च क्त्वातुंतव्यभविष्यति ॥ २ । ४ । १९ ॥

क्त्वातुंतव्येषु भविष्यत्कालविहिते च प्रत्यये परतः अत एत्वं चकारादिच्च भवति । हवेहिइ । हविहिइ । हवेहिज्ज । हवेहिज्जा । हविहिज्ज । हविहिज्जा । हवेहिंति । हवेहिंते । हविहिंति । हविहिंते । इत्यादि । जर्जारौ च । मध्यमे । हवेहिसि । हविहिसि । हवेहिइत्था । हविहिइत्था । हवेहिह । हविहिह । जर्जारौ च । उत्तमे । हवेहिमि । हविहिमि । हवेहामि । हविहामि । हवेस्सामि । हविस्सामि । हवेहिस्सं । हविहिस्सं । जर्जारौ च । हवेहिमो । हविहिमो । हवेहामो । हविहामो । हवेस्सामो । हविस्सामो । एवं मम्वोरपि । हवेहिस्सा[5] । हविहिस्सा । हवेहित्था । हविहित्था । जर्जारौ च[6] । एवमन्येषां हलन्तानां भविष्यति रूपम्[7] ॥ लोटि

एकस्मिन् प्रथमादेर्विध्यादिषु दुसुमु ॥ २ । ४ । ३५ ॥

---

१ T. drops तु. २ M. omits च. ३ इत्यधिकृत्य M., T. ४ इति च M., T. ५ हविहिस्सा । हवेहिस्सा M. ६ T. drops च. ७ P. and My. add नेयम् after it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिङ्लोटोः प्रथममध्यमोत्तमपुरुषैकवचनानां स्थाने दु सु मु इति क्रमाद्भवन्ति[1]। होदु। लिङ्लोटोराशीरर्थे उकारान्तस्यैव प्रयोग इति[2] केचित्। तदा दलोपः। दकारोच्चारणं भाषान्तरार्थमित्यपरे। प्राकृते विध्यादिषु होउ। अत्र 'प्रायो लुक्—'इति दलोपः। होसु। होमु॥

बहौ न्तुहमो॥ २। ४। ३६॥

लिङ्लोटोः प्रथममध्यमोत्तमबहुवचनानां स्थाने[3] न्तु ह मो इति क्रमाद् भवन्ति। होन्तु। होह। होमो॥

सोस्तु हि॥ २। ४। ३७॥

विध्यादिषु 'एकस्मिन्—'इति सूत्रविहितस्य सोर्मध्यमपुरुषैकवचनस्य स्थाने हि इत्यादेशो वा भवति[4]। होहि। होसु। पूर्ववत् 'मध्ये चाजन्तात्' इति जर्जारौ। तदा। होज्जदु। होज्जादु। होज्ज। होज्जा। एवं वचनान्तरेष्वपि जर्जारावूह्यौ॥ लिङि

त्विज्ज्ञाल्लिङः॥ २। ४। ३४॥

लिङो जर्जाभ्यां पर इकारो वा प्रयोक्तव्यः[5]। होज्जइ। होज्जाइ। इयान् विशेषः। शेषं पूर्ववत्। एवमन्येषामजन्तानां लिङ्लोटो रूपम्। हलन्तानां तु 'वा लड्लोट्छतृषु' इति वा एत्वम्। हवेउ। हवउ। हवेन्तु। हवन्तु। हवेज्ज। हवज्ज। हवेज्जा। हवज्जा॥ मध्यमे 'सोस्तु हि' इत्यतः 'सोः' इत्यनुवर्तमाने

लुगिज्जहीज्जस्विज्जेतः॥ २। ४। ३८॥

अदन्ताद्धातोः मध्यमैकवचनादेशस्य सोः स्थाने लुक् इज्जहि इज्जसु इज्जे इति चत्वार आदेशा भवन्ति। हव। हविज्जहि। हविज्जसु। हविज्जे। पक्षे। हवसु। हवेसु। हवेज्ज। हवेज्जा। 'त्विज्ज्ञाल्लिङः' इति इत्वं च। हवेज्जइ। हवेज्जाइ। शेषं पूर्ववत्। एवमन्येषां हलन्तानां रूपं नेयम्॥ लङि

---

1 क्रमात् स्युः T. 2 °मिति केचित् T. 3 T. has प्रत्ययानां before स्थाने. 4 स्यात् T. 5 स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणन्तौ लृ च लङः ॥ २ । ४ । ४१ ॥

लङो माण न्त इत्यादेशौ सर्वत्र पुरुषेषु वचनेषु [1]भवतः । लित्वान्नित्यम् । चकारात् जर्जारौ च । होमाण । होन्त । होज्जमाण । होज्जन्त । होज्जामाण । होज्ज । होज्जा । हलन्तानां तु । हवमाण । हवन्त । हवेज्ज । हवेज्जा । एवमन्येष्वजन्तेषु हलन्तेषु च धातुष्वनया प्रक्रियया [2]सर्वलकाररूपाणि प्रयोज्यानि ॥

अथ केचिदेधादयो धातवः प्रदर्श्यन्ते ।

एध वृद्धौ । अगागमः । 'खघथधभाम्' इति [3]धस्य हत्वम् । इजादयः । एहइ । [4]एहए । शेषं हववत् । डुपचष् पाके । अनुक्रमन्यायेनानुबन्धलोपः । अक् । 'प्रायो लुक्—'इति चलोपः । पअइ । पअए ॥

सोल्लपउल्लौ पचेः ॥ ३ । १ । ३८ ॥

पचतेः सोल्ल पउल्ल इत्यादेशौ [5]भवतः । सोल्लइ । पउल्लइ । टुनदि समृद्धौ । अक् । णंदइ । णंदए । ध्वंसु गतौ । अक् । 'त्वथ्वद्वध्वां क्वचित्—' इत्यादिना ध्वस्य झकारः । झंसइ । झंसए । पक्षे । 'लवराम्—' इति [6]वलोपः । धंसइ । धंसए । व्येञ् संवरणे । 'मनयाम्' इति यलोपः । वेइ । 'त्वनतः' इत्यगागमे । वेअइ । वेअए । अद भक्षणे । अक् । प्रायोग्रहणाद् [7]दलोपाभावः । अदइ । अदए ॥ अस्तेर्विशेष उच्यते । अस भुवि । लटि

त्वस्तेर्म्हम्होम्हि ममोमिना ॥ २ । ४ । ८ ॥

'मिर्मिबिटौ' इति विहितमिना 'मोमसु मसमहिङ्' इति विहितममोभ्यां च सह अस्तेः स्थाने यथायोगं म्ह म्हो म्हि इत्यादेशा वा

---

१ च स्तः T. २ सर्वलकाराणां रूपाणि P., My. ३ M. and T. drop धस्य. ४ My. and P. drop it; T. has एहऐ only. ५ स्तः T. ६ वलोपे T. ७ दकारलोपाभावः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति । गअम्हि । गतोस्मि । गअम्हो । गअम्ह[1] । गताः स्मः । मुकारस्याग्रहणादप्रयोग एव तस्येत्यवसीयते । पक्षे । तिङास्थि' इति अत्थिः सामान्यप्राप्तः । अत्थि ॥

सिना त्सि ॥ २ । ४ । ९ ॥

'अस्तेः' इत्यनुवर्तते । अस्तेर्धातोः सिना मध्यमपुरुषैकवचनादेशेन सह सि इत्यादेशो लिद्‌ भवति । लित्वान्नित्यम् । णिट्ठुरो जं[2] सि । निष्ठुरो यदसि ॥

तिङास्थि ॥ २ । ४ । १० ॥

अस्तेस्तिङा सह अत्थि इत्यादेशो भवति । अत्थि सो । अस्ति स इत्यर्थः । अत्थि ते । सन्ति त इत्यर्थः । मध्यमे । अत्थि तुमं । असि त्वमित्यर्थः । अत्थि तुम्हे[3] । स्थ यूयमित्यर्थः । उत्तमे । अत्थि हं । अस्म्यहम् । अत्थि अम्हे[4] । स्मो वयमित्यर्थः ॥ लुङ्लङ्लिट्सु 'भूतार्थस्य सिहिअहि' इत्यतः 'भूतार्थस्य' इत्यधिकृत्य

अहेस्यासी तेनास्तेः ॥ २ । ४ । २४ ॥

अस्तेर्धातोर्भूतार्थप्रत्ययेन सह अहेसि आसि इत्यादेशौ भवतः । अहेसि । आसि । आसीत् । आसन् । आसीः । आस्त । आसम् । आस्म । इत्यर्थः । लुङ्लिटोः । अस्तेर्भ्वादेशे । अभूत् । बभूव । इत्यादि संचारणीयम् । इदं त्वादेशद्वयं सर्ववचनेषु पुरुषत्रये च साधारणम् । तेन भूतलकारमात्रे अस्तेरिदमेव रूपद्वयम् । लोटि सिद्धावस्थापेक्षया अस्तु इत्यत्र 'स्तः'[5] इति स्तस्य थत्वे । अत्थु । संतु । इति च दृश्यते । लिङि । स्यादित्यत्र 'स्याद्भव्य—'इति सूत्रेण यात् प्रागित्वम् । यलोपः । अन्त्यहलो लोपश्च । सिअ । अन्येषु लकारेषु अनुक्तमन्यन्यायेन 'अस्तेर्भूः' इति भूधातोरेव प्रयोगः ॥ शीङ् स्वप्ने ।

योरेङ् ॥ २ । ४ । ६५ ॥

---

१ गअह्मा M., T. २ जं My. ३ तुह्मो M. ४ अह्मो M. ५ स्तः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इश्च उश्च युः तस्य योर्धातोरिवर्णोवर्णयोः एङ् एदोतौ यथासंख्यं भवतः। इवर्णस्य एकारः। उवर्णस्य ओकारः। इत्येत्वे। 'शोस्सल्' । सेइ। 'त्वनतः' इत्यक्। सेअइ। सेअए। इत्यादि। हुवत्॥ ब्रूञ् व्यक्तायां वाचि।

उवर्णस्यावः॥ २। ४। ६४॥

धातोरन्त्यस्य उवर्णस्य अव इत्यादेशो भवति। रेफलोपः। बवइ। बवए। 'योरेङ्' इत्योत्वे। बोइ। एवं ह्नुङ् धूङ्[1] प्रभृतयः॥ हु दानादानयोः।

णो ह्रश्च चिजिपूश्रुधूस्तुहुलूभ्यः॥ २। ४। ७२॥

एभ्यः परो ण इत्यागमो वा[2] भवति। तत्संनियोगेन दीर्घस्य ह्रस्वश्च[3]। हुणइ। हुणए। पक्षे उवर्णस्य अव इत्यादेशः। हवइ। हवए। नात्र 'योरेङ्' इत्युकारस्यौत्वम्। अनन्तरविषयत्वात् तस्य। परंतूवर्णस्य अव इत्यादेशः। बहुलाधिकाराण्णागमः क्वचिद्विकल्पितः। उच्चेणइ। उच्चेइ। जेणइ। जेइ। ओहाङ् गतौ। अनुक्तमन्यन्यायेनानुबन्धलोपः। 'त्वनतः' इत्यगागमः। हाअइ। हाअए। पक्षे। हाइ। डु धाञ् धारणपोषणयोः। अनुबन्धलोपः। अर्[4]। धाअइ। धाअए। पक्षे। धाइ॥

घो दहश्रदः॥ २। ४। १३१॥

श्रदित्यव्ययात् परस्य दधातेर्दह इत्यादेशो[5] भवति। 'अश्रदः' इति पर्युदासादन्त्यहलो लोपो न भवति। रेफलोपः। सत्वम्। सद्दहइ। सद्दहए। दिवि क्रीडादौ। अक्। दिवइ। दिवए॥ अथ[6] पुरुषादयोपि प्रदर्श्यन्ते।

रुषगेचो दिः॥ २। ४। ६८॥

रुषादिष्वादेरचो दीर्घो भवति। रुष। रूसइ। रूसए। शुष।

---

१ धूञ् M. २ भवति वा T. ३ M. drops च. ४ अक् M. ५ इत्यादेशः स्यात् T. ६ अत्र M.

सूसइ । तुष । तूषइ । पुष । पूसइ । शिष । सीसइ । षूङ् प्राणिप्रसवे । उवर्णस्य अव इत्यादेशः । सवइ । सवए । णह बन्धने । णहइ । णहए । षुङ् अभिषवे । अवादेशः । सवइ । सवए । सोइ । अशू व्याप्तौ । अक् । असइ । असए । चिञ् चयने । 'णो ह्रस्व चिजि—'इत्यादिना णागमः । चिणइ । चिणए । पक्षे । 'योरेङ्' इत्येत्वम् । चेइ । चेए । 'त्वनतः' इत्यक्येत्वे च । चेअइ । चेअए । तुद व्यथने । अक् । तुदइ । तुदए । दलोपोपि । तुअइ । तुअए ॥ दंशतिदहत्योर्विशेषः । 'हलोक्' इत्यगागमे 'वेतस इति तोः' इत्यतः 'तोः' इत्यधिकृत्य 'टो डः' इत्यतः 'डः' इति च ।

दंशदहोः ॥ १ । ३ । ३४ ॥

दंशतिदहयोर्धात्वोस्तवर्गस्य डकारो भवति । डंसइ । डंसए । डहइ । डहए ॥ दीप्यतौ

डो दीपि ॥ १ । ३ । ४६ ॥

पूर्वसूत्रात् 'तोः' इत्यनुवर्तते । दीप्यतेस्तोस्तवर्गस्य डत्वम् । डिप्पइ । प्रदीप्यतौ 'दोहदप्रदीप—'इत्यादिना तोर्लत्वम् । पलिप्पइ ॥ मृङ्[1] मरणे[3]

आर उः ॥ २ । ४ । ६६ ॥

धातोर्ऋवर्णस्य अर इत्यादेशो भवति । मरइ । मरए ॥ गम्लृ गतौ

छर्गमिष्यमासाम् ॥ २ । ४ । ५० ॥

गम् इषू यम् आस् एषामन्त्यस्य छकारो रित् स्यात् । गच्छइ ॥

गमिरणुवज्जावज्जसाकुसोकुसाइच्छाय्यवहरावसेहवदअपरिअलपरिअल्लवोल्लपरिणिसपच्छड्डणीणणिम्महवच्छदणिछुकंभणीणिवहान् ॥ ३ । १ । ९७ ॥

---

१ मृञ् M. २ My. and P. drop it. ३ My. and P. drop मरणे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गामेरणुवज्जादीनादेशान् प्राप्नोति । अणुवज्जइ । अवज्जसइ । अक्कुसइ । उक्कुसइ । अइच्छइ । अईइ । अवहरइ । अवसेहइ । वद्अइ । परिअलइ । परिअल्लइ । वोलइ । परिणिसइ । पेच्छड्डइ । णीणइ । णिम्महइ । वच्छदइ । णिल्लुक्कइ । रंभइ । णीइ । णिवहइ ॥ दृशिर् प्रेक्षणे[3]

दृशिरोअक्खणिअच्छावअच्छचज्जावअज्झपुलअपुलोअदेक्खावअक्खपेच्छावआसपासणिअसच्चवावक्खान् ॥ २ । ४ । १५३ ॥

दृशिर् प्रेक्षण इत्ययं धातुः ओअक्ख णिअच्छ अवअच्छ चज्ज अवअज्झ पुलअ पुलोअ देक्ख अवअक्ख पेच्छ अवआस पास णिअ सच्चव अवक्ख इति पञ्चदशादेशानापद्यते[1] । ओअक्खइ । णिअच्छइ । अवअच्छइ । चज्जइ । अवअज्झइ । पुलअइ । पुलोअइ । देक्खइ । अवअक्खइ । पेच्छइ । अवआसइ । पासइ । णिअइ । सच्चवइ । अवक्खइ । इति पञ्चदशादेशाः[2] ॥ गमृदृशोर्भविष्यति

डच्छ दृशिगम इजादौ हिलुक् च वा ॥ २ । ४ । २८ ॥

'भविष्यति हिरादिः' इत्यतः 'भविष्यति' इत्यनुवर्तते[4] । दृश्[5] गम् आभ्यां धातुभ्यां भविष्यदादेशेषु ईच् इत्यादिषु[6] परेषु डित् अच्छ इत्ययं भवति हेर्वा लुक् च । डित्वादन्त्यस्याजादेर्लुक् । दच्छिइ । दच्छिहिइ । दच्छिंति । दच्छिहिंति । दच्छिसि । दच्छिहिसि । दच्छिइत्था[7] । दच्छिहिइत्था[8] । दच्छिह । दच्छिहिह । दच्छिमि । दच्छिहिमि । दच्छिहामि । दच्छिस्सामि । दच्छिस्सं । दच्छिहिस्सं । दच्छिमो । दच्छिहिमो । दच्छिहामो । दच्छिस्सामो । दच्छिहिस्सा । दच्छिहित्था । दच्छिम । दच्छिहिम । इत्यादि । मोवत् मम्वोरप्युदा-

---

१ आपद्यते T. २ पच्चदइ M. ३ My. and P. drop प्रेक्षणे. ४ इत्यनुवर्तते M., T. ५ दृशिर् M. ६ इत्यादिषु P., My. ७ °इद्धा P., My. ८ °इद्धा My., P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हार्यम् । एवं गमेरपि ॥ भिदिइ् विदारणे । छिदिइ् द्वैधीकरणे । 'अन्त्यस्य वचिमुचि—'इत्यादेः 'अन्त्यस्य' इत्यनुवर्तते ।

छिदिभिदो न्दः[1] ॥ २ । ४ । ५४ ॥

अनयोरन्त्यस्य न्दं[2] इत्यादेशो भवति । [3]छिन्दइ । भिन्दइ[4] । भविष्यति विशेषः ।

छिदिभिदिविदो डेच्छ ॥ २ । ४ । २९ ॥

'भविष्यति हिरादिः' इत्यतः 'भविष्यति' इत्यनुवर्तते । 'हिलुक् च' इति च 'इजादौ' इति च । छिदादिभ्यो[5] भविष्यति इजादिषु परेषु डित् एच्छ इत्ययं स्यात् हिलुक् च वा । चेच्छिइ[6] । चेच्छिहिइ । चेच्छिंति । चेच्छिहिंति । चेच्छिसि । चेच्छिहिसि । चेच्छित्था[7] । चेच्छिहित्था[8] । चेच्छिह । चेच्छिहिह । चेच्छिमि । चेच्छिहिमि । चेच्छिहामि । चेच्छिस्सामि । एवं हौ । चेच्छिस्सं । चेच्छिहिस्सं । चेच्छिमो । चेच्छिहिमो । चेच्छिहामो । चेच्छिस्सामो । चेच्छिहिस्सा । चेच्छिहित्था । एवं मम्वोरपि । एवं भिदविदोरपि रूपाण्युदाहर्तव्यानि ॥ वच परिभाषणे । मुच्लृ मोक्षणे । रुदिइ् अश्रुविमोचने । श्रु श्रवणे । भुज पालनाभ्यवहारयोः । अङ्क । वअइ । मुअइ । रुअइ । एषु भविष्यति

डोच्छ वचिमुचिरुदिश्रुभुजः ॥ २ । ४ । ३० ॥

वच्यादिभ्यो धातुभ्यो भविष्यदर्थे इजादिषु परेषु डित् ओच्छ इति भवति हिलुक् च वा । वचि । वोच्छिइ । वोच्छिहिइ । वोच्छिंति । वोच्छिहिंति । वोच्छिसि । वोच्छिहिसि । वोच्छिइत्था । वोच्छिहित्था । इत्यादि भिदिवत् । एवं मुचादीनामुदाहार्यम् ।

---

१ न्धः P., My. २ न्द्ध P., My. ३ छिन्धइ My. ४ भिन्धइ My. ५ भिदादिभ्यः M. and P. ६ My. has भेच्छिइ । भेच्छिहि etc.; T. has छेच्छिइ, छेच्छिहि, etc. ७ छेच्छिद्धा P., My. ८ छेच्छिहिद्धा P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

डं मेश्छात्ततः ॥ २ । ४ । ३१ ॥

भविष्यति दृशादिभ्यो धातुभ्यः पूर्वसूत्रैस्त्रिभिरुक्तानां डच्छ डेच्छ डोच्छानां यश्छकारस्ततः परस्य मेरुत्तमपुरुषैकवचनस्य स्थाने डित् अमित्यादेशो भवति[1]। दच्छं। द्रक्ष्यामि। गच्छं। गमिष्यामि। संगच्छं। संगंस्ये। भेच्छं। भेत्स्यामि। वेच्छं। वेत्स्यामि। चेच्छं। छेत्स्यामि। वोच्छं। वक्ष्यामि। मोच्छं। मोक्ष्यामि। इत्यादि। पक्षे। दच्छिमि। दच्छिहिमि। इत्यादि। 'छात्ततः' इति किम्। अन्येभ्यः परो मा भूत्॥

णिव्वडो मुचेर्दुःखे ॥ ३ । १ । ४० ॥

दुःखं[2] मुञ्चत्यर्थमुचेः णिव्वड इत्यादेशो[3] भवति। णिव्वडइ।

अवहेडमेल्लणिल्लुंछोसिक्कदिसडरेअवछंडाः ॥ ३ । १ । ४१ ॥

'मुचेः' इत्यनुवर्तते। मुञ्चतेरवहेड इत्यादि सप्तादेशा[4] भवन्ति स्वरूपार्थे। अवहेडइ। मेल्लइ। णिल्लुंच्छइ। उसिक्कइ। दिसडइ। रेअवइ। छंडइ। सिद्धावस्थापेक्षया। मुंचइ। मुंचए॥ रुधिर् आवरणे। 'अन्त्यस्य वचिमुचि—'[5]इत्यादेः 'अन्त्यस्य' इत्यनुवर्तते।

रुधो न्धम्भौ ॥ २ । ४ । ५० ॥

रुधेरन्त्यस्य न्धम्भ इत्यादेशौ भवतः[6]। रुन्धइ। रुम्भइ।

ढंसोत्तंघौ विवृतिरुध्योः ॥ ३ । १ । ६४ ॥

विपूर्वकस्य वर्तते रुधेश्च ढंस उत्तंघ इत्येतौ प्रत्येकं वा भवतः[7]। ढंसइ। उत्तंघइ। इदमेव वर्त्ततेरपि। पक्षे। रुंधइ। वट्टइ। अत्र 'र्तस्याधूर्तादौ टः' इति र्तस्य टत्वम्। 'युधबुधगृधक्रुधसिधमुहां च झः' इति चकारानुकृष्टरुधेरन्त्यस्य झः। रुझइ। रुझए। युजिर्योगे

जुंजजुज्जजुप्पा युजेः ॥ २ । ४ । १३९ ॥

---

1 स्यात् T. 2 दुःखविषयस्य मुच्चिर् मोक्षणे इत्यस्य धातोः T. 3 इत्यादेशः स्यात् T. 4 °देशाः स्युः T. 5 'मुचिरुचिरुधिश्रुभुजाम्—' इत्यादिना M. 6 स्तः T. 7 स्तः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युजेर्धातोः जुंजादय आदेशाः स्युः । जुंजइ । जुज्जइ । जुप्पइ । भुज पालनाभ्यवहारयोः । अक् । भुअइ । भुअए । ललुटोः । 'डोच्छ वचिमुचि—'इत्यादिना ओच्छादेशो हिलुक् च वा । भोच्छिइ । भोच्छिहिइ । 'डं मेश्छात्ततः' इति मेर्डं । भोच्छं । पक्षे । भोच्छिमि । शेषं हववत् ॥

णिवरो बुभुक्षाक्षिप्योः ॥ ३ । १ । ७८ ॥

सन्नन्तस्य भुजेराङ्पूर्वस्य क्षिपेश्च णिवर इत्यादेशो भवति । णिवरइ । बुभुक्षति । आक्षिपति वा ॥

भुजेरण्णभुजकम्मसमाणचमडचड्डजेमजिमाः ॥ २।४।१३७ ॥

भुजेर्धातोरण्णादय आदेशा भवन्ति वा । अण्णइ । अण्णए । भुज्जइ । कम्मइ । समाणइ । चमडइ । चड्डइ । जेमइ । जिमइ ॥ तनु विस्तारे । अक् । तणइ । तणए ।

तड्डवविरल्लतडतड्डास्तनेः ॥ ३ । १ । ७४ ॥

तनु विस्तार इत्यस्य तड्डव इत्यादयश्चत्वार आदेशाः स्युः । तड्डवइ । विरल्लइ । तडइ । तड्डइ । मनु अवबोधने । अक् । मणइ । मणए । कृञ् । 'अर उः' इत्यरः । करइ । कलए ॥ लुङ्लङ्लिट्सु 'अन्त्यस्य वचिमुचि—'इति सूत्रात् 'अन्त्यस्य' इत्यनुवर्तते ।

आ भूतभविष्यति च कृञः ॥ २ । ४ । ४७ ॥

भूतार्थे भविष्यदर्थे च प्रत्यये परे कृञोन्त्यस्य आ इत्ययमादेशो भवति । 'भूतार्थस्य सिहिअहि' इति स्यादयः । कासि । काहिअ । काहि । अकार्षीत् । अकरोत् चकार वा । ललुटोः । काहिइ । काहिंति ॥ 'डं मेश्छात्ततः' इत्यतः 'मेः' इत्यनुवर्तमाने

कृदो हं ॥ २ । ४ ३२ ॥

---

१ त्रयः for जुंजादयः T. २ भुजिधातुः M.; भुजधातुः T. ३ आदेशानापद्यते M.; आदेशानाप्नोति T. ४ °मुचिरुधिश्रुभुजाम्—' इत्यतः ५ °मादेशः स्यात् T. ६ इत्यनुवर्तते T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करोतेर्ददातेश्च[1] [2]भविष्यति मेस्थाने हं इति वा स्यात् । 'आ भूत-भविष्यति—'इत्याकारः । काहं । पक्षे । काहिमि । 'सं' इत्यनेन 'सं' च । कस्सं । पक्षे । काहिमि । शेषं हववत् ॥

कृञः कुणः ॥ ३ । १ । २० ॥

कृञः कुण इति[3] वा स्यात् । कुणइ । कुणए ॥

काणेक्षिते णिंआरः[4] ॥ ३ । १ । २१ ॥

कृञ इत्यनुवर्तते । कृञः काणेक्षितविषयस्य णिंआर[5] इत्यादेशो[6] भवति । णिआरइ । काणेक्षितं करोतीत्यर्थः ॥

निष्टम्भे[7] णिट्ठुहः ॥ ३ । १ । २२ ॥

निष्टम्भविषयस्य कृञो णिट्ठुइ इत्यादेशो[8] भवति । णिट्ठुहइ । निष्टम्भं[9] करोतीत्यर्थः ॥

श्रमे वांपंफः[10] ॥ ३ । १ । २३ ॥

श्रमं करोतीत्यर्थे कृञो वांपंफ[11] इत्यादेशो भवति । वांपंफइ[12] ॥

सद्दाणोवष्टम्भे ॥ ३ । १ । २४ ॥

अवष्टम्भं[13] करोतीत्यर्थे कृञः सद्दाणादेशो भवति । सद्दाणइ ॥

णिव्वोलो मन्युनौष्ठमालिन्ये ॥ ३ । १ । २५ ॥

मन्युना ओष्ठमालिन्यं करोतीत्यर्थे कृञः णिव्वोल इत्यादेशो[14] भवति । णिव्वोळइ ॥

गुललश्चाटौ ॥ ३ । १ । २६ ॥

चाटु करोतीत्यर्थे कृञो गुलल इत्यादेशो[15] भवति । गुललइ ॥

पयल्लो लम्बनशैथिल्ययोः ॥ ३ । १ । २७ ॥

---

१ T. has परतः after it. २ T. has विहितस्य after भविष्यति. ३ इत्यादेशः स्यात् T. ४ णिअरः M. ५ णिअर M. ६ इत्यादेशः स्यात् T. ७ णिष्टम्भ° My., P.; विष्टम्भ° M. ८ इत्यादेशः स्यात् T. ९ णिष्टम्भं° My., P. विष्टम्भं° M. १० पापंफः M. ११ पापंफ M. १२ पापंफइ M. १३ अवष्टम्भविषयस्य १४ °देशः स्यात् T. १५ °देशः स्यात् T.

२६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लम्बनं करोति शैथिल्यं करोति इत्यनयोरर्थयोः कृञः पयल्लादेशो[1] भवति । पयल्लइ ॥

क्षुरे कम्मः ॥ ३ । १ । २८ ॥

क्षुरं करोतीत्यर्थे कृञः कम्मादेशो भवति । कम्मइ । कम्मए ॥

णीलुंछो निष्पाताच्छोटे ॥ ३ । १ । २९ ॥

निष्पातं करोतीत्यौच्छोटनं करोतीत्यनयोरर्थयोः कृञः णीलुंछ इत्यादेशो भवति । णीलुंछइ ॥ डुक्रीञ् द्रव्यविनिमये । 'योरेङ्' इत्येत्वम् । केइ । 'त्वनतः' इत्यगागमः । केअइ ॥

क्रियः कीणः ॥ २ । ४ । १२२ ॥

क्रीणातेः कीण इत्यादेशो भवति । कीणइ । कीणए ॥

केर्च वेः ॥ २ । ४ । १२३ ॥

विपूर्वस्य क्रीणातेः केइ इत्यादेशो भवति । रित्वाद् द्वित्वम् । विक्केइ । 'त्वनतः' इत्यगागमे विक्केअइ । चकारात् कीणश्च । विकीणई । विकीणए ॥ वृञ् । 'अर उः' वरइ ॥

साहट्टसाहरौ संवुः ॥ ३ । १ । ३० ॥

संपूर्वस्य वृणोतेः साहट्ट साहर इत्यादेशौ भवतः । साहट्टइ । साहरइ ॥ दृञ् । दरइ । दरए ॥ ग्रह उपादाने ।

ग्रहेर्णिरुवारगेण्हबलहरपग्गाहिपच्चुआः ॥ २ । ४ । १५७ ॥

ग्रहेर्णिरुवाराद्याः षडादेशा वा स्युः । णिरुवारइ । गेण्हइ । बलइ । हरइ । पग्गइ । अहिपच्चुअइ ॥ 'अन्त्यस्य वचिर्मुचि—'इत्यतः 'अन्त्यस्य' इत्यधिकृत्य

नमोद्विजरुदां वः ॥ २ । ४ । ४८ ॥

---

१ °देशः स्यात् T. २ °ताच्छादनयोः M. ३ °त्याच्छादनं M. ४ °देशः स्यात् T. ५ M. and P. omit it ६ °देशःस्यात् T. ७ स्तः T. ८ °मुचिरुचिशुभुजाम्–'इत्यधिकृत्य M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमतेरुद्विजते रोदतेश्चान्त्यस्य वकारो भवति । णम् । णवइ । उद्विज् । अक् । उव्विवइ । अत्र दलोपद्वित्वे । रुदिंर् । रुवइ । उव्वेवइ । रोवइ । 'अचोचाम्' इत्येत्वमोत्वं च ॥

चर्नृतिमदिव्रजाम् ॥ २ । ४ । ४९ ॥

'अन्त्यस्य' इत्यनुवर्तते । नृति मद व्रज एषां धातूनामन्त्यस्य चकारो रिद्भवति । रित्वाद् द्वित्वम् । णच्चइ । अत्र 'ऋतोत्' इत्यतः अत्वम् । मच्चइ । वच्चइ । अत्र 'लवराम्—' इति रेफलोपः ॥

छर्गमिष्यमासाम् ॥ २ । ४ । ५० ॥

'अन्त्यस्य' इत्यनुवर्तते । गम् इष् यम् आस् एषामन्त्यस्य छोरित् स्यात् । गच्छइ । इच्छइ । जच्छइ । अत्र जत्वम् । अच्छइ । अत्र 'संयोगे' इति ह्रस्वः ॥

युधबुधगृधक्रुधसिधमुहां च ज्झः ॥ २ । ४ । ५२ ॥

युधादीनां चकाराद्दुधेश्चान्त्यस्य द्विरुक्तो झकारः स्यात् । जुज्झइ । बुज्झइ । गिज्झइ । अत्र कृपादित्वादृत इत्वम् । 'अचोचाम्' इति वा इत्वम् । कुज्झइ । अत्र रेफलोपः । सिध । सिज्झइ । मुह । मुज्झइ ॥

जर् खिदाम् ॥ २ । ४ । ५३ ॥

खिदिप्रकाराणां धातूनामन्त्यस्य जकारो रिद् भवति । खिद् । खिज्जइ । संपद् । संपज्जइ । खिज्जइ । बहुवचनं प्रयोगानुसरणार्थम् ॥

ढः कथिवर्धाम् ॥ २ । ४ । ५५ ॥

कथतेर्वर्धतेश्चान्त्यस्य ढः स्यात् । 'लवराम्—' इति वैलोपः । कड्ढइ । वड्ढइ । बहुवचनाद्वृधेः कृतगुणस्य वर्धतेश्चाविशेषेण ग्रहणम् ॥

वेष्टेः ॥ २ । ४ । ५६ ॥

---

१ अन्त्यस्य is omitted in My., P. २ M., My., and P. drop व. ३ Omitted in My., M , P.

'ढः' इत्यनुवर्तते । वेष्ट वेष्टन इत्यस्य 'कगटड—' इत्यादिना षलोपेन्त्यस्य ढो भवति । वेढइ ॥

समुदो लर् ॥ २ । ४ । ५७ ॥

'वेष्टेः' इत्यनुवर्तते । सम् उद् इत्युपसर्गाभ्यां परस्य वेष्टतेरन्त्यस्य लकारो रित् स्यात् । संवेल्लइ ।[१] बहुलाधिकारादुतः परस्य वा लः । उव्वेल्लइ । उव्वेढइ ॥

खादधावि लुक् ॥ २ । ४ । ५८ ॥

खादतौ धावतौ चान्त्यस्य लुग्[२]भवति । खाइ । 'त्वनतः' इत्यक् । खाअइ । खाहिइ । अत्र 'भविष्यति हिरादिः' इति हिः । खाउ । अत्र 'एकस्मिन् प्रथमादेर्विध्यादिषु—' इत्यादिना दुः दलोपश्च । धाइ । धाहिइ । धाउ । बहुलाधिकाराद् वर्तमानभविष्यद्विध्याद्येकवचन एवा-न्त्यलोपः । तेनेह न भवति । खादन्ति । धावन्ति । क्वचिद् धावइ पुरओ इति च दृश्यते । धावति पुरतः । ओसैरइ[३] ॥

रः सृजि ॥ २ । ४ । ५९ ॥

सृजिधातोरन्त्यस्य रत्वं भवति । [४]विसरइ ॥

डः सीदपति ॥ २ । ४ । ६० ॥

सीदतौ पततौ चान्त्यस्य डत्वं भवति । सडइ । पडइ[५] ॥

मीलेः प्रादेर्द्वे तु ॥ २ । ४ । ६१ ॥

प्रादेरुपसर्गात् परस्य मीलेरन्त्यस्य वा द्वित्वं स्यात् । समिल्लइ । अत्र 'संयोगे' इति ह्रस्वः । [६]समीलइ । अत्र समो मांसादित्वाद्विकल्पेन बिन्दुलोपः । संमिल्लइ । संमीलइ । [७]निमीलइ । निमिल्लइ । 'प्रादेः' इति किम् । मीलइ ॥

चलस्फुटे ॥ २ । ४ । ६२ ॥

---

१ M. adds उव्वेलइ. २ लुक् स्यात् T. ३ M. drops it. ४ M. drops it. ५ P. and My. omit it. ६ M. drops it. ७ M. inserts उम्मिलइ before it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चलतौ स्फुटितौ चान्त्यस्य द्वे रूपे वा भवतः । चल्लइ चलइ । फुट्टइ । फुडइ । अत्र 'ष्पस्पोः फः' इति फत्वम् । 'टो डः' इति डत्वं च ॥

शकगे ॥ २ । ४ । ६३ ॥

'द्वे' इत्यनुवर्तते । शकादिषु धातुष्वन्त्यस्य द्वे रूपे भवतः । योग[1]विभागान्नित्यम् । शक । सक्कइ । मृग । मग्गइ । षिवु[2] । सिव्वइ । अटि[3] । अट्टइ । लुटि[4] । लुट्टइ । त्रुटि[5] । तुट्टइ । कुपु[6] । कुप्पइ । जभि[7] । जम्मइ । णशि[8] । णस्सइ ॥ 'अर उः' इत्यतः 'उः' इत्यधिकृत्य

अरि वृषाम् ॥ २ । ४ । ६७ ॥

वृषप्रकाराणां धातूनामृवर्णस्य अरि इत्या[9]देशो भवति । वृष । वरिसइ । मृष[10] । मरिसइ । हृष । हरिसइ । बहुवचनं प्रयोगानुसरणार्थम् ॥

निमेर्निम्मवनिम्माणौ ॥ २ । ४ । १२० ॥

'अन्त्यस्य' इति निवृत्तम् । निपूर्वस्य मिमीतेः निम्मव निम्माण इत्या[11]देशौ भवतः । निम्मवइ । निम्माणइ । 'आदेस्तु' इति वा णत्वे । णिम्मवइ । णिमाणइ । पक्षे णिम्मइ ॥

आलीङोल्लिः ॥ २ । ४ । १२१ ॥

आङ् पूर्वस्य लीयतेः अल्लि इति भवति । अल्लिइ ॥

स्त्यस्समः खा ॥ २ । ४ । १२४ ॥

संपूर्वस्य स्त्यै ष्टै शब्दसंघातयोरित्यस्य खा इत्यादेशो भवति । संखाइ । 'त्वनतः' इत्यक् । संखाअइ ॥

---

१ My. and P. drop योगविभागान्नित्यम् । २ षिव् M. ३ अट M. ४ लुट M. ५ त्रुट M. ६ कुप् P., कुप M. ७ जिम । जिम्मइ M. ८ णस My., P. ९ इत्यादेशः स्यात् T. १० M. inserts कृष । करिसइ before it. ११ इति भवतः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्मो धुमोदः ॥ २ । ४ । १२५ ॥

उत्पूर्वस्य ध्मा शब्दाग्निसंयोगयोरिति धातोर्धुमा इत्यादेशो भवति । उद्धुमाइ । अक् । उद्धुमाअइ ॥

स्थष्ठकुकुरौ ॥ २ । ४ । १२६ ॥

'उदः' इत्यनुवर्तते । उदः परस्य स्थाधातोः ठ कुक्कुर इत्यादेशौ भवतः । उट्ठइ । उक्कुक्कुरइ ॥

णिरप्पथक्कठाचिट्ठाः ॥ २ । ४ । १२७ ॥

'स्थः' इत्यनुवर्तते । तिष्ठतेः णिरप्प थक्क ठा चिट्ठ इति चत्वार आदेशाः स्युः । णिरप्पइ । थक्कइ । ठाइ । चिट्ठइ । 'त्वनतः' इत्यगागमे । ठाअइ ॥

विस्मरः पेम्हसवीसरौ ॥ २ । ४ । १२८ ॥

विस्मरतेः पैम्हस[2] वीसर इत्यादेशौ भवतः । पैम्हसइ[3][4] । वीसरइ । पक्षे । विम्हेरइ[5] । अत्र 'अर उः' इति ऋतो रादेशः । 'श्मष्म—' इत्यादिना स्मस्य म्हादेशः[6] ॥

कृपो णिजवहः ॥ २ । ४ । १२९ ॥

कृप कृपायामित्यस्य धातोरवह इत्यादेशो भवति णिजन्तश्च । इति णिजन्तत्वात् 'णिजदेदावावे' इत्यावे भवति । अवहावेइ । कृपां करोतीत्यर्थः ॥[7]

जाणमुणौ ज्ञः ॥ २ । ४ । १३० ॥

ज्ञा अवबोधन इत्यस्य जाण मुण इत्यादेशौ भवतः[8] । जाणइ । मुणइ । भणइ इति तु मन्यतेरेव ॥

स्पृशि छिवालुक्खफरिसफासफंसालिहच्छिहान् ॥२।४।१३२॥

स्पृश स्पर्शन[9] इत्ययं धातुः छिव आलुक्ख फरिस फास फंस

---

१ °ढक्क M. २ पह्मस° My. ३ पह्मस My. ४ पह्मसइ My. ५ विह्मरइ My. ६ ह्मादेशः My. ७ My. and P. omit this sentence. ८ स्तः M. ९ स्पर्श My., P.

आलिह छिह इति सप्तादेशानापद्यते । छिवइ । आलुक्खइ । एवमन्येपि ॥

फक्कस्थक्कः ॥ २ । ४ । १३३ ॥

फक्क नीचैर्गताविित्यस्य धातोः थक्क इत्यादेशो भवति । थक्कइ ॥

श्लाघः सळाहः ॥ २ । ४ । १३४ ॥

श्लाघृ कत्थन इत्यस्य धातोः सळाह इत्यादेशो भवति । सळाहइ ॥

दिप्पस्तृपः ॥ २ । ४ । १३५ ॥

तृप प्रीणन इत्यस्य दिप्प इत्यादेशो भवति । दिप्पइ ॥

भियो भाभिहौ ॥ २ । ४ । १३६ ॥

ञिभी भय इत्यस्य भा भिह इत्यादेशौ भवतः । भाइ । अक् । भाअइ । भिहइ ॥

जृम्भेरवेर्जंभा ॥ २ । ४ । १३८ ॥

वीत्युपसर्गरहितस्य जृंभि[2] गात्रविनाम इत्यस्य जंभा इत्यादेशो भवति । जंभाइ । जंभाअइ । 'अवेः'[4] इति किम् । विअंभइ ॥

जनो जाजम्मौ ॥ २ । ४ । १४० ॥

जनी प्रादुर्भाव इत्यस्य जा जम्म इति भवतः । जाइ । जाअइ । जम्मइ ॥

उत्थल्ल उच्छलेः ॥ २ । ४ । १४१ ॥

उत्पूर्वस्य शल गतावित्यस्य उत्थल्ल इत्यादेशो भवति । उत्थल्लइ ॥

घूर्णेर्घुम्मपहल्लघोलघुलाः ॥ २ । ४ । १४२ ॥

घूर्ण भ्रमण इत्यस्य घुम्म पहल्ल घोल घुल इति चत्वार आदेशा भवन्ति । घुम्मइ । पहल्लइ । घोलइ । घुलइ ॥

लिंपो लिंपः ॥ २ । ४ । १४३ ॥

१ स्तः M. २ जुभि P. ३ T. drops it. ४ सोपसर्गस्य न for 'अवेः' इति किम् T. ५ स्युः T. ६ लिपेः M.

लिपेर्धातोर्लिंप इत्यादेशो भवति । लिंपइ ॥

शदेर्झडपक्खोडौ ॥ २ । ४ । १४४ ॥

शद्लृ शातन इत्यस्य झड पक्खोड इत्येतावादेशौ[1] भवतः । झडइ । पक्खोडइ ॥

नेः सदेर्मज्जः ॥ २ । ४ । १४५ ॥

निपूर्वस्य सदेर्धातोर्मज्ज इत्यादेशो भवति । णुमज्जइ । निषीदति । अत्र 'द्विनीक्षुप्रवासिषु' इति सूत्रेण नेरिकारस्योत्वम् ॥

पृच्छेः पुच्छः ॥ २ । ४ । १४६ ॥

पृच्छतेः पुच्छादेशः[2] स्यात् । पुच्छइ ॥

गंठो ग्रन्थेः ॥ २ । ४ । १४७ ॥

ग्रन्थ संदर्भ इत्यस्य गंठ इत्यादेशो भवति[3] । गंठइ ॥

तुवरजॅअडौ[4] त्वरेः ॥ २ । ४ । १४८ ॥

त्वरतेः तुवर जॅअड[5] इत्येतौ भवतः । तुवरइ । जॅअडइ[6] ॥

तूरः शतृतिङि ॥ २ । ४ । १५० ॥

त्वरेः इत्यनुवर्तते । शतृप्रत्यये तिङि च त्वरेस्तूर इत्यादेशो[7] भवति । तूरइ ॥

पर्यसेः पल्लट्टपल्लोट्टपल्हत्थाः ॥ २ । ४ । १५१ ॥

परिपूर्वस्यासु क्षेपण इत्यस्य पल्लट्ट पल्लोट्ट पल्हत्थ इति त्रय आदेशा भवन्ति । पल्लट्टइ । पल्लोट्टइ । पल्हत्थइ ।

मृद्गातेर्मलपरिहट्टखुड्डपन्नाडचड्डमड्डमडाः ॥ २ । ४ । १५२ ॥

मृद्गातेर्मल परिहट्ट खुड्ड पन्नाड चड्ड मड्ड मड इति सप्तादेशा भवन्ति[8] । मलइ । परिहट्टइ । खुड्डइ । पन्नाडइ[9][10] । चड्डइ । मड्डइ । मडइ ॥

---

१ इति स्तः T. २ पुच्छादेशो भवति M.; पुच्छादेशः T. ३ T. drops it. ४ °जयडौ M. ५ जयड M. ६ जयडइ M. ७ इत्यादेशः स्यात् T. ८ T. drops it. ९ T. drops it. १० M. has एवमन्येपि in place of the remaining instances.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

झरपज्झरपच्चडुखरणिद्धुलणिब्बलाः क्षरेः ॥ २ । ४ । १५४ ॥

क्षरतेः झर पज्झर पच्चड खर णिद्धुल णिब्बल इति षडादेशा भवन्ति । झरइ । पज्झरइ । एवमन्येपि ॥

कासेरवाद्वासः ॥ २ । ४ । १५५ ॥

अवात्परस्य कासेर्वास इत्यादेशो भवति । ओवासइ । अत्र 'त्वोद-वापोताः' इति सूत्रेण अवेरुपसर्गस्य ओ इत्यादेशः ॥

न्यसेर्णिमणुमौ ॥ २ । ४ । १५६ ॥

अस्यतेर्निपूर्वस्य णिम णुम इत्यादेशौ भवतः । णिमइ । णुमइ ॥

आघ्राक्षिस्नामाइग्घणिज्झराब्हुत्ताः ॥ ३ । १ । ६ ॥

आजिघ्रतिक्षयतिस्नातीनां आइग्घ णिज्झर अब्हुत्त इति यथासंख्यं भवन्ति । आइग्घइ । णिज्झरइ । अब्हुत्तइ । पक्षे । आग्घाइ । खअइ । ण्हाइ । अत्र 'श्नक्ष्ण—' इत्यादिना स्नस्य ण्हादेशः ।

रा वेर्लियः ॥ ३ । १ । ७ ॥

लीङ् श्लेषण इत्यस्य धातोर्विपूर्वस्य रा इत्यादेशो भवति । राइ ॥

निना ल्हिक्कणिलुक्कणिळिअलिक्कलुक्कणिरुग्घाः ॥३। १ । ८ ॥

'लियः' इत्यनुवर्तते । नि इत्युपसर्गेण सह लीयतेः ल्हिक्क णिलुक्क णिळिअ लिक्क लुक्क णिरुग्घ इति षडादेशा भवन्ति । णिक्कइ । एवमन्येपि ॥

सारः प्रहुः ॥ ३ । १ । ९ ॥

प्रहरतेः सार इत्यादेशो भवति वा । साइ । पक्षे । पहरइ ॥

प्रसुरुवेल्लवअल्लौ ॥ ३ । १ । १० ॥

---

१ इत्यादेशो भवति M.; इत्यादेशो वा स्यात् T. २ इति स्तः T. ३ वा स्युः T. ४ षडादेशाः स्युः M.; षडादेशा वा स्युः T. ५ इति वा स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसरतेः उवेल्ल वअल्ल इत्यादेशौ भवतः। उवेल्लइ। वअल्लइ। पक्षे। पसरइ॥

महमहो गन्धे॥ ३। १। ११॥

गन्धः प्रसरतीत्यर्थे प्रसरतेर्महमह इत्यादेशो भवति। महमहइ माळईगंधो। प्रसरति मालतीगन्धः। 'गन्धे' इति किम्। पसरइ॥

झरझारसुमरविम्हरभरभललढपअरपम्हुहाः स्मरतेः॥ ३। १। १२॥

स्मृ आध्यान इत्यस्य धातोः झर झार सुमर विम्हर भर भल लढ पअर पम्हुह इति नवादेशा भवन्ति। झरइ। झारइ। एवमन्येपि। पक्षे। म्हरइ। सरइ। उभयत्रारः[2]॥

[3]व्यापेराअड्डः॥ ३। १। १३॥

व्याप्रियतेराअड्डादेशो भवति। आअड्डइ। पक्षे। वाविरइ॥

निस्सुर्णिहरनिलदाढवरहाढाः॥ ३। १। १४॥

[4]निःसरतेर्णिहर निल दाढ वरहाढ इति [5]चत्वार आदेशा वा स्युः। णिहरइ। निलइ। इत्यादि। पक्षे। णिसरइ॥

जागुर्जग्गः॥ ३। १। १५॥

[6]जागर्तेर्जग्ग इत्यादेशो भवति। जग्गइ। पक्षे। जागरइ॥

पट्टघोट्टडल्लपिज्जाः पिबेः॥ ३। १। १६॥

पिबतेर्धातोः पट्ट घोट्ट डल्ल पिज्ज इति चत्वार आदेशा वा स्युः। पट्टइ। एवमन्येपि। पक्षे। पिबइ॥

धुवो धूजः॥ ३। १। १७॥

---

१ इति तु स्तः T. २ P. and My. drop उभयत्रारः ३ My. and P. drop Sûtras ३। १। १३ and ३। १। १४ and their commentaries. ४ निःपूर्वस्य सरतेः T. ५ चत्वारः स्युः T. ६ जागृ निद्राक्षय इत्यस्य T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूञ् कम्पन इत्यस्य धुव इत्यादेशो वा स्यात्। धुवइ। पक्षे। धुणइ। अत्र 'णो हश्च चिजिपूश्रुधूस्तुहुलूभ्यः' इत्यनेन णागमह्रस्वौ॥

भण शृणोतेः॥ ३। १। १८॥

श्रु श्रवण इत्यस्य भण इत्यादेशो वा भवति। भणइ। पक्षे। सुणइ। अत्रापि पूर्ववर्णागमः। 'लवराम्—' इति रेफलोपः। 'शोस्सल्' इति सत्वं च॥

म्लै वापव्वाओ॥ ३। १। १९॥

म्लै गात्रविनाम इत्यस्य वा पव्वाअ ईत्यादेशौ वा भवतः। वाइ। वाअइ। पव्वाअइ। पक्षे। मिलाअइ। अत्र 'लादक्लीबेषु' इति लात् प्रागित्वम्॥

ओहिरोग्घौ निद्रः॥ ३। १। २१॥

निपूर्वस्य द्रै स्वप्न इत्यस्य ओहिर उग्घ इत्यादेशौ वा भवतः। ओहिरइ। उग्घइ। पक्षे। णिद्दाइ॥

उद्घ ओरुम्मावसुऔ॥ ३। १। ३२॥

उत्पूर्वस्य वा गतिगन्धनयोरित्यस्य ओरुम्म अवसुअ इत्यादेशौ वा भवतः। ओरुम्मइ। अवसुअइ। पक्षे। उव्वाइ॥

रुवो रुंजरुंटौ॥ ३। १। ३३॥

रु शब्द इत्यस्य धातोरुंज रुंट ईत्यादेशौ वा भवतः। रुंजइ। रुंटइ। पक्षे। रुवइ॥

कोक्कवोक्कौ व्याहुः॥ ३। १। ३४॥

व्याहरतेः कोक्क वोक्क ईति वा भवतः। कोक्कइ। वोक्कइ। पक्षे। वाहरइ।

सन्नाम आदृङः॥ ३। १। ३५॥

आद्रियतेः सन्नाम इति वा भवति। सन्नामइ। पक्षे। आअरइ॥

---

१ °णागमह्रस्वौ T. २ इत्यादेशानापद्यते T. ३ स्तः T. ४ इति for इत्यादेशौ P., My. ५ स्तः T. ६ इति स्तः T. ७ स्यात् for वा भवति T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओहरौसराववतरेस्तु ॥ ३ । १ । ३६ ॥

अवपूर्वस्य तॄ प्लवनतरणयोरित्यस्य ओहर ओसर [1]इत्यादेशौ वा भवतः । ओहरइ । ओसरइ । त्वधिकारे पुनस्तुग्रहणमधिकारस्यानु-[2]स्मारणार्थम् ॥

शकेस्तरतीरपारचआः ॥ ३ । १ । ३७ ॥

शक्लृ शक्तावित्यस्य तर तीर पार चअ इति चत्वार [3]आदेशा भवन्ति । तरइ । तीरइ[4] । पारइ । चअइ । पक्षे । सकइ ॥

तरतेरपि तरइ । पारतीर कर्मसमाप्तावित्यनयोरपि । पारइ । तीरइ । त्यजेरपि । चअइ । अत्र 'त्योचैत्ये' इति त्यस्य चः जलोपश्च ॥

वेअडः खचेः ॥ ३ । १ । ३९ ॥

खचतेर्वेअड इति वा स्यात् । वेअडइ । पक्षे । खअइ ॥

सिंचसिप्पौ सिचेः ॥ ३ । १ । ४२ ॥

षिच क्षरणे इत्यस्य सिंच सिप्प इति वा भवतः[5] । सिंचइ । सिप्पइ । पक्षे । सेअइ ॥

रचेर्विडविड्डावहोग्गहाः ॥ ३ । १ । ४३ ॥

रच प्रतियत्ने इत्यस्य विडविड्ड अवह उग्गह इति त्रय आदेशा [6]भवन्ति । विडविड्डइ । अवहइ । उग्गहइ । पक्षे । रअइ ॥

केवलाअसारवसमारोवहट्टास्समारभेः ॥ ३ । १ । ४४ ॥

समाङ्पूर्वस्य रभ रामस्य इत्यस्य केवलाअ सारव समार उवहट्ट इति [7]चत्वार आदेशा भवन्ति । केवलाअइ । [8]सारवइ । समारइ । उवहट्टइ । पक्षे । समारहइ ॥

---

१ इति तु स्तः T. २ °स्मरणार्थम् M. ३ आदेशाः for आदेशा भवन्ति T. ४ एवमन्येपि for तीरइ—चअइ M.; इत्यादि T. for तीरइ–चअइ. ५ स्तः T. ६ T. drops भवन्ति. ७ चत्वारः स्युः T. ८ T. has इत्यादि in place of this and the remaining instances.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मस्जेराउड्डणिउड्डबुड्डखुप्पाः ॥ ३ । १ । ४५ ॥

टुमस्जौ शुद्धावित्यस्य आउड्ड णिउड्ड बुड्ड खुप्प इति चत्वार आदेशा[1] भवन्ति । आउड्डइ । णिउड्डइ । बुड्डइ । खुप्पइ । पक्षे । मज्जइ ॥

अनुव्रजेः पडिअग्गः ॥ ३ । १ । ४६ ॥

अनुपूर्वस्य व्रज गतावित्यस्य पडिअग्ग इति वा स्यात् । पडिअग्गइ । पक्षे । अणुवअइ ॥

वंचेर्वेहववेलवजूरवोम्मच्छाः ॥ ३ । १ । ४७ ॥

वंचु प्रलंबन इत्यस्य वेहव वेलव जूरव उम्मच्छ इति चत्वार आदेशा वा[2] स्युः । वेहवइ । एवमन्येपि । पक्षे । वंचइ ॥

रोसाणोबुसलुहलुच्छपुच्छफुसफुस्सघसहुला मार्जेः ॥३।१।४८॥

मृजू शुद्धावित्यस्य रोसाण उबुस लुह लुच्छ पुच्छ फुस फुस्स घस हुल इति नवादेशा[3] भवन्ति । रोसाणइ । उबुसइ[4] । एवमन्येपि । पक्षे । मज्जइ[5] ॥

भञ्जेर्वेमअमुसुमूरमूरपविरञ्जसूरसूडकरंजनिरंजविराः
॥ ३ । १ । ४९ ॥

भञ्जो आमर्दन इत्यस्य वेमअ मुसुमूर मूर पविरज्ज सूर सूड करंज निरंज विर इति नवादेशाः स्युः[6] । वेमअइ । मुसुमूरइ । एवमन्येपि[7] । पक्षे । भंजइ ॥

गर्जेर्बुक्कः ॥ ३ । १ । ५० ॥

गर्जतेर्बुक्कादेशो वा[8] स्यात् । बुक्कइ । पक्षे । गज्जइ ॥

डिक्को वृषे ॥ ३ । १ । ५१ ॥

वृषकर्तृकस्य गर्जतेर्डिक्क इत्यादेशो वा स्यात् । डिक्कइ । वृषो[9] गर्जतीत्यर्थः ॥

---

१ आदेशाः स्युः T २ M. drops वा. ३ नवादेशाः स्युः M.; नवादेशाः T. ४ इत्यादि for उबु……न्येपि T. ५ T. has अत्र संयोग इति ह्रस्वः after it. ६ T. drops it. ७ इत्यादि T. ८ T. drops वा स्यात्. ९ My. and P. drop the sentence.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिजेरोसुक्कः ॥ ३ । १ । ५२ ॥

तिज निशातन[1] इत्यस्य ओसुक्क इति[2] भवति । ओसुक्कइ । पक्षे । तेअइ । अत्र 'अचोचाम्' इति इकारस्य एकारः ॥

आरोलवमालौ पुञ्जेः ॥ ३ । १ । ५३ ॥

पुञ्जधातोः[3] आरोल वमाल इत्यादेशौ[4][5] वा स्तः । आरोलइ । वमालइ । पक्षे । पुंजइ ॥

कम्मवमुपभुजिः ॥ ३ । १ । ५४ ॥

उपपूर्वको भुजिः कम्मव इत्यादेशमापद्यते । कम्मवइ । पक्षे । उवभुंजइ ।

पिडवमर्जिः ॥ ३ । १ । ५५ ॥

अर्जिः[6] पिडव इत्यादेशमापद्यते । पिडवइ । पक्षे । अज्जइ ॥

लज्जेर्जीहः[7] ॥ ३ । १ । ५६ ॥

ओलस्जी व्रीडायामित्यस्य जीहं इति वा स्यात् । जीहइ । पक्षे । लज्जइ ॥

स्फुटेः सहासे मुरः ॥ ३ । १ । ६० ॥

हाससहितार्थे प्रयुक्तस्य[10] स्फुटि[11]धातोः[12] मुर इत्यादेशो वा[13] भवति[14] । मुरइ । हासेन स्फुटतीत्यर्थः ॥

मण्डेष्टिविडिकरिडचिंचचिंचिल्लचिंचआः ॥ ३ । १ । ६१ ॥

मडि भूषायामित्यस्य टिविडिक रिड चिंच चिंचिल्ल चिंचअ इति पञ्चादेशा वा[15] भवन्ति । टिविडिक्कइ । रिडइ । एवमन्येपि[16] । पक्षे । मंडइ ।

---

१ क्षमानिशातन M. २ इत्यादेशः । T. ३ °धातुः M. ४ इति स्तः T. ५ °देशावापद्यते M. ६ T. has धातुः after it. ७ °र्जिहः M., T. ८ जिह M., T. ९ जिहइ । M. १० प्रयुज्यमानो T. ११ स्फुटतेः M. १२ °धातुः तस्य T. १३ T. drops it १४ स्यात् M. १५ T. drops वा भवन्ति । १६ इत्यादि T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुडिरुल्लुकणिल्लुकोल्लूरोक्खुडलुकतोडखुट्टखुडान्
॥ ३ । १ । ६२ ॥

तुडि तोडन इत्ययं धातुः उल्लुक णिल्लुक उल्लूर उक्खुड लुक तोड खुट्ट खुड इत्यष्टादेशाना[1]प्नोति । उल्लुकइ । णिल्लुकइ । ऐवमन्येपि । पक्षे । तुडइ । त्रुटेः शकादित्वात् 'शकगे' इत्यनेनान्त्यस्य द्वित्वे तुट्टइ ॥

घुसलविरोलौ मथिः ॥ ३ । १ । ६३ ॥

मन्थ विलोडन इत्यें[3]यं धातुः घुसल विरोल ईत्यादेशावाप्नोति । घुसलइ । विरोलइ । पक्षे । मंथइ ॥

णिहर आक्रन्देः ॥ ३ । १ । ६५ ॥

आङ्पूर्वस्य क्रन्देः णिहर ईति वा स्यात् । णिहरइ । पक्षे । अक्कंदइ ॥

ओअंदोद्दालौ च्छिदेराङा ॥ ३ । १ । ६६ ॥

छिदिर् द्वैधीकरण इत्यस्य आङ्सहितस्य ओअंद उद्दाल ईत्येतौ वा भवतः । ओअंदइ । उद्दालइ । पक्षे । छिंदइ ॥

अड्डः कथेः ॥ ३ । १ । ६८ ॥

कँथे निष्पाक इत्यस्य अड्ड इति वा स्यात् । अड्डइ । पक्षे । कहइ ॥

कथेर्वज्जरपज्जरसग्घसाससाहचवजप्पपिसुणबोल्लोव्वालाः
॥ ३ । १ । ६९ ॥

कथयतेः वज्जर पज्जर सग्घ सास साह चव जप्प पिसुण बोल्ल उव्वाल ईति दशादेशा भवन्ति । वज्जरइ । पज्जरइ । एवमन्येपि । पक्षे । कहइ ॥

[11]दुःखे णिव्वरः ॥ ३ । १ । ७० ॥

---

१ °नापद्यते T. २ इत्यादि T. ३ इत्यस्य for इत्ययं धातुः T. ४ इत्यादेशौ । T. ५ इत्यादेशो वा T. ६ इत्यादेशौ तु स्तः T. ७ कथ M. ८ एते M. ९ T. has तु after it. १० M. has पज्जरइ । वज्जरइ । ११ My. and P. drop Sutras ३ । १ ।७० and ३ । १ । ७१ and the commentary thereon.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखविषयस्य कथेः णिव्वर इति वा स्यात् । णिव्वरइ । दुःखं कथयतीत्यर्थः ॥

निषेधेर्हक्कः ॥ ३ । १ । ७१ ॥

निपूर्वस्य षिधू शास्त्रे माङ्गल्ये चेत्यस्य हक्क इति वा स्यात् । हक्कइ । पक्षे । सिहइ ॥

जूरः क्रुधेः ॥ ३ । १ । ७२ ॥

क्रुधेर्जूर इत्यादेशो वा स्यात् । जूरइ । पक्षे । कुज्झइ । 'ध्यह्यो-र्झल्' इति झल् ॥

विसूरश्च खिदेः ॥ ३ । १ । ७३ ॥

खिद दैन्य इत्यस्य विसूर इति वा स्यात् चकारात् जूर इति च । विसूरइ । जूरइ । पक्षे खिज्जइ । अत्र 'घ्यय्यांजः' इति घस्य जः[१] ॥

निरः पद्यतेर्वलः ॥ ३ । १ । ७५ ॥

निपूर्वस्य पद्यतेर्वल इति[२] वा स्यात् । णिव्वलइ । पक्षे । णिवज्जइ ॥

संतपां झंखः ॥ ३ । १ । ७६ ॥

संपूर्वस्य तप्यतेः बहुवचनान्निश्वसिति विलपत्युपालभतीनां च झंख इत्यादेशो[३] वा स्यात् । झंखइ । संतप्यते निश्वसिति विलपति उपालभते वा । पक्षे । णीससिइ[४] । 'शोर्लुप्त—'इति दीर्घः । विळ-वइ । उपाळहइ ।

णिरवो बुभुक्षाक्षिप्योः ॥ ३ । १ । ७८ ॥

बुभुक्षतेराङ्पूर्वस्य क्षिपतेश्च णिरव इत्यादेशो[५] वा स्यात् । णिरवइ । बुभुक्षते । आक्षिपति वा । पक्षे । बुहुक्खइ[६] ।

क्षिपेरड्डक्खपरिहुलघत्तचूहपेल्लणोल्लसोल्लगल्लत्थाः ॥ ३ । १ । ७९ ॥

---

१ जत्वम् T. २ इत्यादेशो M. ३ इति for इत्यादेशो My., P. ४ णीसाइंस M. ५ इत्यादेशः । T. ६ बुभुक्खइ M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षिप प्रेरणे इत्यस्य[1] अड्डक्ख परि हुल घत्त चूह पेल्ल णोल्ल सोल्ल गल्लत्थ इति नेवादेशा[2] वा[3] स्युः । अड्डक्खइ । परिइ । एवमन्येपि । पक्षे । खिपइ ॥

उत्क्षिपेरुत्थंघोसिक्कहक्खुवाल्लत्थगुलुगुंछाब्हुत्ताः ॥ ३।१।८०॥

उत्पूर्वस्य क्षिपतेः[4] उत्थंघ उसिक्क हक्खुव अल्लत्थ गुलुगुंछ अब्हुत्त इत्यादेशौ[5] वा भवन्ति । उत्थंघइ । उसिक्कइ । एवमन्येपि । पक्षे । उक्खिवइ ॥

वेपेराअब्बाअज्झौ ॥ ३ । १ । ८१ ॥

टुवेपृ कम्पन इत्यस्य आअब्ब आअज्झ इत्यादेशौ[6] वा भवतः । आअब्बइ । आअज्झइ । पक्षे । वेवइ ॥

विरणडौ गुंपेः[7] ॥ ३ । १ । ८२ ॥

गुंप[8] व्याकुलत्व इत्यस विर णड इति[9] वा भवतः । विरइ । णडइ । पक्षे । गुंप्पइ[10] ॥

चच्चारवेलवमुपालभेः ॥ ३ । १ । ८३ ॥

उपाङ्पूर्वस्य डुलभष् प्राप्तावित्यस्य चच्चार वेलव इति वा[11] भवतः । चच्चारइ । वेलवइ । पक्षे । उवालहइ[12] ॥

खउरपड्डुहौ क्षुभेः ॥ ३ । १ । ८४ ॥

क्षुभ्यतेः खउर पड्डुह इति वा[13] भवतः । खउरहि । पड्डुहइ । पक्षे । खुब्भइ ॥

प्रदीपेः संदुक्खाब्हुत्ततेअवसंधुमाः ॥ ३ । १ । ८५ ॥

प्रपूर्वस्य दीप्यतेः संदुक्ख अब्हुत्त तेअव संधुम इति चत्वार[14]

---

१ इत्ययं धातुः T. २ नवादेशानापद्यते वा T. ३ M. drops it. ४ क्षिपतिः M., T. ५ °देशानाप्नोति M; इति षडादेशानापद्यते T. ६ इति वा भवतः My., P. ७ गुम्पेः M. ८ गुम्प M. ९ इत्येतौ M. १० गुम्पइ M. ११ स्तः for वा भवतः T. १२ उपाळहइ My. १३ तु स्तः T. १४ चत्वारस्तु स्युः । T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदेशा भवन्ति । संदुक्खइ । अब्भुत्तइ । तेअवइ । संधुमइ । पक्षे । पलीवइ । अत्र 'दोहदप्रदीप—' इत्यादिना दस्य लः ॥

अल्लिअ उपसर्पेः ॥ ३ । १ । ८६ ॥

उपपूर्वस्य सृप गतावित्यस्य अल्लिअ इति वा स्यात् । अल्लिअइ । पक्षे । उपसप्पइ ॥

कमवसलिसलोट्टाः स्वपेः ॥ ३ । १ । ८७ ॥

ञिष्वप् शय इत्यस्य कमव सलिस लोट्ट इति त्रय आदेशा वा स्युः । कमवइ । सलिसइ । लोट्टइ । पक्षे 'स्वार्द्रे उदोत्' इत्यतः 'उदोत्' इत्यनुवर्तमाने

स्वपि ॥ १ । २ । २८ ॥

स्वपि धातौ आदेरत उदोतौ वा भवतः । सुवइ । सोवइ ॥

बेडबडो[1] विलपेः ॥ ३ । १ । ८८ ॥

विपूर्वस्य लपव्यक्तायां वाचीत्यस्य[2] बडँबड[3] इत्यादेशो वा स्यात् । बेंडबडइ[4] । पक्षे । विळवइ ॥

रभिराङोरम्भडवौ ॥ ३ । १ । ८९ ॥

आङ्पूर्वः रभ राभस्य इत्ययं धातुः रम्भ डव इत्येतावादेशावाप्नोति[5] । रम्भइ । डवइ । पक्षे । आरहइ ।

भाराक्रान्ते नमेर्णिसुडः ॥ ३ । १ । ९० ॥

भाराक्रान्तो[6] नमतीत्यर्थे नमतेर्[7]णिसुड इत्यादेशो[8] भवति । णिसुडइ[9] ॥

उब्भाववेल्लणिसरकोड्डुमसंखुड्डखेड्डमोट्टाअकिलिकिंचा रमेः ॥ ३ । १ । ९१ ॥

१ बिडबिडो P., My. २ °त्यस्यायमादेशः । M. ३ बिडबिड P., My. ४ बिडबिडइ My., P. ५ इत्येतावापद्यते M. ६ भाराक्रान्ते कर्तरि M.; नमु प्रह्वत्वे शब्दे इत्यस्य भाराक्रान्ते T. ७ M. drops नमतेः. ८ इत्यादेशः T. ९ M. adds नमतीत्यर्थः । T. has भाराक्रान्तो नमतीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रमु क्रीडायामित्यस्य धातोः[1] उब्भाव वेल्ल णिसर कोड्डुम संखुड्ड खेड्ड मोट्टाअ किलिकिंच इत्यष्टादेशा वा स्युः । उब्भावइ । वेल्लइ । एवमन्येपि । पक्षे । रमइ ॥

पडिसापडिसामौ शमेः ॥ ३ । १ । ९२ ॥

शम उपशम इत्यस्य पडिसा पडिसाम इत्यादेशौ वा भवतः[2] । पडिसाइ । पडिसामइ ॥

लुभेः संभावः ॥ ३ । १ । ९३ ॥

लुभ गार्ध्ये इत्यस्य धातोः संभाव इति[3] वा स्यात् । संभावइ । पक्षे । लुभइ ॥

आक्रमिरोहावोत्थारच्छुंदान्[6] ॥ ३ । १ । ९४ ॥

आङ्पूर्वः क्रमु पादविक्षेप इत्ययं धातुः ओहाव उत्थार छुंद[7] इति त्रीनादेशानाप्नोति । ओहावइ । उत्थारइ । छुंदइ[8] । पक्षे । अक्कमइ ॥

विश्रमतेर्णिव्वा ॥ ३ । १ । ९५ ॥

विपूर्वस्य श्रमु[9] तपसि खेदे चेत्यस्य णिव्वा इत्यादेशो[5] वा स्यात्[4] । णिव्वाइ । पक्षे । वीसमइ । अत्र 'शोर्लुस—'[10] इत्यादिना दीर्घः ॥

झंडुल्लडुमडंडल्लभमाडभुमभंमडतलअंटझंटगुमटिरिटिल्लपरिपरघमचक्कमुभमडघसझंपडुसा भ्रमेः ॥ ३ । १ । ९६ ॥

भ्रमु अनवस्थान इत्यस्य झुंडुल्ल डुम डंडल्ल भमाड भुम भंमड तलअंट झंट गुम टिरिटिल्ल परि पर घम चक्कमु भमड घस झंप डुस इत्यष्टादशादेशा वा भवन्ति[11] । झुंडुल्लइ । डुमइ । एवमन्येपि । पक्षे । भमइ ॥

---

१ M. drops it. २ भवन्ति । M., T. ३ M. drops it. ४ स्तः M., T. ५ इत्यादेशः । T. ६ चरण्डान् M. ७ चरण्ड M. ८ चरण्डइ M. ९ श्रमु परिश्रम इत्यस्य M. १० T. drops it. ११ स्युः M., T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यागमागमाभ्यागमां पल्लोट्टाहिपच्चुओम्मच्छाः ॥ ३ । १ । ९८ ॥

प्रत्यागमेरागमेरभ्यागमेश्च यथाक्रममेते त्रय आदेशा वा भवन्ति । पल्लोट्टइ । अहिपच्चुअइ । उम्मच्छइ । पक्षे । पच्चाअच्छइ । अत्र 'त्योचैत्ये' इति त्यस्य चः । आअच्छइ । अब्भाअच्छइ ॥

रिहरिंगौ प्रविशेः ॥ ३ । १ । ९९ ॥

प्रविशतेः रिह रिंग इति वा भवतः । रिहइ । रिंगइ । पक्षे । पविसइ ॥

संगमोब्भिडः ॥ ३ । १ । १०० ॥

संगच्छतेरब्भिड इति भवति । अब्भिडइ । पक्षे । संगच्छइ ॥

डिप्पणिड्डुहौ विगलेः ॥ ३ । १ । १०१ ॥

विपूर्वस्य गलतेः डिप्प णिड्डुह इति वा भवतः । डिप्पइ । णिड्डुहइ । पक्षे । विगळइ ॥

णिवहणिरिणासणिरिणिज्जरोञ्चचंडाः पिष्टेः ॥ ३।१।१०२ ॥

पिष्लृ संचूर्णने इत्यस्य णिवह णिरिणास णिरिणिज्ज रोञ्च चंड इति पञ्चादेशा वा स्युः । णिवहइ । एवमन्येऽपि । पक्षे । पिसइ ॥

वलेर्वंफः ॥ ३ । १ । १०३ ॥

वलेर्वंफ इति वा स्यात् । वंफइ । पक्षे । वलइ ॥

भ्रंशेः पिड्डपिट्टचुंक्कचुल्लघट्टघाडाः ॥ ३ । १ । १०४ ॥

भ्रंशु अधःपतन इत्यस्य पिड्ड पिट्ट चुंक्क चुल्ल घट्ट घाड इति षडादेशा वा स्युः । पिड्डइ । एवमन्येपि । पक्षे । भंसइ ॥

भषेर्बुक्कः ॥ ३ । १ । १०५ ॥

भष श्वविराव इत्यस्य बुक्क इति वा स्यात् । बुक्कइ । पक्षे । भसइ ॥

---

१ स्युः M., T. २ तु स्तः T. ३ संगमोच्छिडः P. ४ °रच्छिड P. ५ तु स्तः T. ६ अच्छिडइ P. ७ द्वौ आदेशौ तु । T. ८ इत्यादेशस्तु T. ९ छुक्कछुल्लपुट्टपुटाः P. १० छुक्क छुल्ल पुट्ट पुट P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरग्घवाग्घोडाहिरेमांगुमाङ्गुमाः ॥ ३ । १ । १०६ ॥

पॄ पालनपूरणयोरित्यस्य अग्घव अग्घोड अहिरेम अंगुम अङ्गुम इति पञ्चादेशा वा स्युः । अग्घवइ । एवमन्येपि पक्षे । पूरइ ॥

आहाहिलंघवच्चाहिअक्खमहसिहचिल्लुंपचंपाः काङ्क्षेः ॥ ३ । १ । १०७ ॥

काङ्क्षतेः आह अहिलंघ वच्च अहिअक्ख मह सिह चिल्लुंप चंप इत्यष्टादेशा वा स्युः । आहइ । एवमन्येपि । पक्षे । कंखइ ॥

नशिरवहरावसेहणिवहपडिसासेहणिरणासान् ॥ ३ । १।१०८॥

नश्यतीत्ययं धातुः अवहर अवसेह णिवह पडिसा सेह णिरणास इति षडादेशानापद्यते वा । अवहरइ । एवमन्येपि । पक्षे । णासइ । अत्र 'शोर्लुप्त—' इति दीर्घः ॥

साअड्ढाणच्छकड्ढाच्छाअंछाणंछाः कृषेः ॥ ३ । १ । १०९ ॥

कृष विलेखन इत्यस्य साअड्ढ आणच्छ कड्ढ अच्छ आअंछ आणंछ इति षडादेशा वा स्युः । साअड्ढइ । एवमन्येपि । पक्षे । कासइ ॥

असावक्खोडः ॥ ३ । १ । ११० ॥

कृषेरित्यनुवर्तते । असिं कोशात् कर्षतीत्यर्थे कर्षतेः अक्खोड इति भवति । अक्खोडइ । असिं कोशादाकर्षतीत्यर्थः ॥

उल्लषेरूसलोसुंभारोअणिल्लसगुंजोल्लपुलआआः ॥ ३ । १ । १११ ॥

उत्पूर्वस्य लष कान्तावित्यस्य ऊसल ऊसुंभ आरोअ णिल्लस गुंजोल्ल पुलआअ इति षडादेशा भवन्ति । ऊसलइ । गुंजोल्लइ । ह्रस्वे । गुंजुल्लइ । एवमन्येपि । पक्षे । उल्लसइ ॥

---

१ °घुवाघूडाहिरमांगुमांडुमाः P. २ अघुव अघूड अहिरम अंगुम अंडुम P. ३ अघुवइ P. ४ धातोः M. ५ षडादेशा वा स्युः M. ६ My. and P. drop this sentence. ७ वा स्युः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संदिशोप्पाहः ॥ ३ । १ । ११२ ॥

संपूर्वस्य दिश अतिसर्जन इत्यस्य अप्पाह इति वा स्यात् । अप्पाहइ । पक्षे । संदिसइ ॥

ग्रसेर्घिसः ॥ ३ । १ । ११३ ॥

ग्रसु अदन इत्यस्य घिस इति वा स्यात् । घिसइ । पक्षे । गसइ ॥

भ्रासेर्भिसः ॥ ३ । १ । ११४ ॥[1]

भ्रासृ दीप्तावित्यस्य भिस इति वा स्यात् । भिसइ । पक्षे । भासइ ॥[2]

प्रतीक्षेर्विहरविरमालसामआः ॥ ३ । १ । ११५ ॥[3]

प्रतिपूर्वस्येक्षतेः विहर विरमाल सामअ इति वा भवन्ति । विहरइ । एवमितरौ । पक्षे । पडिक्खइ ॥

स्रंसेर्ल्हसडिम्भौ ॥ ३ । १ । ११६ ॥

स्रंसु अवस्रंसन इत्यस्य ल्हस डिम्भ इति द्वौ भवतः । ल्हसइ । डिम्भइ । पक्षे । संसइ । परिल्हसइ इत्यपि दृश्यते ॥

मृक्षेश्चोव्वडः ॥ ३ । १ । ११७ ॥

मृक्ष संघात इत्यस्य चोव्वड इति वा स्यात् चोव्वडइ । पक्षे । मक्खइ ॥

विसट्टो दलेः ॥ ३ । १ । ११८ ॥

दलतेर्विसट्ट इति वा स्यात् । विसट्टइ । पक्षे । दळइ ॥

त्रसेर्वज्जडरौ ॥ ३ । १ । ११९ ॥

त्रसतेर्वज्ज डर इत्येतौ वा भवतः । वज्जइ । डरइ ॥

वोज्जो वीजेश्च ॥ ३ । १ । १२० ॥

वीज व्यजन इत्यस्य चकारात् त्रसेश्च वोज्ज इति वा स्यात् । वोज्जइ । पक्षे । वीजइ । तसइ ॥

---

१ भाजुर्भिसः P., My. २ भास M. ३ °सामयाः M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गवेषेर्घत्तगमेसडुंडुल्लडंडोल्लाः ॥ ३ । १ । १२१ ॥

गवेषयतेः घत्त गमेस डुंडुल्ल डंडोल्ल इति चत्वार आदेशा वा स्युः । घत्तइ । एवमन्येपि । पक्षे । गवेसइ ॥

तक्षेश्चंछरंपरंफाः ॥ ३ । १ । १२२ ॥

तक्षू तनूकरण इत्यस्य चंछ रंप रंफ इति त्रय आदेशा भवन्ति । चंछइ । रंपइ । रंफइ । पक्षे तक्खइ । स्पृहादिपाठात् क्षस्य छः । तच्छइ ॥

हसेर्गुंजः ॥ ३ । १ । १२३ ॥

हसतेर्गुंज इति वा स्यात् । गुंजइ । पक्षे । हसइ ॥

दहेरहिऊलालुंखौ ॥ ३ । १ । १२४ ॥

दह भस्मीकरण इत्यस्य अहिऊल आलुंख इति वा भवतः । अहिऊलइ । आलुंखइ । पक्षे । दहइ ।

विकसेः कोआसवोसैग्गौ ॥ ३ । १ । १२५ ॥

विकसेः कोआस वोसैग्ग इति वा भवतः । कोआसइ । वोसैग्गइ । पक्षे । विकसइ ।

श्लिषोपआससामग्गपरिअन्ताः ॥ ३ । १ । १२६ ॥

श्लिष आलिङ्गन इत्यस्य अपआस सामग्ग परिअन्त इति वा भवन्ति । अपआसइ । सामग्गइ । परिअन्तइ । पक्षे । सिसइ ।

जुगुप्सतेर्झणदुगुच्छदुगुंच्छझप्पदुगच्छाः ॥ ३ । १ । १२७ ॥

जुगुप्सतेः झण दुगुच्छ दुगुंछ झप्प दुगच्छ इत्यादेशा वा स्युः । झणइ । दुगुच्छइ । एवमन्येपि । पक्षे । जुउच्छइ । अत्र 'ध्यश्चत्सप्साम्' इति पस्य छः ॥

वलग्गच्छडामारुहेः ॥ ३ । १ । १२८ ॥

---

१ °लुक्खौ P. २ आलुक्ख P. ३ °लोसट्टौ P. ४ लोसट्ट P. ५ लोसट्टइ P. ६ °परिअत्ताः P. ७ परिअन्त P. ८ परिअत्तइ P.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आङ्पूर्वस्य रुहेः वलग्ग छड इति वा भवतः । वलग्गइ । छडइ । पक्षे । आरुहइ ॥

भुल्लो[1] लक्ष्यात् स्खलेः ॥ ३ । १ । १२९ ॥

लक्ष्यविषयकस्य स्खलतेः भुल्ल[2] इति भवति लक्ष्यात् स्खलतीत्यर्थे । भुल्लइ[3] ॥

गाहोवाद्वाहः ॥ ३ । १ । १३० ॥

अवात्परस्य गाहू विलोडन इत्यस्य वाह इति वा स्यात् । ओवाहइ । पक्षे । ओगाहइ । अत्र 'त्वोदवापोताः' इति सूत्रेण अवस्य ओ इत्यादेशः ॥

गुंमगुंमडौ मुहेः ॥ ३ । १ । १३१ ॥

मुह वैचित्य इत्यस्य गुंम गुंमड इति[4] वा भवतः । गुंमइ । गुंमडइ । पक्षे । मुज्जइ । अत्र 'ध्यह्योर्झल्' इति झल् ॥

विशेषाननुवृत्तेः 'तूरः शतृतिङि' इति ज्ञापकाच्च उक्ता धात्वादेशाः शतृशानजादिष्वपि[5] संचारणीयाः ॥

धातवोऽर्थान्तरेष्वपि ॥ ३ । १ । १३२ ॥

उक्तेभ्योन्येष्वप्यर्थेषु[6] धातवो भवन्ति । पलिः प्राणने पठितः खादनेपि । पलिर्द्वयोः प्रयोज्यः । पलइ खादति । प्राणिति वा । कलिः संख्याने संज्ञाने च । कलिरुभयोः प्रयोज्यः । कलइ । जानाति संख्यानं करोति वा । गिरिर्गतौ प्रवेशे च । अनयोरयं प्रयोज्यः । गिरइ । गच्छति । प्रविशति वा । विलपत्युपालंभिसंतपनिश्वसां[7] कंखादेशः । विलपत्यादीनां चतुर्णां कंखादेशो भवति । कंखइ । विलपति । उपालभते । संतप्यति[8] । निश्वसिति वा । केचिद् भाष्यन्ते कैश्चिदुपसर्गैर्नित्यम् । अत्र केचिद् धातवः कैश्चिदुपसर्गैरर्थान्तरेषु नित्यं

---

१ चुल्लो P. २ चुल्ल P. ३ चुल्लइ P. ४ इत्यादेशौ वा स्याताम् M. ५ तादृशानङादिष्वपि M. ६ अर्थान्तरेष्वपि M. ७ संतपि M. ८ संतपति M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाष्यन्ते । पहरइ । युध्यते । संहरइ । संवृणोति । अणुहरइ । सदृशीभवति । णिहरइ । पुरीषोत्सर्जनं करोति । विहरइ । क्रीडति । आहरइ । खादति । परिहरइ । त्यजति । पडिहरइ । पुनः पूरयति । उपहरइ । पूजयति । आहरइ । आह्वयति । पवसइ । देशान्तरं गच्छति । उच्चुवइ । चटति । झ्ल्लहरइ[1] । निःसरति । इत्यादि ॥

अत्र भावकर्मणोरेभ्य एव धातुभ्यः कतिचिद्रूपाणि प्रदर्श्यन्ते । अत्राकर्मकेषु धातुषु भावे प्रथमपुरुषैकवचनमेव । उपसर्गवशात् सकर्मकत्वे तेभ्योपि बहुवचनानि[2] भवन्ति । भावे भू इति स्थिते । अनुक्तमन्यन्यायेन यकि हो इत्यादेशः । पूर्ववत् हो य इति स्थिते

ईअइज्जौ यकः ॥ २ । ४ । ९१ ॥

सर्वेभ्यो धातुभ्यो भावकर्मणोर्विहितो यो यक् प्रत्ययस्तस्य ईअ इज्ज इत्यादेशौ[3] भवतः । होईअ । होइज्ज इति स्थिते तिबादयस्तदादेशा इजादयश्च पूर्ववत् । भावे । होईअइ । होईअए । होइज्जइ । होइज्जए । 'वा लड्लोट्छतृषु' इत्येत्वं वा । होईएइ । होइज्जेइ । 'लड्लटोश्च जर्जारौ' इति इचः स्थाने जर्जारौ च । 'ज्जाज्जे' इत्यत एत्वं च वा । होईएज्ज । होईएज्जा । होइज्जेज्ज । होइज्जेज्जा । कर्मणि लटि प्रथमपुरुषैकवचने[4] अनुपूर्वत्वमेव विशेषः । रूपाणि तु अणुहोईअइ । इत्यादि । भाववत् । कर्मणि प्रथमपुरुषबहुत्वे[5] झिझयोरादेशाः पूर्ववत् । यक ईआदेशपक्षे । अणुहोईअंति । अणुहोईअंते । अणुहोईअइरे । 'वा लड्लोट्छतृषु' इति वा एत्वे । अणुहोईएन्ति । अणुहोईएन्ते । अणुहोईएइरे । अत्र लड्लटोः जर्जारौ । 'ज्जाज्जे' इत्येत्वं च । अणुहोईएज्ज । अणुहोईएज्जा । एवं यक इज्जादेशपक्षेपि रूपाणि कल्पनीयानि । मध्यमपुरुषैकवचने सिप्थासोरादेशौ पूर्ववत् । यक ईआदेशपक्षे । अणुहोईअसि । अणुहोईएसि । अणुहोईएज्ज । अणु-

---

१ उल्लाहइ M. २ बहुवचनान्यपि M. ३ इत्यादेशावापद्यते M. ४ My. and P. drop पुरुष. ५ My. and P. drop पुरुष.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होईएज्जा । एवं यक इज्जादेशपक्षेपि । मध्यमपुरुषबहुत्वे थध्वमोरादेशौ पूर्ववत् । अणुहोईअइत्था । अणुहोईअह । अणुहोईएइद्धा । अणुहोईएह । अणुहोईएज्ज । अणुहोईएज्जा । एवं यक इज्जादेशपक्षेपि । उत्तमैकवचने । यक ईआदेशपक्षे मिबिटोरादेशाः पूर्ववत् । अणुहोईअमि । अणुहोईआमि । अणुहोईइमि । अणुहोईएमि । अणुहोईएज्ज । अणुहोईएज्जा । एवं यक इज्जादेश[1]पक्षेपि । उत्तमपुरुषबहुत्वे । मसहिङ्गोरादेशाः पूर्ववत् । यक ईआदेशपक्षे । अणुहोईअमो । अणुहोईआमो । अणुहोईइमो । अणुहोईएमो । अणुहोईएज्ज । अणुहोईएज्जा । एवं यक इज्जादेश[2]पक्षेपि । एवं मस्महिङ्गोरादेशयोः मह्मोरपि रूपनिर्णयः कर्तव्यः । यक इज्जादेश[3]पक्षेपि तद्वद्रूपक्लृप्तिः ॥

एवमजन्तानां हलन्तानां च धातूनां भावकर्मणोः लँटि[4] रूपाणि निर्णेतव्यानि । आर्धधातुके यगभावेपि तस्य स्थाने ईअइज्जावक्गन्तव्यौ । तथा च लुङ्लङ्लिट्सु भावे 'भूतार्थस्य सिहिअहि' इति स्यादयः । यक ईअइज्जौ च । होईअसि । होईअहिअ । होईअहि । इज्जादेशे । होइज्जसि । होइज्जहिअ । होइज्जहि । कर्मणि अणुहोईसि । अणुहोईअहिअ । अणुहोईअहि । एवमिज्जादेशेपि स्यादयस्तुतिप्तयोरेवेत्युक्तत्वात् । अन्यत्र लङ्रूपाण्युदाहर्तव्यानि ॥

एवमन्येषामजन्तानां हलन्तानां च धातूनां भूतार्थे रूपक्लृप्तिर्भवति । ललृटोः 'भविष्यति हिरादिः' इति हिः । ईअइज्जौ च । 'एच्च क्त्वातुंतव्यभविष्यति' इत्येदितौ । भावे । होईएहिइ । होईइहिइ । होईएहिज्ज । होईइहिज्ज । होईएहिज्जा । होईइहिज्जा । एवं यक इज्जादेशेपि । कर्मणि प्रथमैकवचने अनुपूर्वत्वमेव विशेषः । रूपाणि तु भाववत् । कर्मणि प्रथमबहुत्वे । अणुहुईएहिंति । अणुहोई-

---

१ °देशेपि P., My. २ °पक्षे M. ३ °देशे एतद्व° My., P.
४ M. has अपि for लटि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिंति । अणुहोईएहिंते । अणुहोईइहिंते । अणुहोईएहिरे । अणुहोईइहिरे । अणुहोईएहिज्ज । अणुहोईएहिज्जा । एवमिज्जादेशेपि । मध्यमैकवचने । अणुहोईएहिसि । अणुहोईइहिसि । अणुहोईएहिसे । अणुहोईइहिसे । जर्जारौ च । एवमिज्जादेशेपि । [1]मध्यमबहुत्वे । अणुहोईएहिइत्था । अणुहोईइहिइत्था । अणुहोईएहिह । जर्जारौ च । एवमिज्जादेशेपि । उत्तमैकत्वे । अणुहोईएहामि । अणुहोईइहामि । अणुहोईएस्सामि । अणुहोईइस्सामि । अणुहोईएस्सं । अणुहोईइस्सं । जर्जारौ च । एवमिज्जादेशेपि । बहुत्वे । अणुहोईएहिमो । अणुहोईइहिमो । अणुहोईएहामो । अणुहोईइहामो । अणुहोईएस्सामो । अणुहोईइस्सामो । एवं मम्वोरपि । हिस्साहित्थयोः । अणुहोईएहिस्सा । अणुहोईइहिस्सा । अणुहोईएहित्था । अणुहोईइहित्था । जर्जारौ च । एवमिज्जादेशेपि । एवमन्येषां धातूनां भावकर्मणोर्भविष्यति रूपाणि । लोटि पूर्ववदीआइज्जौ । 'एकस्मिन् प्रथमादेः–' इति दुसुमवः । 'बहौ न्तुहमो', 'सोस्तु हि', 'लुगिज्जहीज्जस्विज्जेतः' इति लुगादयः । 'वा लङ्लोट्छतृषु' इत्येत्वं च वा । शेषं पूर्ववत् । भावे । होईएदु । होईअदु । होइज्जेदु । होइज्जदु । कर्मणि । ईआदेशपक्षे । प्रथमैकत्वे । अणुहोईएदु । अणुहोईअदु । जर्जारौ च । एवमिज्जादेशेपि । अणुहोईएन्तु । अणुहोईअन्तु । जर्जारौ च । मध्यमैकत्वे । अणुहोईएसु । अणुहोईअसु । अणुहोईएहि । अणुहोईअहि । अणुहोईए । अणुहोईअ । अणुहोईएइज्जहि । अणुहोईअइज्जहि । अणुहोईएइज्जसु । अणुहोईअइज्जसु । अणुहोईएइज्जे । अणुहोईअइज्जे । जर्जारौ च । एवमिज्जादेशेपि । [2]बहुत्वे । अणुहोईएह । अणुहोईअह । जर्जारौ च । एवमिज्जादेशेपि । उत्तमैकत्वे । अणुहोईएमु । अणुहोईअमु । जर्जारौ च । एवमिज्जा-

---

१ My. and P. omit मध्यमबहुत्वे—एवमिज्जादेशेपि. २ My. omits बहुत्वे—इज्जादेशेपि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशेपि । बहुत्वे । अणुहोईएमो । अणुहोईअमो । जर्जारौ च । एवमिज्जादेशेपि ॥

एवमन्येषां हलन्तानामजन्तानां च लोटि भावकर्मणो रूपसिद्धि-रूह्या ॥

लिङि । 'त्विज्जालिङः' इति लिङादेशादिज्जात्पर इकारो वा प्रयो-क्तव्यः । अयमेव विशेषः । रूपाणि तु लोड्वत् ॥

लृङि । ईअइज्जौ । 'माणन्तौल् च लृङः' इति माणन्तौ च । भावे । होईअमाण । होईअन्त । होइज्जमाण । होइज्जन्त । कर्मणि । अणुहोईअमाण । अणुहोईअन्त । अणुहोइज्जमाण । अणुहोइज्जन्त । जर्जारौ च । एवमन्येषु पुरुषेषु वचनेषु ईअइज्जयोरुदाहरणानि ॥

धात्वन्तराणामपि लृङ्येवं रूपाणि कल्पनीयानि ॥

अथ भावकर्मणोरेधादयः प्रदर्श्यन्ते । ईअइज्जौ । एहीअइ । एहिज्जहि ॥ **डुपचष्** पाके । वईअई । वइज्जइ ॥ **टुनदि** समृद्धौ । णंदीअइ । णंदिज्जइ ॥ **ध्वंसु** गतौ । झुंसीअइ । झुंसिज्जइ । धंसी-अइ धंसिज्जइ ॥ **व्येञ्** संवरणे । वेईअइ । वेइज्जइ ॥ **अद्** भक्षणे । अदीअइ । अदिज्जइ ॥ **ओहाक्** त्यागे । हाईअइ । हाइज्जइ ॥ **डुधाञ्**—धाईअइ । धाइज्जइ ॥ **षूञ्**—सवीअइ । सविज्जइ ॥ **णह** बन्धने । णहीअइ । णहिज्जइ ॥ **तुद** व्यथने । तुदीअइ । तुदिज्जइ ॥ **मृङ्**[2] मरणे । मरीअइ । मरिज्जइ ॥ **मुच्लृ**[3] मोक्षणे । मुईअइ । मुइ-ज्जइ । लृलुटोः 'डोच्छ वचिमुचिरुदिश्रुभुजः' इति ओच्छादेशो हिलुक् च वा । मोच्छीअहिइ । मोच्छिज्जहिइ । 'डं मेस्छात्ततः' इति मेस्थाने डं च । मोच्छीअअं । मोच्छिज्जअं ॥ एवं वच्यादेरपि भाव-कर्मणोर्लृलुटो रूपम् । शेषं पूर्ववत् । **रुधिर्**—रुंधीअइ । रुंधिज्जइ । 'युधबुध—' इत्यादि सूत्रेण रुधेरन्त्यस्य झादेशे । रुंझीअइ । रुंझि-

---

१ अजन्तानां हलन्तानां च M. २ मृञ् । My., P. ३ P. and My. drop it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्जइ ॥ **युजिर्**—जुंजीअइ । जुंजिज्जइ । जुप्पीअइ । जुप्पिज्जइ । जुज्जीअइ । जुज्जिज्जइ । अत्र 'जुंजजुज्जजुप्पा युजेः' इति सूत्रेण त्रय आदेशाः । क्वचित् सिद्धावस्थापेक्षया[1] जुज्जइ इति च दृश्यते । **भुज** पालनाभ्यवहारयोः—भुईअइ । भुइज्जइ । ऌलुटोः । 'डोच्छ वचिमुचिरुदिश्रुभुजः' इति ओच्छादेशो हिलुक् च वा । भोच्छीअहिइ । भोच्छिज्जहिइ । भोच्छीअइ । भोच्छिज्जइ । 'डं मेश्छात्ततः' इति मेस्थाने डं च । भोच्छीअअं । भोच्छिज्जअं । भोच्छीअहिमि । भोच्छिज्जहिमि ॥ **तनु**—तणीअइ । तणिज्जइ । 'तड्डवविरल्लतडतड्डास्तनेः' इति तड्डवाद्यादेशाः । तड्डवीअइ । तड्डविज्जइ । इत्याद्यपि ॥ **मनु**—मणीअइ । मणिज्जइ ॥ **कृञ्**—करीआई । करिज्जइ । लुङ्लङ्लिट्सु 'आ भूतभविष्यति च कृञः' इत्याकारः स्यादयश्च । काईअसि । काईअहिअ । काईअहि । एवमिज्जादेशेपि । भविष्यति । काईएहिइ । काईइहिइ । एवमिज्जादेशेपि । 'कृदो हं' इति भविष्यति मेस्थाने हं । काईएहं । काईइहं । काइज्जेहं । काइज्जिहं । पक्षे । काईएहिमि । काइज्जहिमि ॥ [2]वृञ्—वरीअइ । वरिज्जइ ॥ **ग्रह** उपादाने—गहीअइ । गहिज्जइ ॥

अनया दिशा धात्वन्तराणां सामान्येन विहितोक्तधात्वादेशस्थले च भावकर्मणोर्लकारेषु रूपाण्युदाहर्तव्यानि । ग्रन्थविस्तरभयाद्विशेषविधानाभावाच्चास्माभिर्न लिख्यन्ते ॥

अथ भावकर्मणोर्धातूनामागमादेशाश्च प्रदर्श्यन्ते ॥

'णो हश्च चिजिपूश्रुधूस्तुहुलूभ्यः' इत्यतः 'णो हश्च' इत्यधिकृत्य

भावकर्मणि तु वर्यग्लुक् च ॥ २ । ४ । ७३ ॥

भावे कर्मणि च वर्तमानेभ्यश्चिज्यादिभ्यो धातुभ्यः परो वकारागमो रित् स्याद्वा । तत्संयोगेन यको लुक् । रित्वाद् द्वित्वम् । चिव्वइ ।

---

१ सिद्धरूपापेक्षया M. २ M. has दृङ्—दरीअइ । दरिज्जइ in place of this line.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिव्वइ । पुव्वइ । सुव्वइ । धुव्वइ । थुव्वइ । हुव्वइ । लुव्वइ । अत्र 'संयोगे' इति यथायोगं ह्रस्वः । बहुलाधिकारात् 'स्तौ' इत्युत ओत्वं न भवति । पक्षे 'णो ह्रश्च—' इत्यादिना ण इत्यागमः । यक ईअइज्जौ । चिणीअइ । चिणिज्जइ । जिणीअइ । जिणिज्जइ । इत्यादि । भविष्यति । चिणिज्जहिइ । इत्यादि ॥

मश्चेः ॥ २ । ४ । ७४ ॥

'भावकर्मणि' इत्यनुवर्तते 'यग्लुक् च' इति च । चिनोतेः परो भावकर्मणि मकारागमो रिद्वा स्यात् । चिम्मइ । पक्षे । चिव्वइ । चिणिज्जइ । भविष्यति । चिम्महिइ । पक्षे । चिणिज्जहिइ ॥

अन्त्यस्य हनखनोः ॥ २ । ४ । ७५ ॥

'मर्' इत्यनुवर्तते । हन खन इत्येतयोरन्त्यस्य भावकर्मणि मोरिद्वा स्यात् तत्संनियोगेन यग्लुक् च । हम्मइ । पक्षे । हणिज्जइ । भविष्यति । हम्महिइ । खणिज्जहिइ । बहुलाधिकारात् कर्तर्यपि । हम्मइ । हन्तीत्यर्थः । क्वचिन्न भवति । हंतव्वं कहंचण ॥

दुहलिहवहरुहां भरत उच्च ॥ २ । ४ । ७६ ॥

दुहादीनामन्त्यस्य भावकर्मणि भकारो रिद्वा स्यात् तत्संनियोगेन यग्लुक् च वहेरत उकारश्च । दुब्भइ । लिब्भइ । वुब्भइ । रुब्भइ । पक्षे । दुहिज्जइ । लिहिज्जइ । वहिज्जइ । रुहिज्जइ ॥

दहेर्झर् ॥ २ । ४ । ७७ ॥

'अन्त्यस्य' इत्यनुवर्तते । दहेरन्त्यस्य भावकर्मणि झकारो रिद्वा स्यात् तत्संनियोगेन यग्लुक् च । दज्झइ । पक्षे । दहिज्झइ ॥

बन्धो न्धः ॥ २ । ४ । ७८ ॥

---

१ भावे कर्मणि M. २ M. adds after पक्षे हणिज्जहि । खम्मिहिइ । ३ M. inserts खम्मइ । खणिज्जइ after it. ४ हम्मिहिइ M. ५ M. has हंतव्वं । हंतूण । हन्तव्यम् । हत्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'झइ' अनुवर्तते। बन्ध बन्धन इत्यस्य धातोः न्धइत्यस्य भावकर्मणि[1] झकारो रिद्वा स्यात् तत्संनियोगेन यग्लुक् च। बज्झइ। बन्धिज्झइ[2]॥

रुध उपसमनोः॥ २। ४। ७९॥

'अन्त्यस्य' इत्यनुवर्तते 'झइ' इति च। उपसमनुभ्यः परस्य रुधेरन्त्यस्य भावकर्मणि झकारो रिद्वा स्यात् तत्संनियोगेन यग्लुक् च। उपरुज्झइ। पक्षे[3]। उपरुंधिज्जइ। ईत्यादि[4]॥

द्वे गमिगे॥ २। ४। ८०॥

'अन्त्यस्य' इत्यनुवर्तते। गमादौ धातोरन्त्यस्य द्वे भवतो भाव[5]कर्मणि तत्संनियोगेन यग्लुक् च। गम्मइ। गमिज्जइ। हस्सइ। हसिज्जइ। भण्णइ। भणिज्जइ। इत्यादि। गमादि—गम् हस् भण् लुभ् कथ् भस् भुज् रुद्। 'नमो द्विजरुदां वः' इति कृतवकारो रुदिरत्र गृह्यते[6]॥

ईर हकृतृज्राम्॥ २। ४। ८१॥

हृञ् कृञ् तॄ जॄ इत्येतेषामन्त्यस्य भावकर्मणि ईर इत्यादेशो वा स्यात् तत्संनियोगेन यग्लुक् च। हीरइ। हरिज्जइ। तीरइ। तरिज्जइ। जीरइ। जरिज्जइ। अत्र सर्वत्र ईकारादेशाभावे[7] 'अर उः' इति ऋकारस्य अरादेशः[8]॥

अजेर्विडप्पः॥ २। ४। ८२॥

'अन्त्यस्य' इति निवृत्तम्। अजेर्विडप्प इत्यादेशो वा स्यात् तत्संनियोगेन यग्लुक् च। विडप्पइ। पक्षे। अज्जिज्जइ॥

---

१ भावकर्मणोः M. २ M. adds भविष्यति। बन्धिजहिअ। ३ M. adds after it संरुज्झइ. ४ After this M. inserts भविष्यति। उपरुज्झहिअ। उपरुन्धिजिहाइ। ५ भावकर्मणोः M. ६ M. adds भविष्यति गम्मिहइ। गमिज्जहइ। इत्यादि. ७ ईकाराभावे M. ८ M. adds भविष्यति हिरिज्जिहिइ। इत्यादि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरभ आढप्पः ॥ २ । ४ । ८३ ॥

आरभतेर्भावकर्मणि आढप्प इत्यादेशो वा स्यात् । तत्संनियोगेन यग्लुक् च । आढप्पइ । पक्षे । आरभिज्जयि ॥

णप्पणज्जौ ज्ञः ॥ २ । ४ । ८४ ॥

जाणातेर्भावकर्मणि णप्प णज्ज इत्येतावादेशौ स्यातां तत्संनियोगेन यग्लुक् च । णप्पइ । णज्जइ । पक्षे । जाणिज्जइ । मुणिज्जइ । अत्र 'जाणमुणौ ज्ञः' इति ज्ञाधातोर्जाणमुणादेशौ । 'ज्ञम्नोः' इति णत्वे । णाइज्जइ ॥

सिप्पस्सिचस्निहोः ॥ २ । ४ । ८५ ॥

सिञ्चतेः स्निह्यतेश्च भावकर्मणि सिप्पादेशो वा स्यात् तत्संनियोगेन यग्लुक् च । सिप्पइ । सिच्यते । स्निह्यते वा । पक्षे । सिंचिज्जइ । ण्हिहिज्जइ । अत्र 'श्लक्ष्ण—'इत्यादिना ण्हादेशः ॥

वाहिप्पो व्याहुः ॥ २ । ४ । ८६ ॥

व्याहरतेर्भावकर्मणि वाहिप्प इत्यादेशो वा स्यात् तत्संनियोगेन यग्लुक् च । वाहिप्पइ । पक्षे । वाहरिज्जइ ॥

ग्रहेर्घेप्पः ॥ २ । ४ । ९० ॥

ग्रहेर्धातोर्भावकर्मणि घेप्पादेशो वा स्यात् तत्संनियोगेन यग्लुक् च । घेप्पइ । पक्षे । गेण्हिज्जइ । अत्र 'ग्रहेर्णिरुवारगेण्ह—'इत्यादिना गेण्हादेशः ॥

छिप्पः स्पृशतेः ॥ २ । ४ । ८८ ॥

स्पृशतेर्भावकर्मणि छिप्प इत्यादेशो वा स्यात् तत्संनियोगेन यग्लुक् च । छिप्पइ । पक्षे । छिविज्जइ । अत्र 'स्पृशिश्छिवालुक्—' इत्यादिना स्पृशतेश्छिवादेशः ॥

दीसल् दृशेः ॥ २ । ४ । ९१ ॥

दृशेर्भावकर्मणि दीस इत्यादेशो लित् स्यात् तत्संनियोगेन यग्लुक् च । लित्वान्नित्यम् । तथा च 'दृशिरोअक्खणिअच्छावअच्छ—'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि सूत्रेण विधीयमाना आदेशाः दृशेः कर्मणि न भवन्ति । दीसइ ॥

वचेरुंचः ॥ २ । ४ । ९० ॥

वचेर्भावकर्मणि उंच इत्यादेशो वा स्यात् तत्संनियोगेन यग्लुक् च । उंचइ । पक्षे । वइज्जइ । एषां धातूनामुक्ता एते आदेशा भावकर्मणोरेव भवन्ति । एषां धातूनामेतद्व्यतिरिक्ता आदेशाः कर्तर्यपि भवन्ति ॥

अथ णिचि रूपनिर्णयः प्रदर्श्यते ।

भू इति स्थिते । अनुक्तमन्यन्यायेन णिचि भुवो हो इत्यादेशः पूर्ववत् । होणि इति स्थिते ॥

णिजदेदावावे ॥ २ । ४ । ११ ॥

धातोः प्रेरणार्थे विहितस्य णिच्प्रत्ययस्य स्थाने अत् एत् आव आवे इति चत्वार आदेशा भवन्ति । तकारस्तावन्मात्रप्रदर्शनार्थः । इजादयः पूर्ववत् । होअइ । होएइ । होआवइ । होआवेइ । बहुलाधिकारात् क्वचिदेतन्नास्ति । जाणअइ । जाणावइ । जाणावेइ । क्वचिदावे नास्ति । भारइ । भारेइ । भारावइ । पारइ । पारेइ । पारावइ ॥

गुर्वादेरविर्वा ॥ २ । ४ । १२ ॥

'णिज्' अनुवर्तते । गुरुरादिर्यस्य धातोः स गुर्वादिः । गुर्वादेर्णिचः अविर्वा स्यात् । होअविइ । अत्र न यण् । 'एङः' इति च प्रतिषेधात् संधिर्न भवति । 'अपदे' इत्युक्तत्वाद्वा । लटि प्रथमे पूर्ववदिजादयः जर्जारौ च । अत्र णिजादेशयोरावे आव इत्येतयोः 'ज्जाज्जे' इत्येत्वे कृते णिजादेशयोः अत् एत् इत्येतयोश्च स्वरूपतो भेदाभावाच्चतुर्णामुदाहरणवेलायां द्वैरूप्यमवगन्तव्यम् । होअइ । होएइ । होआवइ । होआवेइ । एवं तिसयोरिजादेशे रूपाणि । 'मध्ये चाजन्तात्' इति जर्जारौ । होएज्जइ । होएज्जाइ । इदमदेतोः समानम् । होआवेज्जइ । होआवेज्जाइ । इदमावेआवयोस्तुल्यम् । होअविज्जइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होअविज्जाइ । 'लङ्लृटोश्च जर्जारौ' । होएज्ज । होएज्जा । इदमदेतोः समानं रूपम् । होआवेज्ज । होआवेज्जा । इदमावेआवयोस्तुल्यम् । होअविज्ज । होअविज्जा । लट्प्रथमबहुत्वे । होअन्ति । होअन्ते । होअइरे । होएन्ति । होएन्ते । होएइरे । एवमावावेअन्तानामप्युदाहार्यम् । होएज्जन्ति । होएज्जन्ते । होएज्जइरे । इदमदेतोस्तुल्यम् । होआवेज्जन्ति । होआवेज्जन्ते । होआवेज्जइरे । इदमावेआवयोस्तुल्यम् । पूर्वोक्तान्येव जारादेशपक्षेप्युदाहरणानि । विशेषस्तु । होएज्जाइरे । होआवेज्जाइरे । युक्तपरे 'संयोगे' इति ह्रस्वः । होअविज्जन्ति । होअविज्जन्ते । होअविज्जइरे । होअविज्जाइरे । जारि । पूर्ववत् । होएज्ज । होएज्जा । इति 'मध्ये चाजन्तात्' इति जर्जारावुदाहर्तव्यौ । एवमावेआवयोरपि जर्जारावुदाहर्तव्यौ । मध्यमे । होअसि । होअसे । होआवसि । होआवसे । होएसि । होआवेसि । होअविसि । नात्र से । अनदन्तत्वात् । होएज्जसि । होएज्जासि । अदेतोरिदम् । होआवेज्जसि । होआवेज्जासि । आवेआवयोरिदम् । होअविज्जसि । होअविज्जासि । अन्ते जर्जारौ च । मध्यमबहुत्वे । होअइत्था । होअह । होएइत्था । होएह । एवमावावेअवीनामुदाहार्यम् । होएज्जइत्था । होएज्जाइत्था । होएज्जह । होएज्जाह । अदेतोः । होआवेज्जइत्था । होआवेज्जाइत्था । होआवेज्जह । होआवेज्जाह । आवेआवयोः समानम् । होअविइत्था । होअविह । जर्जारौ च । उत्तमे । होअमि । होआमि । होएमि । होइमि । एवमावादेशेपि । होएमि । होआवेमि । होअविमि । मध्ये । जर्जापक्षे । मीत्यस्योच्चारणमेव विशेषः । अन्यन्मध्यमैकत्ववत् । बहुत्वे । होअमो । होआमो । होएमो । एवमावादेशेपि । एवमवावयोर्मम्वोरपि । होएमो । होआवेमो । एवमनयोर्मम्वोरपि । होअविमो । एवं मम्वोरपि । जर्जापक्षे । होअज्जमो । होअज्जामो । इत्यादि । पूर्ववत् । विशेषस्तु मोममूनामुच्चारणम् । अन्ते जर्जारौ च । एवमन्येषामजन्तानां णिचि लटि च रूपम् । लुङ्लङ्लिट्सु णिजादेशा इजादयश्च पूर्ववत् । 'भूतार्थस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिहिअहि' इति स्यादयः । शेषं लड्वत् । होअसि । होअहिअ । होअहि । होएसि । होएहिअ । होएहि । एवमावावेअवीनामुदाहार्यम् । लड्रूपाणि च सर्वाणि । ल्लटोः । णिजादेशाः । 'भविष्यति हिरादिः' इति हिः । 'हास्सा मिमोमुमे वा' इति हास्सा । 'सं' इति सं । 'हिस्साहित्था मुमोमस्य' इति हिस्साहित्था च । शेषं पूर्ववत् । होअहिइ । होएहिइ । होआवहिइ । होआवेहिइ । होअविहिइ । होएज्जहिइ । अदेतोः । होआवेज्जहिइ । आवेआवयोः । होएहिज्जा । अदेतोः । होआवेहिज्जा । आवेआवयोः । होअविज्जहिइ । होअविज्जाहिइ । होअविहिज्ज । होअविहिज्जा । प्रथमबहुत्वे । होअहिन्ति । होअहिन्ते । होअहिइरे । एवमावावेअवीनामुदाहार्यम् । होअविज्जहिन्ति । होअविज्जहिन्ते । होअविज्जइरे । एवं जारोपि । होएहिज्ज । होएहिज्जा । एवमावावेअवीनाम् । मध्यमे । होअहिसि । होएहिसि । एवमावावेअवीनाम् । होएज्जहिसि । होएज्जाहिसि । अदेतोः । एवमावेआवयोः । होअविज्जहिसि । होअविज्जाहिसि । जर्जारौ च । मध्यमबहुत्वे । होअहिइद्धा । होअहिह । एवमावावेअवीनामुदाहार्यम् । होएज्जहिइत्था । होएज्जाहिइत्था । होएज्जहिह । होएज्जाहिह । अदेतोस्तुल्यम् । एवमावावेअवीनामुदाहर्तव्यम् । जर्जारौ च । उत्तमे । होअहिमि । होएहिमि । एवमावावेअवीनामुदाहार्यम् । होअहामि । होएहामि । एवमावावेअवीनामुदाहार्यम् । होअहामि । होएहामि । एवमावावेअवीनाम् । होअस्सामि । होएस्सामि । एवमावावेअवीनाम् । होअहिस्सं । होएहिस्सं । एवमावावेअवीनाम् । होएज्जहिमि । होएज्जाहिमि । अदेतोः । एवमावावेअवीनाम् । जर्जारौ च । उत्तमबहुत्वे । होअहिमो । होएहिमो । एवमावावेअवीनाम् । होअहामो । होएहामो । एवमावावेअवीनाम् । होअहामो । होएहामो । एवमावावेअवीनाम् । होअस्सामो । होएस्सामो । एवमावावेअवीनाम् । एवं मम्वोरप्युदाहर्तव्यम् । होअहिस्सा । होअहिद्धा । होएहिस्सा । होएहिद्धा । एवमावावेअवीनाम् । होएज्जहिमो । होएज्जाहिमो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदेतोरिदं रूपम् । एवमावावेअवीनाम् । एवं मम्वोरपि । होअहिज्ज । होअहिज्जा । एवमावावेअवीनाम् । एवमन्येषामजन्तानां णिचि भविष्यति रूपं ज्ञेयम् । लोटि णिजादेशाः दुसुमवः । 'बहौ न्तुहमो' । 'सोस्तु हि' । 'वा लड्लोट्—' इत्येत्वं च यथायोगम् । प्रथमे । होअदु । होएदु । अदेतोः । होआवदु । होआवेदु । आवेआवयोरिदम् । होअएदु । होएज्जदु । होएज्जादु । अदेतोः । एवमावावेअवीनाम् । होएज्ज । होएज्जा । अदेतोः । एवमावावेअवीनाम् । होएज्जन्तु । अदेतोः । एवमावावेअवीनाम् । जर्जारौ च । मध्यमे । होअसु । होएसु । एवमावावेअवीनाम् । होएज्जसु । होएज्जासु । अदेतोः । एवमावावेअवीनाम् । एवं 'सोः' इत्यादेशपक्षेपि । जर्जारौ च । मध्यमबहुत्वे । होअह । एवमावावेअवीनाम् । होएज्जह । होएज्जाह । अदेतोः । एवमावावेअवीनाम् । जर्जारौ च । उत्तमे । एकवचने मीत्यस्योच्चारणम् । बहुवचने मो इत्यस्योच्चारणं च विशेषः । रूपाणि तु प्रथममध्यमैकत्वबहुत्ववत् । एवं णिचि लोट्यन्येषामजन्तानां धातूनां रूपं नेयम् । लिङि णिजादेशाः । 'स्विज्जालिङः' इतीज्जात्पर इत् । होएज्जइ । होएज्जाइ । होआवेज्जइ । होआवेज्जाइ । इत्यादि लोड्रूपाणि च । लृङि णिजादेशाः । 'माणन्तौलृ च लृङः' इति माणन्तौ च । होअमाण । होअन्ते । होएमाण । होएन्त । एवमावावेअवीनाम् । होएज्जमाण । होएज्जन्त । एवमावावेअवीनां सर्वत्र पुरुषेषु वचनेषूदाहार्यम् । हवादीनां तु भेदः । पूर्ववणिजादेशाः । 'णिजदेदावावे' इत्यतो 'णिज्' इत्यधिकृत्य षष्ठ्यन्तविपरिणामः ।

अदेल्लुक्यात्त्वोरतः ॥ २ । ४ । १५ ॥

णिचः स्थाने विहितेषु अत् एत् लुक् इत्येतेषु परतः धातोरादेरतः आद् भवति ॥

लुक् भावकर्मणिच्स्थले प्रदर्शयिष्यते ॥

हावइ । हावेइ । केचिदावे आव इत्येतयोरपि आदेरत आत्वमि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छन्ति । हावावइ । हावावेइ । पूर्ववज्जर्जारौ च । लटि प्रथमे । होवइ । होवेइ । होहवइ । होहवेइ । होवेज्ज । होवेज्जा । होवन्ति । होवन्ते । होवइरे । होवेन्ति । होवेन्ते । होवेइरे । होहवन्ति । होहवन्ते । होहवइरे । जर्जारौ च । मध्यमे । हावसि । हावेसि । हावावसि । हावावेसि । जर्जारौ च । मध्यमबहुत्वे । हावइद्धा । हावह । हावेइद्धा । हावेह । हावावइद्धा । हावावह । हावावेइद्धा । हावावेह । जर्जारौ च । उत्तमे । हावमि । हावामि । हाविमि । हावेमि । हावावमि । हावावामि । हावाविमि । हावावेमि । जर्जारौ च । उत्तमबहुत्वे । हावमो । हावामो । हाविमो । हावेमो । हावावमो । हावावामो । हावाविमो । हावावेमो । एवं मम्वोरपि । जर्जारौ च । एवं हलन्तानां णिचि लटि रूपं नेयम् । लुङ्लङ्लिट्सु णिजादेशाः । भूतार्थे 'हलईअ' इति तिप्तयोरीअः । हावईअ । हावईआ । हावावईअ । हावावेईअ । शेषं लड्वत् । ऌलुटोः णिजादेशाः । 'भविष्यति हिरादिः' इति हिः । 'हार्सा मिमोमुमे वा' । 'सै' । 'हिस्साहित्था मुमोमस्य' । शेषं पूर्ववत् । हाविहिइ । हावेहिइ । हावाविहिइ । हावावेहिइ । हाविहिज्ज । हावेहिज्जा । हावाविहिज्ज । हावावेहिज्ज । एवं जारोपि । हावहिन्ति । हावेहिन्ति । एवं तेइरयोः । हावावहिन्ति । हावावेहिन्ति । एवं तेइरयोः । जर्जारौ च । मध्यमे । हावहिसि । हावेहिसि । हावावहिसि । हावावेहिसि । जर्जारौ च । मध्यमबहुत्वे । हावहिइद्धा । हावहिह । हावेहिइद्धा । हावेहिह । हावावहिइद्धा । हिवावहिह । एवमदन्तेपि । जर्जारौ च । उत्तमे । हावहिमि । हावहामि । हाविस्सामि । एवमदन्तेपि । हावावहिमि । हावावहामि । हावाविस्सामि । हावाविस्सं । एवमत एदादेशेपि । जर्जारौ च । उत्तमबहुत्वे । हावहिमो । हावहामो । हाविस्सामो । एवमेदादेशेपि । हावावहिमो । हावावहामो । हावाविस्सामो । एवमत एदादेशेपि । एवं मम्वोरपि । हावहिस्सा । हावहिद्धा । हावावहिस्सा । हावावहिद्धा । हावाविहिस्सा । हावाविहिद्धा । एवमेदन्तेपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जर्जारौ च । अत्र सर्वत्र 'एच्च क्त्वातुंतव्यभविष्यति' इत्यत्र एदितौ । एवं हलन्तान्तराणां लोटि णिजादेशाः दुसुमवः । 'बहौ न्तुहमो' 'सोस्तु हि' । 'लुगिज्जहीज्जस्विज्जेतः' इति लुगादयश्च । शेषं पूर्ववत् । प्रथमे । हावदु । हावेदु । हावावदु । हावावेदु । जर्जारौ च । बहुत्वे । हावन्तु । हावेन्तु । हावावेन्तु । हावावन्तु । जर्जारौ च । मध्यमे । हावसु । हावेसु । हावावसु । हावावेसु । हावहि । हावेहि हावावहि । हावावेहि । लुगादयः । हाव । हावेज्जहि । हाविज्जसु । हाविज्जे । हावाव । हावावेज्जहि । हावावेज्जसु । हावावेज्जे । इत्यादि । जर्जारौ च । बहुत्वे । हावह । हावेह । हावावह । हावावेह । जर्जारौ च । उत्तमे । हावमि । हावामि । हाविमि । हावेमि । उत्तमबहुत्वे । हावमो । हावामो । हाविमो । हावेमो । इत्यादि । अत्र सर्वत्र यथायोगं 'वा लड्लोट्—'इत्यादिना अत एत्वं वा । 'मोममुण्विच्च' इतीत्वं च । लिङि 'त्विज्जालिङः' इतीत्वम् । हावेज्जइ । हावेज्जाइ । हावावेज्जइ । हावावेज्जाइ । लोड्रूपाणि च । लङि माणन्तौ । हावमाण । हावन्त । हावावमाण । हावावन्त । एवमेदन्ता अपि । जर्जारौ च । एवं सर्वेषु पुरुषेषु वचनेषूदाहार्यम् ॥

एधादयः प्रदर्श्यन्ते णिजादेशाः । 'गुर्वादेरविर्वा' । एहइ । एहावइ । एहावेइ । एहाविइ ॥ **पच्** । 'अदेल्लुक्यात् खोरतः' इत्यात्वम् । पाअइ । पाएइ । पाआवइ । पाआवेइ । अत्र आत्वे कृते बहुलाधिकारादाविर्न भवति ॥ **टुनदि** । णंदइ । णंदेइ । णंदावइ । णंदावेइ । णंदविइ ॥ **ध्वंसु** गतौ । झंसइ । झंसेइ । झंसावइ । झंसावेइ । झंसविइ । एवं धंसइ । इत्याद्यपि ॥ **व्येञ्** । 'गुर्वादेरविर्वा' । वेअइ । वेएइ । वेआवइ । वेआवेइ । वेअविइ ॥ **अद्** । आदइ । आदेइ । आदावइ । आदावेइ । 'अदेल्लुक्यात्—' इत्यात्वम् ॥ **शीङ्** । 'योरेङ्' इत्येत्वम् । सेअइ । सेएइ । सेआवइ । सेआवेइ । सेआविइ ॥ **ब्रूञ्** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उवर्णस्याव:' । 'अदेल्लुक्यात्—'इत्यात्वम् । बावइ । बावेइ । बावावइ । बावावेइ ॥ हु दानादानयोः । 'णो ह्रश्च—'इत्यादिना णः । हुणअइ । हुणएइ । हुणावइ । हुणावेइ ॥ **ओहाङ्** । हाअइ । हाएइ । हाआवइ । हाआवेइ । हाअविइ । अत्र गुर्वादित्वादविः ॥ **धाञ्** । धाअइ । धाएइ । धाआवइ । धाआवेइ। धाअविइ ॥ **दिवू** । दिवइ । दिवेइ । दिवावइ । दिवावेइ ॥ **षूञ्** । 'उवर्णस्याव:' । 'अदेल्लुक्यात्—' इत्यात्वम् । सावइ । सावेइ । सावावइ । सावावेइ ॥ **मृङ्** । 'अर उ:' । आत्वम् । मारइ । मारेइ । मारावइ । मारावेइ ॥ **रुधि** । न्धन्भौ । रुन्धइ । रुन्धेइ । रुन्भइ । रुन्भेइ । रुज्झइ । इत्यादि ॥ **डुकृञ्** । कारइ । कारेइ । इत्यादि ॥ **डुक्रीञ्** । केअइ । केएइ । केआवइ । केआवेइ । केअविइ ॥ **भ्रम्** । 'णिजदेदावावे' इत्यतः 'णिच्' इत्यधिकृत्य

भ्रमेराडः ॥ २ । ४ । १३ ॥

भ्रमेः परो णिच् आड इति वा स्यात् । भमाडइ । पक्षे । भामइ । भामेइ । भामावइ । भामावेइ ॥ **पटिधातौ** णिचि 'फः पाटिपरिघपरिखा—' इत्यादिना पस्य फः । फाळइ । फाळेइ । इत्यादि । अत्र बडिशादित्वाट्टस्य ळत्वम् । अथ **चुरादयः** । **चुर** स्तेये । णिचि । णिजादेशाः । 'अचोचाम्' इत्युकारस्य ओकारः । चोरइ । चोरेइ । चोरावइ । चोरावेइ । चोरविइ ॥ **पाल** रक्षणे । पाळइ । पाळेइ । पाळावइ । पाळावेइ । पाळविइ ॥ **अर्च** पूजायाम् । अच्चइ । अच्चेइ । अच्चावइ । अच्चावेइ अच्चविइ ॥ इत्याद्युक्तसर्वधातुषु तदादेशेषु च णिचि रूपाणि बुद्धिमद्भिरूह्यानि । ग्रन्थगौरवभयादस्माभिर्न लिख्यन्ते ॥

अथ णिचि धात्वादेशाः प्रदर्श्यन्ते ।

स्पृहदूञोः सिहदूमौ णिचोः ॥ २ । ४ । ९२ ॥

णिजन्तयोरनयोः सिहदूम इत्येतावादेशौ भवतः । सिहइ । दूमइ । सिहेइ । इत्यादि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवृपतोर्णिहोडो वा ॥ २ । ४ । ९३ ॥

इत उत्तरं यावद्धात्वादेशं 'णिच्' अनुवर्तते। निपूर्वस्य वृञः पतेश्च णिहोड इत्यादेशो वा स्यात्। णिहोडइ। निवारयति पातयति वा। पक्षे। णिवारेइ। पाडेइ। अत्र प्रत्यादिपाठात् तस्य डत्वम्॥

धवलोद्घटोर्दुमोग्गौ ॥ २ । ४ । ९४ ॥

'वा' इत्यनुवर्तते। धवलयतेर्नामधातोरुत्पूर्वस्य घटयतेश्च णिजन्तस्य यथासंख्यं दुमउग्ग इत्यादेशौ वा भवतः। दुमइ। उग्गइ। पक्षे। धवळइ। उग्घाडेइ। अत्र 'टो डः' इति टस्य डत्वम्॥

भ्रमवेष्ट्योस्तालिअंटपरिआलौ ॥ २ । ४ । ९५ ॥

भ्रमयतिवेष्टयत्योर्णिजन्तयोर्यथाक्रमं तालिअंट परिआल इत्येतावादेशौ वा भवतः। तालिअंटइ। पक्षे। भमाडइ। अत्र 'भ्रमेराडः' इत्याडः। भामइ। वेष्टेः परिआलइ। पक्षे। वेडइ। अत्र 'वेष्टेः' इत्यन्त्यस्य डः॥

रावो रञ्जयतेः ॥ २ । ४ । ९६ ॥

रञ्जयतेर्णिजन्तस्य राव इत्यादेशो वा स्यात्। रावेइ। पक्षे। रंजेइ॥

तुलिडोल्योरोहामरंखोलौ ॥ २ । ४ । ९७ ॥

णिजन्तस्य तुलयतेर्दोलयतेश्च नामधातोर्यथासंख्यं ओहाम रंखोल इत्येतौ वा भवतः। ओहामइ। रंखोलइ। पक्षे। तुलइ। दोलइ॥

आसंघः संभावेः ॥ २ । ४ । ९८ ॥

संभावयतेरासंघ इति वा स्यात्। आसंघइ। पक्षे। संभावेइ। संभावयति॥

अर्पेरल्लिवपणामचच्चुप्पाः ॥ २ । ४ । ९९ ॥

णिजन्तस्यार्पयतेः अल्लिव। पणाम। चच्चुप्प इति त्रय आदेशा वा भवन्ति। अल्लिवइ। पणामइ। चच्चुप्पइ। पक्षे। अप्पेइ। ओप्पेइ। अत्र 'त्वर्पौ' इत्यादेरत ओत्वं वा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुलुगुंछोत्थंघोव्वेल्लोल्लोला उन्नमेः ॥ २ । ४ । १०० ॥

नमतेरुत्पूर्वस्य णिजन्तस्य गुलुगुंछ उत्थंघ उव्वेल्ल उल्लोल इति चत्वार आदेशा वा स्युः । गुलुगुंछइ । उत्थंघइ । उवेल्लइ । उल्लोलइ । पक्षे । उण्णवेइ । अत्र 'नमोद्विजरुदां वः' इत्यन्त्यस्य वत्वम् ॥

प्रकाशेर्णुव्वः ॥ २ । ४ । १०१ ॥

प्रकाशतेर्णिजन्तस्य णुव्व इति वा स्यात् । णुव्वइ । पक्षे । पआसेइ ॥

णिहुवः कमेः ॥ २ । ४ । १०२ ॥

कमेः स्वार्थे णिजन्तस्य णिहुव इत्यादेशो वा स्यात् । णिहुवइ । पक्षे । कामेइ ॥

नशेर्विप्पगालणासवपलावहारवविउडाः ॥ २ । ४ । १०३ ॥

नाशयतेर्णिजन्तस्य विप्पगाल णासव पलाव हारव विउड इति पञ्चादेशा वा स्युः । विप्पगालइ । णासवइ । पलावइ । हारवइ । विउडइ । पक्षे । णासेइ ॥

वल आरोपेः ॥ २ । ४ । १०४ ॥

णिजन्तस्यारोपेर्वल इति वा स्यात् । वलइ । पक्षे । आरोवेइ ॥

विरेचेरोलुङ्डोलुङ्डपल्हत्थाः ॥ २ । ४ । १०५ ॥

विपूर्वस्य रेचयतेर्णिजन्तस्य ओलुङ्ड उलुङ्ड पल्हत्थ इति त्रय आदेशा वा भवन्ति । ओलुङ्डइ । उलुङ्डइ । पल्हत्थइ । पक्षे । विरेएइ ॥

कम्पेर्विच्छोळः ॥ २ । ४ । १०६ ॥

कम्पयतेर्णिजन्तस्य विच्छोळ इति वा स्यात् । विच्छोळइ । पक्षे । कम्पेइ ॥

रोमन्थेरोग्गालवग्गालौ ॥ २ । ४ । १०७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोमन्थतेर्नामधातोर्णिजन्तस्य ओग्गाल वग्गाल इति वा स्याताम् । ओग्गालइ । वग्गालइ । पक्षे । रोमन्थेइ ॥

प्लावेरोंबालपव्वालौ ॥ २ । ४ । १०८ ॥

प्लावयतेः रोंबाल पव्वाल इति वा भवतः । रोंबालइ । पव्वालइ । पक्षे । पावेइ ॥

मिश्रेर्मीसाळमेळवौ ॥ २ । ४ । १०९ ॥

मिश्रयतेर्मीसाळ मेळव इति वा भवतः । मीसाळइ । मेळवइ । पक्षे । मीसेइ । अत्र 'शोर्लुप्त—'इति दीर्घः ॥

छादेर्णूमणुमोंबालढक्कपव्वालसण्णुमाः ॥ २ । ४ । ११० ॥

छादयतेः णूम णुम उंबाल ढक्कपव्वाल सण्णुम इति षडादेशा वा स्युः । णूमइ । णुमइ । उंबालइ । ढक्कइ । पव्वालइ । सण्णुमइ । पक्षे । छाएइ ॥

अच्चुक्कवोक्कौ विज्ञापेः ॥ २ । ४ । १११ ॥

विज्ञापेः अच्चुक्क वोक्क इति वा भवतः । अच्चुक्कइ । वोक्कइ । पक्षे । विण्णावेइ ॥

परिवाडो घटेः ॥ २ । ४ । ११२ ॥

घटयतेः परिवाडो वा स्यात् । परिवाडइ । पक्षे घडेइ ॥

दृशेर्दावदक्खवदंसाः ॥ २ । ४ । ११३ ॥

दृशेर्णिजन्तस्य दाव दक्खव दंस इति त्रय आदेशा वा स्युः । दावइ । दक्खइ । दंसइ । पक्षे । दंसेइ ॥

प्रस्थापेः पेट्ठवपेंडवौ ॥ २ । ४ । ११४ ॥

प्रस्थापेर्णिजन्तस्य पेट्ठव पेंडव इत्येतौ वा भवतः । पेट्ठवइ । पेंडवइ । पक्षे । पत्थावेइ । अत्र 'कग—'इति सलोपद्वित्वे ॥

यापेर्जवः ॥ २ । ४ । ११५ ॥

यापयतेर्जव इत्यादेशो वा स्यात् । जवइ । पक्षे । जावेइ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकोशेः पक्खोडः ॥ २ । ४ । ११६ ॥

विकोशेर्नामधातोः पक्खोड इति वा स्यात् । पक्खोडइ । पक्षे । विआसेइ ॥

गुंठ उद्धूलेः ॥ २ । ४ । ११७ ॥

उद्धूलयतेर्नामधातोर्णिजन्तस्य गुंठ इत्यादेशो वा स्यात् । गुंठइ । पक्षे उद्धूळेइ ॥

तडेराहोडविहोडौ ॥ २ । ४ । ११८ ॥

ताडयतेर्णिजन्तस्य राहोड विहोड इत्यादेशौ वा भवतः । राहोडइ । विहोडइ । पक्षे । ताडेइ ॥

छादेरवअच्छलणिचश्च ॥ २ । ४ । ११९ ॥

छादयतेरणिजन्तस्य चकाराण्णिजन्तस्य च अवअच्छल् इत्यादेशो वा भवति । अवअच्छइ ॥

एवमन्येषु धातुषु तदादेशेषु च णिजादेशा अदादयश्च कल्पनीयाः । अथ णिचि भावकर्मविवक्षायां धातोरुपरि णिच् । तदुपरि यक् । तस्य पूर्ववदीअइज्जयोर्विधाने 'णिजदेदावावे' इत्यतः 'णिच्' इत्यधिकृत्य

लुगाविल्भावकर्मक्ते ॥ २ । ४ । १४ ॥

भावकर्मविहिते प्रत्यये क्ते च परे णिचो लुक् आवि इत्यादेशौ वा भवतः । लित्वान्नित्यम् । एवं णिचो लुकि आवौ च सति लटि भावे रूपाणि । होइअइ । होइअए । इत्यादि । लुक्पक्षे केवलभाववद्रूपाणि । आविल्पक्षे । होआविअइ । होआइअए । होआविज्जइ । होआविज्जए । 'वा लड्लोट्—' इत्येत्वं वा । होआविएइ । होआविज्जेइ । होआविएज्ज । होआविएज्जा । होआविज्जेज्ज । होआविज्जेज्जा । कर्मणि प्रथमैकत्वे भाववत् । बहुत्वे णिचो लल्पक्षे अण्यन्तकर्मबहुत्ववद्रूपाणि । आविल्पक्षे । अणुहोआविअन्ति । अणुहोआविअन्ते । अणुहोआविएन्ति । अणुहोआविएन्ते । अणुहोआविइरे । अणुहोआविएइरे । अणुहोएएज्ज । अणुहोएएज्जा । एवमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विल्पक्षे । यक इज्जादेशेपि । मध्यमे णिज्लुक् पक्षे अण्यन्तकर्मवत् । आविल्पक्षे । अणुहोआविअसि । अणुहोआविअसे । एवं यक इज्जादेशेपि । अणुहोआविअसे । एवं यक इज्जादेशेपि । जर्जारौ च । मध्यमबहुत्वे णिज्लुकि पूर्ववत् । आवौ । अणुहोआविअइत्था । अणुहोआविह । अणुहोआविएइत्था । अणुहोआविएह । एवमिज्जादेशेपि । जर्जारौ च । उत्तमे लुकि पूर्ववत् । आवौ । अणुहोआविअमि । अणुहोआविआमि । अणुहोआविइमि । अणुहोआविएमि । एवमिज्जादेशेपि । जर्जारौ च । बहुत्वे णिचि लुकि पूर्ववत् । आवौ । अणुहोआविअमो । अणुहोआविआमो । अणुहोआविइमो । अणुहोआविएमो । जर्जारौ च । एवं मम्वोरपि । एवमिज्जादेशेपि ॥

एवमजन्तानां लटि रूपम् । लुङ्लङ्लिट्सु । 'भूतार्थस्य सिहिअहि' इति स्यादयः । शेषं पूर्ववत् । भावे लुक्पक्षे पूर्ववत् । आवौ । होआविअसि । होआविअहिअ । होअविअहि । एवमिज्जादेशेपि । कर्मण्यनुपूर्वत्वमेव विशेषः । अणुहोआविअसि । इत्यादि । भाववत् । ऌलुटोः । 'भविष्यति हिरादिः' । हार्साच । 'सं' । हिस्साहिङ्गा च । भावे लुकि पूर्ववत् । आवौ । होआविएहिइ । होआविइहिइ । होआविज्जेहिइ । होआविज्जहिइ । कर्मणि लुकि पूर्ववत् । आवौ । एकत्वे प्रथमभाववत् । बहुत्वे । अणुहोआविएहिन्ति । अणुहोआविएहिन्ते । अणुहोआविएहिरे । इत्यादि । शेषं पूर्ववदुन्नेयम् । लोटि णिचि लुगाविऌ च ईअइज्जौ । दुसुमवः । 'बहौ न्तुहमो' । 'सोस्तु हि' । शेषं पूर्ववत् । भावे लुकि पूर्ववत् । आवौ । होआविअदु । होआविएदु । एवमिज्जादेशेपि । कर्मणि लुकि पूर्ववत् । आवौ । अणुहोआविअदु । अणुहोआविएदु । एवमिज्जादेशेपि । अणुहोआविअन्तु । अणुहोआविएन्तु । इत्यादि कल्पनीयम् । तिङि 'त्विज्जालिङः' इति इज्जात् पर इत् । शेषं लोड्वत् । लङि माणन्तौ । लुकि भावकर्मणोः पूर्ववत् । आवौ । होआअविमाण । होआअविआन्त । होआविज्जमाण । होआविज्जन्त । कर्मण्यनुपूर्वत्वमेव विशेषः । एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वेषु वचनेषूदाहार्यम् । हवादीनां पूर्ववण्णिचि लुगाविल् च ईअइज्जौ च । 'अदेल्लुक्यात्वोरतः' इति णिचो लुकि आदेरत आत्वम् । हाविअइ । हाविअए । हावाविअइ । हावाविअए । हावाविज्जइ । हावाविज्जए । अणुहावाविअइ । अणुहावाविअए । अणुहावाविइ । अणुहावाविज्जइ । अणुहावाविज्जए । इत्यादि ॥

एवमन्येषां हलन्तानां धातूनां रूपम् ॥

एधादयः केचित् प्रदर्श्यन्ते ॥ एहीअइ । एहिज्जइ । एहाविअइ । एहाविज्जइ ॥ **पचु**—पाईअइ । पाइज्जइ । पाआविअइ । पाआविज्जइ ॥ **नद्**—णंदीअइ । णंदिज्जइ । णंदाविअइ । णंदाविज्जइ । **ध्वंसु**—झंसीअइ । झंसिज्जइ । झंसाविअइ । झंसाविज्जइ । धंसीअइ । इत्याद्यपि । **व्येञ्**—वेईअइ । वेइज्जइ । वेआविअइ । वेआविज्जइ । **अद्**—आदीअइ । आदिज्जइ । आदाविअइ । आदाविज्जइ । **चिञ्**—चिणीअइ । चिणिज्जइ । चिणाविअइ । चिणाविइज्जइ । **कृञ्**—कारीअइ । कारिज्जइ । काराविअइ । काराविज्जइ । **ग्रह्**—गाहीअइ । गाहिज्जइ । गाहाविअइ । गाहाविज्जइ । **चुर्**—चोरीअइ । चोरिज्जइ । चोराविअइ । चोराविज्जइ । इत्यादि ॥

एवमन्येषां धातूनां अदाद्यादेशानां चानया दिशा रूपाण्युदाहर्तव्यानि । ग्रन्थविस्तरभयादस्माभिर्न प्रदर्श्यन्ते ॥

क्यजन्तक्यषन्तयोर्विशेषाः प्रदर्श्यन्ते । 'क्वचिदसादेः' इत्यतः 'क्वचित्' इत्यनुवर्तमाने

लुक्क्यङोर्यस्य ॥ २ । ३ । ४२ ॥

'कर्तुः क्यङ् सलोपश्च' इति विहितस्य क्यङन्तस्य द्विवचनात् 'लोहितादिडाज्भ्यः क्यष्' इति विहितस्य क्यषन्तस्य संबन्धिनो यकारस्य क्वचिल्लुग् भवति ॥

क्यङ् । गुरूयते च्छात्रः । गुरूअइ । अत्र यलोपे गुरूइ । गुरुरिवाचरतीत्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्यषि । धमधमायते । धमधमाअइ । यलोपे । धमधमाइ । लोहितायते । लोहिआअइ । यलोपे । लोहिआइ ॥

अस्मिन् शास्त्रे यङन्तयङ्लुगन्तसन्नन्तक्यजन्तसुब्धात्वादिरूपाणां विशेषविधानाभावात् सिद्धावस्थापेक्षया वर्णानां विशेषादेशानाकलय्य बुद्धिमद्भिः प्रयोगाः संचारणीयाः ॥

श्रीमदखिलविद्यापरिवारदक्षिणामूर्तिप्रसादलब्धविद्यपूर्वोत्तरमीमांसासाहित्यशब्दतर्कसार्वभौमचरकूरियज्ञेश्वरभट्टोपाध्यायतनयकोण्डभट्टोपाध्यायशिष्येण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना सर्वविद्वत्कविसंमतेन दक्षिणामूर्तिमहादेवकिङ्करेण लक्ष्मीधरेण विरचितायां षड्भाषाचन्द्रिकायां प्राकृतप्रक्रियाविभागः संपूर्णः ॥

एवं निबन्धनिर्मित्या या परोपकृतिस्तया ।
वृषाकपायीरमणः प्रीयतां परमेश्वरः ॥

श्रीरस्तु ।

मतिमुद्रापरश्वेण जानुभिः सक्तबाहवे ।
भुजङ्गबद्धकक्षाय दक्षिणामूर्तये नमः ॥

अथ शौरसेन्यादयो भाषाः प्रदर्श्यन्ते । राम इति स्थिते [1]प्रथमैकवचनमारभ्य [2]पञ्चम्येकवचनपर्यन्तं प्राकृतवदेव । पञ्चम्येकवचने तु राम ङसि इति स्थिते 'दस्तस्य शौरसेन्यामखावचोस्तोः' इत्यतः 'शौरसेन्याम्' इत्यधिकृत्य

अतो ङसेर्डुदोश् ॥ ३ । २ । २० ॥

शौरसेन्यामकारात् परस्य ङसेर्डु दो इत्येतौ शितौ भवतः । रामाद् । रामादो । अत्र शित्वाद् [3]दीर्घः ॥ शेषं प्राकृतवत् । एवं घटादीनां सर्वनाम्नां च प्राकृतवत् । [4]पूर्वशब्दस्य तु ।

पूर्वस्य पुरवः ॥ ३ । २ । ९ ॥

पूर्वशब्दस्य पुरव [5]इत्यादेशः स्यात् । पुरवो । [6]पुरवे । [7]इत्यादि । पितृशब्दे तलोपे प्राप्ते

दस्तस्य शौरसेन्यामखावचोस्तोः ॥ ३ । २ । १ ॥

शौरसेन्यां भाषायामचः [8]परस्यासंयुक्तास्यानादौ वर्तमानस्य तकारस्य दकारः स्यात् । पिदा । पिदरो । इत्यादि । प्राकृतवदेव । सर्वत्रैवं भूतस्य तस्य द एव । 'अखौ' इति किम् । तरुणो । 'अचः' इति किम् । कंतो । 'अस्तोः' इति किम् । मत्तो । अज्जउत्तो ॥

संयोगे धः क्वचित् ॥ ३ । २ । २ ॥

'शौरसेन्याम्' अनुवर्तते । 'दस्तस्य' इति च । पूर्वसूत्रेणास्तोरित्यपोदितेपि क्वचिद्विशेषः । उच्चारिते शौरसेन्यां संयोगे धो वर्तमानस्य

---

१ प्रथमाविभक्तिमारभ्य T. २ तृतीयाविभक्त्यन्तं T. ३ पूर्वस्य दीर्घः T. ४ पूर्वस्य तु T. ५ इत्यादेशो भवति T. ६ T. has before it अत्र 'तावति खोर्वा' इत्यतः 'वा' इत्यनुवर्तते । ७ After this T. has शेषं प्राकृतवत् । ८ परस्यानादौ वर्तमानस्यासंयुक्तस्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तकारस्य केचिल्लक्ष्यानुरोधेन दकारो भवति । णिच्छिन्दो महन्धो । निश्चिन्तो महान् । आर्यपर्याय इत्यादिषु 'तावति खोर्वा' इत्यतः 'वा' इत्यनुवर्तमाने

र्योय्यः ॥ ३ । २ । ८ ॥

र्य इत्यस्य स्थाने य्य इति वा स्यात् । जत्वापवादः । अय्यो । अज्जो । पय्याओ । पज्जाओ ॥

इत्यजन्ताः पुंलिङ्गाः ।

स्त्रीलिङ्गेषु कथाप्रथा इत्यादिषु थस्य हत्वे प्राप्ते

थो धः ॥ ३ । २ । ४ ॥

'वा' इत्यनुवर्तते । 'शौरसेन्याम्' इति च । शौरसेन्यां थस्य धः स्याद्वा । कथा । कहा । प्रथा । पहा । इत्यादि । मातृशब्दे तस्य दः । मादा । इत्यादि । शेषं प्राकृतवत् ॥

अथाजन्तेषु नपुंसकलिङ्गेषु कुण्डप्रभृतिषु शौरसेनी अकारान्तपुंलिङ्गवदेव । अन्तःपुरे । 'संयोगेधः क्वचित्' इत्यनेन संयुक्तस्याधो वर्तमानस्य तस्य प्रयोगानुसारेण दः स्यादित्युक्तत्वात्तस्य दत्वम् । अंदेउरं ॥

अथ हलन्तेषु विशेष उच्यते ।

नकारान्तेष्विन्नन्तेषु

आत् सावामन्त्रइनो नः ॥ ३ । २ । २१ ॥

आमन्त्रे सौ परे इनो नकारस्यात्वं वा स्यात् । दे करिआ । पक्षे । दे करी । दे कंचुइआ । दे कंचुई ॥

मः ॥ ३ । २ । २२ ॥

'आत्' इति व्यतिरिक्तं पूर्वसूत्रं सर्वमनुवर्तते । आमन्त्रे सौ परे नकारस्य मकारो वा स्यात् । दे राअं । दे राअ । दे सुकम्मं । दे सुकम्म ॥ तकारान्तेषु

---

१ दकारो भवति क्वचिल्लक्ष्यानुसारेण । T. २ इत्यादेशो वा भवति T. ३ धो वा स्यात् T. ४ इत्युक्तत्वात् प्रयोगानुसारेण स्तोरपि तस्य दः । My., P. ५ °स्य वा त्वम् P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवताम् ॥ ३ । २ । २३ ॥

'आमन्त्रे' इति निवृत्तम् । 'मः' इत्यनुवर्तते । 'नः' इति च । भवन् भगवन् मघवन् कृतवन् इत्येवमादीनां दृश्यमानस्य नकारस्य सौ परे मकारो भवति । किं भवं हिअए णंदेइ । किं भवान् हृदये नन्दति । पज्जळिदो भअवं हुदासणो । प्रज्वलितो भगवान् हुताशनः । महवं पाअसासणो । मघवान् पाकशासनः । कअवं । कृतवान् । हलन्तेषु स्त्रीनपुंसकयोर्विशेषो[1] नास्ति । युष्मदस्मच्छब्दावपि प्राकृतवदेव ॥

अथाव्ययेषु विशेषाः प्रदर्श्यन्ते । तावत् । 'दस्तस्य—' इत्यनुवर्तते ।

तावति खोर्वा ॥ ३ । २ । ३ ॥

तावच्छब्दे खोस्तस्य दो वा स्यात् । 'अखौ' इत्यस्यापवादः । दाव । ताव । कथं । 'थो धः' इति वा धत्वम् । कधं । कहं ॥

इहहचोर्हस्य ॥ ३ । २ । ५ ॥

'थो धः' इत्यतः 'धः' इत्यनुवर्तते । इहशब्दे हकारस्य 'थध्वमित्थाहचौ' इति विहितहकारस्य च धो वा स्यात् । इध । इह ॥ इदानींशब्दस्य

इदानीमोल्दाणिं ॥ ३ । २ । १२ ॥

शौरसेन्यामिदानींशब्दस्य दाणिमिति लिद् भवति । दाणिं । 'तद्व्यत्ययश्च' इति सूत्रात् प्राकृतेपि ॥

तस्मात्ता ॥ ३ । २ । १३ ॥

तस्माच्छब्दस्य[2] शौरसेन्यां ता इति भवति । ता ॥ क्त्वाप्रत्ययस्य

इअदूणौ क्त्वः ॥ ३ । २ । १० ॥

'शौरसेन्याम्' इत्यनुवर्तते । क्त्वाप्रत्ययस्य शौरसेन्यां इअ दूण

---

१ °नपुंसकलिङ्गयोरविशेषः P., My. २ शौरसेन्यां तस्माच्छब्दः ता इति आपद्यते T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येतौ वा भवतः । भविअ । होदूण । पढिअ । पढिदूण । रमिअ । रमिदूण । इत्यादि । पढिता रंता इति तु सिद्धावस्थापेक्षया[1] भवतः ॥

कृगमोर्डदुअः ॥ ३ । २ । ११ ॥

'क्त्वः' इत्यनुवर्तते । कृ गम् आभ्यां परस्य क्त्वाप्रत्ययस्य डित् अदुअ इत्यादेशो भवति । कदुअ । गदुअ । पक्षे । करिअ । करिदूण । गमिअ । गमिदूण ॥

णं नन्वर्थे ॥ ३ । २ । १४ ॥

नन्वर्थे णं इति भवति । णं ॥

अम्हहे हर्षे ॥ ३ । २ । १५ ॥

शौरसेन्यां हर्षे[2] अम्हहे इति निपातः प्रयोक्तव्यः । अम्हहे धणं लद्धं ॥

हीही वैदूषके ॥ ३ । २ । १६ ॥

'हर्षे' इत्यनुवर्तते । वैदूषके हर्षे हीही इति प्रयोज्यम् । हीही संपण्णा मणोरहा पिअवअंसस्स । संपन्ना मनोरथा प्रियवयस्यस्य ॥

हीमाणहे निर्वेदविस्मये ॥ ३ । २ । १७ ॥

निर्वेदे विस्मये च हीमाणहे इति प्रयोज्यम्[3] । निर्वेदे । हीमाणहे परिस्संता[4] अम्हे एइणा णिअविहणो दुव्विलसिदेण । परिश्रान्ता वयमेतेन निजविधेर्दुर्विलसितेन । विस्मये । हीमाणहे जीवन्तवच्छा मे जणणी । जीवद्वत्सा मे जननी ॥

एवार्थे एव्व ॥ ३ । २ । १८ ॥

एवार्थे एव्वेति निपात्यते । मह एव्व । ममैव ॥

हंजे चेट्याह्वाने ॥ ३ । २ । १९ ॥

चेट्याह्वाने हंजे इति निपात्यः । हंजे ॥ प्रसङ्गाद्युक्तमिदमित्यादिषु किंचिदुच्यते ।

---

१ सिद्धावस्थायां T. २ हर्षे अम्हहे इति वा भवति P., My. ३ निपातः प्रयोज्यः T. ४ My. and P. have only परिस्संता परिश्रान्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्त्याद्दिदेति मो णः ॥ ३ । २ । ७ ॥

शौरसेन्यामन्त्यान्मः मकारात् परो णकारागमो भवति इदेति इकारे एकारे च परे । जुत्तं णिमं । युक्तमिदम् । सरिसं णिमं । सदृशमिदम् । एकारे । किं[1] णेदं । किमिदम् । एव्वं णेदं । एवमेतत् ।

इति शौरसेन्यां सुबन्तविभागः ।

अथ[2] तिङन्ते विशेषाः प्रदर्श्यन्ते ।

भू सत्तायाम् । 'इहहचोर्हस्य' इत्यतः 'हस्य' इत्यनुवर्तते[3] 'शौरसेन्याम्' इति च ॥

भुवो भः ॥ ३ । २ । ६ ॥

भवतेर्धातोरादेशस्य सहकारस्य भकारादेशो वा भवति । भो इति स्थिते 'शेषे प्राकृतवत्' इत्यतिदेशात् 'लटस्तिप्ताविजेचू' इति इजेचोर्विधाने

इजेचोर्दट् ॥ ३ । २ । २५ ॥

लटस्तिप्तादेशयोरिजेचोर्दट् आगमो भवति । अनुक्तमन्यन्यायेन टित्वात् 'आद्यन्तौ टकितौ' इत्यादावेव स्यात् । भोदि । भुवदि । भुवदे । अन्यत् प्राकृतवत् । लटो मध्यमपुरुषबहुवचने 'थध्वमित्थाहचौ' इति हचि सति 'इहहचोर्हस्य' इति हस्य धकारः । बोध । पक्षे । होध । होह । शेषं प्राकृतवत् । भोदि । भोन्ति । भोन्ते । भोइरे । भोसि । भोइत्था । भोध । भोह । भोमि । भोम । भोमु । भोमो ॥ ऌलुटोः

भविष्यति स्सि ॥ ३ । २ । २४ ॥

भविष्यदर्थे विहितस्य हेः स्सिं[4] भवति । हिस्सादीनामपवादः । भोस्सिदि । भोस्सिन्ति । भोस्सिन्ते । भोस्सिइरे । भोस्सिसि ।

---

१ My. and P. omit किं णेदं । किमिदम्. २ तिङन्तविशेषाः My., P. ३ °वर्तमाने P., My. ४ स्सि इत्यादेशः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोस्सिइत्था । भोस्सिह । भोस्सिधा । भोस्सिमि । भोस्सिम । भोस्सिमु । भोस्सिमो । इत्यादि । अन्येषु लकारेषु प्राकृतवद्रूपं वेदितव्यम् । हवादीनामप्यनया प्रक्रियया रूपाणि प्रकल्पनीयानि ॥

शेषं प्राकृतवत् ॥ ३ । २ । २६ ॥

शौरसेन्यां यदिह कार्यमुक्तं 'दस्तस्य' इत्यारभ्य एतत्पर्यन्तं ततोऽन्यत् प्राकृतवदेव भवति ॥

इति षड्भाषाचन्द्रिकायां शौरसेनीभाषाप्रक्रिया[1] ।

१ T. has समाप्ता after it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीरस्तु ।

शिष्टार्यशुकयोग्यादिमुनिवृन्दावृताङ्घ्रये ।
कृतस्वीयारिशिक्षाय दक्षिणामूर्तये नमः ॥

अथ मागधीभाषा निरूप्यते ।

राम सु इति स्थिते 'मागध्यां शौरसेनीवत्' इत्यतः 'मागध्याम्' इत्यधिकृत्य

स्रोः श्लौ ॥ ३ । २ । २६ ॥

स्रोः सकाररेफयोः मागध्यां शकारलकारौ यथाक्रमं भवतः । इति रेफस्य लकारे सति[1]

सौ पुंस्येलतः ॥ ३ । २ । २७ ॥

मागध्यां पुंलिङ्गे वर्तमानस्य अकारस्य[2] एकारो लित् सौपरे । 'शेषं प्राकृतवत्' इत्यतिदेशात् सोर्लुकि लामे । इत उत्तरं षष्ठ्येकवचनपर्यन्तं प्राकृतवत् । लाम ङस् इति स्थिते

त्वाङ्डाहो ङसः ॥ ३ । २ । २८ ॥

'मागध्याम्' इत्यनुवर्तते । मागध्यामवर्णात् परस्य ङसः डित् आह इत्यादेशस्तु भवति । लामाह । पक्षे । 'स्रोःश्लौ' इति सकारस्य शकारः । लामश्श ॥

आमो डाहङ् ॥ ३ । २ । २९ ॥

पूर्वसूत्रात् 'आत्' इत्यनुवर्तते । 'तु' इति च । अवर्णात् परस्य मो मागध्यामाहादेशो ङिद्वा स्यात्[3] । ङित्त्वात् पूर्वस्य सानुनासिक उच्चारः । लामाहँ । पक्षे । लामाणं । लामाण । 'तद्व्यत्ययश्च' इति सूत्रात् प्राकृतेप्याहङ् । 'मागध्यां शौरसेनीवत्' इत्यतिदेशात् 'अतो ङसेर्दुदोश्' इति दुदो च । लामादु । लामादो । अन्यत् सर्वं शौरसेनीवद् द्रष्टव्यम् ॥ अथाकारान्तेषु केषुचिद्विशेषाः प्रदर्श्यन्ते ।

---

१ T. drops सति. २ पुंलिङ्गे वर्तमानस्य मागध्यामेकारो My., P. ३ भवति T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छोनादौ श्चः ॥ ३ । २ । ३२ ॥

अनादौ वर्तमानस्य लाक्षणिकस्यालाक्षणिकस्य च च्छस्य शकारसहित-चकारो भवति । पिच्छिलः । पिश्चिले । लाक्षणिकस्य । आपन्नवत्सलः । आवण्णवश्चले । आवण्णवच्छळो । वृक्षः । वच्छो । वृश्चे । इत्याद्यूह्यम् । 'अनादौ' इति किम् । छागः । छाए ।

क्षः ×कः ॥ ३ । २ । ३३ ॥

'अनादौ' इत्यनुवर्तते । मागध्यामनादौ वर्तमानस्य क्षस्य जिह्वामूलीयाक्रान्तककारो भवति । यक्षः । य×के । राक्षसः । ला×कशे । वृक्षः । लु×के । 'अनादौ' इति किम् । क्षयः । खए ॥

सः सषोः संयोगेऽग्रीष्मे ॥ ३ । २ । ३५ ॥

'अनादौ' इत्यनुवर्तते । अनादिमयोः संयोगे वर्तमानयोः सकार-षकारयोः मागध्यां सकारो भवति अग्रीष्मे । ग्रीष्मे तु न भवति । ऊर्ध्वलोपाद्यपवादः । प्रशस्तः । प्रशस्ते । हस्तः । हस्ते । विसयः । विस्सए । शुष्कः । शुस्के । शष्पकवलः । शस्पकवळे । इत्याद्यूह्यम् । 'अग्रीष्मे' इति किम् । ग्रीष्मः । गिंहो ॥ धन्य । सामान्य । गण्य । प्राज्ञ । धनञ्जय । इत्यादिषु

न्यण्यज्ञञ्जां ञ्ञः ॥ ३ । २ । ३७ ॥

मागध्यां न्यण्यज्ञञ्ज इत्येतेषां ञकारो रिद् भवति । रित्वाद् द्वित्वम् । धञ्ञे । सामञ्ञे । गञ्ञे । पञ्ञे । धणञए । इत्याद्यूह्यम् ॥ समाज । जय । हृद्य । इत्यादिषु

जयद्यां यः ॥ ३ । २ । ३९ ॥

जकारयकारद्यकाराणां यकारो भवति । समाजः । समाये । जयः ।

---

१ मागध्यामनादौ T. २ छकारस्य for लाक्ष°—च्छस्य T. ३ शकाराक्रान्तश्च° T. ४ अनादौ वर्तमानस्य क्षस्य मागध्यां P., My. ५ मागध्यां संयोगे° T. which drops मागध्यां before सकारो. ६ T. drops तु. ७ My. and P. drop मागध्यां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यये । हृद्यः । हिय्ये । विद्याधरः । विय्याहरे । दुर्जनः । दुय्यणे । जनपदः । यणवए । अनवद्यः । अणवय्ये । इत्यादि । यस्य यकारविधानं 'आदेर्जः' इत्यस्य बाधनार्थम् ॥ प्रकोष्ठ । सुष्ठु । कृतभट्ट । इत्यादिषु

ष्टट्टौ स्थम् ॥ ३ । २ । ४० ॥

ष्ठकारो द्विरुक्तटकारश्च सकाराक्रान्तथकारः स्यात् । पवस्थे । पओस्थे । प्रकोष्ठः । सुष्ठुकृतः । सुस्थुकए । भट्टः । भस्थे । भस्थालए । इत्यादि ॥

स्थर्थौ स्तं ॥ ३ । २ । ४१ ॥

स्थर्थ इत्येतौ सकाराक्रान्ततकारमापद्येते । उपस्थितः । उपस्तिदे । अत्र 'शौरसेनीवत्' इत्यतिदेशात्तस्य दः । अर्थः । अस्ते । पार्थवाहः । शस्तवाहे । इत्यादि॥ इकारान्तमारभ्य हलन्तान्तं लिङ्गत्रयेपि शौरसेनीवत् प्राकृतवच्च । असच्छब्दे विशेषः ॥

हगेहंवयमोः ॥ ३ । २ । ३१ ॥

अहं वयं एतयोः स्थाने मागध्यां हगे इति भवति । हगे शुहमणुहोमि । अहं सुखमनुभवामि । हगे शंवत्ता । वयं संप्राप्ताः । अव्ययादिषु शौरसेनीवत् प्राकृतवच्च ॥

इति मागध्यां सुबन्तविभागः ॥

अथ तिङन्तप्रक्रिया ।

भू इतिस्थिते । 'शौरसेनीवत्' इत्यतिदेशात् भुवो[1] हकारस्य भकारः । [2]भोदि । इत्यादि । शौरसेनीवत् । ललुटोः । 'भविष्यति स्सि' इति स्सौसति 'स्रोः श्लौ' इति सकारस्य शकारः[3] । [4]भोश्शिदि । शेषं-पूर्ववत् । विशेषस्तु 'क्षऽकः' इत्यनुवर्तमाने

---

१ 'भुवो हः' इति वा भस्य हत्वम् T. २ होदि T. ३ शः T. ४ होश्शिदि T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्कः प्रेक्षाचक्षतेः ॥ ३ । २ । ३४ ॥

मागध्यां प्रेक्षतेराचक्षतेश्च क्षकारस्य सकाराक्रान्तककारो भवति । 'क्ष×कः' इत्यस्यापवादः । पेस्कदि । पेस्कदे । आअस्कदि । आअस्कदे । इत्यादि । शेषं पूर्ववत् ॥ 'न्यण्यज्ञञ्जां ञ्ञः' इत्यतः 'ञ्ञः' इत्यधिकृत्य

जो व्रजेः ॥ ३ । २ । ३८ ॥

व्रज गतावित्यस्य जकारस्य ञकारो रिद् भवति । 'जयद्यां यः' इत्यस्यापवादः । वञ्ञदि । वञ्ञदे ॥

चिष्ठस्तिष्ठस्य ॥ ३ । २ । ४२ ॥

'पाघ्राध्मा—' इत्यादिना यस्तिष्ठादेशो विहितस्तस्य चिष्ठ इति भवति । चिष्ठदि । चिष्ठदे ॥

मागध्यां शौरसेनीवत् ॥ ३ । २ । २७ ॥

'दस्तस्य' इत्यारभ्य 'शेषं प्राकृतवत्' इत्येतत्पर्यन्तं शौरसेन्यां यदुक्तं तत्सर्वं मागध्यामपि संचारणीयम् ॥

शेषं प्राकृतवत् ॥ ३ । २ । २६ ॥

मागध्यां सूत्रैर्यद्विहितं यच्च मागध्यां शौरसेनीवदित्यतिदेशाल्लब्धं शौरसेनीकार्यं तदुभयातिरिक्तं कार्यं प्राकृतवत् संचारणीयम् ॥

इति षड्भाषाचन्द्रिकायां मागधीभाषा समाप्ता ॥

---

१ My. and P. drop it. २ क्षस्य P., My. ३ उक्तस्यापवादः T. ४ इत्यादेशो T. ५ मागधीभाषाविभागः P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीरस्तु।

वासवादिसुपर्वालिकोटीरद्योतिताङ्घ्रये।
सोमसूर्यानलाक्षाय दक्षिणामूर्तये नमः ॥

अथ पैशाचीभाषा निरूप्यते।

राम सु इति स्थिते प्रथमैकवचनमारभ्य तृतीयैकवचनपर्यन्तं प्राकृतवत्। तृतीयैकवचने राम टा इति स्थिते 'टो डेणऌ' इति डेणऌ सति रामेण इति प्राप्ते

नो णनोः पैशाच्याम् ॥ ३ । २ । ४३ ॥

पैशाच्यां भाषायां णकारनकारयोः नैकारादेशो भवति । रामेन। नकारस्यापि पुनर्नकारविधानं णादेशबाधनार्थम्। एवं सर्वत्र णस्य नो विधेयः ॥ ङसौ

अतो ङसेस्तुतोशू ॥ ३ । २ । ५५ ॥

अकारात् परस्य ङसेस्तु तो इत्यादेशौ शितौ भवतः । रामात्। रामातो । 'अतोङसेर्दुदोशू' इत्यातिदेशिकस्यापवादार्थमयं योगः। अन्यत् प्राकृतवत् ॥ अथाकारान्तेषु विशेषाः प्रदर्श्यन्ते ॥

न्यण्यज्ञां ञर् ॥ ३ । २ । ४४ ॥

'पैशाच्याम्' इत्यनुवर्तते। न्य ण्य ज्ञ इत्येतेषां पैशाच्यां ञकारो रिद् भवति। रित्वाद् द्वित्वम्। धन्यः। धञ्ञो। गण्यः। गञ्ञो। प्राज्ञः। पञ्ञो। एवं सामान्यकार्पण्यसर्वज्ञादिषु संचारणीयम् ॥ प्रतिभास। प्रतिपन्न। वेतस। दामोदर। इत्यादिषु

तल्तदोः ॥ ३ । २ । ४६ ॥

तकारदकारयोः पैशाच्यां तकारो लिद् भवति । पतिहासो। पतिपन्नो। वेतसो। तत्र तकारस्य डकाराद्यादेशान्तरबाधनार्थं तकार-

---

१ T. has शिष्टार्य°. २ T. drops भाषा. ३ नकारो P., My. ४ सामान्यकस्य कार्पण्यकासर्वज्ञादिषु P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विधानम् । तामोतरो । दामोदरः । मतो । मदः । इत्यादि कल्पनीयम् ॥ [1]कमल । कोमल । मुकुल । इत्यादिषु

लो ळः ॥ ३ । २ । ४८ ॥

पैशाच्यां लकारस्य ळकारः स्यात् । कमळो । कोमळो । मुकुळो ।

दुस्तिर्यादृशगे ॥ ३ । २ । ४९ ॥

यादृशादिषु दृ इत्यस्य स्थाने ति इत्ययमादेशो भवति । [2]यातिसो । यादृशः । तातिसो । तादृशः । [3]इत्यादि । यादृश । तादृश । भवादृश । अन्यादृश । अत्र न्यस्य ञ्ञ् । अञ्ञातिसो । एतिसो । ईदृशः । केतिसो । कीदृशः । अत्र उभयत्र 'एत्पीडनीडकीदृश—' इत्यादिना ईत एत्वम् । अम्हातिसो । अस्मादृशः । अत्र 'श्मष्म—' इत्यादिना स्मस्य म्हादेशः ॥ आर्य । [4]वर्य । [5]स्नात । [6]कष्ट । दुष्ट । [7]इत्यादिषु

र्यस्नष्टां रिअसिनसिटाः क्वचित् ॥ ३ । २ । ५० ॥

पैशाच्यां र्य स्न ष्ट इत्येतेषां यथासंख्यं रिअ सिन सिट इत्यादेशा [8]भवन्ति । आरिओ । वरिओ । सिनातो । कसिटो । 'क्वचित्' इत्युक्तत्वादार्य इत्यत्र अय्यो भ्रष्ट इत्यत्र भट्टो इत्यप्यस्ति ॥

टोस्तु तु ॥ ३ । २ । ५१ ॥

पैशाच्यां टु इत्यस्य तु इति वा स्यात् । वटुकः । वतुको । कुटुंबं ॥ कुतुंबं । पटुदेहः । पतुदेहो ॥

योल्पो हृदये ॥ ३ । २ । ५२ ॥

हृदयशब्दे यस्य पो लिर्स्यात् । हृदयसंतोषः । हितपसंतोसो ॥

शषोः सः ॥ ३ । २ । ४७ ॥

पैशाच्यां सकारषकारयोः सकारो भवति । शेषः । सेसो । वेषः ।

---

१ कालकोलाहलकुडिलादिषु T. २ यादृशः । यातिसो । तादृशः । तातिसो T. ३ T. has after it:—भवादृशः । भवातिसो । अस्मादृशः । अम्हातिसो । अत्र 'श्मष्म'—इत्यादिना स्मस्य म्हादेशः । अन्यादृशः । ४ T. has अर्यः before it. ५ T. has स्नातः before it. ६ कष्टः before it T. ७ T. adds दुष्टः । दुसिटो । ८ भवति T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेसो । शठः । सढो । पोषः । पोसो । इत्यादि । इदं सूत्रं 'न प्रायोलुक्कादिच्छल्षट्छम्यन्तसूत्रोक्तम्' इत्यस्य सूत्रस्य सत्वबाधकस्य बाधनार्थम्। ननु 'न प्रायोलुक्कादि—'सूत्रबाधनार्थमिदं सूत्रमिति यदुक्तं तदसङ्गतम् । विचारासहत्वात्। तथाहि। 'प्रायो लुक्कग—' इति सूत्रमारभ्य 'छल्षट्छमीसुधाशाबसप्तवर्णे' इति सूत्रान्तानि यानि सूत्राणि तेषां प्राकृतभाषाविधायकानां पैशाच्यां प्रसक्तौ सत्यां 'न प्रायोलुक्कादिछल्षट्छम्यन्तसूत्रोक्तम्' इति निषेधसूत्रेण भवितव्यम् । न च तेषां प्राकृतविधायकानां पैशाच्यां प्रसक्तिरस्ति । न च शेषं प्राकृतवदित्यतिदेशात् प्रसक्तिर्भविष्यति इति वाच्यम् । तत्सूत्रस्य पैशाच्यामभावात् । परंतु 'शेषं शौरसेनीवत्' इत्येवास्ति । न च 'शेषं शौरसेनीवत्' इत्यतिदेशादेव प्राकृतानामप्यत्र प्रसक्तिर्भविष्यति । शौरसेन्यां 'शेषं प्राकृतवत्' इत्यतिदेशस्य दृष्टत्वादतिदिष्टातिदेशमर्यादया प्राकृतानामप्यत्र संभवादिति वाच्यम्। अतिदिष्टातिदेशस्य अदृष्टचरत्वात् । तस्माद्बाधकबाधनार्थमित्यसंगतमुक्तमिति चेत् । अत्रोच्यते[1] । यदुक्तं प्राकृतानामत्र प्रसक्तिर्नास्ति इति तदसत् । अतिदिष्टातिदेशमर्यादया प्रसक्तेः । न चातिदिष्टातिदेशस्यादृष्टचरत्वम् । अतिदेशतः प्राप्तानां श्येनयागधर्माणामघनामककर्मण्यतिदेशस्य दृष्टत्वात् । अग्नीषोमीयधर्माणां सान्नाय्यातिदेशतः प्राप्तानां सवनीयादावतिदेशस्य दृष्टत्वाच्च । तस्माद्बाधकबाधनार्थमिति सम्यगुक्तम् ॥ एक । भाग । कुच । गज । इत्यादौ 'प्रायोलुक्—' इति कादिलोपे प्राप्ते

न प्रायोलुक्कादिच्छल्षट्छम्यन्तसूत्रोक्तम्॥ ३ । २ । ६३ ॥

'प्रायो लुक्कग—' इति सूत्रमारभ्य 'छल्षट्छम्यन्त' सूत्रपर्यन्तं ये विधयः प्राकृते ते पैशाच्यां न भवन्ति । इति कादीनां लोपाद्यपवादः[2] । एको । भागो । कुचो । गजो । इत्यादि । एवं सर्वविध्यभावोनुसंधेयः ।

---

१ तत्रोच्यते T. २ लोपाद्यभावः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वादयः प्राकृतवत् । पूर्वस्य पुरवः । पुरवो । पुरवे । इत्यादि । इतः परमजन्तेषु लिङ्गत्रयेपि प्राकृतवच्छौरसेनीवच्च ॥ हलन्तेषु

राज्ञो ज्ञो वा चिञ् ॥ ३ । २ । ४५ ॥

संस्कृते राजन्शब्दस्य यत्र यत्र ज्ञकारस्तस्य तस्य ज्ञकारस्य पैशाच्यां चिञ् इत्यादेशो वा स्यात्[1] । राचिञो लपितं । राज्ञो लपितम्[2]। राचिञो वचनं[3] इत्यादि । 'ज्ञः' इति किम् । राजा ॥

टा नेन तदिदमोः ॥ ३ । २ । ५३ ।

पैशाच्यां तदिदमोः स्थाने टावचनेन सह नेन इति भवति । नेन । तेन अनेन वा ॥

नाये स्त्रियाम् ॥ ३ । २ । ५४ ॥

तदिदमोः स्थाने टावचनेन सह पैशाच्यां स्त्रीलिङ्गे नाये इति स्यात् । नाये । तया अनया वा । शेषं प्राकृतवच्छौरसेनीवच्च ॥ अव्ययेषु टाप्रत्यये विशेषः ।

क्त्वा तूनं ॥ ३ । २ । ६० ॥

पैशाच्यां[4] क्त्वाप्रत्ययस्तूनमिति रूपमापद्यते[5] । रंतून । गंतून । हसितून । इत्यादि ॥

ष्ट्वः द्धूनत्थूनौ ॥ ३ । २ । ६१ ॥

पैशाच्यां कृते[6] षत्वे ष्ट्वा इति सिद्धस्य क्त्वाप्रत्ययस्य स्थाने द्धून त्थून इत्यादेशौ भवतः । कद्धून । कत्थून । कृष्ट्वा । तद्धून । तत्थून । दृष्ट्वा । इत्यादि । अन्यत् सर्वं प्राकृतवच्छौरसेनीवच्च ॥

इति सुबन्तविभागः ।

अथ तिङन्तविशेषाः ।

हो इति स्थिते 'शौरसेनीवत्' इत्यतिदेशात् 'भुवो भः' इति हस्व भः । भो इति स्थिते इजेचोर्विधाने

१ इत्यादेशः स्याद्वा My., P. २ T. adds राचिञ्ञं धनं । राज्ञो धनम्. ३ T. drops राचिञो वचनं. ४ P. and My. drop पैशाच्यां. ५ रूपं प्राप्नोति My., P. ६ कृष्ट्वा दृष्ट्वा इत्यादि सिद्धस्य P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तडिजेचः ॥ ३ । २ । ५६ ॥

पैशाच्यां तिप्रादेशयोरिजेचोस्तकारो[1] भवति । दटोपवादः । भोति । भवति । भवते । इत्यादि । शेषं प्राकृतवत् ॥ लृलुटोः

एय्य एव भविष्यति ॥ ३ । २ । ५७ ॥

भविष्यदर्थे विहितयोरिजेचोः स्थाने एय्यादेश एव भवति न तु शौरसेन्यामित्यातिदेशिकः सिः । [2]भोएय्य । भवेय्य । भोस्सिंति । भोस्सिमि । इत्यादि । अन्येषु लकारेषु प्राकृतवच्छौरसेनीवत् सर्वे विधयो द्रष्टव्याः ॥ यकि

इय्यो यकः ॥ ३ । २ । ५८ ॥

यक्प्रत्ययस्य इय्य इत्ययमादेशो भवति पैशाच्याम् । ईअइज्जयोरातिदेशिकयोरपवादः । भोइय्यति । भोइय्यते । भविय्यति । भविय्यते । इत्यादि ॥

कृञो डीरः ॥ ३ । २ । ५९ ॥

'यकः' इत्यनुवर्तते । कृञो यकः स्थाने पैशाच्यामीर इत्यादेशो डित् स्यात् । कीरति । कीरते । इत्यादि ॥ अन्येषु लकारेषु णिचि भावकर्मणोश्च सर्वे विधयः प्राकृतवच्छौरसेनीवद्द्रष्टव्याः ॥

इति षड्भाषाचन्द्रिकायां पैशाचीभाषा समाप्ता[3] ॥

---

१ °स्तकारागमो P., My. २ T. has होएय्य । होवेय्य । होस्सिंति । होस्सिमि । ३ पैशाचीभाषाप्रक्रिया T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यैर्मिवर्यात्वलिस्वान्तद्योतमानात्ममूर्तये ।
वेदान्तपक्षपाताय दक्षिणामूर्तये नमः ॥

अथ चूलिकापैशाची ।

राम सु इति स्थिते

रो लस्तु चूलिकापैशाच्याम् ॥ ३ । २ । ६४ ॥

चूलिकापैशाच्यां रेफस्य लो वा स्यात् । रामो । लामो । इत्यादि । शेषं पैशाचीवत् ॥

गजडदबघझढधभां कचटतपखछठथफाल्र् ॥ ३ । २ । ६५ ॥

चूलिकापैशाच्यां गादीनां यथासंख्यं कादयो भवन्ति । लिस्वान्लित्यम् । मार्गणः । मक्कनो । नगः । नको । मेघः । मेखो । व्याघ्रः । वखो । राजा । लाचा । जीमूतः । चीमूतो । निर्झरः । निच्छलो । झरः । छलो । तडाकं । तटाकं । डमरुकः । टमलुको । गाढं । काढं । ढक्का । ठक्का । मदनः । मतनो । दामोदरः । तामोतलो । मधुरः । मथुलो । धारा । थाला । बाडवः । पाटपो । बौलः । पालो । रभसः । लफसो । रंभा । लंफा । भवः । फवो । इत्यादि । कचिल्लाक्षणिकस्यापि । प्रतिमा । पडिमा । पटिमा । दंष्ट्रा । दाढा । ताढा ॥

अन्येषामादियुजि न ॥ ३ । २ । ६६ ॥

चूलिकापैशाच्यामन्येषामाचार्याणां मते गजडदबघझढधभामादौ वर्तमानानां युजिधातौ चकारादयो न भवन्ति । गती । घनो । जनो । झल्लरी । इत्याद्यूह्यम् । युजि । नियोजितं ॥

शेषं प्राग्वत् ॥ ३ । २ । ६७ ॥

चूलिकापैशाच्यां 'रो लस्तु—' इत्याद्यारभ्य यदुक्तं ततोन्यत् प्राग्वत् पैशाचीवत् । तेन 'नो णनोः पैशाच्याम्' इत्यारभ्य 'न प्रायोऌक्—'

---

१ T. has वासवादि &c. in place of this couplet. २ लकारो T. ३ बालकः पालको P., My.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदि सूत्रान्तं यत् कार्यजातं पैशाच्यां तदत्रापि भवति । सर्वत्रोपदिष्टे-नातिदिष्टबाधः । तेन । भोति । भवति । भवते । भोइय्य । इत्यादौ भस्य फ एव । फोति । फवति । फवते । इत्यादि ग्रन्थविस्तरभयान्न लिख्यते ॥

इति षड्भाषाचन्द्रिकायां चूलिकापैशाचीभाषा समाप्ता ॥

१ P. and My. have प्रक्रिया for समाप्ता.

[1]अशेषविद्यासंदोहवेष्टिताय परात्मने ।
सर्वदेवपरीताय दक्षिणामूर्तये नमः ॥

अथापभ्रंशभाषा निरूप्यते ।

राम सु इति स्थिते 'प्रायोपभ्रंशे चोच्' [2]इत्यतः 'अपभ्रंशे' इत्यधि-कृत्य

स्वम्यत उत् ॥ ३ । ४ । २ ॥

अपभ्रंशे सावमि च परे अत उत् स्यात् ॥ 'ङमो लुक्' [3]इत्यतः 'लुक्' इत्यनुवर्तमाने

सुससोः ॥ ३ । ४ । १७ ॥

सुस् प्रथमा अस् द्वितीया । तयोरपभ्रंशे [4]लुग्भवति । इति सोर्लोपः । रामु । स्वमोरदन्तत्वमपि केचित् । राम ॥ 'स्वम्यत उत्' [5]इत्यतः 'अत्' इत्यनुवर्तमाने

ओत् सौ तु पुंसि ॥ ३ । ४ । ३ ॥

पुंलिङ्गे वर्तमानस्यातः सौ परे [6]वा ओत्वं भवत्यपभ्रंशे । रामो । अत्रापि पूर्ववत् सोर्लुक् । अत्रैव विशेषः ॥

तु मो ङ्वम् ॥ ३ । ३ । ३ ॥

'अचो[7]स्तवोखौ कखतथपफा गघदधबभान्' इत्य[8]तः 'चो[9]स्तवोखौ' [10]इत्यनुवर्तते । अपभ्रंशेचः परोनादौ वर्तमानोसंयुक्तो मकारो [11]वत्वमापद्यते वा । इति विकल्पेन वत्वे ङित्वात् सानुनासिक [12]उच्चारे रावँु रावँा इत्याद्यपि संचारणीयम् ॥ ङसि राम ङस् इति स्थिते

---

१ T. has—यमे मानसकासारहंसस्वच्छस्वमूर्तये । वेदान्तपक्षपाताय दक्षिणा-मूर्तये नमः ॥ in place of अशेष°. २ इत्यधिकृत्य T. ३ इत्यनुवर्तमाने T. ४ T. has अनित्यं लुग्भवति. ५ इत्यनुवर्तमाने T. ६ ओत्वं वा भवत्य° T. ७ °स्तावखौ My., P. ८ इत्यनुवर्तते T. ९ °स्तावखौ My., P. १० इत्यनुवर्तमाने My. ११ वकारत्व° T. १२ उच्चारः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिहौ सुपि ॥ ३ । ४ । १ ॥

'अपभ्रंशे' इत्यनुवर्तते । अपभ्रंशे सुपि परतः नाम्नोन्त्यस्य स्वरस्य दीर्घह्रस्वौ मिथः प्रायो भवतः । इति दीर्घे रामा ङसि इति स्थिते 'सुससोः' इति ङसो लुक्[1] । रामा । दीर्घाभावे राम । संबुद्धौ । दे रामु । दे रामो । संबुद्धावत्वमिति केचित् । तेषां मते दे राम दे रामा इत्येव ॥ ङसि

हो ङस आमन्त्रणे ॥ ३ । ४ । १८ ॥

आमन्त्रणे[2] वर्तमानान्नाम्नः[3] परस्य ङसो हो इति भवति[4] । दे रामहो । दे रामाहो । अत्र 'दिहौ सुपि' इति दीर्घः । अमि 'स्वम्यत उत्' इत्युत्वम् । रामु । अम्यदोताविति केचित् । राम । रामो । अत्र 'सुससोः' इत्यमो लोपः । शसि 'सुससोः' इति शसो लुक् । राम । रामा । शस इदेतौ डिताविति केचित् । रामि । रामे ॥ टा राम टा इति स्थिते 'स्वम्यत उत्' इत्यतः[5] 'अतः' इत्यनुवर्तमाने

टो णानुस्वारौ ॥ ३ । ४ । ११ ॥

अतः परस्य टावचनस्य णत्वमनुस्वारश्च भवति । 'ए भिसि' इत्यतः[6] 'ए' इत्यनुवर्तमाने 'स्वम्यत उत्' इत्यतः[7] 'अतः' इति च ।

टि ॥ ३ । ५ । ५ ॥

अतः टावचने परे एकारो भवति । पृथग्योगान्नित्यम् । रामेण । रामे । टो डिदेत्वमिति केचित् । रामे ॥ भिसि

हिं भिस्सुपोः ॥ ३ । ४ । १९ ॥

भिस्सुपोः हिमित्यादेशो[8] भवति ॥ 'स्वम्यत उत्' इत्यतः[9] 'अतः' इत्यधिकृत्य 'ओत् सौ तु पुंसि' इत्यतः[10] 'तु' इतिच

---

१ लोपे T. २ अपभ्रंशे आमन्त्रितेर्थे T. ३ P. and My. drop वर्तमानात्. ४ T. has लोपापवादः after it. ५ इत्यनुवर्तमाने T. ६ इत्यनुवर्तमाने T. ७ इति च T. ८ °देशः स्यात् T. ९ इत्यधिकृत्य T. १० इति च T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ए भिसि ॥ ३ । ४ । ४ ॥

भिसि परे अत एत्वं वा स्यात् रामेहिं । रामाहिं । रामहिं । अत्र 'दिहौ सुपि' इति दीर्घः । भिसो डिदेत्वमिति केचित् । रामे । राम ॥ ङसि इति स्थिते

ङसेर्हेहु ॥ ३ । ४ । ७ ॥

'अतः' इत्यनुवर्तमानं[1] पञ्चम्यन्ततया विपरिणम्यते । अपभ्रंशेका-[2]रात् परस्य ङसेर्हे हु इत्यादेशौ भवतः । रामहे । रामहु । रामाहे । रामाहु । अत्र 'दिहौ सुपि' इति दीर्घः ॥ राम भ्यस् इति स्थिते

भ्यसो हुं ॥ ३ । ४ । ८ ॥

अपभ्रंशेकारात्[3] परस्य भ्यसो हुमित्यादेशो[4] भवति । रामहुं । रामाहुं ॥ राम ङसिति स्थिते

सुस्सुहो ङसः ॥ ३ । ४ । ९ ॥

अतः परस्यः ङसः सु स्सु हो इति त्रय आदेशा भवन्ति । रामसु । रामासु । रामस्सु । रामहो । रामाहो ॥

ङमो लुक् ॥ ३ । ४ । १६ ॥

ङमः षष्ठीविभक्तेः प्रायो लुग्भवति[5] । रामा । राम ॥ राम[6] आम् इति स्थिते

आमो हं ॥ ३ । ४ । १० ॥

अतः परस्यामो हमिति भवति[7] । रामहं । रामाहं । 'ङमो लुक्'[8] । राम । रामा ॥ राम ङि इति स्थिते 'ए भिसि' इत्यतः 'ए' इत्यधिकृत्य[9] 'अतः' इति च ॥

ङिनेच्च ॥ ३ । ४ । ६ ॥

अतो ङिना सहेत् स्याच्चकारादेच्च । रामि । रामे । सुपि 'हिं भिस्सुपोः' इति हिं । रामहिं । सुपः सुरेवेति केचित् । रामसु । रामासु ।

---

१ वर्तते T. २ drops अपभ्रंशे. ३ T. has 'अतः' इत्यनुवर्तते । अतः परस्य &c. ४ °मित्यादेशः स्यात् T. ५ लुक् स्यात् T. ६ P. and My. drop this line. ७ स्यात् T. ८ लुकि T. ९ इत्यधिकृत्य T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तद्वयत्ययश्च' इति सर्वासु विभक्तिषु प्राकृतादिरूपता च । एवमकारान्तानां वृक्षादीनां रूपमुन्नेयम्[1] । अथाकारान्तेषु विशेषाः प्रदर्श्यन्ते । लोक । काक । मख । विशिख । सुत । चूत । नाथ । शतपथ । कोप । ताप । रेफ । कफ । इत्यादिषु 'प्रायोपभ्रंशेचोच्' इत्यतः 'अपभ्रंशे' इत्यधिकृत्य[2] ॥

अचोस्तवोखौ[3] कखतथपफा गघदधवभान् ॥ ३ । ३ । २ ॥

अचः परे असंयुक्ता अनादौ वर्तमानाः कादयो यथासंख्यमपभ्रंशे गादीनापद्यन्ते[4] प्रायः । 'स्यम्यत उत्' इत्युत्वं[5] च । लोगु[6] । कागु । मघु । विसिघु । सुदु । चूदु । णाधु । सदबधु । कोबु । ताबु । रेभु । कभु । इत्यादि । अन्यत् सर्वं रामवत् । एवं सर्वत्र । शिष्टं[7] पूर्ववदुन्नेयम् ॥

म्हो म्भं ॥ ३ । ३ । ४ ॥

म्ह इत्ययं माक्रान्तभकारमापद्यते[8] । अत्र 'म्हो' इति 'श्मष्म—' इत्यादिना प्राकृतलक्षणविहितो म्हो गृह्यते । तस्यायं[9] विधिः । ब्राह्मणः । बम्भणु । एवमश्मन् काश्मीरेत्यादिष्वपि म्हस्य म्भ एव । तथा च अम्भु कम्भूरु इत्यादि सिद्धम् ॥ 'तु मो ड्वम्' इत्यतः 'तु' इत्यनुवर्तमाने

रो लुकमधः ॥ ३ । ३ । ५ ॥

अधो वर्तमानो रेफो लुकं[10] त्वापद्यते । पिउ । प्रिउ ।

क्वचिदभूतोपि ॥ ३ । ३ । ६ ॥

'रः' इत्यनुवर्तते । क्वचिदविद्यमानोपि रेफो भवति । व्यासः । व्रासु । विषण्ण वर्त्म उक्त एषु

उन्नविच्छवुत्ता विषण्णवर्त्मोक्ताः ॥ ३ । ३ । ५३ ॥

विषण्णादीनां त्रयाणां यथासंख्यमुन्नादय[11] आदेशाः स्युः ।

---

१ रूपं नेयम् P., My. २ इत्यधिकृत्य T. ३ °स्तावखौ P., My. ४ °नाप्नुवन्ति P., My. ५ इत्यत उत्वं च My. ६ has लोकः । लोगु । काकः । कागु and so on. ७ Before this T. adds विशेषमात्रमुच्यते. ८ T. has अपभ्रंशे मकाराक्रान्त° T. ९ T. has संस्कृते तदसंभवात् in place of तस्यायं विधिः. १० लोपं T. ११ उन्न विच्छ वुत्त इति यथासंख्यं भवति T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उन्नु । विच्छु । वुत्तु ॥ यादृश । तादृश । कीदृश । ईदृश ।—एषु 'दादेर्डेह्रो यादृक्तादृक्कीदृगीदृशाम्' इत्यस्मिन् 'डेह्रो' वर्जमनुवर्तमाने

डइसोताम् ॥ ३ । ३ । १० ॥

अतामकारान्तानां यादृगादीनां दादेरवयवस्य डित् अइस इत्यादेशो भवति । जइसु । यादृशः । तइसु । तादृशः । कइसु । कीदृशः । अइसु । ईदृशः ॥

अन्यादृशस्याण्णाइसावराइसौ ॥ ३ । ३ । ५५ ॥

अन्यादृशस्य अण्णाइस अवराइस इत्येतावादेशौ भवतः । अण्णाइसु । अवराइसु ॥

अरखुः परस्परस्य ॥ ३ । ३ । ५४ ॥

परस्परशब्दस्यादिरद्भवति । अवरोवरु । अत्र 'तद्वच्चत्ययश्च' इत्यपभ्रंशभाषास्थसूत्राकृष्टं प्राकृतसिद्धं 'फोःपरस्परनमस्कारे' इत्योत्वं च ॥ सर्वादीनां भेदः ॥

सर्वगान् ङेर्हिं ॥ ३ । ४ । २६ ॥

सर्वादेरुत्तरस्य ङेर्हिं भवति । सव्वहिं ॥

ङसेर्हं ॥ ३ । ४ । २७ ॥

सर्वादेरुत्तरस्य ङसेर्हं भवति । सव्वहं । शेषं रामवत् ॥ सर्वशब्दस्यादेशान्तरं

त्वँनुसाहावन्यथा सर्वौ ॥ ३ । ३ । ५१ ॥

अन्यथासर्वशब्दयोः अनु साह इत्येतौ क्रमाद् भवतः । साहु साहो इत्यादि । एवं विश्वादीनां रूपम् । इकारान्तः पुंलिङ्गः कविशब्दः । 'सुससोः' इति सुलोपः । कइ । कई । 'दिहौ सुपि' इति दीर्घः ।

---

१ इत्येतेषां T. २ इत्यनुवर्तमाने T. ३ इत्यत ओत्वं च T. ४ सर्वगात् ङि हिं T. ५ रकारान्तात् परं ङिवचनं हि इति भवति T. ६ रकारान्तात् परं ङसि पञ्चम्येकवचनं हमिति भवति । T. ७ त्वणु° T. ८ अणु T. ९ इति यथासंख्यं भवतः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जसि । कइ । कई । जसि हो इति केचित् । कइहो । कईहो । संबुद्धौ दे कइ । दे कई । 'होजसामन्त्रणे' । दे कइहो । दे कईहो । अमि 'सुससोः' इति लुक् । कइ । कई । शस्यम्वत्[1] ॥ 'टो णानुस्वारौ' इत्यधिकृत्य

एं चेदुतः ॥ ३ । ४ । १२ ॥

इकाराद्[2]उकाराच्च परस्य टावचनस्य एं इति च भवति[3] । चकाराण्णानुस्वारौ च भवतः । कइएं । कईएं । कइण । कईण । कइओ । कईओ । भिसि 'हिं भिस्सुपोः' इति हिं । कइहिं । कईहिं ॥ ङसौ

हि हे ङिङस्योः ॥ ३ । ४ । १३ ॥

'इदुतः' इत्यनुवर्तते । इदुतः परयोः ङिङसि इत्येतयोः यथाक्रमं हि हे इति भवतः । कइहे । कईहे ॥ भ्यसि

हुं भ्यसः ॥ ३ । ४ । १४ ॥

इदुतः परस्य भ्यसो हुमिति[4] भवति । कइहुं । कईहुं[5] ॥ आमि 'हुंभ्यसः' इत्यतः[6] 'हुं' इत्यनुवर्तमाने

आमो हं च ॥ ३ । ४ । १५ ॥

इदुतः परस्यामो हं भवति । चकाराद्धुं च । कइहं । कईहं । कइहुं । कईहुं । 'ङमो लुक्' । कइ । ङौ 'हि हे ङिङस्योः' इति हिः । कइहि । कईहि । ङौ हुमिति केचित् । कइहुं । कईहुं । सर्वत्र 'दिहौ सुपि' इति दीर्घः 'तद्व्यत्ययश्च' इति प्राकृतरूपता च । एवमग्निरी[7]तिप्रभृतयः । उकारान्तानामप्ययमेव प्रकारः । कारु । कारुहो । कारूहो । इत्यादि कल्प्यम् ॥ ऋकारान्तानां पितृशब्दप्रभृतीनां विशेषः । पितृ सु इति स्थिते

प्रायोपभ्रंशेचोच् ॥ ३ । ३ । १ ॥

अपभ्रंशे चः स्थाने अन्त्योच्[8] प्रायो भवति । प्रायो ग्रहणाद्यस्यापभ्रंशे

---

१ शस्यमिवत् T. २ इकारान्तादुकारान्ताच्च T. ३ स्यात् T. ४ T. drops इति. ५ T. has here ङसि 'ङमो लुक्' इति षष्ठ्या लुक् । कइ । ङसो हमिति केचित् । कइहं । कईहं । ६ इत्यनुवर्तमाने T. ७ गिरि for रीति T. ८ अजन्यः T.

विशेष उच्यते तस्यापि क्वचित् प्राकृतवच्छौरसेनीवच्च कार्यं भवति। इत्यचः स्थाने अजन्तरस्य विधानादकारस्यात्वमुत्वं च। तकारस्य 'अचो-स्तथोस्तौ–' इत्यादिना दकारः । पिदु । पिदो । इत्यादि । रामवत् । एवमन्येष्वजन्तेषु प्रयोगवशादजन्तरं कल्पनीयम् ।

इत्यजन्ताः पुंलिङ्गाः ॥

अथाजन्तस्त्रीलिङ्गाः प्रदर्श्यन्ते ।

जाआ सु इति स्थिते 'सुससोः' इति सोर्लुक् । जाआ । 'दिहो सुपि' इति ह्रस्वः । जाअ । आकारान्तेषु स्त्रियामित्वमिति केचित् । जाई । जाइ ॥ 'स्त्रियां ङेः' इत्यतः 'स्त्रियाम्' इत्यनुवर्तमाने

उदोतौ जश्शसोः ॥ ३ । ४ । २३ ॥

स्त्रियां वर्तमानयोर्जश्शसोः उत् ओत् इत्येतौ[1] भवतः । जाआउ । जाआओ । जाईउ । जाईओ । एवं ह्रस्वान्तेष्युदाहार्यम् । सर्वत्र 'हो जसामन्त्रणे' इति हो च । दे जाअ । दे जाआ । दे जाइ । दे जाई । 'उदोतौ जश्शसोः' । दे जाआउ । दे जाआओ । दे जाअहो । दे जाआहो । एवमीदन्तेपि । उभयत्र ह्रस्वेष्युदाहार्यम् । अमि । जाई । जाइ । जाआ । जाअ । अत्र 'सुससोः' इति लोपः । शसि । जाआउ । जाआओ । जाआ । जाईउ । जाईओ । जाई । एवमुभयत्र[3] ह्रस्वान्ते-ष्युदाहार्यम् । अकारान्तपक्षे 'टो णानुस्वारौ' इति णानुस्वारौ । इत्व-पक्षे 'एं चेदुतः' इति णानुस्वारौ एं च । जाआण । जाअण । जाआं । जाअं । जाईण । जाइण । जाईं । जाइं । जाईएं । जाइएं । भिसि । 'हिं भिस्सुपोः' इति हिं । जाईहिं । जाइहिं । जाआहिं । जाअहिं ॥ ङसौ 'स्त्रियां ङेः' इत्यतः[4] 'स्त्रियाम्' इत्यधिकृत्य

ङसुङस्योर्हे ॥ ३ । ४ । २१ ॥

स्त्रियां ङसुङस्योर्हे भवति । जाईहे । जाइहे । जाआहे । जाअहे ॥ भ्यसि

---

१ वक्ष्यते T. २ इति च भवतः P., My. ३ एवं सर्वत्र T. ४ इत्य-धिकृत्य T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रुमाम्भ्यसः ॥ ३ । ४ । २२ ॥

'स्त्रियाम्' इत्यनुवर्तते । स्त्रियां [1]वर्तमानयोराम्भ्यसोः हुं भवति । जाईहुं । जाइहुं । जाआहुं । जाअहुं । ङसि । जाआहे । जाअहे । 'ङसो लुक्' । जाआ जाअ । [2]एवमीदन्तेपि ॥ ङौ

स्त्रियां ङेः ॥ ३ । ४ । २० ॥

'हिं भिस्सुपोः इत्यतः 'हिं' इत्यनुवर्तते । स्त्रियां [3]वर्तमानस्य ङेर्हिं भवति । जाईहिं । जाइहिं । जाआहिं । जाअहिं । सुपि । 'हिं भिस्सुपोः' इति हिं । जाईहिं । जाइहिं । जाआहिं । जाअहिं । 'तद्व्यत्ययश्च' इति प्राकृतरूपता च । एवं शालामालाप्रभृतयः । सर्वनामशब्देषु 'त्वनुसाह्वावन्यथा सर्वौ' इति सर्वशब्दस्य साहादेशे साहा इत्यादि जायावत् । विश्वा[4]दीनामपि जायावदेव । विशेषविधानाभावात् । एवमजन्तस्त्रीलिङ्गानां रुच्यादीनां ङीवद्रूपं[5] नेयम् । [6]माता पितृवत् अत्वं दत्वं च । मादा । मादी । इत्यादि ॥

इत्यजन्ताः स्त्रीलिङ्गाः ॥

---

[7]अथाजन्ता नपुंसकलिङ्गाः ।

कुंड सु इति स्थिते 'स्यम्यत उत्' इत्युत्वम् । 'सोर्लुक्' । कुंडु ।

अडडडुल्लाः स्वार्थिककलुक् च ॥ ३ । ३ । २९ ॥

नाम्नः [8]परे अ डड डुल्ल इत्येते प्रत्यया भवन्ति । तत्संनियोगेन स्वार्थिककप्रत्ययलोपश्च । इति यत्र अडडडुल्लानां प्राप्तिस्तत्र कप्रत्ययस्य

---

१ वर्तमानान्नाम्नः परयोराम्° T. २ T. has आमि । जाआहं जाअहं । जाआ । जाअ । before it. ३ वर्तमानान्नाम्नः परं ङिवचनं हिं भवति T. ४ My., and P. omit विश्वादीनामपि जायावदेव. ५ रूपं नेयम् T. ६ मातृशब्देपि पितृशब्दवद्दत उत्वमोत्वं च । मादो । मादु । मादी । मादा इत्यादि T. ७ अथ नपुंसकलिङ्गाः T. ८ परतः अ इति डड डुल्ल इत्येतौ च डितौ T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोप एव । अन्यत्र कप्रत्ययस्यावस्थानमेव । इति कुंडशब्दे कप्रत्ययस्यावस्थाने 'इं नपि' इत्यतः[1] 'नपि' इत्यधिकृत्य

क्तान्तस्यात उं स्वमोः ॥ ३ । ४ । २५ ॥

कान्तस्य[2] तान्तस्य चातः स्वमोः परयोः उं भवति नपि नपुंसकलिङ्गे । कुंडउं । तान्ते भग्गउं । भग्नं । करउं कृतमित्यादि ॥ जसि 'उदोतौ जश्शसोः' इत्यतः 'जश्शसोः' इत्यधिकृत्य

इं नपि ॥ ३ । ४ । २४ ॥

नपि नपुंसकलिङ्गे वर्तमानयोः जश्शसोरिं भवति । 'दिहौ सुपि' इति दीर्घः । कुंडाइं । नपुंसकलिङ्गे जश्शसोरदेतौ डिताविति केचित् । कुंडं । कुंडे । कुंडानि । अन्यत् सर्वं रामवत् । 'तद्वचत्ययश्च' इति प्राकृतादिरूपता च । एवमन्येषामकारान्तनपुंसकलिङ्गानां रूपम् । इकारान्तनपुंसकलिङ्गो वारिशब्दः । वारि । वारिउं । वारिइं । इत्यादि । एवमजन्तनपुंसकलिङ्गे । सर्वत्र[3] यथाप्रयोगं रूपाणि निर्णेतव्यानि शास्त्रे । विशेषविधानाभावादस्माभिर्न प्रपञ्च्यन्ते ॥

इत्यजन्ता[4] नपुंसकलिङ्गाः ।

अथ हलन्ताः ।

किंशब्दे 'त्रतसि च किमो ल्कः' इति कादेशः । उत्वमोत्वं च । कु । को । क । का । के । इत्यादि सर्वं सर्ववत् । विशेषस्तु 'ङसेर्हे'[5] इत्यतः[6] 'ङसेः' इत्यधिकृत्य

तु किमो डिह ॥ ३ । ४ । २८ ॥

किंशब्दङसेः इह इति डिद्वा स्यात् । किह । पक्षे । 'ङसेर्हे'[7] इति हें[8] । केहं । काहं[9] । ङसि तु 'तु किमो डिह' इत्यतः[10] तु इत्यधिकृत्य

---

१ इत्यधिकृत्य T. २ नपुंसकलिङ्गे वर्तमानान्नाम्नः यः ककारस्तकारश्च तदन्तस्याकारस्य T. ३ My. and P. have सर्वत्र after रूपाणि. ४ इति नपुंसकलिङ्गाः P., My. ५ ङसेर्हां P., My., T. ६ इत्यधिकृत्य T. ७ ङसेर्हां P., My., T. ८ हां My., P., T. ९ कहां । काहां P., My., T. १० इत्यधिकृत्य T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ङसः सुश् यत्तत्किंभ्यः ॥ ३ । ४ । २९ ॥

यत्तत्किंभ्यः परस्य ङसः सु इति शिद्वा स्यात् । कासु । शित्वाद् दीर्घः । पक्षे 'सुस्सुहो ङसः' इति त्रय आदेशाः । कसु । कस्सु । कहो । इत्यादि ॥

किं काइंकवणौ ॥ ३ । ३ । ५३ ॥

किंशब्दस्य काइं कवण इत्यादेशौ भवतः । काइं । काइहो । इत्यादि । कविवत् । कवणु । कवणो । इत्यादि । रामवत् ॥ इदंशब्दस्य

इदम आअः ॥ ३ । ४ । ३६ ॥

इदंशब्दस्य आअ इत्यादेशो भवति । अत्र जश्शसोरनुवृत्तिमङ्गीकृत्य तयोरेव आआदेश इति केचित् । तयोरनुवृत्तिमनङ्गीकृत्य सुम्मात्रे आआदेश इत्यपरे । पक्षद्वयेपि सर्ववत् । आउ । आओ । आअ । जसि । आअ । आआ । आए । आउ । आओ इत्यादि । यदा जश्शसो-रेवादेशस्तदा जश्शस्भ्यामन्यत्र 'इदम इमः' इतीमादेशे । इमु । इमो । इम । आअ । आआ । इत्यादि । सर्ववत् ॥ यत्तदोः

यत्तत् ध्रुंत्रुं स्वमोः ॥ ३ । ४ । ३१ ॥

यत्तच्छब्दयोः स्वमोः परतः यथासंख्यं ध्रुं त्रुं इत्यादेशौ भवतः । ध्रुं । त्रुं । पक्षे । जु । जो । सु । सो । अत्र 'तस्सौ सोक्लीबे—' इति तस्य सः । 'ङसः सुश् यत्तत्किंभ्यः' । जासु तासु । शेषमुभयत्र सर्ववत् ॥ 'यत्तत् ध्रुं त्रुं स्वमोः' इत्यतः[3] 'स्वमोः' इत्यधिकृत्य

एतदेह एहो एहु स्त्रीनृनपि ॥ ३ । ४ । ३३ ॥

एतच्छब्दस्य[4] स्वमोः परतः स्त्रीपुंनपुंसकलिङ्गेषु एह एहो एहु इति क्रमाद् भवन्ति । 'सुस्सोः' इति सोर्लुक् ।

जश्शसोरेइ ॥ ३ । ४ । ३४ ॥

---

१ अत्र शित्वात् पूर्वस्य दीर्घः T. २ वा भवतः T. ३ इत्यधिकृत्य T.
४ स्त्रीपुंनपुंसकलिङ्गेषु वर्तमान एतच्छब्दः स्वमोः परतः एह &c. T.

३५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदो जश्शसोः परतः एइ इति भवति । एइ । शेषं सर्ववत् । टादिष्वन्त्यहलो लोपे तस्य दः । एदेण । एदें एदहिमित्यादि । शकारान्तेषु

दादेर्डेहो यादृक्तादृक्[1]कीदृगीदृशाम् ॥ ३ । ३ । ९ ॥

यादृगादीनां दादेरवयवस्य डित् एह इत्यादेशो भवति । सर्वत्र डित्वाट्टिलोपे । जेहुं । जेहो । जेह । यादृक् । तेहुं । तेहो । तेह । तादृक् । केहुं । केहो । केह । कीदृक् । एंहु । एहो । एह । ईदृक् । ईत्यादि । रामवत् ॥ अदस्शब्दस्य 'सुप्यदसो मुः' इति सुपि परे अमु इत्यादेशः । अमु । अमू । जसि 'जश्शसोरेइ' इत्यतः 'जश्शसोः' इत्यधिकृत्य

ओइ अदसः ॥ ३ । ४ । ३५ ॥

अदः शब्दस्य जश्शसोः परतः ओइ इत्यादेशो भवति । ओइ । टादौ । अमुऐं । अमूऐं । अमुण । अमूण इत्यादि । कविवत् ।

इति हलन्ताः पुंलिङ्गाः ॥

अथ हलन्ताः स्त्रीलिङ्गाः ।

किंशब्दस्य कादेशे नकारान्तत्वात् स्त्रियामित्वे प्राप्ते 'किंयत्तदोस्यमामि सुपि' इति स्यमामवर्जमीत्वम् । क । का । कीउ । कीओ । इत्यादि । जाआवत् । एवं यत्तच्छब्दावपि । विशेषस्तु 'ङसः सुश्यत्तत्किंभ्यः' इत्यनुवर्तमाने

स्त्रियां डहे ॥ ३ । ४ । ३० ॥

यत्तत्किंभ्यः परस्य ङसः स्त्रियां डित् अहे इत्यादेशो भवति ।

---

१ My. and P. omit कीदृश्. २ T. omits it. ३ T. omits it. ४ T. omits it. ५ T. omits it. ६ T. adds जेहु । तेहु । केहु । एहु । इत्याद्यपि. ७ इत्यधिकृत्य T. ८ परयोः T. ९ P. and My. drop सुपि. १० °वर्जितसुपि परे ईत्वं स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कहे । जहे । तहे । इदं शब्दस्य 'इदम आअः' इत्याआदेशे आआ । आअ । आआउ । आआओ । इत्यादि । सर्ववत् । एतच्छब्दस्य 'एतदेह एहो एहु स्त्रीनृनपि' इति स्वमोरेहादेशः । एहो । 'जश्शसोरेइ'[1] । एइ । अन्यत्रान्त्यहलो लोपे तस्य दत्वे एदाण इत्यादि जाआवत् । अदस्शब्दस्य 'सुप्यदसोमुः' इत्यमुः । अमु । अमू । जश्शसोः 'ओइ अदसः' इति ओइ इत्यादेशः । ओइ । अमुएं । अमूएं । इत्यादि । ईकारान्त जोआवत्[2] ॥

इति हलन्ताः स्त्रीलिङ्गाः ।

अथ हलन्ता नपुंसकलिङ्गाः[3] ॥

किंशब्दस्य 'किं किं' इति स्वमोः[4] किमादेशः अन्यत्र 'त्रतसि च किमो त्कः' इति कादेशो जश्शसोः 'इं नपि' इति इं । काइं । कइं । 'किं काइंकवणौ' इति काइंकवणादेशयोः । काइं । कवणु । इत्यादि । पूर्ववत् । इदंशब्दस्य 'यत्तत् ध्रुं त्रुं स्वमोः' इत्यधिकृत्य

इदम इमु नपुंसके ॥ ३ । ४ । ३२ ॥

इदं शब्दस्य स्वमोः परतः[5] नपुंसके[6] इमु इत्यादेशो[7] भवति । इमु 'सुससोः' इति सोर्लुक् । 'इदम आअः' इति जश्शसोराअः । अन्यत्र 'इदम इमः' इतीमादेशः । शेषं सर्ववत्[8] । इम । एण । इमएं । इमहिं । इत्यादि । सर्वत्रादेशेप्येवं नेयम् । यत्तदोः 'यत्तत् ध्रुं त्रुं स्वमोः' इति ध्रुं । त्रुं । पक्षे बिन्दुरिति केचित् । जं । तं । 'इं नपि' इति इं च । जाइं । ताइं । जइं । तइं । शेषं पुंलिङ्गयत्तच्छब्दवत् । एतच्छब्दस्य 'एतदेह एहो एहु स्त्रीनृनपि' इति नपुंसकलिङ्गे एतदः एहु इत्यादेशः[9] ।

---

१ 'जश्शसोरेइ' इत्यधिकृत्य 'ओइ अदसः' अदस् शब्दस्य ओइ इत्यादेशः स्यात् । ओइ । T. २ जायाशब्दवत् T. ३ This heading is dropped in P., My. ४ स्वमोः परयोः T. ५ परयोः T. ६ नपुंसकलिङ्गे T. ७ इत्यादेशः स्यात् T. ८ पूर्ववत् T. ९ T. adds स्यात् after it.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एहु । 'जश्शसोरेइ ' । एइ । पक्षे बिन्दुल् । एइं । 'इं नपि' इति इं । एदइं । एदाइं । शेषं पुंलिङ्गवत् । अदसूशब्दस्य 'सुप्यदसोमुः' इत्यमुः । अमु । जसि । 'जश्शसोरेइ' इति एइ । 'इं नपि' इति इं । अमुइं । अमूइं । इत्यादि । अन्येषु शब्देषु विशेषविधानाभावात् प्राकृतवच्छौरसेनीवच्च द्रष्टव्यम् ॥

इति हलन्ता[1] नपुंसकलिङ्गाः ।

अथ युष्मदस्मच्छब्दावुच्येते ॥

युष्मच्छब्दः । युष्मद् सु इति स्थिते

सौ युष्मदस्तुहुं ॥ ३ । ४ । ३७ ॥

युष्मच्छब्दस्य सौ परे तुहुमित्यादेशो भवति । तुहुं । त्वं । युष्मद् जस् इति स्थिते

तुम्हे तुम्हइ जश्शसोः ॥ ३ । ४ । ३८ ॥

युष्मदो जश्शसोः परतः[2] प्रत्येकं[3] तुम्हे तुम्हइ इत्यादेशौ भवतः[4] । तुम्हे । तुम्हइ । यूयम् । युष्मद् अम् इति स्थिते

ङ्यमूटा एइं तइं ॥ ३ । ४ । ४० ॥

युष्मदः ङि अम् टा एतैः सह एइं तइं इत्यादेशौ प्रत्येकं भवतः[5] । एइं । तइं । त्वाम् । शसि जस्वत् । टा अम्वत् । भिसि

भिसा तुम्हेहिं ॥ ३ । ४ । ३९ ॥

युष्मदो भिसा सह तुम्हेहिमिति भवति[6] । तुम्हेहिं । युष्माभिः । ङसौ

तुज्झतुध्रतउ ङसिङसा ॥ ३ । ४ । ४१ ॥

युष्मदो ङसिङस्भ्यां सह तुज्झ तुध्र तउ इति त्रय आदेशाः प्रत्येकं भवन्ति[7] । तुज्झ । तुध्र । तउ । त्वत् । ङसिङसोरेव प्रत्येकं तुह तओ इति केचित् ॥

---

१ हलन्ताः समाप्ताः T. २ परयोः T. ३ T. drops it. ४ स्तः T. ५ स्तः T. ६ स्यात् T. ७ स्युः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुम्हहमाम्भ्यस्भ्याम् ॥ ३ । ४ । ४३ ॥

आम्भ्यस् इत्येताभ्यां सह युष्मदस्तुम्हहमित्यादेशो भवति । तुम्हहं । ङसि ङसाविव । तुज्झ। तुध्र । तउ । तुह । तओ । तव । आमि भ्यस्वत् । ङौ । 'ङ्यम्टा एइं तइं' इति एइं तइं च । सुपि

सुपा तुम्हासु ॥ ३ । ४ । ४२ ॥

युष्मदः सुपा सह तुम्हासु इति भवेति । तुम्हासु । शेषं प्राकृतवदिति प्राकृतरूपता च । 'असदोम्हहं' इत्यतः 'अस्मदः' इत्यधिकृत्य

सौ हउं ॥ ३ । ४ । ४५ ॥

अस्मदः सौ परे हउमिति स्यात् । हउं ॥

अम्हइं अम्हेइं जश्शसोः ॥ ३ । ४ । ४८ ॥

अस्मदो जश्शसोः परतः अम्हइं अम्हेइं इति प्रत्येकं भवतः । 'सुससोः' इति लुक् । अम्हइं । अम्हेइं ॥

मइं ङ्यम्टा ॥ ३ । ४ । ४६ ॥

ङि अम् टा इत्येतैः सह अस्मदो मइमिति स्यात् । मइं । मां । शसि जस्वत् । टा अम्वत् । भिसि

भिसा अम्हेहि ॥ ३ । ४ । ४९ ॥

भिसा सह अम्हेहि इति स्यात् । अम्हेहि । अस्माभिः ॥

ङसृङसिना महुमज्झ ॥ ३ । ४ । ४७ ॥

अस्मदो ङसृङसिभ्यां सह प्रत्येकं महु मज्झ इत्यादेशौ स्तः । महु । मज्झ । मत् । भ्यसि 'तुम्हहमाम्भ्यस्भ्याम्' इत्यतः 'आम्भ्यस्भ्याम्' इत्यधिकृत्य ॥

असदोम्हहं ॥ ३ । ४ । ४४ ॥

आम्भ्यस् इत्येताभ्यां सह अस्मदो म्हहमित्यादेशो भवति ।

---

१ °त्यादेशः स्यात् T. २ स्यात् T. ३ इत्यधिकृत्य T. ४ परयोः T. ५ प्रत्येकं अम्हइं अम्हेइं इति स्तः T. ६ अस्मद् भिसा सह T. ७ T. has अस्मदः after सह. ८ इत्यधिकृत्य T. ९ °त्यादेशः स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम्हहं । असभ्यम् । ङसि 'ङस्ङसिना 'महुमज्झ' । महु । मज्झ । मम । आमि भ्यसत् । अम्हहं । ङौ । मइं । सुपि

सुपाम्हासु ॥ ३ । ४ । ५० ॥

असदः सुपा सह अम्हासु इति भवति[1] । अम्हासु । अस्मासु ।

इति युष्मदस्मच्छब्दौ ।

अथाव्ययेषु विशेषाः कथ्यन्ते ॥

कथंयथातथि[2] डिहडिधडिमडेमास्थादेः ॥ ३ । ३ । ८ ॥

अपभ्रंशे कथमादिषु थकारादेरवयवस्य इह इध[3] इम एम इति चत्वार आदेशा डितो भवन्ति[4] । किह । किध । किम । केम । कथम् । जिह । जिध । जिम । जेम । यथा । तिह । तिध । तिथ । तेम । तथा ॥

यावत्तावत्युम्महिम्मा वादेः ॥ ३ । ३ । ११ ॥

यावत् तावदित्यव्यययोः वकारादेरवयवस्य उं महिम् मा इति त्रय आदेशा भवन्ति[4] । जाउं । जामहिं । जाम । यावत् । ताउं । तामहिं । ताम । तावत् ॥

डेत्तहे त्रलः ॥ ३ । ३ । १३ ॥

सर्वादेः सप्तम्यन्तात् परस्य त्रल्प्रत्ययस्य डित् एत्तहे इत्यादेशो भवति । सव्वेत्तहे । सर्वत्र ॥

यत्तदो डइ ॥ ३ । ३ । १४ ॥

यत्तद्भ्यां परस्य त्रलः अइ इति स्यात् । जइ । तइ । यत्र । तत्र ॥

कुत्रात्रे च डेत्थु ॥ ३ । ३ । १५ ॥

अपभ्रंशे[5] कुत्र अत्र इत्येतयोः स्थितस्य[6] चकाराद्यत्तदः परस्य च

---

१ स्यात् T. २ तथा T. ३ डितः स्युः T. ४ स्युः T. ५ T. drops अपभ्रंशे. ६ T. drops स्थितस्य.

त्रलः डित् एत्थु ईति भवति । केत्थु । कुत्र । एत्थु । अत्र । जत्थु । यत्र । तेत्थु । तत्र ॥

क्त्व इइउएअवि ॥ ३ । ३ । १८ ॥

क्त्वाप्रत्ययस्य इ इउ ए अवि इति चत्वार आदेशा[2] भवन्ति । करइ । करइउ । करए । करअवि । कृत्वा । एवं सर्वत्रोह्यम् ।

एप्प्येप्पिण्वेव्येविणु ॥ ३ । ३ । १९ ॥

'क्त्वः' इत्यनुवर्तते । क्त्वाप्रत्ययस्य एप्पि एप्पिणु एपि एपिणु इति चत्वार आदेशा[3] भवन्ति । करएप्पि । करएप्पिणु । करएपि । करएपिणु[4] । एवं सर्वत्र कल्पनीयम्[5] ॥

तुम एवमणाणहमणहिं च ॥ ३ । ३ । २० ॥

तुमुन्प्रत्ययस्य एवं अण अणहं अणहिं चकारात् एप्पि एप्पिणु एपि एपिणु एते भवन्ति । देवं । दातुमित्यादि ॥

गमेस्त्वेप्प्येप्पिण्वोरेलुक् ॥ ३ । ३ । २१ ॥

गमेरुत्तरस्य क्त्वाप्रत्ययस्य यौ एप्पिएप्पिणू तयोरेकारस्य वा लुक् स्यात्[6] ॥ गप्पि । गप्पिणु । गमेप्पि । गमेप्पिणु । गत्वा ॥

जणिजणुनन्नइनावइनाइ इवार्थे ॥ ३ । ३ । २४ ॥

इवार्थे[7] जणि जणु नं नइ नावइ नाइ इति षडादेशा[8] भवन्ति । चंदुजणि । चंदुजणु । चंदुनं । चंदुनइ । चंदुनावइ । चंदुनाइ । चन्द्र इव ॥

तणेणतेसिंतेसितेहिंकेहिं तादर्थ्ये ॥ ३ । ३ । २५ ॥

तादर्थ्ये द्योत्ये तणेण तेसिं तेसि तेहिं केहिं इति पञ्च निपाताः प्रातिपदिकात् परतः[9] प्रयोक्तव्याः । रामतणेण[10] । रामतेसिं । रामतेसि । रामतेहिं । रामकेहिं । णमोक्कारो रामार्थं नमस्कारः ॥

---

१ इत्यादेशः स्यात् T. २ आदेशाः स्युः T. ३ आदेशाः स्युः T. ४ After this T. adds कृत्वा । पृथग्योग उत्तरार्थः. ५ कल्प्यम् T. ६ T. drops it. ७ My. and P. drop it. ८ षडादेशाः स्युः T. ९ T. omits प्रातिपदिकात् परतः. १० T. has रामु for राम.

स्वार्थे डुः पुनर्विनाध्रुवमः ॥ ३ । ३ । २६ ॥

पुनर्विना ध्रुवं ऐभ्यः स्वार्थे डित् उप्रत्ययो भवति । पुणु होइ । पुनर्भवति । पावुविण । पापं विना । ध्रुवुजम्मु । ध्रुवं जन्म ॥

डेडाववश्यमः ॥ ३ । ३ । २७ ॥

अवश्यमः परौ स्वार्थे एं अ इत्येतौ डितौ भवतः । अवासें । अवास । अवश्यम् । अत्र 'शोर्लुस—' इति दीर्घः ॥

परमेकशसोर्ड डि ॥ ३ । ३ । २८ ॥

परं एकशः इत्येताभ्यां परौ स्वार्थेडितौ अ इ इत्येतौ भवतः । पर । एगसि ॥

इदानीमेव्वहि ॥ ३ । ३ । ३४ ॥

इदानीमः स्थाने एव्वहि इति भवति । एव्वहि होइ । इदानीं भवति ॥

एव जि ॥ ३ । ३ । ३५ ॥

एव इत्यस्य स्थाने जि इति भवति । रामुजि । राम एव ॥

एवमेम ॥ ३ । ३ । ३६ ॥

एवमित्यस्य स्थाने एम इति भवति । एम रामु कुणइ । एवं रामः करोति ॥

नहि नाहि ॥ ३ । ३ । ३७ ॥

नहीत्यस्य स्थाने नाहीति भवति । नाहि धम्मु । नहि धर्मः ।

प्रत्युत पच्छलिउ ॥ ३ । ३ । ३८ ॥

प्रत्युत इत्यस्य स्थाने पच्छलिउ इति भवति । पच्छलिउ सुधु । प्रत्युत सुखम् ॥

एवमेव एमइ ॥ ३ । ३ । ३९ ॥

---

१ अपभ्रंशे पुन° T. २ इत्येतेभ्यः परे T. ३ स्तः T. ४ स्यात् T. ५ स्यात् T. ६ स्यात् T. ७ स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमेवेत्यस्य स्थाने एमइ इति भवति[1] । एमइ लोगु । एवमेव लोकः ॥

समं समाणु ॥ ३ । ३ । ४० ॥

सममित्यस्य स्थाने समाणु इति भवति[2] । रामाण समाणु । रामेण[3] समम्[4] ॥

किल किर ॥ ३ । ३ । ४१ ॥

किलेत्यस्य स्थाने किर इति भवति[5] । एम किर । एवं किल ॥

पग्गिमप्राइमप्राउप्राइव प्रायशः ॥ ३ । ३ । ४२ ॥

प्रायश इत्यस्य स्थाने पग्गिम प्राइम प्राउ प्राइव इति चत्वारः प्रयोज्याः । पग्गिम चबुलु । प्राइम चबुलु । प्राउ चबुलु । प्राइव चबुलु । प्रायश्चपलः ॥

दिवा दिवे ॥ ३ । ३ । ४३ ॥

दिवा इत्यस्य स्थाने दिवे इति प्रयोज्यम्[6] । दिवे णिद्दा । दिवा निद्रा ॥

सह सहुं ॥ ३ । ३ । ४४ ॥

सहेत्यस्य[7] स्थाने सहुमिति भवति । रामाण सहुं । रामेण सह ॥

मा मं ॥ ३ । ३ । ४५ ॥

मा इत्यस्य स्थाने ममिति[8] भवति । मं एम । मैवम् ॥

कुतः कउकहुतिहु ॥ ३ । ३ । ४६ ॥

कुत इत्यस्य स्थाने कउ कहु तिहु इति भवति[9] । कउ गदु । कहु गदु । तिहु गदु । कुतो गतः ॥

अथवामनागहवइमणाउं ॥ ३ । ३ । ४७ ॥

अथवा मनागेतयोः स्थाने यथाक्रमं अहवइ मणाउं इत्येतौ

---

१ स्यात् T. २ स्यात् T. ३ रामस्य T. ४ T. adds रामेण समाणु । रामेण समानम् । ५ किर इति स्यात् T. ६ स्यात् T. ७ सहेत्यव्ययं सहुमिति स्यात् T. ८ मं स्यात् T. ९ त्रयः स्युः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवंतः[1] । अहवइ [2]कामसरतिव्वु रमणीकडक्खु । अथवा कामशरतीव्रः रमणीकटाक्षः । मणाउं दिण्णु । मनाग्दत्तम् ॥

इतसेत्तहे ॥ ३ । ३ । ४८ ॥

इत इत्यस्य स्थाने एत्तहे इति भवति[3] । एत्तहे सुघु । इतः सुखम् ॥

पश्चात् पच्छइ ॥ ३ । ३ । ४९ ॥

पश्चादित्यस्य स्थाने पच्छइ इति भवेति[4] । पच्छइ[5] पहादु । पश्चात् प्रभातम् ॥

ततस्तदा तो ॥ ३ । ३ । ५० ॥

ततः तदा इत्येतयोः स्थाने तो इति भवति[6] । तो गदु । ततो गतः । तदा गतो वा ॥

स्वनु[7]साहावन्यथासर्वौ ॥ ३ । ३ । ५१ ॥

अन्यथा सर्व इत्येतयोः स्थाने यथाक्रममनु[8] साह इत्यादेशौ वा भवतः । अनुकदु[9] । अन्यथा कृतम् ॥

हुहुरुघिग्घिगाश्शब्दचेष्टानुकृत्योः ॥ ३ । ३ । ५७ ॥

हुहुर्वादयः शब्दानुकरणे घिग्घ्यादयश्चेष्टानुकरणे प्रयोज्याः[10] ।

अनर्थका घइमादयः ॥ ३ । ३ । ५८ ॥

घइं इत्यादयो निपाता[11] अनर्थका प्रयुज्यन्ते ॥

इत्यव्ययानि ।

अथ तद्धितेषु विशेषाः कथ्यन्ते[12] ।

डेत्तुलडेवडावियत्कियति च व्यादेर्वतुपः ॥ ३ । ३ । १२ ॥

---

१ स्तः T. २ कामसरतिव्वु अहवइ तरुणीकडक्खु । कामशरस्तीव्रः अथवा तरुणीकटाक्षः । T. ३ स्यात् T. ४ स्यात् T. ५ पचइ होदे वहादु । पश्चाद्भवति प्रभातम् । T. ६ स्यात् T. ७ अणु T. ८ °मणु T. ९ अणु T. १० च प्रयोज्याः T. ११ T. drops निपाताः. १२ T. drops कथ्यन्ते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'यावत्तावत्युम्महिम्मा वादेः' इत्यतः 'यावत्तावति' इत्यनुवर्तते । इयत् कियत् हत्येतयोः चकाराद् यावत्तावतोश्च परिमाणार्थे विहितो यो वतुप्प्रत्ययः तस्य वतुप्प्रत्ययस्य व्यादेर्यकारादेर्वकारादेश्च अवयवस्य एत्तुल एवड इत्यादेशौ डितौ भवतः । एत्तुलु । केत्तुलु । जेत्तुलु । तेत्तुलु । एवड्डु । केवड्डु । जेवड्डु । तेवड्डु । अत्र सर्वत्र 'स्यमोरस्योत्' इत्युत्वम् ॥

त्वतलो प्पणं ॥ ३ । ३ । १६ ॥

भावे विहितौ यौ त्वतलौ प्रत्ययौ तौ प्पण इत्यादेशमापद्येते । पड्डुप्पणु । पटुत्वम् । पटुता । सुक्कप्पणु । शुक्लत्वम् । शुक्लता ॥

तव्यस्य एव्वइएप्पइएव्वाः ॥ ३ । ३ । १७ ॥

तव्यप्रत्ययस्य एव्वइ एप्पइ एव्व इत्यादेशाः स्युः । जेएव्वइ । जेएप्पइ । जेएव्व । जेतव्य इत्यादि ॥

तृनो णअल् ॥ ३ । ३ । २२ ॥

तृन्प्रत्ययस्य णअल् स्यात् । होणउ । भविता । सुणउ । श्रोता ॥

छस्य युष्मदादेर्डारः ॥ ३ । ३ । २३ ॥

युष्मदादेः परस्य छप्रत्ययस्य डित् आर इत्यादेशो भवति । तुम्हारु । अत्र 'अर्थपरे तो युष्मदि' इत्यातिदेशिकं यस्य तत्त्वं ष्मस्य म्हत्वं च । अम्हारु । अस्मदीयः । अत्र 'स्यमोरस्योत्' इत्युत्वम् ॥

अडडडुल्लाः स्वार्थिककलुक् च ॥ ३ । ३ । २९ ॥

नाम्नः परतः अ इति अड उल्ल इत्येतौ डितौ च प्रत्यया भवन्ति तत्संनियोगेन स्वार्थिककप्रत्ययलोपश्च । अ । रामउ । अड । रुक्खडु । उल्ल । रुक्खुल्लु वृक्षः । एवमेते प्रत्ययाः सर्वत्र स्वार्थे संचारणीयाः ॥

इत्यपभ्रंशभाषायां सुबन्तविभागः ॥

---

१ इत्यनुवर्तते T. २ इत्येतौ T. ३ स्तः T. ४ इति त्रयः स्युः T. ५ युष्मदादिभ्यः T. ६ इति स्यात् T. ७ अपभ्रंशे नाम्नः T. ८ च डितौ T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तिङन्तप्रक्रिया ।

भू इति स्थिते 'भुवो हो' इत्याद्यादेशाः प्राकृतवत् कर्तव्याः । शेषं शौरसेनीवदित्यतिदेशात् 'इजेचोर्दट्' इति दट् । होदि । हवदि । हवदे । 'तद्व्यत्ययश्च' इति प्राकृतरूपता च । होइ । हवइ । हवए । अपभ्रंशे तिप्तयोरिजेवेति केचित् । तदा होइ । हवइ । होदि । हवदि ॥

लटो हिं वा झझ्योः ॥ ३ । ४ । ५१ ॥

अपभ्रंशे लटोर्झझ्यो[1] हिं वा स्यात् । होहिं । हवहिं । होवहिं । पक्षे । 'न्तिन्ते इरे च' । होन्ति । इत्यादि ।

हिर्थासिसपोः ॥ ३ । ४ । ५२ ॥

पक्षे[2] सेसि च । होसि । हवसि । होसे । हवसे ॥

हु थध्वमोः ॥ ३ । ४ । ५३ ॥

अपभ्रंशे[3] थध्वमोर्हु इत्यादेशो वा स्यात् । होहु । हवहु । द्वयोरपि पक्षे हिद्धा हचौ च । होइद्धा । होह । हवइद्धा । हवह ॥

उ मिबिटोः ॥ ३ । ४ । ५४ ॥

अपभ्रंशे[4] मिबिटोर्वा उ भवति । होउ । हवउ । पक्षे 'मिर्मिबिटोः' इति मिः । होमि । हवमि ॥

हुं मसहिङोः ॥ ३ । ४ । ५५ ॥

अपभ्रंशे[6] मस्स हिङोर्हुं वा भवति । होहुं । हवहुं । पक्षे 'मोममवः' । होमो । होम । होमु । हवमो । हवम । हवमु । लङ्लटोः ॥

स्यस्य सो लृटि ॥ ३ । ४ । ५७ ॥

व्याकरणान्तरे लृटि परे विहितस्य स्यप्रत्ययस्य स इत्यादेशो वा स्यात् । होसइ । होसदि । हवसइ । हवसदि । होसहिं । अत्र 'लटो

---

१ लटः वर्तमानाया विभक्तेः प्रथमपुरुषबहुवचनयोः परस्मैपदात्मनेपदयोः स्थाने हिं इत्यादेशो भवति T. २ लटः मध्यमपुरुषैकवचनयोः T. ३ लटो मध्यमपुरुषस्य बहुत्वे वर्तमानयोः T. ४ लटः उत्तमपुरुषस्यैकत्वे वर्तमानयोः परस्मैपदात्मनेपदयोः T. ५ स्यात् T. ६ वर्तमानोत्तमपुरुषे बहुत्वे वर्तमानयोः T. ७ स्यात् T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिं वा झङ्योः' इति वा हिं । पक्षे । होसन्ति । होसन्ते । होसइरे । मध्यमे । होसहि । अत्र 'हिर्थास्सिपोः' इति हि । पक्षे । होससि । होसहु । अत्र 'हु थध्वमोः' इति हुः । पक्षे । होसइद्धा । होसह । उत्तमे । होसउ । अत्र 'उ मिबिटोः' । इति उः । पक्षे । होसमि । होसहुं । अत्र 'हुं मस्सहिङ्भोः' इति हुं । पक्षे । होसमो । [1]होसम । होसमु । एवं हुवसइ । हुवसदि । हुवसहिं । हुवसंति । इत्यादि ॥ लोटि ॥

इदुदेत्स्वह्योः ॥ ३ । ४ । ५६ ॥

संस्कृते 'सवाभ्यां वामौ' 'सेर्ह्यपिच्च' आभ्यां सूत्राभ्यां लोण्मध्यमपुरुषैकवचनस्थाने विहितयोः [2]स्वह्योः इउए इति त्रय आदेशा[3]भवन्ति । होइ । होउ । होए । हवइ । हवउ । हवए । अन्यत्र 'लटो हिं वा झङ्योः' इत्यादि सूत्रविहितादेशाः प्राकृतरूपता च । अन्येषु लकारेषु विशेषविधानाभावात् प्राकृतवद्रूपनिर्णयः । अनुक्तविशेषस्थले भाषान्तरोक्तमत्र कल्पनीयमिति केचित् । एवमजन्तानां हलन्तानां च धातूनां भावकर्मणोर्णिचि च रूपसिद्धिः प्राकृतवदेव कल्पनीया ॥

अथ धात्वादेशाः प्रदर्श्यन्ते ।

पर्याप्तौ भुवो बहुच्छः ॥ ३ । ४ । ५८ ॥

'[4]भुवो धातोः [5]पर्याप्त्यर्थे बहुच्छ इत्यादेशः स्यात् । बहुच्छए । बहुच्छदि ॥

व्रजेर्वञ्जः ॥ ३ । ४ । ५९ ॥

व्रज गतावित्यस्य धातोर्वञ्ज इत्ययमादेशः स्यात् । वञ्जइ । वञ्जदि । केषांचिद्व्रजतेर्वुल इति मतम् । वुलइ । वुलदि ॥

ब्रूञो बुवः ॥ ३ । ४ । ६० ॥

---

१ होसमु । होसम T. २ स्वहि इत्येतयोः T. ३ स्युः T. ४ अपभ्रंशे भुवो T. ५ पर्याप्त्यर्थे वर्तमानस्य बहुच्छ T.

ब्रून् व्यक्तायां वाचीत्यस्य ब्रुव इत्यादेशः स्यात् । ब्रुवइ । ब्रुवदि ॥

क्रियेः किसु ॥ ३ । ४ । ६१ ॥

डुकृञ् करण इत्यस्य कर्मणि लडुत्तमपुरुषैकवचनस्य क्रिये इत्यस्य किसु इत्यादेशः स्यात् । किसु । । क्रिये ॥

पस्सगण्हौ दृशिग्रहोः ॥ ३ । ४ । ६२ ॥

दृशिइ प्रेक्षणे ग्रह उपादाने अनयोर्धात्वोर्यथासंख्यं पस्स गह्ल इत्यादेशौ भवतः । पस्सइ । पस्सदि । गह्लइ । गह्लदि । दृशेर्णिहाणिहाआविति केचित् । णिहाइ । णिहाआइ । ग्रहेर्घे इति केचित् । घेइ ।

तक्षेश्छोल्लः ॥ ३ । ४ । ६३ ॥

तक्षू तनूकरण इत्यस्य च्छोल्ल इत्यादेशो भवति । च्छोल्लइ । च्छोल्लदि । शेषाश्च धात्वादेशाः भावकर्मणोर्धात्वादेशाः प्रत्ययाश्च सर्वे प्राकृतवदवगन्तव्याः ॥

ओङ्कारादिममन्त्राणां सर्वेषामर्थरूपिणे ।
सर्वश्रेयोनिमित्ताय दक्षिणामूर्तये नमः ॥
नवाक्षरमहामन्त्रवर्णादिश्लोकगर्भितम् ।
इमं प्रबन्धं विबुधः पठन् वाक्सिद्धिमाप्नुयात् ॥
एतन्निबन्धनिर्मित्या या परोपकृतिस्तया ।
वृषाकपायीरमणः प्रीयतां परमेश्वरः ॥

इति श्रीमदखिलविद्यापरिवारदक्षिणामूर्तिमहादेवप्रसादलब्धविद्यपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकूरियज्ञेश्वरभट्टोपाध्यायतनयकोण्डभट्टोपाध्यायशिष्येण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना सर्वविद्वत्कविसंमतेन दक्षिणामूर्तिमहादेवकिङ्करेण लक्ष्मीधरेण विरचितायां षड्भाषाचन्द्रिकायामपभ्रंशभाषाविभागः संपूर्णः ॥

---

१ स्तः T. २ तक्षाद्याश्छोल्लादीन् T. ३ इत्यादयो धातवः च्छोल्ल इत्यादीनादेशानापद्यन्ते T. ४ T. adds आदिग्रहणाद्देशीयेषु ये क्रियाशब्दा उपलभ्यन्ते ते उदाहार्याः T.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

CRITICAL AND EXPLANATORY NOTES

ON THE

SHAḌBHÂSHÂCHANDRIKÂ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Notes on the 'Shaḍbhâshâchandrikâ.'

P. 4. **षड्विधा सा प्राकृती च**—The Prâkṛita is generally divided into the six divisions as given in the text. Hemachandra and S'eshakṛishṇa treat of the same six divisions, though the latter disposes of the last division, viz. the **Apabhraṁs'a** as under :—

> अपभ्रंशस्तु यो भेदः षष्ठः सोऽत्र न लक्ष्यते ।
> देशभाषादितुल्यत्वान्नाटकादावदर्शनात् ॥
> अनत्यन्तोपयोगाच्चातिप्रसङ्गभयादपि ॥
>
> प्राकृतचन्द्रिका by शेषकृष्ण.

Mârkaṇḍeya in his Prâkṛitasarvasva classifies the Prâkṛita first into तद्भव, तत्सम, and देश्य and तद्भव into भाषा, विभाषा, अपभ्रंश, and पैशाच. भाषा is further subdivided into महाराष्ट्री, शौरसेनी, प्राची, आवन्ती, and मागधी; विभाषा into शाकारी, चाण्डाली, शाबरी, आभीरिका, and टाक्की; अपभ्रंश into नागर, व्राचड, and उपनागर; and पैशाच into कैकेय, शौरसेन, and पाञ्चाल. The total number of divisions is thus sixteen :—

> अतः षोडशधाभिन्नभाषालक्ष्म प्रचक्ष्महे ।
> वेधा विदग्धैरपरास्तत्तद्देशानुसारतः ॥
>
> प्राकृ॰ सर्व॰ p. 3

(published in the ग्रन्थप्रदर्शिनी of Vizagapatam).

According to Rudraṭa, Apabhraṁs'a has many divisions based upon the countries where they are spoken :—

> 'षष्ठोत्र भूरिभेदो देशविशेषादपभ्रंशः.'

Some of these divisions are नागर, उपनागर, द्राविड, टक्क, मालवी, पञ्चाली, कालिन्दी, गुर्जरी, वैतालिकी, काञ्ची, आभीरी, शाबरी &c. In his Nâṭyas'âstra, Bharata divides languages into seven kinds :—

> मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी ।
> वाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥ १७.४८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Of these महाराष्ट्री which is considered to be the best of all the Prâkṛitas by Daṇḍin is called आर्ष in the Prâkṛitachandrikâ.

P. 7–9. **सिद्धिर्लोकाच्च**—संतोष्टव्यम्—The Sûtra means that the propriety of forms in the Prâkṛita is to be proved or established from their use in the language. The word च in the Sûtra is used to show that the propriety can be established also by means of the Sûtras given in the book. The author then gives the broad distinguishing features of the Prâkṛita, meaning the Mahârâshṭrî, in comparison with the Sanskrit. They are the following :—

1. Letters ऋ and ऌ are not found in the Prâkṛita.

 This is known from the absence of these letters in the language and also from the Sûtras which teach that they are changed to अ, इ &c.

2. Letters श् and ष् are changed to स्.

3. ऐ and औ are not found, they being generally changed to ए and ओ. ऐ is occasionally found, the vocative particle अयि being changed to ऐ.

4. ङ and ञ् are not found except in combination with other consonants; for the Sûtra 'शुल्के ङ्गः' teaches that ल्क is optionally changed to ङ्ग, where ङ is combined with ग्; the Sûtra 'प्राक् श्लाघाप्लक्षशार्ङ्गे ङ्गोत्' teaches the insertion of अ before ङ and ल in the words श्लाघा, प्लक्ष, and शार्ङ्ग; thereby showing that ङ is not dropped, but remains combined with ग् in शार्ङ्ग changed into सारङ्ग; the Sûtra 'वर्गेन्त्यः' teaches that बिन्दु or अनुस्वार is changed to the final letter of the class to which the following consonant belongs as in वङ्को, कुम्पलो, बुन्धो &c.; here too ङ is used as combined with another letter and not by itself; and the Sûtra 'श्चोऽवृश्चिके ञ्चर्वा' teaches that in the word वृश्चिक, श्च् is changed to ञ्च्, that is to ञ् combined with च्.

5. There is no dual number, the plural number being used in place of it.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

6. Forms ending in a consonant are not used; for the Sûtra 'अन्त्यहलोऽश्रदुदि' teaches that the final consonant of words is dropped except in the case of the indeclinable श्रत् and the preposition उद्; the Sûtra 'शरदामल्' teaches that शरद् and words of a similar nature, *i. e.* words ending in a consonant, have the augment अ necessarily added to their final consonant; the Sûtra 'हलोक्' teaches that roots ending in a consonant take the augment अ; and other Sûtras teach either the elision of the final consonant, or the addition of an augment or a substitute for the final letter.

7. The genders of words in the Prâkṛita are sometimes the reverse of those of the Sanskrit words from which the Prâkṛita words are derived. The Sûtra 'अक्ष्यर्थेकुलाद्या वा' teaches that words synonymous with अक्षि and the words कुल and others are optionally masculine; the Sûtra 'क्लीबे गुणगाः' teaches that गुण and other words are optionally neuter; and the Sûtra 'स्त्रियामिमाञ्जलिगाः' teaches that words ending in इम, and अञ्जलि and others are optionally feminine.

8. There is no rule about roots taking the Parasmaipada and the Âtmanepada terminations; that is, any root takes either pada. This is learnt from the Sûtra 'लटस्तितावितेच्' which means that the third person singular terminations of the Present Tense, both Par. and Âtm., viz. ति and त, are changed to इ and ए; the Sûtra 'सिप्थास्सेसि' which teaches that the second person singular terminations सि and थास् are changed to सि and से; the Sûtra 'मिर्मिबिटौ' which means that the 1st person singular terminations मि and इ are changed to मि; and other Sûtras which teach the substitution of इ &c. for ति &c.

9. The विकरण terminations, *i. e.* the conjugational signs, like शप् (अ) &c., are not added. This is taught by the Sûtra 'न शपाम्'.

10. The Dative is not used, its place being taken up by the Genitive; and any case is sometimes used in the sense of any other case. This is learnt from the following Sûtras :—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'**क्वचिद्सादेः**'—This means that the Genitive is sometimes used in the sense of the Accusative.

'**ङेसो ङम्**'—ङेस् or terminations of the Dat. are changed to ङम्, terminations of the Gen. Another Sûtra 'तादर्थ्ये ङेस्तु' teaches the optional use of the Gen. in place of तादर्थ्यचतुर्थी or the Dat. in the sense of purpose; and the Sûtra 'वधाड्डाइ च' teaches that in the case of the word वध, आइ is optionally substituted for the Dat. termination in the sense of the Genitive.

'**ङिपोस्**'—This Sûtra teaches the use of the Acc. in place of the Loc.

A question is raised that if the Prâkṛita has no dual, how is it that the author has used the dual number in the Sûtra 'उभयाधसोरवहहेड्डौ.' The solution is that here 'उभयाधसो:' and 'अवहहेड्डौ' signify 'of the words उभय and अधस्' and 'the words अवह and हेड्ड.' These words are used as words and do not convey their usual sense. Pâṇini also uses the form एकाद् in the Sûtra 'एकादाकिनिच्चासहाये' in place of एकस्माद्, because एक does not signify 'one' or 'principal' and is not consequently a pronoun. It means 'the word एक.'

P. 9. **अनुक्तमन्यशब्दानुशासनवत्**—This Sûtra teaches that what is not said in this grammar is to be understood as in other grammars. Thus in the Sûtras 'शेषेच्यचः', 'ऐच एङ्' &c. अच्, ऐच्, एङ् &c. are to be understood as प्रत्याहार's as in Pâṇini's grammar. A doubt is then raised that if this be the case तृणम् would assume the Prâkṛita form तर्णं instead of the correct form तणं; for the Sûtra 'ऋतोत्' teaches the substitution of अ for ऋ and by Pâṇini's Sûtra 'उरण् रपरः' अ must be changed to अर्. The answer to this objection is that 'बहुलम्' which is the seventeenth Sûtra of the first Pâda of the first Adhyâya, being an अधिकार Sûtra having its power throughout the work, prevents the application of the Sûtras from other works on grammar when they come in conflict with correct forms as found in the language.

बहुलम् is explained in the following verse and is of four kinds:—(1) sometimes the Sûtras are applicable; (2) some-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

times they are not applicable; (3) sometimes they are optionally applicable; and (4) sometimes some other result takes place:—

'क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य
चतुर्विधं बाहुलकं वदन्ति ॥'

P. 10. सुप्स्वादिरन्त्यहल्ला—बहुलम्—Now follows an explanation of technical terms occurring in the Sûtras. The terms are to be understood as under:—

सुस्=सु औ जस्	Nom.	Sing.,	Du., and	Plu. terms.
अस्=अम् औट शस्	Acc.	„	„	„
टास्=टा भ्याम् भिस्	Inst.	„	„	„
ङेस्=ङे भ्याम् भ्यस्	Dat.	„	„	„
ङसिस्=ङसि भ्याम् भ्यस्	Abl.	„	„	„
ङस्=ङस् ओस् आम्	Gen.	„	„	„
ङिप्=ङि ओस् सुप्	Loc.	„	„	„

ह=A ह्रस्व or short vowel.
दि=A दीर्घ or long vowel.
स=A समास or a compound.
शु=श्, ष्, and स्.
खु=The first letter.
स्तु=A conjunct consonant.
ग=गण or a class.
फु=The second letter of a word.
तु=Optionally.

Abl.	राआणाणो–राइणो–रण्णो–राआहिंतो–राअत्तो–राआओ–राआउ–राआ–राआहि; राआणाहिंतो–राआणत्तो–राआणाओ–राआणाउ	राआणासुंतो–राआणेहि–राआणाहिंतो–राआणत्तो–राआणाओ–राआणाउ–राआहिंतो–राएहिंतो–राईहिंतो–राइत्तो–राईओ–राईउ–राईहि–राईसुंतो
Gen.	राइणो–रण्णो–राआणाणो–	राईण–राईणं;

	राआणो–राअस्स–राआणस्स	राआणाण–राआणाणं; राआण–राआणं
Loc.	राइम्मि–राअम्मि–राआणे–राआणम्मि–राए	राईसु–राईसुं; राएसु–राएसुं; राआणेसु–राआणेसुं
Voc.	दे राआ–राअ–राओ–राआण	दे राओ–राआणो

The Shaḍbhâshâs'abdamañjarî omits राआणाणो (Nom. Plu.) and has Voc. Sing. दे राआणो and Voc. Plu. दे राइणो also. Acc. Plu. राआणाणो is omitted. Abl. Sing.—Additional forms राआणो, राआणा, and राआणाहि; राआणाणो is omitted. Abl. Plu.—Additional forms राअत्तो, राआओ, राआउ, राआहि, राएहि, राआसुंतो, राएसुंतो, राआणेहिंतो, राआणाहि, राआणेहि, राआणेसुंतो; Gen. Plu.—Additional forms राआणेण–राआणेणं.

It remarks—एतद्रूपमप्पय्यदीक्षितानां मते । वृत्तिकारादीनां मते तु सौ राआणा जसि राआणाणा शसि राआणाणो टि राआणणा ङसौ राआणाणो ङसि राआणाणो । अयं विशेषः ।

किम् Mas.

	Sing.	Plu.
Nom.	को	के
Acc.	कं	के–का
Inst.	किणा–केण–केणं	केहि–केहिँ–केहिं
Abl.	कम्हा–काहिंतो–कत्तो–काओ–काउ–कीस–किणो–का–काहि	काहिंतो–केहिंतो–कासुंतो–केसुंतो–कत्तो–काओ–काउ–काहि–केहि
Gen.	कास–कस्स	केसिं–कास–काण–काणं
Loc.	कत्थ–कस्सि–कंमि–कहिं–कइआ–काहे–काला	केसु–केसुं

The Shaḍbhâshâs'abdamañjarî has कस an additional form as Gen. Sing. Vararuchi has कदो (Abl. Sing.) for काओ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् Fem.

	Sing.	Plu.
Nom.	का	का–काओ–काउ; की–कीओ–कीउ–कीआ
Acc.	कं	Like the Nom.
Inst.	कीअ–कीआ–कीइ–कीए; काअ–काइ–काए	कीहि–हिँ–हिं; काहि–हिँ–हिं
Abl.	कीअ–कीआ–कीइ–कीए; काअ–काइ–काए; कम्हा–काहिंतो–कत्तो–काओ–काउ; कीहिंतो–कित्तो–कीओ–कीउ; कीस–किणो	काहिंतो–कासुंतो–कत्तो–काओ–काउ; कीहिंतो–कीसुंतो–कित्तो–कीओ–कीउ
Gen.	कीसे–किस्सा; कीअ–कीआ–कीइ–कीए; काअ–काइ–काए; कीस–कास	काण–काणं; कास–कीस–केसिं
Loc.	कीअ–कीआ–कीइ–कीए; काअ–काइ–काए–काहिं	कीसु–सुं; कासु–सुं

The Shaḍbhâshâmañjarî omits कम्हा (Abl. Sing.), कास–कीस (Gen. Plu.), and has कीहिं as an additional form as Loc. Sing. Vararuchi has कदो (Abl. Sing.) for काओ.

किम् Neu.

	Sing.	Plu.
Nom. Acc.	किं	काणि–काइ–काइं

The rest like Mas.

यद् Mas. **तद् Mas.**

	यद् Sing.	यद् Plu.	तद् Sing.	तद् Plu.
Nom.	जो	जे	सो	ते
Acc.	जं	जे–जा	तं–णं	ते–ता–णे–णा
Inst.	जिणा–जेण–जेणं	जेहि–हिँ–हिं	तिणा–तेण–तेणं; णिणा–णेण–णेणं	तेहि–हिँ–हिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Abl.	जम्हा–जाहिंतो– जत्तो–जाओ–जाउ– जा–जाहि	जाहिंतो– जेहिंतो– जासुंतो– जेसुंतो–जत्तो– जाओ–जाउ– जाहि–जेहि	तम्हा–तो– ताहिंतो–तत्तो– ताओ–ताउ– ता–ताहि	ताहिंतो–तेहिंतो तासुंतो– तेसुंतो–तत्तो– ताओ–ताउ– ताहि–तेहि
Gen.	जास–जस्स	जेसिं–जाण– जाणं	तास–तस्स– से	तेसिं–ताण– ताणं–सिं– तास
Loc.	जत्थ–जस्सि–जम्मि– जहिं–जइआ–जाहे– जाला	जेसु– जेसुं	तत्थ–तस्सि– तम्मि–तहिं– तइआ–ताहे– ताला	तेसु–तेसुं; णेसु–णेसुं

The Shaḍbhâshâs'abdamañjarî observes– 'अत्रापि त्यदादेरुत्सर्गतः संबोधनं नास्तीति ज्ञेयम् ।'. Inst. Sing. जिण-जिणं. Vararuchi has जदो and तदो (Abl. Sing.) for जाओ and ताओ.

In the forms of तद् Mas. the Shaḍbhâshâmañjarî has Nom. Sing. स also, Gen. Plu. से also.

	यद् Fem.		**तद् Fem.**	
Nom.	जा	जी–जीओ– जीउ–जीआ– जा–जाओ–जाउ	सा	ती–तीओ– तीउ–तीआ– ता–ताओ–ताउ
	&c.	&c.	&c.	&c.

Like the Fem. forms of **किम्**   Like the Fem. forms of **किम्**

	यद् Neu.			
Nom. and Acc.	जं	जाणि जाइ– जाइं	तं	ताणि–ताइ– ताइं

The rest like the Mas.   The rest like the Mas.

The Shaḍbhâshâmañjarî has के, जे, and ते as Neu. Nom. Plu. in place of the forms given above.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदम् Mas.

	Sing.	Plu.
Nom.	इमो–अयं	इमे
Acc.	इमं–णं–इणं	इमे–इमा–णे–णा
Inst.	इमेण–इमेणं–णेण–णेणं–इमिणा	इमेहि–हिँ–हिं; णेहि–हिँ–हिं; एहि–हिँ–हिं
Abl.	इमाहिंतो–इमत्तो–इमाओ–इमाउ–इमा–इमाहि	इमाहिंतो–इमेहिंतो–इमासुंतो–इमेसुंतो–इमत्तो–इमाओ–इमाउ–इमाहि–इमेहि–आहि–एहि
Gen.	अस्स–इमस्स–से	इमेसिं–सिं–इमाण–इमाणं
Loc.	अस्सिं–इमस्सिं–इमम्मि–इह	एसु–एसुं–इमेसु–इमेसुं–णेसु–णेसुं

The Shaḍbhâshâs'abdamañjarî has अअं (for अयं) Nom. Sing. and Inst. Sing. णिणा also, Abl. Sing. आहि also and omits इमस्सिं and णेसु–णेसुं.

इदम् Fem.

	Sing.	Plu.
Nom.	इमी–इमा–इमिआ–इअं	इमाओ–इमाउ–इमा; इमीओ–इमीउ–इआ–इमी
Acc.	इमिं–इमं–इणं	Like the Mas.
Inst.	इमीअ–आ–इ–ए; इमाअ–इ–ए	इमीहि–हिँ–हिं; इमाहि–हिँ–हिं
Abl.	इमीअ–आ–इ–ए; इमाअ–इ–ए; इमीहिंतो–इमित्तो–इमीओ–इमीउ–इमाहिंतो–इमत्तो–इमाओ–इमाउ	इमीहिंतो–इमीसुंतो–इमित्तो–इमीओ–इमीउ–इमाहिंतो–इमासुंतो–इमत्तो–इमाओ–इमाउ
Gen.	इमीअ–आ–इ–ए; इमाअ–इ–ए; से	इमेसिं; इमीण–इमीणं–इमाण–इमाणं; सिं
Loc.	इमीअ–आ–इ–ए; इमाअ–इ–ए; इमस्सिं–इमम्मि–अस्सिं–इह	इमीसु–सुं; इमासु–सुं; आसु–सुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदम् Neu.

	Sing.	Plu.
Nom. and Acc.	इदं–इणं–इणमो	इमे इमे–इमा–णे–णा

The rest like the Mas.

एतद् Mas.

	Sing.	Plu.
Nom.	एसो–एस– इणमो–इणं	एए
Acc.	एअं	एए–एआ
Inst.	एइणा–एएण– एएणं	एएहि–हिँ– हिं
Abl.	एत्तो–एत्ताहे– एआहिंतो–एअत्तो– एआओ–एआउ– एआ–एआहि	एआहिंतो– एएहिंतो– एआसुंतो– एएसुंतो– एअत्तो–एआओ– एआउ–एआहि– एएहि
Gen.	से–एअस्स	सिं–एएसिं– एआण–एआणं
Loc.	एत्थ–अअम्मि इअम्मि–एअम्मि– एअस्सि	एएसु–सुं

The Shaḍbhâshâs'abdamañjarî has से also Gen. Plu. and remarks 'तदेतदोरामा सह से आदेशं केचिदिच्छन्तीति भाष्ये' ।

Hemachandra and S'rîkṛishṇa have ईअम्मि as an additional Loc. Sing.

एतद् Fem.

	Sing.	Plu.
Nom.	एसा–एई– एस–इणं– इणमो	एईओ–एईउ– एआओ–एआउ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Acc.	एअं–एइं	Like the Nom.
Inst.	एईअ–आ–इ–ए; एआअ–इ–ए	एईहि–हिँ–हिं; एआहि–हिँ–हिं
Abl.	एत्तो–एत्ताहे–एईअ–आ–इ–ए; एआअ–इ–ए; एईहिंतो–एइत्तो–एईओ–एईउ; एआहिंतो–एअत्तो–एआओ–एआउ	एईहिंतो–एईसुंतो–एइत्तो–एईओ–एईउ–एआहिंतो–एआसुंतो–एअत्तो–एआओ–एआउ
Gen.	एईअ–आ–इ–ए; से; एआअ–इ–ए	सिं–एआण–णं
Loc.	एईअ–आ–इ–ए; एआअ–इ–ए	एईसु–सुं; एआसु–सुं

एतद् Neu.

	Sing.	Plu.
Nom.	एस–इणमो–इणं–एअं	एआणि–एआइ–एआइं
Acc.	एअं–एआणि–एआइ–एआइं	Like the Nom.

The rest like the Mas.

अदस् Mas.

	Sing.	Plu.
Nom.	अह–अमू	अमू–अमउ–अमओ–अमुणो–अमवो
Acc.	अमुं	अमुणो–अमू
Inst.	अमुणा	अमूहि–हिँ–हिं
Abl.	अमुणो–अमूओ–अमूउ–अमूहिंतो–अमुत्तो	अमूहिंतो–अमूसुंतो–अमुत्तो–अमूओ–अमूउ
Gen.	अमुणो–अमुस्स	अमूण–णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Loc.	अमुम्मि– अअम्मि– इअम्मि	अमूसु–सुं

Additional forms in Nom. Plu. अमुउ–अमुओ–अमुवो–प्राकृ॰ चन्द्रि॰.

अदस् Fem.

	Sing.	Plu.
Nom.	अह–अमू	अमूओ– अमूउ–अमू
Acc.	अमुं	Like the Nom.
Inst.	अमूअ–आ–इ–ए	अमूहि–हिँ–हिं
Abl.	अमूअ–आ–इ–ए; अमूहिंतो– अमुत्तो–अमूओ– अमूउ	अमूहिंतो– अमूसुंतो– अमुत्तो– अमूओ–अमूउ
Gen.	अमूअ–आ–इ–ए	अमूण–णं
Loc.	अमूअ–आ–इ–ए	अमूसु–सुं

अदस् Neu.

	Sing.	Plu.
Nom.	अमु–अह	अमूनि–अमूइ–अमूइं
Acc.	अमु–मुं– मुँ	Like the Nom.

युष्मद् Mas., Fem., Neu.

	Sing.	Plu.
Nom.	तुवं–तुं–तुमं–तुह–तं	भे–तुब्भे–तुय्हे–उय्हे–तुब्भ– तुम्हे–तुज्झे–तुम्ह–तुज्झ
Acc.	तुमे–तुए–तुवं–तुं–तुमं– तुह–तं	वो–भे–तुय्हे–तुम्हे–तुज्झे– उय्हे–तुब्भ–तुम्ह–तुज्झ– तुब्भे
Inst.	भे–ते–दे–दि–तुमं–तुमइ– तुमए–तुइ–तुए–तुमाइ– तुमे	भे–तुब्भेहि–तुम्हेहि– तुज्झेहि–उब्भेहि–उम्हेहि– उज्झेहि–उय्हेहि–तुय्हेहि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Abl.	तुब्भ–तुम्ह–तुज्झ– तुहिंतो–तुरह– तईहिंतो–तइत्तो–तईओ–तईउ– तुवाहिंतो–तुवत्तो–तुवाओ–तुवाउ– तुवाहि–तुवा– तुमाहिंतो–तुमत्तो–तुमाओ– तुमाउ–तुमाइ–तुमा– तुहाहिंतो &c.– तुब्भाहिंतो &c.–तुम्हाहिंतो &c.– तुज्झाहिंतो &c.	उम्हेहिंतो–उम्हाहिंतो– उम्हेसुंतो–उम्हासुंतो– उम्हेहि–उम्हाहि–उम्हत्तो– उम्हाओ–उम्हाउ– उय्हेहिंतो &c.–तुय्हेहिंतो &c. तुब्भेहिंतो &c.–तुम्हेहिंतो &c. तुज्झेहिंतो &c.
Gen.	तुब्भ–तुम्ह–तुज्झ–उब्भ–उम्ह– उज्झ–उय्ह–तइ–तुहं–तुह– तुम्हं–तुव–तुम–तुमे–तुमाइ– तुमो–दे–ते–दि–तु–इ–ए–	तुम्हाण–णं–तुब्भं–तुम्हं–तुज्झं– तुब्भाण–णं–तुम्हाण–णं– तुज्झाण–णं–तुमाण–णं–तुवाण– णं–तुहाण–णं–तुब्भ–तुम्ह– तुज्झ–वो–भे–त्वा
Loc.	तुमए–तुइ–तुए–तुमाइ– तुमे–तुम्मि	तुवेसु–सुं–तुमेसु–सुं–तुहेसु– सुं–तुब्भेसु–सुं–तुम्हेसु–सुं– तुज्झेसु–सुं–तूसु–सुं

अस्मद्.

	Sing.	Plu.
Nom.	अम्हि–हं–अहअं–अहं– अहम्मि–अम्मि	मो–भे–वअं–अम्हे–अम्हो– अम्ह
Acc.	मं–णे–णं–मि–मिमं–ममं– अम्मि–अहं–मम्ह–अम्ह	अम्हे–अम्हो–अम्ह–णे
Inst.	मि–मइ–ममाइ–मए–मे– ममं–णे–मआइ–ममए	णे–अम्हेहिं–अम्हेहिँ– अम्हेहि–अम्हाहिं–अम्हाहिँ– अम्हाहि–अम्हे–अम्ह
Abl.	मइ–मम–मह–मज्झ– मईहिंतो–मइत्तो–मईओ– मईउ–ममाहिंतो–ममत्तो– ममाओ–ममाउ–ममा– ममाहि–महाहिंतो–महत्तो– महाओ–महाउ–महा– महाहि–मज्झाहिंतो–मज्झत्तो–	अम्हाहिंतो–अम्हेहिंतो– अम्हासुंतो–अम्हेसुंतो–अम्हत्तो– अम्हाओ–अम्हाउ–अम्हाहि– अम्हेहि; ममाहिंतो–ममेहिंतो– ममासुंतो–ममेसुंतो–ममत्तो– ममाओ–ममाउ–ममाहि– ममेहि

17

Jain Education International For Private & Personal Use Only www.jainelibrary.org

	Sing.	Plu.
	मज्झाओ–मज्झाउ–मज्झा–मज्झाहि	
Gen.	अम्हं–मज्झं–मज्झ–मइ– मह–महं–मे–अम्ह–मम	अम्हे–अम्हो–अम्हाण-णं– मज्झाण–णं-ममाण-णं– महाण–णं–मज्झ–अम्ह– अम्हं–णे–णो
Loc.	मि–मइ–ममाइ–मए–मे– अम्हे–अम्हम्मि–ममे–ममम्मि– मज्झे–मज्झम्मि–महे–महम्मि	अम्हासु-सुं–अम्हेसु–सुं– अम्हसु–सुं–ममसु-सुं-ममेसु–सुं– मज्झसु–सुं–मज्झेसु–सुं– महसु–सुं–महेसु–सुं

According to Lakshmîdhara Loc. Sing. ought to have the following additional forms:–

अम्हत्थ–अम्हस्सि–ममत्थ–ममस्सि—मज्झत्थ–मज्झस्सि–महत्थ–महस्सि

The Shaḍbhâshâs'abdamañjarî has also ममासु–सुं–मज्झासु–सुं–महासु–सुं in Loc. Plu. and remarks 'अत्र चन्द्रिकाकारादीनामष्टादशत्ववचनं गणनानभिज्ञत्वमेव।'

हस्, Present Tense.

	Sing.	Plu.
1st Pers.	हसमि–हसामि– हसिमि–हसेमि	हसमो–हसम–हसमु; हसामो–म–मु; हसिमो–म–मु; हसेमो–म–मु
2nd Pers.	हससि–हसेसि हससे–हसेसे	*हसइत्था–हसेइत्था– हसह–हसेह
3rd Pers.	हसइ–हसेइ; हसए–हसेए	हसन्ति–हसेन्ति; हसन्ते– हसेन्ते; हसइरे–हसेइरे

*Almost all the other Prâkṛita grammars and Trivikrama's MS. consulted by me give हसित्था and हसेत्था in place of हसइत्था and हसेइत्था.

Also हसेज्ज and हसेज्जा (according to Lakshmîdhara and Trivikrama हसज्ज and हसज्जा also) in all persons and numbers.

In this root ज्ज and ज्जा are not inserted between the base and the terminations, because it does not end in a vowel ("स्वतोनजन्तत्वात् 'मध्ये चाजन्तात्' इत्ययं विधिर्न भवति" P. 189 of the text).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भू.

It substitutes हो, हुव, and हव and हु before अचित् terminations (all personal terminations except 3rd Pers. Sing. and ह 2nd Pers. Plu.).

The forms of the substitutes हव and हुव are exactly like those of the root हस् above.

हो.

1st Pers.	होमि– होअमि–होआमि–होइमि– होएमि	होमो–होम–होमु; होअमो–म–मु; होआमो–म–मु; होइमो–म–मु; होएमो–म–मु
2nd Pers.	होसि*– होअसि–होअसे– होएसि–होऐसे	होइत्था–होह; होअइत्था–होअह; होएइत्था–होएह
3rd Pers.	होइ*– होअइ–होअए– होएइ–होएए	होन्ति–होन्ते–होइरे; होअन्ति–होअन्ते–होअइरे होएन्ति–होअन्ते–होएइरे

Optional forms in ज्ज and ज्जा:—

होज्ज–होज्जा in all persons and numbers. Also होज्जमि–होज्जामि–होज्जेमि; होज्जमो–म–मु; होज्जामो–म–मु; होज्जेमो–म–मु &c. Before न्ति and न्ते we have होज्जन्ति and होज्जन्ते only, not होज्जान्ति and होज्जान्ते; because आ of ज्जा is shortened by 'संयोगे'. Before इरे, there are two forms होज्जइरे and होज्जाइरे.

हु.

1st Pers.	हुमि– हुअमि–हुआमि– हुइमि–हुएमि	हुमो–हुम–हुमु; हुअमो–म–मु; हुआमो–म–मु; हुइमो–म–मु; हुएमो–म–मु
2nd Pers.	हुसि– हुअसि–हुअसे– हुएसि–हुएसे	हुइत्था– हुअइत्था–हुएइत्था;

---

* Not होसे and होए because the root does not end in अ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

3rd Pers. No forms. हुन्ति–हुन्ते–हुइरे; हुअन्ति–हुअन्ते–हुअइरे; हुएन्ति–हुएन्ते–हुएइरे

Optional forms in ज्ज and ज्जाः–

हुज्ज–हुज्जा in all persons and all numbers.

Also हुज्जमि–हुज्जामि–हुज्जेमि &c.

The Past Tense.

भू (लङ्, लिट्, or लुङ्).

हो.

	Sing.	Plu.
3rd Pers.	होसि–होअसि; होहिअ–होअहिअ; होहि–होअहि	Like the Present Tense.
2nd Pers.	Like the Present Tense.	
1st Pers.	Do.	

हस्.

3rd Pers. Sing. हसीय. The rest like the Present Tense.

According to other authors the terminations are सीअ, हीअ, and ही, or हीअ alone, or सी, ही, and हीअ in the 3rd Pers. Sing. in the case of roots ending in a vowel.

भू, Futures.

From हो.

	Sing.	Plu.
1st Pers.	होहामि–होस्सामि–होहिमि–होहिस्सं	होहामो–म–मु; होस्सामो–म–मु; होहिमो–म–मु; होहिस्सा; होहित्था
2nd Pers.	होहिसि–होहिसे	होहित्था–होहिह
3rd Pers.	होहिइ–होहिए	होहिन्ति–होहिन्ते–होहिइरे

हस्, Futures.

	Sing.	Plu.
1st Pers.	हसेहामि–हसिहामि; हसेस्सामि–हसिस्सामि; हसेहिमि–हसिहिमि; हसेहिस्सं–हसिहिस्सं	हसेहामो–म–मु; हसिहामो–म–मु; हसेस्सामो–म–मु; हसिस्सामो–म–मु; हसेहिमो–म–मु; हसिहिमो–म–मु;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		हसेहिस्सा–हसिहिस्सा;
		हसेहित्था–हसिहित्था
2nd Pers.	हसेहिसि–हसिहिसि;	हसेहिइत्था–हसिहिइत्था;
	हसेहिसे–हसिहिसे	हसेहिह–हसिहिह
3rd Pers.	हसेहिइ–हसिहिइ;	हसेहिन्ति–हसिहिन्ति;
	हसेहिए–हसिहिए	हसेहिन्ते–हसिहिन्ते;
		हसेहिइरे–हसिहिइरे

Also हसेहिज्ज–हसेहिज्जा; हसिहिज्ज–हसिहिज्जा; &c.

हो, Imperative and Potential.

1st Pers.	होमु	होमो
2nd Pers.	होसु–होहि	होह
3rd Pers.	होदु–होउ	होन्तु

Also होज्जदु–होज्जादु–होज्ज–होज्जा &c.

The Potential has होज्जइ–होज्जाइ as additional forms.

हस्, Imperative and Potential.

1st Pers.	हसमु–हसामु–हसिमु–हसेमु	हसमो–हसामो–हसिमो–हसेमो
2nd Pers.	हससु–हसेसु–हसहि–हसेहि–हस–हसे–हसिज्जहि–हसिज्जसु–हसिज्जे	हसह–हसेह
3rd Pers.	हसदु–हसेदु–हसउ–हसेउ	हसन्तु–हसेन्तु

Hemachandra and S'eshakrishṇa as well as Simharâja give हसेज्जहि, हसेज्जसु, and हसेज्जे. Simharâja gives also हसेइज्जहि, हसेइज्जसु; हसेइज्जे.

Also हसज्ज–हसेज्ज–हसज्जा–हसेज्जा and the Potential has हसेज्जइ–हसेज्जाइ–हसज्जइ–हसज्जाइ as additional forms.

The Conditional.

हो	हस्
All persons, all numbers.	All persons, all numbers.
होमाण–होन्त–होज्जमाण–होज्जन्त–होज्जामाण–होज्ज–होज्जा	हसमाण–हसन्त–हसेज्ज–हसेज्जा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्, Present Tense.

1st Pers.	म्हि–अत्थि	म्ह–म्हो–अत्थि
2nd Pers.	सि–अत्थि	अत्थि
3rd Pers.	अत्थि	अत्थि

अस् Past Tenses (लट्, लिट्, लुङ्).

अहेसि–आसि—All persons, all numbers.

अनुभू, Passive.

1st Pers.	अणुहोईअमि–	अणुहोईअमो–म–मु;
	अणुहोईआमि–	अणुहोईआमो–म–मु;
	अणुहोईइमि–	अणुहोईइमो–म–मु;
	अणुहोईएमि–	अणुहोईएमो–म–मु;
	अणुहोइज्जमि–	अणुहोइज्जमो–म–मु;
	अणुहोइज्जामि–	अणुहोइज्जामो–म–मु;
	अणुहोइज्जिमि–	अणुहोइज्जिमो म–मु;
	अणुहोइज्जेमि	अणुहोइज्जेमो–म–मु;
2nd Pers.	अणुहोईअसि–	अणुहोईअइत्था–
	अणुहोईएसि	अणुहोईएइत्था–
		अणुहोईअह–
		अणुहोईएह
	अणुहोइज्जसि–	अणुहोइज्जइत्था–
	अणुहोइज्जेसि	अणुहोइज्जेइत्था
		अणुहोइज्जह
		अणुहोइज्जेह
3rd Pers.	अणुहोईअइ–	अणुहोईअन्ति–न्ते–इरे;
	अणुहोईएइ	अणुहोईएन्ति–न्ते–इरे;
	अणुहोइज्जइ–	अणुहोइज्जन्ति–न्ते–इरे;
	अणुहोइज्जेइ	अणुहोइज्जेन्ति–न्ते–इरे

Also the forms अणुहोईएज्ज, अणुहोईएज्जा, अणुहोइज्जेज्ज, अणुहोइज्जेज्जा, &c.

Causal of भू from the substitute हो.

Add terminations of the Present to होअ, होए, होआव, होआवे, and होअवि.

1st Pers. होअमि–होआमि–होइमि– होअमो–म–मु; होआमो–म–मु;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

	Singular	Plural
	होएमि; होएसि; होआवेमि; होअविमि; होआवमि–होआवामि–होआविमि–होआवेमि	होइमो–म–मु; होएमो–म–मु; होएमो–म–मु;होआवेमो–म–मु; होअविमो–म–मु; होआवमो–म-मु; होआवामो–म–मु; होआ-विमो–म–मु; होआवेमो–म–मु.
2nd Pers.	होअसि; होअसे; होएसि; होआवसि, होआवसे; होआवेसि; होअविसि	होअइत्था–होअह; होएइत्था–होएह; होआवइत्था–होआवह; होआवेइत्था–होआवेह होअविइत्था–होअविह
3rd Pers.	होअइ–होएइ–होआवइ–होआवेइ–होअविइ	होअन्ति–न्ते–इरे; होएन्ति–न्ते–इरे; होआवन्ति–न्ते–इरे; होआवेन्ति–न्ते–इरे; होअविन्ति–न्ते–इरे

Also होएज्जइ–होएज्जाइ, होआवेज्जइ–होआवेजाइ–होअविज्जइ, होअविज्जाइ, होएज्ज, होएज्जा, होआवेज्ज–ज्जा; होअविज्ज–ज्जा &c.

Passive of the Causal of अनुभू.

	Singular	Plural
1st Pers.	अणुहोईअमि–अणुहोईआमि–अणुहोईइमि–अणुहोईएमि; अणुहोइज्जमि–ज्जामि–ज्जिमि–ज्जेमि; अणुहोआवीअमि–आमि–इमि–एमि; अणुहोआविज्जमि–ज्जामि–ज्जिमि–ज्जेमि	अणुहोईअमो–म–मु; अणुहोईआमो–म–मु; अणुहोईइमो–म–मु; अणुहोईएमो–म–मु; अणुहोइज्ज (°इज्जा–°इज्जि–°इज्जे)–मो–म–मु; अणुहोआवीअ (°वी-आ–°वीइ-°वीए) मो–म–मु; अणुहोआविज्ज (°विज्जा–°विज्जि–°विज्जे) मो–म–मु
2nd Pers.	अणुहोईअ (°ईए) सि–से; अणुहोइज्ज (°इज्जे) सि–से; अणुहोआवीअ (°वीए) सि–से; अणुहोआविज्ज (°विज्जे) सि–से	अणुहोईअ (°ईए) इत्था–ह; अणुहोइज्ज (°इज्जे) इत्था–ह; अणुहोआवीअ (°वीए) इत्था–ह; अणुहोआविज (°विज्जे) इत्था–ह
3rd Pers.	अणुहोईअइ–ए; अणुहोईएइ–ए; अणुहोइज्जइ–ए;	अणुहोईअ (°ईए) न्ति–न्ते–इरे; अणुहोइज्ज (°इज्जे) न्ति–न्ते–इरे;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणुहोइज्जेइ–ए;	अणुहोआवीअ (°वीए) न्ति–न्ते–इरे;
अणुहोआवीअइ–ए;	
अणुहोआवीएइ–ए;	अणुहोआविज्ज (°विज्जे) न्ति–न्ते–इरे
अणुहोआविज्जइ–ए;	
अणुहोआविज्जेइ–ए	

Also अणुहोआवीएज्ज–ज्जा, अणुहोआविज्जेज्ज–ज्जा, &c. when जर् and जार् are added.

The Apabhrams'a.

Forms of Mas. words ending in अ in the Apabhrams'a.

राम Mas.

	Sing.	Plu.
Nom.	रामु–रामो–राम–रामा	रामा–राम
Acc.	रामु–रामो–राम–रामा	राम–रामा–रामि–रामे
Inst.	रामेण–रामें–रामे	रामेहिं–रामाहिं–रामहिं–रामे
Abl.	रामहे–रामाहे–रामहु–रामाहु	रामहुं–रामाहुं
Gen.	रामसु–रामासु–रामस्सु–रामहो–रामाहो–राम–रामा	रामहं–रामाहं–राम–रामा
Loc.	रामि–रामे	रामहिं–रामाहिं–रामसु–रामासु
Voc.	रामु–रामो–राम–रामा	रामहो–रामाहो

In the above forms म् is in all cases optionally changed to व्; रावु–रावो–राव–रावा, &c.

यादृश्, तादृश्, कीदृश्, and ईदृश् make up their forms like those of राम from the bases जेह, तेह, केह, and एह respectively.

Pronouns ending in अ like सव्व are declined like राम except in the Abl. Sing. where हं is the substitute for ङसि; सव्वहं and in the Loc. Sing. where ङि is changed to हिं, सव्वहिं.

According to Hemachandra हां is substituted for ङसि; सव्वहां–सव्वाहां. सव्वा or साहा Fem. is declined like जाआ.

कुण्ड Neu.

	Sing.	Plu.
Nom.	कुंडु	कुंडाइं–कुंड–कुंडे
Acc.	,,	Like the Nom.
Voc.	,,	कुंडहो–कुंडाहो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

The rest like the forms of Mas. Nouns ending in अ.
The forms of सव्व Neu. are like those of कुण्ड Neu.

कइ Mas.

	Sing.	Plu.
Nom.	कइ–कई	कइ–कई; कइहो–कईहो
Acc.	कइ–कई	कइ–कई
Inst.	कइण–कईण–कइएं– कईएं–कइं–कईं	कइहिं–कईहिं
Abl.	कइहे–कईहे	कइहुं–कईहुं
Gen.	कइ–कई	कइ–कई–कइहं–कईहं– कइहुं–कईहुं
Loc.	कइहि–कईहि; कइहुं–कईहुं	कइहिं–कईहिं
Voc.	कइ–कई	कइहो–कईहो

कारु Mas.

	Sing.	Plu.
Nom.	कारु–कारू	कारु–कारू–कारुहो–कारूहो
Acc.	कारु–कारू	कारु–कारू
Inst.	कारुण–कारूण–कारुएं– कारूएं–कारुं–कारूं	कारुहिं–कारूहिं
Abl.	कारुहे–कारूहे	कारुहुं–कारूहुं
Gen.	कारु–कारू	कारु–कारू–कारुहं–कारूहं– कारुहुं–कारूहुं
Loc.	कारुहि–कारूहि– कारुहुं–कारूहुं	कारुहिं–कारूहिं
Voc.	कारु–कारू	कारुहो–कारूहो

पितृ to be considered as पिद and declined like राम.

जाआ Fem.

	Sing.	Plu.
Nom.	जाआ–जाअ–जाई–जाइ	जाआउ–जाअउ–जाआओ– जाअओ–जाईउ–जाइउ– जाईओ–जाइओ
Acc.	जाआ–जाअ–जाई–जाइ	जाआउ–जाअउ–जाआओ– जाअओ–जाईउ–जाइउ– जाईओ–जाइओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Inst.	जाआण–जाअण–जाआं–जाअं–जाईण–जाइण–जाई–जाइं–जाईएं–जाइएं	जाआहिं–जाअहिं–जाईहिं–जाइहिं
Abl.	जाआहे–जाअहे–जाईहे–जाइहे	जाईहुं–जाइहुं–जाआहुं–जाअहुं
Gen.	जाआहे–जाअहे–जाईहे–जाइहे	जाआ–जाअ–जाई–जाइ
Loc.	जाआहिं–जाअहिं–जाईहिं–जाइहिं	जाआहिं–जाअहिं–जाईहिं–जाइहिं
Voc.	जाआ–जाअ–जाई–जाइ	जाआ–जाअ–जाई–जाइ–जाआउ–जाअउ–जाआहो–जाअहो–जाईउ–जाइउ–जाईहो जाइहो

The forms of Fem. Nouns ending in ई and ऊ are like those from the base जाई.

The forms of मातृ are from the bases मादा and मादी, like those of जाआ.

वारि Neu.

Nom.	वारि	वारिइं
Acc.	Do.	Do.

The rest like the Mas. forms.

सव्व Mas.

	Sing.	Plu.
Nom.	सव्वु–सव्वो–सव्व–सव्वा	सव्वे–सव्व–सव्वा
Acc.	सव्वु–सव्वो–सव्व–सव्वा	सव्व–सव्वा–सव्वि–सव्वे
Inst.	सव्वेण–सव्वें–सव्वे	सव्वेहिं–सव्वाहिं–सव्वहिं–सव्वे
Abl.	सव्वहं–सव्वाहं	सव्वहुं–सव्वाहुं
Gen.	सव्वसु–सव्वासु–सव्वसु–सव्वहो–सव्वाहो–सव्व–सव्वा	सव्वेसिं–सव्वहं–सव्वाहं–सव्व–सव्वा
Loc.	सव्वहिं–सव्वाहिं	सव्वहिं–सव्वाहिं–सव्वसु–सव्वासु

किम् Mas. has three bases क, काइं, and कवण. काइं is declined like कइ Mas., and क and कवण like सव्व except in Abl. Sing.—किह–कहं–काहं.

किम् Fem.—Its base is का, declined like जाआ. Its base is की except in Nom. Sing., Acc. Sing., and Gen. Plu. (सु, अम्, and आम्) and except in Abl. Sing. where the form is कहे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् Neu.

	Sing.	Plu.
Nom.	किं	काइं–कइं–काइं–कवणु
Acc.	किं	,,

The rest like the Mas. forms.

इदम् Mas. has आअ (Hema. आय) as its base in all forms. आअ is declined like सव्व. According to some इदम् has आअ as its base only before जस् and शस्. (Nom. Plu. and Acc. Plu.) In other forms, its base is इम.

इदम् Fem. has आआ (Hema. आया) as its base and its forms are like those of जाआ.

इदम् Neu.

Nom.	इमु	आअ–आआ
Acc.	,,	आअ–आआ
Inst.	इमएण–इमएं	इमहिं

The rest like the Mas. forms.

यद् (Mas.) and तद् (Mas.) have their forms like those of सव्व from the bases ज and त respectively except in the following cases:—

	यद्	तद्
Nom. Sing.	ध्रुं	त्रुं
Acc. Sing.	ध्रुं	त्रुं

Regular forms are optionally used:—यद् Nom. Sing. जु–जो, तद्–सुं–सो. यद् (Fem.) and तद् (Fem.) have जा and ता as their bases. Their forms are like those of जाआ except in the Abl. Sing. where the forms are जहे and तहे respectively.

	यद् Neu.		तद् Neu.	
Nom.	ध्रुं–जं	जाइं–जइं	त्रुं–तं	ताइं–तइं
Acc.	,,	,,	,,	,,

The rest like the Mas. forms.

एतद् Mas.– Its base is एद from which the forms are like those of सव्व except in the following:—

Nom. Sing.	एह–एहो–एहु	These three forms are in all genders
Acc. Sing.	एह–एहो–एहु	
Nom. Plu.	एइ	
Acc. Plu.	एइ	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतद् Fem.–Base एदा. Its forms are like those of जाआ except in the following.

Nom. Sing. / Acc. Sing.	एह–एहो–एहु	All genders.

Nom. Plu. and Acc. Plu. एइ

एतद् Neu.

Nom.	एइ–एहो–एहु	एइ–एइं–एदइं–एदाइं
Acc.	,, ,, ,,	,, ,,

The rest like the Mas.

अदस् Mas.—Its base is अमु, which is declined like कारु except in the following:—

Nom. Plu. ओइ

Acc. Plu. ओइ

अदस् Fem.—Base अमु. Declined like कारु except in the following.

Nom. Plu. / Acc. Plu. } ओइ

अदस् Neu.

Nom.	अमु	ओइ–अमुइं–अमूइं
Acc.	,,	,, ,, ,,

The rest like the Mas.

	युष्मद्		अस्मद्	
Nom.	तुहुं	तुम्हे–तुम्हइ	हउं	अम्हइं–अम्हेइं
Acc.	एइं–तइं	तुम्हे–तुम्हइ	मइं	अम्हइं–अम्हेइं
Inst.	एइं–तइं	तुम्हेहिं	मइं	अम्हेहि
Abl.	तुज्झ–तुध्र–तउ–तुह–तओ	तुम्हहं	महु–मज्झ	अम्हहं
Gen.	तुज्झ–तुध्र–तउ–तुह–तओ	तुम्हहं	महु–मज्झ	अम्हहं
Loc.	एइं–तइं	तुम्हासु	मइं	अम्हासु

भू, Present, हो–हव.

1st Pers.	होउ–हवउ–होमि–हवमि (होउं–हवउं Hema.)	होहुं–हवहुं–होमो–म–मु; हवमो–म–मु
2nd Pers.	होहि–हवहि–होसि; हवसि–से	होहु; हवहु–होइत्था–होह–हवइत्था–हवह
3rd Pers.	होदि–हवदि–दे; होइ–हवइ–ए	होहिं–हवहिं–होन्ति–न्ते–इरे हवन्ति–न्ते–इरे

Similarly from the base हुव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Appendix containing Illustrations of the Apabhraṁs'a.

Hemachandra has treated the subject of the Apabhraṁs'a at great length, giving good illustrations of verses in the Apabhraṁs'a. They are given here in illustration of the corresponding Sûtras in the text. Their Sanskrit equivalents are not given by Hemachandra. For this I had to consult the commentary designated Vyutpattidîpikâ, otherwise known as Ḍhuṇḍhikâ, composed by Udayasaubhâgyagaṇi. Of this commentary there are two MSS. in the Deccan College Library.

Illustrations for Hemachandra's work are given in the order of the Sûtras as they are found in the text.

स्यमोरस्योत् ॥ ३ । ४ । २ ॥ P. 264—

दहमुहु भुवण-भयंकरु तोसिअ-संकरु णिग्गउ रह-वरि चडिअउ ।
चउमुहु छंमुहु झाइवि एक्कहिं लाइवि णावइ दइवें घडिअउ ॥

The corresponding Sanskrit is as under:—

दशमुखो भुवनभयंकरस्तोषितशंकरो निर्गतो रथवरे चटितः ।
चतुर्मुखं षण्मुखं ध्यात्वैकस्मिँल्लगित्वेव दैवेन घटितः ॥

(एकस्मिन् रावणे एतद्द्वयमपि एकीकृत्य रावणो घटितो निर्मितः । दशमुखत्वादित्यर्थः ॥)

सुसतोः ॥ ३ । ४ । २७ ॥ P. 264—

एइ ति घोडा एह थलि एइ ति निसिआ खग्ग ।
एत्थु मुणीसिम जाणीअइ जो नवि वालइ वग्ग ॥
एते ते घोटकाः एषा स्थली एते ते निशिताः खड्गाः ।
अत्र मनुष्यत्वं ज्ञायते येनापि वालयति वल्गाम् (वल्गु?) ॥

(अत्र स्यम्जसां लोपः)—

जिवँ जिवँ वंकिम लोअणहं णिरु सामलि सिक्खेइ ।
तिवँ तिवँ वम्महु निअय-सरु खरपत्थरि तिक्खेइ ॥
यथा यथा वक्रत्वं लोचनानां निश्चितं श्यामला शिक्षते ।
तथा तथा मन्मथो निजकशरान् खरप्रस्तरे तीक्ष्णान् करोति ॥

(अत्र स्यम्शसां लोपः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओत् सौ तु पुंसि ॥ ३ । ४ । ३ ॥ P. 264—

अगलिअ-नेह-निवट्टाहं जोअण-लक्खुवि जाउ ।
वरिस-सएणवि जो मिलइ सहि सोक्खहं सो ठाउ ॥
अगलितस्नेहनिवृत्तानां योजनलक्षमपि यातु ।
वर्षशतेनापि यो मिलति सखि सौख्यानां स भवतु ॥

(अत्रुटितस्नेहचलितानामुपरि योजनलक्षमपि यातु । हे सखि वर्षशतेनापि यो मिलति स सौख्यानां स्थानं भवतीत्यर्थः)

पुंसीति किम् ।

अङ्गहिं अङ्गु न मिलिउ हलि अहरें अहरु न पत्तु ।
पिअ जोअन्तिहे मुह-कमलु एम्वइ सुरउ समत्तु ॥
अङ्गैरङ्गं न मिलितं सखि अधरेण अधरो न प्राप्तः ।
प्रियस्य पश्यन्त्या मुखकमलमेव सुरतं समाप्तम् ॥

तु मोङ्वम् ॥ ३ । ३ । ३ ॥ P. 264—

कवँलु-कमलु । भवँरु-भमरु । लाक्षणिकस्यापि । जिवँ । तिवँ । जेवँ । तेवँ । अनादावित्येव । मयणु । असंयुक्तस्येत्येव । तसु पर समलउ जम्मु । तस्य परं सफलं जन्म ।

दिहौ सुपि ॥ ३ । ४ । २ ॥ P. 265—

सौ

ढोल्ला सामला धण चम्पा-वणी ।
णाइ सुवण्ण-रेह कस-वट्टइ दिण्णी ॥
नायकः श्यामलः प्रिया चम्पकवर्णा ।
इव सुवर्णरेखा कषपट्टके दत्ता ॥

(शीघ्रादीनां वहिल्लादयः । नायकस्य ढोल्लादेशः । प्रियायाः धण आदेशः । उत्प्रेक्ष्यते कषपट्टके सुवर्णरेखेव दत्तेत्यर्थः).

आमन्त्र्ये

ढोल्ला मइं तुहुं वारिया मा कुरु दीहा माणु ।
निद्दए गमिही रत्तडी दडवड होइ विहाणु ॥
नायक मया त्वं वारितः मा कुरु दीर्घं मानम् ।
निद्रया गमिष्यति रात्रिः शीघ्रं भवति विभातम् ॥

(शीघ्रादित्वादवस्कन्दस्य दडवडेति विभातस्य च विहाण इति)

स्त्रियाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बिट्टीए मइ भणिय तुहुं मा करु वङ्की दिट्ठी ।
पुत्ती सकण्णी भल्लि जिव मारइ हिअइ पइट्ठि ॥
पुत्रिके मया भणिता त्वं मा कुरु वक्रां दृष्टिम् ।
पुत्रिके सकर्णा भल्लिः इव मारयति हृदये प्रविष्टा ॥

(हे पुत्रिके यथा सकर्णा भल्लिः हृदये प्रविष्टा मारयति तथा त्वया या दृष्टिभूता भल्लिः परस्य हृदये प्रविष्टा मारयिष्यतीत्यर्थः शीघ्रादित्वाद् बिट्टी आदेशः। स्वार्थे कश्च वा)

जसि ।

एइ ति घोडा एइ थलि एइ ति निसिआ खग्ग ।
एत्थु मुणीसिम जाणीअइ जो नवि वालइ वग्ग ॥
एते ते घोटकाः एषा स्थली एते ते निशिताः खड्गाः ।
अत्र मनुष्यत्वं ज्ञायते येनापि वालयति वल्गम् (वल्गु ?) ॥

हो जस आमन्त्रणे ॥ ३ । ४ । १८ ॥ P. 265—

तरुणहो तरुणिहो मुणिउ मइं करहु म अप्पहो घाउ ॥
हे तरुणाः हे तरुण्यो ज्ञातं मया कुरुत मा आत्मनः घातम् ॥

टो णानुस्वारौ ॥ ३ । ४ । ११ ॥ P. 265—

दइएं पवसन्तेण । (दयितेन प्रवसता)

ङि ॥ ३ । ४ । ५ ॥ P. 265—

जे महु दिण्णा दिअहडा दइएं पवसन्तेण ।
ताण गणन्तिए अङ्गुलिउ जज्जरिआउ नहेण ॥
ये मम दत्ता दिवसा दयितेन प्रवसता ।
तान् गणयन्त्या अङ्गुल्यः जर्जरिता नखेन ॥

हिंभिस्सुपोः ॥ ३ । ४ । १९ ॥ P. 265—

गुणहिं न संपइ कित्ति पर (गुणैः न संपदः कीर्तिः परम् । गुणैः संपदो न स्युः परं केवलं कीर्तिरेव भवति).

भाईरहि जिवँ भारइ मग्गेहिं तिहिंवि पयट्टइ ।
भागीरथी इव भारती मार्गेषु त्रिष्वपि प्रवर्तते ॥

(भागीरथी यथा भारती मार्गेषु त्रिषु प्रवर्तते—यथा भागीरथी गङ्गा त्रिषु मार्गेषु प्रवर्तते तथा भारत्यपि सरस्वत्यपि उत्पादव्ययध्रौव्यात्मकेषु त्रिषु मार्गेषु प्रवर्तत इत्यर्थः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ए भिसि ॥ ३ । ४ । ४ ॥ P. 266—

गुणहिं न संपइ कित्ति पर फल लिहिआ भुञ्जन्ति ।
केसरि न लहइ बोड्डिअवि गय लक्खेहिं घेप्पन्ति ॥
गुणैः न संपदः कीर्तिः परं फलानि लिखितानि भुञ्जते ।
केसरी न लभते कपर्दिकामपि गजाः लक्षैः गृह्यन्ते ॥

(जीवा लिखितानि फलानि भुञ्जते ।)

ङसेर्हेहू ॥ ३ । ४ ॥ ७ ॥ P. 266—

वच्छहे गृण्हइ फलइं जणु कडु–पल्लव वज्जेइ ।
तोवि महद्दुमु सुअणु जिवँ ते उच्छङ्गि धरेइं ॥
वृक्षात् गृह्णन्ति फलानि जनः कटु पल्लवानि वर्जयति ।
ततोपि महाद्रुमः सुजन इव तानुत्सङ्गे धरति ॥

(तान्–कटुपल्लवान्)

भ्यसो हुं ॥ ३ । ४ । ८ ॥ P. 266—

दुरुड्डाणें पडिउ खलु अप्पणु जणु मारेइ ।
जिह गिरि–सिङ्गहुं पडिअ सिल अन्नुवि चूरु करेइ ॥
दूरोड्डानेन पतितः खलः आत्मानं जनं मारयति ।
यथा गिरिशृङ्गेभ्यः पतिता शिला अन्यमपि चूर्णीकरोति ॥

(दूरोड्डानेन दूरगमनेन । आत्मानं जनं च मारयति । अन्यमपि । आत्मानमन्यमपीत्यर्थः)

सुस्सुहो ङसः ॥ ३ । ४ । ९ ॥ P. 266—

जो गुण गोवइ अप्पणा पयडा करइ परस्सु ।
तसु हउं कलि–जुगि दुल्लहहो बलि किज्जउं सुअणस्सु ॥
यो गुणान् गोपायति आत्मीयान् प्रकटान् करोति परस्य ।
तस्य अहं कलियुगे दुर्लभस्य बलिं करोमि सुजनस्य ॥

ङमो लुक् ॥ ३ । ४ ॥ १६ ॥ P. 266—

संगर–सएहिं जु वण्णिअइ देक्खु अम्हारा कन्तु ।
अइमत्तहं चत्तङ्कुसहं गय–कुम्भइं दारन्तु ॥
संग्रामशतेषु यः वर्ण्यते पश्य मदीयं कान्तम् ।
अतिमत्तानां त्यक्ताङ्कुशानां गजानां कुम्भान् दारयन्तम् ॥

आमो हं ॥ ३ । ४ । १० ॥ P. 266—

तणहं तइज्जी भङ्गि नवि तें अवड–यडि वसन्ति ।
अह जणु लग्गिवि उत्तरइ अह सह सइं मज्जन्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृणानां तृतीया भङ्गिः नापि तेन अवटतटे वसन्ति ।
अथ जनः लगित्वा उत्तरति अथ सह स्वयं मज्जन्ति ॥

(तृणानां तृतीया भङ्गी तृतीयः प्रकारो नाप्यस्ति तेन कारणेन अवटतटे वसन्ति अथवा जनस्तृणानि लगित्वा उत्तरति । अथ इति अथवा । तृणानि जनेन सह स्वयं मज्जन्ति । अन्योपि यः प्रकारद्वितयं कर्तुकामो भवति स विषमस्थाने वसति । प्रकारद्वयं किम् । म्रियते वा शत्रून् जयति वेति भावार्थः).

ङिनेच्च ॥ ३ । ४ । ६ ॥ P. 266—

सायरु उप्परि तणु धरइ तलि घल्लइ रयणाइं ।
सामि सुभिच्चुवि परिहरइ सम्माणेइ खलाइं ॥

सागरः उपरि तृणानि धरति तले क्षिपति रत्नानि ।
स्वामी सुभृत्युमपि परिहरति संमानयति खलान् ॥

अचोस्त्वोखौ कखतथपफा गघदधबभान् ॥ ३ । ३ । २ ॥ P. 267—

कस्य गः—

जं दिट्ठउं सोम–ग्गहणु असइहिं हसिउ निसङ्कु ।
पिअ–माणुस–विच्छोह–गरु गिलिगिलि राहु मयङ्कु ॥

यत् दृष्टं सोमग्रहणमसतीभिः हसितं निःशङ्कम् ।
प्रिय–मानस–विक्षोभ–करं गिलगिल राहोर्मृगाङ्कम् ॥

खस्य घः ।

अम्मीए सत्थावत्थेहिं सुधिं चिन्तिज्जइ माणु ।
प्रिए दिट्ठे हल्लोहलेण को चेअइ अप्पाणु ॥

अम्ब स्वस्थावस्थैः सुखेन चिन्त्यते मानम् ।
प्रिये दृष्टे हल्लोहल्लेन कः चेतयति आत्मानम् ॥

(स्त्री कथयति–हे अम्ब स्वस्थावस्थैः स्वस्थचित्तैः सुखेन मानश्चिन्त्यते अहंकारः क्रियते । परं प्रिये दृष्टे सति हल्लोहल्लेन व्याकुलत्वेन का आत्मानं चेतयतीत्यर्थः)

तथपफानां दधबभाः—

सबधु करेप्पिणु कधिदु मइं तसु पर सभलउं जम्मु ।
जासु न चाउ न चारहडि न य पम्हट्ठउ धम्मु ॥

शपथं कृत्वा कथितं मया तस्य परं सफलं जन्म ।
यस्य न त्यागः न चारभटी न यस्य प्रमुष्टः धर्मः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(यस्य त्यागो न प्रमुष्टः दानं न गतं यस्य चारभटी न प्रमुषिता शूरवृत्तिर्न गता यस्य धर्मो न प्रमुष्टः न प्रमुषित इत्यर्थः).

Why अखौ = अनादौ ? – सवधु करेप्पिणु. Here क् is not changed to ग्. Why अचः ? – गिलिगिलि राहु मयङ्कु ॥ (गिलगिल राहोर्मृगाङ्कम्). Why असवः—असंयुक्ताः—एकहिं अक्खिहिं सावणु (एकस्मिन्नक्षिणि श्रावणः).

Because of the word प्रायः, the change does not take place sometimes—

जइ केवँइ पावीसु पिउ अकिआ कुड्ड करीसु ।
पाणीउ नवइ सरावि जिवँ सव्वङ्गें पइसीसु ॥
यदि कथंचित् प्राप्स्ये प्रियं अकृतं कौतुकं करिष्यामि ।
पानीयं नवे शरावे यथा सर्वाङ्गेण प्रविशति ॥

(स्त्री कथयति यदि कथंचित् प्रियं प्राप्स्ये तर्हि अकृतं कौतुकं करिष्यामि यथा नवे शरावे पानीयं सर्वाङ्गेण प्रविशति तथा सर्वाङ्गेण प्रवेक्ष्यामीत्यर्थः ।).

उअ कणिआरु पफुल्लिअउ कञ्चण–कान्ति–पयासु ।
गोरी–वयण–विणिज्जिअउ नं सेवइ वण–वासु ॥
पश्य कर्णिकारः प्रफुल्लितः काञ्चनकान्तिप्रकाशनम् ।
गौरीवदनविनिर्जितः इव वनवासं सेवते ॥

म्हो म्भं ॥ ३ । ३ । ४ ॥ P. 267—

बम्भ ते विरला केवि नर जे सव्वङ्ग–छइल्ल ।
जे वङ्का ते वञ्चयर जे उज्जुअ ते बइल्ल ॥
ब्रह्मन् ते विरलाः केपि नराः ये सर्वाङ्गदक्षाः ।
ये वक्रास्ते वञ्चतराः ये ऋजवः ते बलीवर्दाः ॥

(हे ब्रह्मन् ते केपि नरा विरलाः ये सर्वाङ्गैर्दक्षाः । ये वक्रास्ते वञ्चतराः अत्यर्थवञ्चकाः ये तु ऋजवस्ते बलीवर्दा मूर्खा इत्यर्थः)

रो लुकमधः ॥ ३ । ३ । ५ ॥ P. 267—

जइ केवँइ पावीसु पिउ (यदि कथंचित् प्राप्स्ये प्रियम्). पक्षे

जइ भग्गा पारक्कडा तो सहि मज्झु प्रियेण ॥
यदि भग्नाः परकीयाः तत् सखि मम प्रियेण ।

क्वचिद्भूतोपि ॥ ३ । ३ । ६ ॥ P. 267—

व्रासु महारिसि एउ भणइ जइ सुइ–सत्थु पमाणु ।
मायहं चलण नवन्ताहं दिविदिवि गङ्गा–ण्हाणु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यासो महर्षिः एतद् भणति यदि श्रुतिशास्त्रं प्रमाणम् ।
मातॄणां चरणौ नमतां दिवसे दिवसे गङ्गास्नानम् ॥

Why क्वचित्? Because वासेणवि भारह-खम्भि बद्ध-व्यासेनापि भारत-स्तम्भे बद्धम् ।

उन्नविच्छवुत्ता विषण्णवर्त्मोक्ताः ॥ ३ । ३ । ५३ ॥ P. 267—
Hemachandra gives वुन्न and विच्च in place of उन्न and **विच्छ.**

विषण्णस्य वुन्नः—

मइं वुत्तउं तुहुं धुरु धरहि कसरेहिं विगुत्ताइं ।
पइं विणु धवल न चडइ भरु एम्वइ वुन्नउ काइं ॥
मया उक्तं त्वं धुरं धर कसरैः विगोपिता ।
त्वया विना धवल न चटति भरः एवं विषण्णः कथम् ॥

(हे वृषभ मया उक्तं त्वं धुरं धर कसरैर्गलिवृषभैर्वयं विगोपिताः हे धवल हे वृषभ त्वया विना भरो न चटति एवमेव विषण्णः कथमित्यर्थः ।)

उक्तस्य वुत्तः– मइं वुत्तउं । मया उक्तम् ।

वर्त्मनो विच्चः—जं मणु विच्चि न माइ—
यत् मनः वर्त्मनि न माति ।

अत्थुः परस्परस्य ॥ ३ । ३ । ५४ ॥ P. 268—

ते मुग्गडा हराविआ जे परिविट्ठा ताहं ।
अवरोप्परु जोअन्ताहं सामिउ गञ्जिउ जाहं ॥
ते मुद्गाः हारिता ये परिवेष्टिता तेषाम् ।
परस्परं युध्यतां स्वामी गञ्जितः येषाम् ॥

(मुद्गा हारिताः मुधा जाताः । गञ्जितः पीडितः)

सर्वगान् ङेहिं ॥ ३ । ४ । २६ ॥ P. 268—

जहिं कपिज्जइ सरिण सरु छिज्जइ खग्गिण खग्गु ।
तहिं तेहइ भड-घड-निवहि कन्तु पयासइ मग्गु ॥
एकहिं अक्खिहिं सावणु अन्नहिं भद्दवउ ।
माहउ महिअल-सत्थरि गण्ड-त्थले सरउ ॥
अङ्गिहिं गिम्ह सुहच्छी-तिल-वणि मग्गसिरु ।
तहे मुद्धहे मुह-पङ्कइ आवासिउ सिसिरु ॥
हिअडा फुट्टि तडत्ति करि कालक्खेवें काइं ।
देक्खउं हय-विहि कहिं ठवइ पइं विणु दुक्ख-सयाइं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्मिन् छिद्यते शरेण शरः छिद्यते खड्गेन खड्गः ।
तस्मिन् तादृशे भटघटानिवहे कान्तः प्रकाशयति मार्गम् ॥
एकस्मिन्नक्षिण श्रावणः अन्यस्मिन् भाद्रपदः ।
माधवो महीतलस्रस्तरे गण्डस्थले शरद् ॥
अङ्गेषु ग्रीष्मः सुखासिकातिलवने मार्गशीर्षः ।
तथा मुग्धाया मुखपङ्कजे आवासितः शिशिरः ॥
हृदय स्फुट त्रटदिति कृत्वा कालक्षेपेन किम् ।
पश्यामि हतविधिः कुत्र स्थापयति त्वया विना दुःखशतानि ॥

(यथा एतौ द्वौ मासौ श्रावणौ तथा अक्षिद्वयमप्यश्रुजलस्राविलत्वान्मासद्वय-तुल्यम् । महीतलस्रस्तरे माधवो वसन्तः पल्लवमयत्वात् । गण्डस्थले शरत् तस्याः कासकुसुमादिना पाण्डुत्वात् । अङ्गेषु ग्रीष्मः तापबाहुल्यात् सुखासिकातिलवने मार्गशीर्षः । यथा मार्गशीर्षे तिलवनानामुच्छेदः स्यात् तथा सुखावस्थानस्योच्छेदः। मुखपङ्कजे शिशिरः वासितः । यथा शिशिरे पङ्कजानां म्लानत्वं तथा मुखपङ्कज-स्यापि । स्त्रीणां वियोगावस्थायामेतानि चिह्नानि स्युरतेनेत्युक्तम् । हे हृदय त्वं त्रटदिति कृत्वा स्फुट । क्षेपेन कालविलम्बेन किम् । अहं पश्यामि हतविधिस्त्वया विना दुःखशतानि कुत्र स्थापयतीत्यर्थः ।

ङसेर्हे ॥ ३ । ४ । २७ ॥ P. 268—

Hemachandra gives हां as a substitute in place of हं for ङस् in the case of सर्व and other pronouns ending in अ. His instances are जहां होन्तउ आगदो (यतो भवानागतः) । तहां होन्तउ आगदो (ततो भवानागतः) । and कहां होन्तउ आगदो (कुतो भवानागतः) ।

त्वनुत्साहावन्यथासर्वौ ॥ ३ । ३ । ५१ ॥ P. 268—

विरहानल–जाल–करालिअउ पहिउ कोवि बुड्डिवि ठिअओ ।
अनु सिसिर–कालि सीअल–जलहु धूमु कहन्तिहु उट्ठिअओ ॥
विरहानलज्वालाकरालितः पथिकः कोपि बुडित्वा स्थितः ।
अन्यथा शिशिरकाले शीतलजलात् धूमः कुतः उत्थितः ॥

(कोपि कविर्जले धूमं दृष्ट्वाह । करालितः पीडितः ।)

साहुवि लोउ तडप्फडइ बहुत्तणहो तणेण ।
वड्डप्पणु परिपाविअइ हत्थि मोक्कलडेण ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वोपि लोकः उत्ताम्यति बृहत्त्वस्यार्थे ।
बृहत्त्वं प्राप्यते हस्तेन मुक्तलेन ॥

(उत्ताम्यति व्याकुलीभवति । को भावः । जनैर्महत्त्वं तदा प्राप्यते यदा दानादिगुणाः स्युरित्यर्थः)

एं चेदुतः ॥ ३ । ४ । १२ ॥ P. 269—

एं—

अग्गिएं उण्हउ होइ जगु वाएं सीअलु तेवँ
जो पुणु अग्गिं सीअला तसु उण्हत्तणु केवँ ॥
अग्निना उष्णं भवति जगत् वातेन शीतलं तथा ।
यः पुनः अग्निना शीतलः तस्य उष्णत्वं कथम् ।

(यः पुनः अग्निनापि शीतलस्तस्योष्णत्वं कथम् । न कथमपीत्यर्थः ।)

णानुस्वारौ—

विप्पिअ-आरउ जइवि पिउ तोवी तं आणहि अज्जु ।
अग्गिण-दड्ढा जइवि घरु तो तें अग्गिं कज्जु ॥
विप्रियकारकः यद्यपि प्रियः तथापि तमानय अद्य ।
अग्निना दग्धं यद्यपि गृहं ततः तेन अग्निना कार्यम् ॥

(ततोपि तेन अग्निना सह कार्यं भवेदित्यर्थः).

हि हे ङिङस्योः ॥ ३ । ४ । १३ ॥ P. 269—

ङसेर्हे—

गिरिहे सिलायलु तरुहे फलु घेप्पइ नीसावँन्नु ।
घरु मेल्लेप्पिणु माणुसहं तोवि न रुच्चइ रन्नु ॥
गिरेः शिलातलं तरोः फलं गृह्णाति निःसामान्यः ।
गृहं मुक्त्वा मानुषाणां ततोपि न रोचते अरण्यम् ॥

(निःसामान्यः सर्वोपि जनः गृहं मुक्त्वा गिरेः शिलातलं गृह्णाति तरोः फलं गृह्णाति ततोपि मानुषाणां मनुष्येभ्यो वा अरण्यं न रोचत इत्यर्थः)

ङेर्हि—

अह विरल-पहाउ जि कलिहि धम्मु ॥
अथ विरलप्रभाव एव कलौ धर्मः ।

हुं भ्यसः ॥ ३ । ४ । १४ ॥ P. 269—

तरुहुंवि वक्कलु फलु मुणिवि परिहणु असणु लहन्ति ।
सामिहुं एत्तिउं अग्गलउं आयरु भिच्चु गृहन्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरुभ्योपि वल्कलं फलं मुनयोपि परिधानमशनं लभन्ते ।
स्वामिभ्यः इयत् अर्गलं आदरं भृत्या गृह्णन्ति ॥

(परं स्वामिभ्य इयदर्गलमधिकं यद् भृत्या आदरं गृह्णन्तीत्यर्थः).

आमो हं च ॥ ३ । ४ । १५ ॥ P. 269—

दइवु घडावइ वणि तरुहुं सउणिहं पक्क फलाइं ।
सो वरि सुक्खु पइट्ठ णवि कण्णहिं खल-वयणाइं ॥
देवः घटयति वने तरूणां शकुनानां पक्वफलानि ।
तत् वरं सौख्यं प्रविष्टानि किंतु कर्णयोः खलवचनानि ॥

(कर्णयोः प्रविष्टानि खलवचनानि सौख्यं नेत्यर्थः).

प्रायोधिकारात् क्वचित् सुपोपि हुं ।

धवलु विसूरइ सामिअहो गरुआ भरु पिक्खेवि ।
हउं कि न जुत्तउ दुहं दिसिहिं खण्डइं दोण्णि करेवि ॥
धवलः विषीदति स्वामिनः गुरुं भारं प्रेक्ष्य ।
अहं किं न योजितः द्वयोः दिशोः खण्डौ द्वौ कृत्वा ॥

(धवलः—वृषभो धौरेयः)

उदोतौ जश्शसोः ॥ ३ । ४ । २३ ॥ P. 270—

जसः—अंगुलिउ जज्जरियाओ नहेण । (अङ्गुलयः जर्जरिता नखेन)
शसः—सुन्दर-सव्वङ्गाउ विलासिणीओ पेच्छन्ताण ।

सुन्दरसर्वाङ्गाः विलासिनीः पश्यताम् (नराणाम्)

ङसूङ्स्योर्हे ॥ ३ । ४ । २१ ॥ P.270—

तुच्छ-मज्झहे तुच्छ-जम्पिरहे ।
तुच्छच्छ-रोमावलिहे तुच्छ-राय तुच्छयर-हासहे ।
पिय-वयणु अलहन्तिअहे तुच्छकाय-वम्मह-निवासहे ॥
अनु जु तुच्छउं तहे धणहे तं अक्खणह न जाइ ।
कटरि थणंतरु मुद्धडहे जें मणु-विच्चि ण माइ ॥
तुच्छमध्यायाः तुच्छजल्पनायाः
तुच्छाच्छरोमावल्याः तुच्छराग तुच्छतरहासायाः ।
प्रियवचनमलभमानायाः तुच्छकायमन्मथनिवासायाः ।
अन्यत् यत् तुच्छं तस्याः नायिकायाः तद् आख्यातुं न याति ।
कटरि स्तनान्तरं मुग्धायाः येन मनोवर्त्मनि न माति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(तुच्छरागेति दूतीकृतं नायकस्यामन्त्रणम् । हे तुच्छराग ! तस्या नायिकायाः अन्यद् यत्तुच्छं तदाख्यातुं न याति । नायिकायाः किंभूतायाः । तुच्छमध्यायाः । पुनः किंभूतायाः । तुच्छजल्पनशीलायाः । पुनः किंभूतायाः । तुच्छाच्छरोमावल्याः । पुनः किंभूतायाः । तुच्छतरहासायाः । पुनः किंभूतायाः । प्रियवचनमलभमानायाः । पुनः किंभूतायाः । तुच्छकायमन्मथनिवासायाः तुच्छकाये मन्मथनिवासो यस्याः सा । तुच्छकायत्वं भर्तुर्विरहात् । कटरीत्याश्चर्ये । येन कारणेन मुग्धायाः स्तनान्तरं मनोवर्त्मनि न माति । स्तनयोरतिपीनत्वादन्तरस्यातितुच्छत्वं वर्णितमित्यर्थः ॥).

ङसेः—

फोडेन्ति जे हियडउं अप्पणउं ताहं पराई कवण घण ।
रक्खेज्जहु लोअहो अप्पणा बालहे जाया विसम थण ॥
स्फोटयन्ति ये हृदयमात्मनः तेषां परकीया किं घृणा ।
रक्षयत लोका आत्मानं बालाया जाताः विषमस्तनाः ॥

(यौ स्तनौ आत्मनो हृदयं स्फोटयतः तयोः परकीया घृणा दया किम् । हे लोकाः आत्मानं रक्षत यतः कारणात् बालायाः विषमौ स्तनौ जातावित्यर्थः).

हुमाम्भ्यसः ॥ ३ । ४ । २२ ॥ P. 271—

भल्ला हुआ जु मारिआ बहिणि महारा कन्तु ।
लज्जेज्जं तु वयंसिअहु जइ भग्गा घरु एन्तु ॥
भव्यं भूतं यत् मारितः भगिनि मदीयः कान्तः ।
लज्जां प्राप्स्ये तर्हि वयस्यानां यदि भग्ना गृहमैष्यत् ॥

(वयस्याभ्यो वयस्यानां वा).

स्त्रियां ङेः ॥ ३ । ४ । २० ॥ P. 271—

वायसु उड्डावन्तिअए पिउ दिट्ठउ सहसत्ति ।
अद्धा वलया महिहि गय अद्धा फुट्ट तडत्ति ॥
वायसमुड्डापयन्त्या प्रियः दृष्टः सहसेति ।
अर्धानि वलयानि मह्यां गतानि अर्धानि फुटानि त्रटदिति ॥

(उड्डापयन्त्या स्त्रिया । मह्यां गतानि भूमौ पतितानि अर्धानि त्रटदिति कृत्वा स्फुटानि).

अडडडुल्लाः स्वार्थिककलुक् च ॥ ३ । ३ । २९ ॥ P. 271—

अ—

विरहानल-जाल-करालिअउ पहिउ पन्थि जं दिट्ठउ ।
तं मेलवि सव्वहिं पन्थिअहिं सोजि किअउ अग्गिट्ठउ ॥
विरहानलज्वालाकरालितः पथिकः पथि यस्मात् दृष्टः ।
तं मिलित्वा सर्वैः पथिकैः स एव कृतः अग्निष्ठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

डड—महु कन्तहो बे दोसडा । मम कान्तस्य द्वौ दोषौ ।

डुल्ल—एक कुडुल्ली पञ्चहिं रुद्धी । एका कुटी पञ्चभिः रुद्धा ।

कान्तस्यात उं स्यमोः ॥ ३ । ४ । २५ ॥ P. 272—

अन्नु जु तुच्छउं तहे धणहे । अन्यत् यत् तुच्छं तस्याः नायिकायाः ।

भग्गउं देक्खिवि निअय बलु बलु पसरिअउं परस्सु ।
उम्मिल्लइ ससि–रेह जिवँ करि करवालु पियस्सु ॥
भग्नं दृष्ट्वा निजकं बलं बलं प्रसृतं परस्य ।
उन्मीलति शशिरेखा इव करे करवालं प्रियस्य ॥

(हे सखि यथा द्वितीयादितिथौ शशिरेखा चन्द्ररेखा प्रकटीभवति तथा प्रियस्य करे करवालं खड्गमुन्मीलति प्रकटीभवति । किं कृत्वा । निजकं बलं भग्नं दृष्ट्वा परस्य तु बलं प्रसृतं दृष्ट्वेत्यर्थः ॥).

इं नपि ॥ ३ । ४ । २४ ॥ P. 272—

कमलइं मेल्लवि अलि–उलइं करि–गण्डाइं महन्ति ।
असुलहमेच्छण जाहं भलि ते णवि दूर गणन्ति ॥
कमलानि मुक्त्वा अलिकुलानि करिगण्डानि काङ्क्षन्ति ।
असुलभमेष्टुं येषां भलिः ते नापि दूरं गणयन्ति ॥

(येषामसुलभं दुर्लभमेष्टुं भलिः कदाग्रहो भवति ते नापि दूरं गणयन्तीत्यर्थः).

तु किमो डिह ॥ ३ । ४ । २८ ॥ P. 272—

Hemachandra has डिहे for डिह and gives the following instance:—

जइ तहो तुट्टउ नेहडा मइं सहुं नवि तिल–तार ।
तं किहे वङ्केहिं लोअणेहिं जोइज्जउं सय–वार ॥
यदि तव त्रुटितः स्नेहः मया सह नापि तिलतार ।
तत् कस्मात् वक्रैः लोचनैः विलोक्ये शतवारम् ॥

(हे तिलतार तिलवत् स्निग्धा तारा कनीनिका यस्य स तस्य संबोधनम् । यदि तव स्नेहो मया सह नापि त्रुटितः तत् कथमहं त्वया वक्राभ्यां लोचनाभ्यां शतवारं विलोक्ये इत्यर्थः).

ङसः सुशू यत्तत्किंभ्यः ॥ ३ । ४ । २९ ॥ P. 273—

कन्तु महारउ हलि सहिए निच्छइं रूसइ जासु ।
अत्थिहिं सत्थिहिं हत्थिहिंवि ठाउवि फेडइ तासु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीविउ कासु न वल्लहउं धणु पुणु कासु न इट्ठु ।
दोण्णिवि अवसर-निवडिआइं तिण-सम गणइ विसिट्ठु ॥
कान्तः मदीयः हले सखिके निश्चयेन रुष्यति यस्य ।
अस्त्रैः शस्त्रैः हस्तैरपि स्थानमपि स्फोटयति तस्य ॥
जीवितं कस्य न वल्लभं धनं पुनः कस्य न इष्टम् ।
द्वे अपि अवसरनिपतिते तृणसमे गणयति विशिष्टः ॥

(द्वे अपि=जीवितधने).

किं काइंकवणौ ॥ ३ । ३ । ५२ ॥ P. 273—

Hemachandra makes the substitutes optional and has:—

जइ न सु आवइ दूइ घरु काइं अहो-मुहु तुज्झु ।
वयणु जु खण्डइ तउ सहि एसो पिउ होइ न मज्झु ॥
यदि न स आयाति दूति गृहं किं अधोमुखं तव ।
वचनं यः खण्डयति तव सखि एषः प्रियः भवति न मम ॥

(हे दूति स यदि गृहं नागच्छति तर्हि तवाधोमुखं कथम । हे सखि यस्तव वचनं खण्डयति स मम प्रियो न भवतीत्यर्थः).

काइं न दूरे देक्खइ । किं न दूरे पश्यति
फोडन्ति जे हिअडउं अप्पणउं ताहं पराई कवण घण ।
रक्खेज्जहु लोअहो अप्पणा बालहे जाया विसम थण ॥
सुपुरिस कङ्गुहे अणुहरहिं भण कज्जें कवणेण ।
जिवं जिवं वड्डत्तणु लहहिं तिवं तिवं नवहिं सिरेण ॥
स्फोटयन्ति ये हृदयमात्मनः तेषां परकीया किं घृणा ।
रक्षयत लोका आत्मानं बालाया जाताः विषमस्तनाः ॥
सुपुरुषाः कङ्गोः अनुहरन्ते भण कार्येण केन ।
यथा यथा महत्त्वं लभन्ते तथा तथा नमन्ति शिरसा ॥

(सुपुरुषाः कङ्गोर्धान्यस्य अनुहरन्ते सदृशा भवन्ति कथय केन कार्येणोच्यते).

पक्षे—

जइ ससणेही तो मुइअ अह जीवइ निन्नेह ।
बिहिंवि पयारेहिं गइअ धण किं गज्जहि खल मेह ॥
यदि सस्नेहा तर्हि मृता अथ जीवति निःस्नेहा ।
द्वाभ्यां प्रकाराभ्यां गता नायिका किं गर्जसि खल मेघ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(कस्याश्चिद्भर्ता देशान्तरं गतोस्ति स मेघं प्रत्याह । सा स्त्री यदि सस्नेहा भविष्यति तदा मृता भविष्यति मम विरहात् । अथ यदि जीवति तर्हि निःस्नेहा । द्वाभ्यां निःस्नेहसस्नेहप्रकाराभ्यां प्रिया गता तर्हि हे खल मेघ हे दुर्जन किं गर्जसे इत्यर्थः ।).

इदम आअः ॥ ३ । ४ । ३६ ॥ P. 273—

Hemachandra gives आय instead of आअ as a substitute for इदम् and has the following instances:—

आयइं लोअहो लोअणइं जाई सरइं न भन्ति ।
अप्पिए दिट्ठइ मउलिअहिं पिए दिट्ठइ विहसन्ति ॥
सोसउ म सोसउ च्चिअ उअही वडवानलस्स किं तेण ।
जं जलइ जले जलणो आएणवि किं न पज्जत्तं ॥
आयहो दड्ढ–कलेवरहो जं वाहिउ तं सारु ।
जइ उट्ठब्भइ तो कुहइ अह डज्झइ तो छारु ॥
इमानि लोकस्य लोचनानि जातिं स्मरन्ति न भ्रान्तिः ।
अप्रिये दृष्टे मुकुलन्ति प्रिये दृष्टे विहसन्ति ॥
शुष्यतु मा शुष्यतु निश्चयेन उदधिः वडवानलस्य किं तेन ।
यत् ज्वलति जले ज्वलनः अनेनापि किं न पर्याप्तम् ॥
अस्य दग्धकलेवरस्य यद् वाहितं तत् सारम् ।
यदि आच्छाद्यते ततः कुथ्यति अथ दह्यते ततः छारः ॥

(न भ्रान्तिर्न संदेहः । तेन समुद्राशोषणेन समुद्रशोषणेन वा यदिति क्रियाविशेषणम् । तदेव सारं मरणानन्तरमिति शेषः । यदि आच्छाद्यते स्थाप्यते ततः कुथ्यति अथ दह्यते ततः छारो भस्म स्यादित्यर्थः).

यत्तत् ध्रुंत्रुं स्वमोः ॥ ३ । ४ । ३१ ॥ P. 273—

Hemachandra gives ध्रुं and त्रं as substitutes for यत् and तत् and gives the following instance:—

प्रङ्गणि चिट्ठदि नाहु ध्रुं त्रं रणि करदि न भ्रन्त्रि ॥
प्राङ्गणे तिष्ठति नाथः यत् तत् रणे करोति न भ्रान्तिम् ।

(यद्यस्मात् कारणात् नाथः प्राङ्गणे तिष्ठति तदहमेव जानामीति शेषः । नाथो रणे संग्रामे भ्रान्तिं संदेहं न करोतीत्यर्थः).

तं बोल्लिअइ जु निव्वहइ–तत् जल्प्यते यत् निर्वहति ।
तज्जल्प्यते यन्निर्वहतीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेह एहो एहु स्त्रीनृनपि ॥ ३ । ४ । ३३ ॥ P. 273—

एह कुमारी एहो नरु एहु मणोरह-ठाणु ।
एहउं वढ चिन्तताहं पच्छइ होइ विहाणु ॥
एषा कुमारी एष नरः एतत् मनोरथस्थानम् ।
एतत् वढानां चिन्तयतां पश्चात् भवति विभातम् ॥

(वढानां मूर्खाणाम्)

जश्शसोरेइ ॥ ३ । ४ । ३४ ॥ P. 273—

एइ ति घोडा एह थलि ।
एइ पेच्छ ।

दादेडेंहो यादृक्तादृक्कीदृगीदृशाम् ॥ ३ । ३ । ९ ॥ P. 274—

मइं भणिअउ बलिराय तुहुं केहउ मग्गण एहु ।
जेहु तेहु नवि होइ वढ सइं नारायणु एहु ॥
मया भणितः बलिराज त्वं कीदृक् मार्गणः एषः ।
यादृक् तादृक् नापि भवति वढ स्वयं नारायणः ईदृक् ॥

(हे वढ हे मूर्ख or मूढ).

ओइ अदसः ॥ ३ । ४ । ३५ ॥ P. 274—

जइ पुच्छह घर वड्डाइं तो वड्डा घर ओइ ।
विहलिअ-जण-अब्भुद्धरणु कन्तु कुडीरइ जोइ ॥
यदि पृच्छथ गृहाणि बृहन्ति ततो बृहन्ति गृहाणि अमूनि ।
विह्वलितजनाभ्युद्धरणं कान्तं कुटीरके पश्य ॥

(काचित् स्त्री पथिकं प्रत्याह । यदि बृहन्ति गृहाणि पृच्छथ ततो बृहन्त्यमूनि प्रत्यक्षोपलक्ष्यमाणानि वर्तन्ते । पृष्टा चेद् दानाभिलाषीति शेषः । तदा कुटीरके विह्वलितजनाभ्युद्धरणं पीडितजनाभ्युद्धरणं कान्तं पश्येत्यर्थः ।).

स्त्रियां डहे ॥ ३ । ४ । ३० ॥ P. 274—

जहे केरउ । यस्याः संबन्धी ।
तहे केरउ । तस्याः संबन्धी ।
कहे केरउ । कस्याः संबन्धी ।

इदम इमु नपुंसके ॥ ३ । ४ । ३२ ॥ P. 275—

इमु कुलु तुह तणउं । इदं कुलं तव संबन्धि ।
इमु कुलु देक्खु । इदं कुलं पश्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौ युष्मदस्तुहुं ॥ ३ । ४ । ३७ ॥ P. 276—

भमरु म रुणझुणि रण्णडइ सा दिसि जोइ म रोइ ।
सा मालइ देसन्तरिअ जसु तुहुं मरहि विओइ ॥
भ्रमर मा शब्दं कुरु अरण्ये तां दिशं विलोकय मा रुदिहि ।
सा मालती देशान्तरिता यस्याः त्वं म्रियसे वियोगे ॥

तुम्हे तुम्हइं जश्शसोः ॥ ३ । ४ । ३८ ॥ P. 276—

तुम्हे तुम्हइं जाणह । यूयं युष्मान् जानीथ ।
तुम्हे तुम्हइं पेच्छिह । यूयं युष्मान् प्रेक्षध्वम् ।

ङ्यमृटा पइं तइं ॥ ३ । ४ । ४० ॥ P. 276—

Hemachandra has पइं instead of एइं as Inst. Sing., and has:—टा

पइं मुक्काहंवि वर-तरु फिट्टइ पत्तत्तणं न पत्ताणं ।
तुह पुणु छाया जइ होज्ज कहवि ता तेहिं पत्तेहिं ॥
महु हिअउं तइं ताए तंवि अन्नें विनडिज्जइ ।
पिअ काईं करउं हउं काईं तुहुं मच्छें मच्छु गिलिज्जइ ॥
त्वया मुक्तानामपि वरतरो स्फिटति पत्रत्वं न पत्राणाम् ।
तव पुनः छाया यदि भवेत् कथमपि नहिं तैः पत्रैः ॥
मम हृदयं त्वया तया सापि अन्येन विनट्यते ।
प्रिय किं करोमि अहं किं त्वं मत्स्येन मत्स्यः गिल्यते ॥

(तव पुनः छाया कथमपि यदि भवेत् ततस्तर्हि तैः पत्रैरेव नान्यथेत्यर्थः । काचिन्नायिका अन्यासक्तं पतिं वक्ति । हे प्रिय मम हृदयं त्वया गृहीतमिति शेषः । तया त्वं गृहीतः । साप्यन्येन विनट्यते । हे प्रिय अहं किं करोमि त्वं किं करोषि मत्स्येन मत्स्यो गिल्यत इत्यर्थः ।).

ङिना—

पइं मइं बेहिंवि रण-गयहिं को जयसिरि तक्केइ ।
केसहिं लेप्पिणु जम-घरिणि भण सुहु को थक्केइ ॥
त्वयि मयि द्वयोरपि रणगतयोः कः जयश्रियं तर्कयति
केशैः गृहीत्वा यमगृहिणीं भण सुखं कः तिष्ठति ॥

(तर्कयति=अभिलषति ।).

अमा—

पइं मेल्लन्तिहे महु मरणु मइं मेल्लन्तहो तुज्झु ।
सारस जसु जो वेग्गला सोवि कृदन्तहो सज्झु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वां मुञ्चन्त्या मम मरणं मां मुञ्चतस्तव ।
सारसः यस्य यो दूरः सोपि कृतान्तस्य साध्यः ॥

(स्त्री कथयति—त्वां मुञ्चन्त्या मम मरणं मां मुञ्चतस्तव मरणम् । दृष्टान्तः —यथा सारसः पक्षी यस्य यो दूरः सोपि कृतान्तस्य साध्यो भवति-मरणं प्राप्नोतीत्यर्थः).

भिसा तुम्हेहिं ॥ ३ । ४ । ३९ ॥ P. 276—

तुम्हेहिं अम्हेहिं जं किअउं दिट्ठउं बहुअ–जणेण ।
तं तेवड्डउं समर–भरु निज्जिउ एक्क–खणेण ॥
युष्माभिः अस्माभिः यत् कृतं दृष्टं बहुकजनेन ।
तत् तावन्मात्रः समरभरः निर्जितः एकक्षणेन ॥

तुज्झतुध्रतउ ङसिङसा ॥ ३ । ४ । ४१ ॥ P. 27।

तउ गुण संपइ तुज्झ मदि तुध्र अणुत्तर खन्ति ।
जइ उप्पत्ति अन्न जण महि–मंडलि सिक्खन्ति ॥
तव गुणसंपदं तव मतिं तव अनुत्तरां क्षान्तिम् ।
यदि उपेत्य अन्ये जनाः महीमण्डले शिक्षयन्ति ॥

(महीमण्डले अन्ये जना यदि उपेत्य तव पार्श्वे समागत्य तव गुणसंपदं शिक्षयन्ति तव मतिं शिक्षयन्ति तवानुत्तरां क्षान्तिं शिक्षयन्ति तदा वरमिति गम्यते इत्यर्थः).

तुम्हहमाभ्यसभ्याम् ॥ ३ । ४ । ४३ ॥ P. 277—

तुम्हहं होन्तउ आगदो । युष्मत् भवन्नागतः ।
तुम्हहं केरउं धणु । युष्माकं संबन्धि धनम् ।

सुपा तुम्हासु ॥ ३ । ४ । ४२ ॥ P. 277—

तुम्हासु ठिअं–युष्मासु स्थितम् ।

सौ हउं ॥ ३ । ४ । ४५ ॥ P. 277—

तसु हउं कलिजुगि दुल्लहहो—तस्य अहं कलियुगे दुर्लभः ।

अम्हइं अम्हेइं जश्शसोः ॥ ३ । ४ । ४८ ॥ P. 277—

Hemachandra gives अम्हे and अम्हइं and has the following verses:—

अम्हे थोवा रिउ बहुअ कायर एम्व भणन्ति ।
मुद्धि निहालहि गयण–यलु कइ जण जोण्ह करन्ति ॥
अम्बणु लाइवि जे गया पहिअ पराया केवि ।
अवस न सुअहिं सुहच्छिअहिं जिवँ अम्हइं तिवँ तेवि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वयं स्तोकाः रिपवः बहुकाः कातराः एवं भणन्ति ।
मुग्धे निभालय गगनतलं कति जनाः ज्योत्स्नां कुर्वन्ति ॥
आम्लत्वं लागयित्वा ये गताः पथिकाः परकीयाः केपि ।
अवश्यं न स्वपन्ति सुखासिकायां यथा वयं तथा तेपि ॥

(कतिजनाः ज्योत्स्नां कुर्वन्ति एकश्चन्द्र एवेत्यर्थः । ये केपि परकीयाः पथिकाः आम्लत्वं स्नेहं लागयित्वा गताः तेपि अवश्यं निश्चितं सुखासिकायां न स्वपन्ति तथा वयं तथा तेपीत्यर्थः ।).

अम्हे देक्खइ । } वयं पश्यामः ।
अम्हइं देक्खइ । }

मई ङ्यम्टा ॥ ३ । ४ । ४६ ॥ P. 277—

टा—

मइ जाणिउं पिअ विरहिअहं कवि धर होइ विआलि ।
णवर मिअङ्कुवि तिह तवइ जिह दिणयरु खय-गालि ॥
